कल्हणकृता

राजतरङ्गिणी

Rājataraṅgiṇī

OF

KALHANA

प्रथमो भागः (तरङ्गाः १–७)

PART I

(Taraṅga-s I—VII)

विश्वेश्वरानन्द - वैदिक शोध - संस्थानम्
होशिआरपुर
VISHVESHVARANAND VEDIC RESEARCH INSTITUTE
HOSHIARPUR

The *Rajataraṅgiṇī* of the 12th century poet, Kalhaṇa, chronicling the reigns of the kings of Kashmir from c 2448 B.C. to 1148 A.D., together with its three supplements by Jonarāja, Śrīvara and Śuka, who continued the narrative down to 1586 A.D., forms the most important historical work in the Sanskrit language ; Besides being a work of genuine history and brilliant poetry, it is a mine of information on a variety of subjects like religion, philosophy, sociology, geography, arts and crafts of ancient and medieval India and, as such, is one of the foremost works of reference in Sanskrit literature.

Price : Rs. 35-00

वु. भाभा. ग्रन्थमाला—५

7869/A

कल्हणकृता

राजतरङ्गिणी

सा च

पाठविमर्शौपयिकेन पाठभेदादिटिप्पणेन संयोजिता सती

भीमदेवः, के. एस्. रामस्वामिशास्त्री, एस्. भास्करन् नायर्

इत्येतैः सहकृतेन

विश्वबन्धुना

संपादिता

तत्र चाऽयम् १–७ तरङ्गात्मकः

१मो भागः

होश्यारपुरम्

विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्

विश्वेश्वरानन्द-वैदिकशोध-संस्थान-प्रकाशनम्—२७३
V. V. Research Institute Publication—273

वुल्नर-भारतभारती-ग्रन्थमाला—५
Woolner Indological Series—5

V BOOK AGENCY
Revised Price (INR)
Rs. 42.00

संपादकः — विश्वबन्धुः
Editor — VISHVA BANDHU

Rs-168/n
1-4/st
Each Part
Rs 42/n

7869 A

W. I. Series—5

RĀJATARAṄGIṆĪ
OF
KALHAṆA

Edited,

Critically, and annotated with text-comparative data from original manuscripts and other available materials

By

VISHVA BANDHU

In collaboration with

BHIMA DEV, K. S. RAMASWAMI SASTRI
and
S. BHASKARAN NAIR

PART I

(Taraṅgas I—VII)

HOSHIARPUR
Vishveshvaranand Vedic Research Institute

सर्वेऽधिकाराः सुरक्षिताः

प्रथमं संस्करणम्, २०२० वि०
प्रकाशकृत्—विश्वेश्वरानन्द-वैदिकशोध-संस्थानम्
साधु-आश्रमः (प. गृ.), होश्यारपुरम् (पं., भारतम्)।

All Rights Reserved

FIRST EDITION, 1963

Publishers :
Vishveshvaranand Vedic Research Institute,
Sadhu Ashram (P.O.), Hoshiarpur (Pb., India)

भारतप्रशासनीय-शिक्षामन्त्रालयकृतेन
व्ययार्द्धपरिमित-वित्तानुदानेन प्रकाशनम् अकारि।
Published with 50 percent Financial Assistance received from the Ministry of Education, Government of India

भारते होश्यारपुरे **वि. वै. शो. सं.** मुद्राग्रहे।
शास्त्रिणा देवदत्तेन मुद्राप्येदं प्रकाश्यते॥
Printed and Published by **DEV DATTA SHASTRI**
at the **V. V. R. I. Press, Hoshiarpur, (Pb., India)**

7869/11

The Late Rai Bahadur Lala
Ishwar Das Sawhney
(1882-1956)

7869/A

RĀJATARAṄGIṆĪ

Being

A Chronicle of the Kings of Kashmir

By

Kalhaṇa, Jonarāja, Śrivara and Suka

(*c.* 2448 B.C.—1586 A.D.)

29(A)

Rai Bahadur Lala
Ishwar Das Sawhney
Memorial Edition

Vishveshvaranand Vedic Research Institute
HOSHIARPUR

RAI BAHADUR LALA ISHWAR DAS SAWHNEY

Some Glimpses of his Life and Work

Situated, at a distance of about three miles, to the South-East of Abbotabad, the headquarters of the Hazara District in the North Western Frontier Province of pre-independence British India, the village Nawanshahar was well-known for its natural springs of crystal-clear water, which had made it a popular health resort. This place had also an association with Maharaja Ranjit Singh's great General, Hari Singh Nalwa who, while once returning from Kashmir via Muzzafarabad, with a State treasury under his custody, encamped here for a few months. It was in course of this trip of his that, when attacked by the wild tribesmen of the area, he drove them back and made a short shrift of them with such ferociousness that, thereafter, even the mere pronunciation of his name continued, for long, to strike the worst terror in the hearts of the people there.

Born in 1860 at Nawanshahar and a scion of Sawhney family, being a constituent of the 7 member Khukhrain Khatri community of further North-Western origin, Rai Bahadur Lala Tirath Ram Shah was a very successful businessman and leading financier of that district and was famous for his philanthropic liberality.

Ishwar Das, the eldest son of Rai Bahadur Lala Tirath Ram Shah was born on June 14, 1882 at Nawanshahar. He was favoured by nature with a fine personality, good health and sharp intellect. He soon developed winning manners and was always most respectful towards his parents as well as other elders. He inherited from his father his rich share of the loving qualities of sympathy and philanthropy with which nature had endowed

the former. After having had his schooling at Nawanshahar, he matriculated, in 1899 from Albert Victor Arya High School, Abbotabad, standing first in the district. He had his University education at Lahore where he passed his B.A. and M.A. examinations in 1903 and 1905, respectively, from the Govt. College and thereafter, took his LL. B. degree in 1907. Before starting the lawyer's career at Abbotabad, early in 1908, he worked, purely in an honorary capacity, as the Headmaster at his *Alma Mater* there and won a great name as a very good teacher of English. During his educational career, he had drunk deep at the fountain of knowledge and was particularly well-versed in Sanskrit, science and history. Even when, later on, when his life-activities lay, entirely outside the field of education, he kept up his scholarly interest, specially in the said subjects, right up to the last.

R. B. Lala Tirath Ram Shah did not very much like that his son should practise law and would rather have preferred that he should assist him in his business. But he allowed him to adopt the lawyer's career in view of his strong aptitude for a learned profession. His said career, however, was not to be a long one. He was temperamently averse to certain objectionable and even ignoble practices to which those in that profession, particularly, the new entrants had often to stoop in order to get cases and to win the same. So, he was soon fed up with that work and, after having worked, for a year or so, as a trainee, with a forest contractor who was a friend of his father, he started his own business in that line. He achieved great success as a forest-lessee and continued his extensive business as such till about 1955.

While still carrying on his extensive forest business, he gradually started taking great interest in founding and promoting a number of sugar concerns, including 1. The Punjab Sugar Mills at Ghughali, in 1920, 2. Basti Sugar

Mills at Basti in 1926, 3. Ramkola Sugar Mills at Ramkola, in 1928, 4. Walterganj Sugar Mills at Walterganj, in 1930, 5. Ganga Sugar Corporation at Deoband, in 1933, 6. Mahalakshami Sugar Mills at Hamira, in 1940, 7. The Premier Sugar Mills and Distillery at Madras, in 1944 and 8. Upper India Sugar Mills at Khatauli, in 1952. In the year 1940-41, he got controlling interest in the Lakshmi Insurance Company Ltd. and became its Chairman which office he held up till January, 1956 when life insurance business was nationalised.

In the midst of his above-mentioned extensive business activities, entailing heavy work and requiring full time and attention, he managed to discharge, most creditably, his public duties as an honorary Additional District Magistrate in the Hazara District for a period of about 15 years from 1924 or so upto 1938 when this institution was abolished by the pre-Independence Congress Government which had been first set up at that time. His impartial approach, honesty of purpose and great legal acumen inspired all the communities, namely, the Muslims, the Hindus and the Sikhs, with great confidence in him with the result that they would always like their cases being tried by him rather than by the stipendiary Magistrates and Sub-Judges. The Government recognised this highly meritorious service of his by making him a Rai Bahadur and nominating him to the Provincial Legislative Council, in the early thirties. Later on, in 1937, when Provincial Legislative Assembly was constituted, he was elected to the same. He was a nationalist to the core of his heart and, as such, always supported the cause of the public and the country notwithstanding the pressure which the then foreign Government usually exerted in the contrary direction. He always made a valuable contribution to the deliberations of the Assembly, particularly, with regard to matters connected with the Industrial development of the Province and its finances.

A shining jewel as he was among his own people

of the Khukhrain community, the latter, naturally, were very proud of him and held him in high esteem. He, likewise, was always keen on serving them, in every possible manner. With a view to introduce among them certain social reforms, specially, in respect of a number of undesirable customs involving huge expense on occasions of marriages, various other ceremonies and deaths, he called a conference of the community, at the district level, in 1921, in which his several proposals, requiring discontinuance of the said bad customs and unnecessary expenditure, were duly considered and then, agreed upon. Thereafter, the community continued to follow, till the partition of the country in 1947, all the reformatory rules, laid down on that occasion and this was, certainly, to its great benefit. In this matter, he himself set an example to others by rigidly following the said rules even though in view of his very high social status, it often meant a great strain for him.

During 1920-21 and, again, during the second world-war, the whole of the Hazara District was in the grip of famine conditions. On both these occasions, it was his benevolent munificence that came to the rescue of all and sundry. Cheap grain shops were set up in this behalf and adequate supply of cereals was got arranged, through Governmental agency, from various parts of the country including the far-off Assam. In general also, the continuous flow of his generous charities on all occasions towards providing necessary relief to widows and orphans as well as to the needy, the sick, the blind and the crippled used to be enormous, but he always shunned any publicity on this account. At his native place, Nawanshahar, he set up a charitable dispensary and a girls' school for the benefit of the people living there as well as in the surrounding villages. In 1954, he created a Trust, for the purpose of establishing, at Delhi, the Tirath Ram Shah Charitable Hospital and Nursing Home, in the sacred memory of his revered father. During the year 1940-42, he donated large

sum towards the construction of Nurses' Block at the Mayo Hospital, Lahore.

Following, as he did, the ideals of Hinduism in their real values, he held liberal views in social and religious matters and, in general, respected all religions. In particular, even though, not formally connected with Arya Samaj, he had great regard for its selfless and devoted leaders and liberally helped their educational and cultural institutions like the D. A. V. College, Lahore and Dayanand Salvation Mission, Hoshiarpur and his own above-mentioned *Alma Mater*, the A. V. Arya School, Abbotabad, of which he also functioned as the President for about 15 years preceding the Partition. During the years after his having settled down at Dehra Dun, in 1950, he took great interest in the affairs of the local Mahadevi Arya School which, mainly, through his generous help developed into a full-fledged degree college.

Personally speaking, I had the privilege of knowing him since early twenties, when I started my carreer, at Lahore, as the Founder Principal of Dayānand Brahma Mahā Vidyālaya and, also, as the Founder Director of Vishveshvaranand Vedic Research Institute, in the work-programmes of both of which he felt much interested. Our first personal meeting, however, took place, a little later, when I called on him at his camp on the right bank of the sacred Ganges, at Hardwar, at the time of the 12-yearly Kumbha Pilgrimage of 1927-28. I remained with him for about an hour during which we discussed several things of common interest, including some passages of *Bhagavad-Gītā*. That very first meeting brought both of us closer to each other and, thereafter, I could always draw upon his love and affection as he was like an elder brother to me. Our V.V.R.I. Society was registered in 1936, under Act XXI of 1860, and he became a life Member of it in 1938. He was elected a member of its Executive Board and this office he

continued to hold till he passed away on October 31, 1956 at Dehra Dun.

Here are a few extracts of some of the letters, received from him during the last nine years of his life, which might give a vivid idea of his great and sustained interest in the Institute :—

1. "It is a great relief to learn that you have been able to save the valuable records of the Institute from the vandals who, if they could have had an access to it, would have destroyed everything with a vengeance. God be thanked for this mercy : I should have, however, thought that you would move the Institute to some place in U.P. where it would have been safe."

Hamira
Dated January 30, 1948.

2. "It is something that you have brought out from Pakistan the records of your Institution otherwise much useful work, which had been done with tremendous labour and at considerable expense, would have been lost. I quite realise your financial stringency. The more so, because the people on whom you depended for help in your noble work, have been seriously crippled by the happenings of the last year in West Punjab. However as your cause is noble, God the Almighty will help you."

Hamira
Dated November 23, 1948

3. "I am sorry I shall be in Peshawar on the dates mentioned by you otherwise I would have tried to find time to run upto Hoshiarpur to see you."

Hamira
Dated April 3, 1949.

4. "I am sorry I was not in Hamira when you last called

here. But if you give me the pleasure of your company on about the 16 February, 1950 I shall be much obliged."

Hamira
Dated January 22, 1950.

5. "I am much obliged for your letter dated the 17th instant and the present of the book which you have very kindly sent me. I am greatly obliged to you for this kind present. I wish I could finance your Society for distributing 500 copies of this book in different parts of India. Circumstances have changed considerably and, hence, I can agree to your sending only 100 copies to the deserving libraries, at my cost."

Dehra Dun
Dated July 20, 1950.

6. "It always gives me great pleasure to meet you and enjoy your company but though the spirit is willing flesh is weak. It is, of course, 40 miles from here to Hoshiarpur but whenever I return from tour, I feel so tired that no desire is left to move out of the house."

Hamira
Dated March 7, 1951.

7. "It is extremely kind of you to ask me to be present on the occasion of the "Priti Bhojan" on the 4th of November and preside over the function. Dear Shastri Ji, I am now in my 75th year and do no more travelling than is absolutely necessary. I shall however keep your invitation in my mind, and if I can conveniently come to Hoshiarpur, I shall do so sometime in November or December even though I may not be able to be present at the "Priti Bhojan."

Solan
Dated September 27, 1956.

During the quarter immediately preceding his sad and

sudden demise at the end of October, 1956, he seems to have left a strong desire to study the famous Sanskrit classic, *Rājataraṅgiṇī* being a chronicle of the Kings of Kashmir. Thus, his letter, dated August 27, 1956 from Solan, which spoke for itself on the subject ran as follows : "I shall be obliged if you kindly let me know from where I can secure a copy of Rajatarangini (English Translation). If no translation in English exists, then, from where I can get it in the Sanskrit text". On receipt of this letter, I informed him that the extant text of *Rājataraṅgiṇī* consisted of four parts, all of which our Institute had already undertaken to bring out in the form of a Critical Edition based on original manuscripts as well as earlier editions and that, out of the two published English translations of only the first part, by M.A. Stein and R.S. Pandit, the latter, being of more literary than scholastic nature, should suit his need all right. As he liked this suggestion, various book-sellers in the country as well as abroad were contacted towards purchasing a copy of R. S. Pandit's translation of *Rājataraṅgiṇī*. But none of them could supply it. However, when I informed him on 12th October 1956 that the book was not available in the market but could be had, on loan, from a particular library which happened to possess a copy of the same, he was overjoyed to get this positive information and wrote to me on 18th October, 1956 that the said loan might be arranged and the book, which he would return after going through it, should be sent to Dehra Dun as he would be leaving Solan for Dehra Dun on the 26th instant. No time was lost in securing the said loan, but alas, by the time the book reached dear Rai Bahadur's residence at Dehra Dun, his sojourn on this earth had already reached its end ! What a pity that his last desire to go through *Rājataraṅgiṇī* remained, unfulfilled, in his bosom. What a sad commentary on human proposals and divine disposals !

It was against this pathetic background that our

Institute decided to issue the above-mentioned Critical Edition of *Rājataraṅgiṇī* alongwith its Hindi and English translations, which the Institute had already undertaken to bring out at a total cost of Rs. 1.20 lakhs, as a befitting memorial to the late dear Rai Bahadur Lala Ishwar Das Sawhney, being an abiding symbol of its high appreciation of his long, intimate and ever-helpful association with it. When this decision of the Institute was conveyed to dear Lala Puran Chand Sawhney and dear Lala Devi Chand Sawhney, both of them like worthy sons of a worthy father, wholeheartedly associated themselves with the same and, also, agreed to make a substantial contribution to the said cost of this project. They have already remitted the sum of Rs. 30,000 in this behalf and, thereby, earned my hearty blessings and the Institute's sincere thanks. I am confident that both of them will feel geniune pleasure in extending further help to the Institute towards facilitating early consummation of this project as a whole. In this connection it may be indicated here that while the above-mentioned Critical Edition of the original Sanskrit text of *Rājataraṅgiṇī* has already been completed and issued in Volumes I-IV, it now remains to complete and publish the Hindi and the English Translations of this great classic and also, a separate Volume of social and cultural studies, based on the same.

May the sacred memory of the late dear Rai Bahadur Ji remain evergreen through his children, unto whom may it be given dutifully to tread in his foot-steps and, through their pious deeds, to add further lustre to his illustrious name !

VISHVA BANDHU

समर्पणम्

ओं धी-धाम-प्रचेतिन्यै शब्द-ब्रह्म-स्वयम्भुवे ।
भगवत्यै सरस्वत्यै भूयो भूयो नमो नमः ॥ १ ॥

ज्ञान-विज्ञान-जीवन्ती सारिणी भयवारिणी ।
शरणं मे परं भूयाद् मतिमाता सरस्वती ॥ २ ॥

विद्याम्बुधिः क्व गम्भीरः क्वाऽयं हीनप्लवो जनः ।
तरङ्गोत्तोलितस्य स्याः सहाया देवि मे सदा ॥ ३ ॥

तव प्रवाहं प्रततं प्रवेगं शक्तोऽवगाढुं भवति स्वतः कः ।
प्रसादये तत् करुणावति त्वां निष्णापयेर्मां तव हस्तधारम् ॥ ४ ॥

तव प्रसादः खलु देवमातः सौजन्यसौशील्यसुधासुधावैः ।
पापप्रमुक्तानथ पुण्ययुक्ताञ् शुद्धाञ् पवित्रान् निपुणांस्तनोति ॥ ५ ॥

तव प्रभावान्ननु मानवानां तिर्यक्त्व-मोक्षो मनुताविकासः ।
सद्बुद्धियोगः सुगतेः प्रकाशश्चारित्र्यशुद्धिः सुमतेर्विलासः ॥ ६

त्वमेव शास्त्री भवसीह गुर्वी सद्देशनानां जगतां गुरूणाम् ।
तीर्थङ्करणां श्रुतिपाठकानां योगेश्वराणां भगवद्व्रतानाम् ॥ ७

त्वदेक-निष्ठस्य नु यत्न एष त्वद्-भक्ति-रक्तेर्मम विश्वबन्धोः ।
संसारसर्वस्वविधानसारे स्यात् प्रीतये ते निगमागमेशे ॥ ८ ॥

त्वदीया प्रेरणा बीजं त्वत्-प्रसादः प्रवर्त्तकः ।
पुष्प-पत्र-निभं देवि भवेदेतत् तवाऽर्पितम् ॥ ९ ॥

सत्यमात्रावलोकानां सत्यसारं च संगिराम् ।
सर्वत्र सर्वदा चैव त्वद्-भक्तानां तथाऽर्पितम् ॥ १० ॥

विश्वबन्धुः

Dedicated

TO

SARASVATĪ

The Divine Spirit of ever-progressive march of the ever-unfathomable and ever-unfordable, eternal stream of knowledge

AND

Her sincere devotees of all times and all climes.

VISHVA BANDHU

PREFACE

The importance of Itihāsa and Purāṇa as a kind of literature embodying collections of heroic, cosmogonic and genealogical legends of yore was well recognised even in the hoary age of the Vedic texts from the *Atharvaveda* downwards. The *Ṛgveda* itself contains a number of hymns which easily lent themselves to their legendary interpretations as proposed by the *Aitihāsika*-s and, in some cases, as accepted even by the *Nairukta*, Yāska and the *Vaiyākaraṇa*, Pāṇini themselves. But eulogized as this literature was to the extent of being designated as a *Veda* by itself, it seems to have remained, generally, an admixture of history and mythology.

This brings out in bold relief the great importance of the Kashmirian poet, Kalhaṇa's 12th century classic production, namely, *Rājataraṅgiṇī*, being a genuine historical work, chronicling the reigns of the Kings of Kashmir from *c* 2448 B.C. to 1148 A. D. The three other writers, namely, Jonarāja, Śrīvara and Śuka, who followed Kalhaṇa, further continued his chronicle, bringing it down to the annexation of Kashmir by the great Mughal Emperor, Akbar in 1586 A. D.

The Royal Asiatic Society of Bengal published from Calcutta in 1835 an edition of the entire quadripartite *Rājataraṅgiṇī*. It was based on a single Devanāgarī transcript, very faulty and carelessly prepared from its Śāradā original. There were numerous *lacunae* in the transcript which were filled up by the editing Pandits themselves, making the production very unreliable. The French scholar, A. Troyer, the then Principal of the Government Sanskrit College, Calcutta closely studied that edition and was able to check up the misprints in Kalhaṇa's *Taraṅga*-s I–VI only and publish the same afresh in 1840 from Paris under the auspices of the Société Asiatique, Beyond removing the

said misprints, Troyer, in the absence of new manuscript material, could not improve the text in any other way. Durgāprasāda, who had been Senior Pandit in the Oriental College of the Panjab University at Lahore, prepared his edition of Kalhaṇa's *Rājataraṅgiṇī* in *Taraṅga*-s I–VIII from three modern Devanāgarī manuscripts of the work, belonging to the Bombay Government Collection. This edition in two volumes was published, posthumously, on behalf of the Government of Bombay, by P. Peterson in the Bombay Sanskrit Series (Volumes XLV and LI) during the years 1892–94. Even though this edition could not fully satisfy the requirements of modern critical text-editing, it was, positively, very much superior to the aforesaid previous two editions and the erudite editor's critical acumen stood him in very good stead when he was engaged in preparing it, most carefully. He succeeded in clearing many ambiguous readings and suggesting a number of emendations wherever he found the basic manuscripts defective and unintelligible. The famous geographical explorer, M. A. Stein, who, too had been contemporaneously connected with the aforesaid college at Lahore as its Principal and, likewise, engaged on his study of Kalhaṇa's *Rājataraṅgiṇī*, brought out his edition of that work in *Taraṅga*-s I–VIII in 1892. He spared no pains in producing a standard critical edition, but there still remained good many *lacunae* along with unsettled and ambiguous readings. Therefore, he further continued with great perseverance and at considerable personal sacrifice his study of this work, making several tours of Kashmir to acquaint himself, first-hand, with its topography as well as to delve still deeper into the related manuscript materials as then available. These immense and selfless labours of his duly fructified in 1900 with the publication of his English translation of the said work, with copious text-critical and exegetical footnotes. Herein he could fully utilize Durgāprasāda's aforesaid edition from which he candidly adopted, with acknowledgement, a number of emendations as well as suggestions and, also, make due use of a new manuscript, being described as

SL under B in the sequal, which came out to be his most important find, even though made by pure chance. But while Durgāprasāda's work on Kalhaṇa's *Rājataraṅgiṇī* got complemented, in a way, through the addition to its two volumes of a third volume consisting of the aforesaid three later *Rājataraṅgiṇī* texts which P. Peterson prepared from related manuscripts and published in the Bombay Sanskrit Series as its Volume LIV, it is a pity that, unfortunately for this work, Stein did not extend his activity any further in this direction.

Useful in their own way as all the abovementioned editions of *Rājataraṅgiṇī*, particularly those of Durgāprasāda and Stein were, there still remained some *lacunae* as well as numerous unsettled and ambiguous readings which indicated the need of further work towards the production of a revised critical edition of that historical classic. Moreover, as all the said earlier editions had since long gone out of print and become extremely rare, it became a desideratum worthy of being fulfilled without further delay. Our Institute, accordingly, undertook in 1957 to prepare and publish a revised critical edition of all the aforesaid four *Rājataraṅgiṇī* texts, giving Kalhaṇa's eight *Taraṅga*-s in its first two volumes, all the other three texts in its third volume and a general cultural, historical and geographical study based on all the four texts in its fourth volume. The present volume is the result of the work that has since been done in this direction. The second volume has also been almost done and is following on its heels. The remaining two volumes are expected to get ready for being issued during the next year[1].

For the purposes of the present revised critical edition of Kalhaṇa's *Rājataraṅgiṇī* text in *Taraṅga*-s I-VIII, eleven original manuscripts and one transcript have been fully utilized besides the aforesaid four previous editions as well

1. The somewhat misimpressed but otherwise quite good photostat reproduction of Stein's Edition issued by Munshiram Manoharlal, Delhi in 1960 and the similar but better reproduction of his Translation issued by Motilal Banarsidas, Delhi in 1961 should of course now serve their own purpose in respect of Kalhaṇa's text.

as the nine basic manuscripts of Stein's edition in so far as descriptively recorded by him there and, also, as further reported by him in his Translation. In determining the text, his most valuable contribution in the form of text-critical and exegetical notes embodied in his translation volume has also been thoroughly considered and made use of.

The lines on which our work on the present edition of Kalhaṇa's *Rājataraṅgiṇī* has proceeded may be indicated as under :—

1. The basic text has been copied out from Durgā-prasāda's edition and collated, letter by letter, with all other readings, whether in manuscript or in print.
2. Our manuscript materials have not been susceptible to recensional or versional grouping based upon area-wise variation in the text as has generally been the case with the manuscripts pertaining to the comparatively more popular types of literature like the Epics and the Purāṇa-s and, possibly, in much earlier days, the Veda-s, the Brāhmaṇa-s and the Sūtra-s,
3. Barring the obviously spurious and, therefore, useless variant readings, all others as available from the previous editions as well as the manuscripts collected by us or Stein have been noted in the Critical Apparatus, Pāda-wise, for each verse.
4. Where the manuscript readings, although correct in grammar and metre, were inconsistent with the context, our own suggestions alongwith those indicated in the aforesaid earlier editions have been given in the footnotes.
5. In about a score of cases where we happened to be firmly convinced, on the basis of grammar, metre and context, of the correctness of our proposed emendations, the same have been embodied in the text itself and indicated as such in the footnotes while recording therein the original readings from

the manuscripts alongwith the suggestions made by the previous editors.

6. Where the available manuscript readings could not fit in with the context but, still, neither the previous editors had been able to suggest any emendations nor were we in a position to hazard any suggestions in this behalf, the word or words in question have been marked off in all these cases by a wavy line placed under them.

7. All words of geographical and historical importance being proper names of places, persons or tribes, often determined with the help of the glosses made by the Kashmirian Pandits in the codex prepared by Rājānaka Ratnakaṇṭha (1648-1681 A. D.) and since recorded by Stein, have been got printed in distinctively thin-set types.

8. Kalhaṇa like some other Kashmirian poets like Maṅkha and Bilhaṇa has made use of quite a few local dialectic words like *arari*, *tamori*, *potāsa* and *rora* which have been properly noticed in the footnotes with a view to determine their significance.

9. Usage of word-forms not conforming to the Pāṇinian grammar has been retained as such on account of its linguistic interest. Where, among these cases, previous editors have sought to change a word-form to make it conform to the Pāṇinian grammar, we have retained the same and tried to justify it on other grounds outside the Pāṇinian enunciation (Vide, *e. g. Taraṅga* VII, *v.* 560).

10. In our footnotes, we have also occasionally joined issue with the previous editors in the interpretation of certain texts (Vide, *e. g. Taraṅga* VII, *vv.* 804 and 1356).

11. Additional verses found in our manuscripts have been given in the footnotes except one, to wit, *Taraṅga* VII, *v.* 1150 which has been included in

the text and had been accepted as genuine by Stein also in his translation.

12. While all the previous editions abounded in *lacunae* of individual words as well as verse-halves, the present edition has fortunately been able to trace out the missing links in question and fill in all these *lacunae* except one in *Taraṅga* VII, *v.* 302*cd*.

13. Where in the previous editions *lacunae* had been wrongly located being a result of misconstruction and consequent misnumbering of the preceding verses, the filling-in has been effected at the right place and the entire verse-enumeration corrected, accordingly ((Vide, *e. g. Taraṅga* IV, *v.* 420 corresponding to *Taraṅga* IV, *v.* 423 in Stein's edition).

14. The text as now determined in this edition substantially differs from the same as presented in its own way by each of the previous editions (Vide, *e. g. Taraṅga* I, *v.* 172 *b* ; *Taraṅga* II, *v.* 40 *d* ; *Taraṅga* III, *v.* 61 *d* and *Taraṅga* IV, *v.* 90 *a*). Roughly, it can be said that this edition differs to the extent of 25% from Durgāprasāda's and 30% from Stein's editions and to the extent of 5% from both of them, agreeing, strangely enough, in 1% of the latter cases with the aforesaid earliest Calcutta edition. For detailed information in this matter a Chart of Divergences from Durgāprasāda's and Stein's editions is being given at the end of the Volume II, embodying the *Taraṅga* VIII.

15. Of all the manuscript data available for this edition, those pertaining to P_3, as per its description in the sequel, have helped us the most in the matter of filling-in of the *lacunae* as well as of determination of the text.

It is my most cherished privilege to express on this occasion, on behalf of the Management of our Institute and on my own behalf our deepest gratitude to all our patrons

and friends, particularly, to those whose names are recorded in the Commemorative Script in page iv of the title of this volume in appreciation of their valuable financial assistance towards our project of critical editing and publication of *Rājataraṅgiṇī*.

It is also my most pleasant duty to record here my great appreciation of the devoted co-operation that I have always depended upon and fully received in the accomplishment of this work from all my colleagues in the D. A.-V. College and the Panjab University Sections of the Mahātmā Hans Raj Manuscript Research Department, the Publication Department and the Printing Department of our Institute. I am glad to make a special mention here of the names of Sarvaśrī (1) Bhīm Dev, (2) K. S. Ramaswāmi Sāstrī, (3) S. Bhāskaran Nair, (4) Pītāmbar Datt, (5) Pītāmbar Nārāyan, (6) Shambhu Nāth, (7) Ṭhākur Datt Joshi, (8) Krishna Lal, (9) Shrīvatsa, (10) Duni Chand, (11) Arjun Dev, (12) Yashodā Nandan and (13) Deep Narāyan being the scholars who have mainly assisted in the editorial and the press processing of this work. The title-page also of this volume duly mentions the names of the first three of these scholars for their having rendered, with ability and patience, special assistance in the editing of this volume.

And, finally, our hearty thanks are due to the India Office Library, London ; the Bhandarkar Oriental Research Institute, Poona ; the Sarasvati Bhavan Library, Sanskrit University, Varanasi and the Research and Publication Department, Srinagar for having lent to us their related manuscripts and the D. A.-V. College, Jullundur and the Archaeological Department, New Delhi for having lent to us their copies of the previously printed *Rājataraṅgiṇī* for use in the present edition of that work.

V. V. R. INSTITUTE, VISHVA BANDHU
Sadhu Ashram, Hoshiarpur,
Gobindsingh Day (Dec. 23), 1963.

BASIC MANUSCRIPT MATERIALS

The basic manuscript materials drawn upon in the preparation of this edition of Kalhaṇa's *Rājataraṅgiṇī* fall under two heads, A and B; the former comprising the 12 manuscripts secured for this purpose by the V.V.R. Institute itself and the latter the 9 manuscripts which Stein had been able to secure but of which he could use 8 only in his edition of the said work as the ninth one, even though superior to his all other Mss. had come to his hand, afterwards, when he was translating it. A detailed account of all these manuscripts is given below, first, of those falling under the head A and, then, of those falling under the head, B. For obvious reasons, the latter account is based upon what Stein had reported in this behalf, first, in the short preface to his Edition and, later on, in the Introduction to his Translation.

A

1. I_1=India Office Library, London, Catalogue No. E3969-3970 : Ms. No. 664 a-b ; contains the *Taraṅga*-s I, II, IV, V and VI only and, also, gives at the end of the *Taraṅga* VI Indices of kings for each *Taraṅga*, separately ; folios, 79 ; size, 11½″×9″; generally, 19 lines to a page ; 22 to 26 letters per line ; Indian hand-made paper ; Devanāgarī script written in a peculiarly laboured manner ; general condition good ; readings fairly correct and legible; *Śloka-s*, regularly numbered ; colophon and verse-ends marked by *daṇḍa-s* in red ink ; begins with the invocations ॥ ओं श्रीगणेशाय नमः ॥ ओं श्रीकृष्णाय नमः ॥ and ends with the following verse, indicating the name of the scribe and the date of transcription :

बालगोविन्दमिश्रेण वेदतर्काष्टभूयुते (*i.e.* Sam. 1864=1806/7 A.D.) ।
वर्षे राजतरङ्गिण्याः सूचीपत्रं विनिर्मितम् ॥

2. I_2=India Office Library, London, Catalogue No.

3980 : Ms. No. 2848 ; undated original Ms. ; *Taraṅga-s* I, II, IV, V and VI only ; folios, 166 ; contains two works, namely, Kalhaṇa's *Rājataraṅgiṇī*, folios 1-78 and Śrīvara Paṇḍita's *Nṛpāvali*, being another name for *Rājataraṅgiṇī* folios 79-166 ; size, 29″×13″; lines 8 in each page and 60 letters in each line ; condition good and generally correct ; Devanāgarī script written in old hand-made paper ; begins with ॥ श्रीमते रामानुजाय नमः ॥ and ends with the following verse :

अत्र वर्षचतुःषष्टौ मासेऽप्यर्धे दिनेषु च ।
अष्टस्वभूवन्भूपाला दश भूभोगभागिनः ॥

3. I_3=India office Library, London, Catalogue No. 3967 : Ms. No. 3017 ; undated original Ms.; complete in 8 *Taraṅga-s* ; folios, 718 ; Size, 10″×6½″ ; 16 lines to a page and 12 letters per line ; Indian hand-made paper ; old Devanāgarī script, written in a legible manner ; condition good and readings satisfactorily correct ; *Śloka*-s irregularly numbered, *parasavarṇa*-s, occasionally used, colophon and verse-ends marked by *daṇḍa*-s in red ink, *anusvāra* always used in place of consonant *m* ; begins with ओं स्वस्ति श्रीगणेशाय नमः and ends with ॥ इति श्री काश्मीरिकमहामात्यचण्पकप्रभुसूनो कल्हणस्य कवेः कृतौ राजतरंगिण्यां अष्टमस्तरंगः समाप्तः ॥ समाप्ताश्चायं राजतरंगिन्यां ॥ शुभमस्तु ॥

4. I_4=India Office Library, London, Catalogue No. 3975 : Ms. No. 1146a ; undated original Ms. ; contains first Six *Taraṅga*-s only ; folios of each *Taraṅga* separately numbered *i.e.* I 1—20, II 1—12, III 1—35, IV 1—38, V 1—32, VI 1—20, altogether, making 157 ; size, 9″×5″; 10 lines to a page ; 30 letters in each line ; 2 folios of the first *Taraṅga* missing ; Devanagarī script, written in hand-made paper ; condition good ; readings correct ; begins with ओं स्वस्ति ॥ and ends with राजानः १४, आदितः ९० ग्रन्थाणि ३६८ आदितः २६२८ इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः कल्हणस्य कृतौ राजतङ्गिण्यां षष्ठस्तरंगः ६ अत्र वर्षचतुःषष्टो मासेप्यर्धे दिनेषु च अष्टस्वभूवे भूपाला दश भूभोगभागिनः ॥ शुभं ॥

5. I_5=India Office Library, London, Catalogue No. 3978 : Ms. No. 1146 d; undated paper Ms.; contains only 8 folios, *i. e.* the first 118 verses of *Taraṅga* VII ; Size, 9″×5″; 10 lines on each page and 30 letters in each line; Devanāgarī script; general condition good; readings fairly correct and legible; begins with श्री गणेशाय नमः । ओं मातुस्तेज° and ends with ते तुरुष्काहवे राज्ञा तुंगवत्प्रहिताः पुनः ।

प्रत्यावृत्य ययु ... ... (vii, 118)

6. I_6=India Office Library, London, Catalogue No. 3971 : Ms. No. 2769b; dated 1821 A.D.; contains first two *Taraṅga*-s only ; folios, 16 ; size, 12″×9″; 21 lines to a page and 30 letters per line; Devanāgarī script, written in old hand-made paper ; general condition good ; readings correct ; begins with श्री गणेशाय नमः । ओं श्रीकृष्णाय नमः and ends with इति श्री काश्मीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरंगिन्यां द्वितीयस्तरंगः ॥

7. I_7=India Office Library, London, Catalogue No. 3973 : Ms. No. 2729d ; dated 1821 A. D. ; contains *Taraṅga*-s IV and VI only ; folios, 43 ; size, 12″×9″; 21 lines to a page and 30 letters in each line; old hand-made paper ; Devanāgarī script, legible ; general condition good ; readings fairly correct ; begins with ओम् and ends the 6th *Taraṅga* with संवत् १८७७ मीति जेठ वदि२ वारः अतरवारः ।

8. P_1=Poona, Bhandarkar Oriental Research Institute, Ms. No. N 377 of 1892–95; original, undated paper Ms.; complete in 8 *Taraṅga*-s ; folios, 311 ; size, 12×7½; 11 lines to a page and 40 letters per line ; Devanāgarī script, legible and fairly correct ; general condition good ; begins with ओं श्री गणेशाय नमः ओं नमः सरस्वत्यै and ends with समाप्तेयं राजतरंगिणी कृति श्री महामात्य चंडक प्रभु...रामः स्वनोमहाकाव्ये कल्हणस्य समाप्तं संवत्... ।

9. P_2=Poona, Bhandarkar Oriental Research Institute, Ms. No. N 170 A of 1875-76; original, undated paper Ms. ; complete in 8 *Taraṅga*-s; folios, 365 ; size, 11½″×9″; 22 lines to a page ; generally, 15 letters in each line ; the codex contains the other three *Rājataraṅgiṇī*-s also ; very old Devanāgarī script, mixed with Śāradā characters ; written

by two different scribes; bad writing, not very clear; many folios missing; many verses repeated; general condition poor; readings incorrect; *virāma-daṇḍa*-s omitted; begins with ओं श्री गणेशाय नमः ओं नमो नारायणाय ओम् and ends with श्री कल्हणस्य कृतायां राजतरङ्गिण्यामष्टमस्तरङ्गः समाप्तेयं राजतरङ्गिणः शुभम्.

10. **P**$_3$=Poona, Bhandarkar Oriental Research Institute, Ms. No. 150 of 1875-78; undated original paper Ms.; complete in 8 *Taraṅga*-s; folios, 384; size, 10″×7″; 20 lines to a page and 18 syllables per line; Śāradā script, legible; *virāma-daṇḍa*-s omitted; general condition very good; comparatively correct reedings; the codex also contains the other three *Rājataraṅgiṇi*-s; begins with नमो भगवते वासुदेवाय ओं श्री गणेशाय नमः and ends with इति श्री चम्पक प्रभुसूनोः कल्हणस्य कृतो राजतरङ्गिण्यामष्टमस्तरङ्गः।

गोदावरीसरिदिवोत्तुमुलैस्तरंगै-
र्वक्त्रैः स्फुटं सपदि सप्तभिरापतन्ती।
श्रीकान्तिराजविपुलाभिजनाब्धिमध्यं
विश्रान्तये विशति राजतरङ्गिनीयम्॥

समाप्तेयं राजतरङ्गिणी कृतिर्महामात्यचम्पकप्रभुसूनोर्महाकवेर्कल्हणस्य राजानः ६ श्लोकाः ३७२ आदितो राजानः १०३ ग्रन्थः २०६६.

11. **V**=Benaras Sarsvati Bhavan Library, Ms. No. 1739; original paper Ms.; written in Devanāgarī script; incomplete, contains *Taraṅga*-s I, II, IV and VI only; folios, 65; size, 12″×6″ I2 lines to a page and 46 letters per line; at the end of the *Taraṅga* II, indicating the date of transcription as ॥ श्री संवत् १८६३ मिति कुआर शुक्लपक्ष ६ गुरुवारे समाप्तम्॥; general condition good; illegible and corrupt; begins with ओं श्री गणेशाय नमः॥ ओं कष्णाय नमः and ends with ३६७ राजानः १० आदितः ९७ ग्रंथाणि ३६८ आदितः २६२८ इति श्री कश्मीरिकमहामात्य चंपक प्रभु सूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां षष्टस्तरंगः ६॥

12. **Ś**=Śrinagar Research and Publication Department library, Ms. No. 143; dated Sam, 1948; Devanāgarī tranrscript from original Śāradā Ms.; contains all the 8 *Taraṅga*-s; folios, 386; size, 13″×8″; 25 lines to a page and

14 letters in each line; condition good; readings generally agree with the R. A. S. B., Calcutta edition ; begins with ओं गणेशाय नमः। ओं अथ राजतरंगिणी and ends with इति श्री कश्मीरिकमहामात्यचम्पकप्रभुसूनोः कल्हणस्य कृतौ राजतरङ्गिण्यां अष्टमस्तरंगः समाप्तः।

B

1. **SA**=Rājānaka Ratnakaṇṭha's Ms., very old, undated, written cn birch-bark ; Śāradā script ; general condition poor ; many *lacunae* in the text ; readings fairly correct and legible.

2. **SA₁**=Rājānaka Ratnakaṇṭha's Ms., copied from the Ms. SA by that scholar himself, approximately, during 1648-1681 A.D.; plenty of glosses noted in the margin by the later collaters ; various readings and corrections also marked by different hands ; Śāradā script ; general condition good ; generally, correct and legible.

3. **SA₂**=The Ms. SA₁ had been collated by later hands with this Ms. and additions and corrections noted in the margins of the former.

4. **SA₃**=What is said above regarding SA₂ holds good in this case, too.

5. **SA₄**=Written in Śāradā script in small letters by a modern hand ; later on, collated with SA₁ and a number of notes and glosses added in the margins ; very useful for interpretation of certain passages.

6. **SA₅**=Written by a modern hand, in Śāradā script ; last seven folios rewritten ; leaves worn out and, therefore, difficult to read ; plenty of mistakes.

7. **SR**=Belonged to Pandit Rāzdan Balabhadra of Kashmir ; 353 folios, written on modern paper, according to the colophon, by Bhattagovardhana in the Laukika year 99 *i.e.* 1823 A.D. ; very good copy, free from mis-readings and blunders ; several *lacunae* in the last two *Taraṅga*-s, but filled in by a different hand, probably, with the help of the Calcutta edition.

8. **SG**=Copied by Pandit Govind Kaul, seemingly, from SA ; variant readings, without glosses, noted in the

margin ; seems to have been revised by several later hands which have entered many other additions.

9. **SL**=Discovered by Stein in 1895, three years after his edition had been out, from a heap of Mss., considered useless and, therefore, much neglected, belonging to Pandit Jaganmohan Lal Hund of Kashmirian descent, residing at Lahore ; about 316 folios, some 44 of these from the beginning, the end and the middle having been lost ; written on Kashmirian hand-made paper ; in appearance, about 150 years old ; size, 10″×6¾″ ; 20 lines to a page ; Devanāgarī script ; copied out from an original Śāradā Ms. ; general condition poor.

ABBREVIATIONS, SIGNS AND SYMBOLS

[a] or *a*	=first quarter of verse.
[b] or *b*	=second quarter of verse.
[c] or *c*	=third quarter of verse.
C	=Calcutta ed. of *Rājataraṅgiṇī*.
cf.	=*confer* (=compare).
corr.	=correction.
[d] or *d*	=last quarter of verse.
D	=Durgāprasāda's ed. of *Rājataraṅgiṇī*.
ed.	=edition(s).
Eng.	=English.
fn.	=footnote(s).
Hem.	=Hemacandra's *Siddhaśabdānuśāsana*.
I	=India Office Library Ms.
infra or *infra lin.*	=*infra lineam* (=below the line).
ins.	=insert(s) or inserted.
int. or *int. lin.*	=inter lineas (between the line).
Kāṣ.	=Kāṣmīrī.
Manu.	=*Manusmṛti*.
marg.	=margin or marginal (ly).
MIA.	=Middle Indo-Āryan.
MW.	=Monier-William's Sanskrit-English Dictionary.
NIA.	=New Indo-Āryan.
om.	=omit(s).
P	=Poona (B.O.R.I.) Ms.
Pāṇ.	=Pāṇini's *Aṣṭādhyāyī*.
Panj.	=Panjābī.
Pers.	=Persian.
prima manu	=by original hand.
Rām.	=*Vālmīki Rāmāyaṇa* (Lahore ed.).
Ṛg.	=*Ṛgveda*.
Ś	=Śrīnagar (Research and Publication Department) Ms.

SA	=Stein's Ms. A.
sec.	=*second(ly)*.
Sec. m. or *sec. manu*	=by another hand.
SG	=Stein's Ms. G.
sic	=corrupt.
SL	=Stein's Lahore Ms.
SR	=Stein's Ms. R.
St	=Stein's ed. of *Rājataraṅgiṇī*.
St. Tr.	=Stein's Eng. Translation of *Rājataraṅgiṇī*.
subst.	=substitute (s).
T	=Troyer's ed. of *Rājataraṇgiṇī*.
v.	=verse.
V	=Vārāṇasī (Sarasvatī Bhavan Library) Ms.
v.l.	=*varia(e) lectio(nes)*.
VP	=*Viṣṇu Purāṇa*.
vv.	=verses.
W.	=Western.
कस.	=karmadhāraya compound.
बस.	=bahuvṛīhi compound.
~~	indicates (text thus underlined) as less than certain.
[ ]	enclose comments on certain readings.
( )	besides their normal uses enclose comments on certain Mss. and their readings.
⌊ ⌋	enclose additional letter(s) which appears when *Sandhi* is removed.
...	indicate missing syllables or words.
*	indicates Ms. readings as corrected by us.
°	indicates portion left out for completion.

अथ

कल्हणकृतायां

राजतरङ्गिण्याम्

१–७ तरङ्गात्मकः

प्रथमो भागः

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

अथ

श्रीकल्हणकृतायां राजतरङ्गिण्याम्

प्रथमस्तरङ्गः

भूषाभोगिफणारत्नरोचिस्सिचयचारवे ।
नमः प्रलीनमुक्ताय हरकल्पमहीरुहे ॥ १ ॥

भालं वह्निशिखाङ्कितं दधदधिश्रोत्रं वहन् संभृत-
क्रीडत्कुण्डलिजृम्भितं जलधिजच्छायाऽच्छकण्ठच्छविः ।
वक्षो विभ्रदहीनकञ्चुकचितं बद्धाङ्गनाऽर्धस्य वो
भागः पुङ्गवलक्ष्मणोऽस्तु यशसे वामोऽथवा दक्षिणः ॥ २ ॥

वन्द्यः कोऽपि सुधास्यन्दाऽऽस्कन्दी स सुकवेर्गुणः ।
येन याति यशःकायः स्थैर्यं स्वस्य परस्य च ॥ ३ ॥

कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः ।
कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिनः ॥ ४ ॥

न पश्येत्सर्वसंवेद्यान् भावान् प्रतिभया यदि ।
तदन्यद्दिव्यदृष्टित्वे किमिव ज्ञापकं कवेः ॥ ५ ॥

I_6 V begin with श्रीगणेशाय नमः । ओं श्रीकृष्णाय नमः; P_1 ओं सरस्वत्यै; P_2 ओं श्रीगणेशाय नमः । ओं नमो नारायणाय । ओम् ; P_3 ओं भगवते वासुदेवाय । ओं श्रीगणेशाय नमः; I_3 ओं स्वस्ति । श्रगिणेशाय नमः; Ś श्रीगणेशाय नमः । अथ राजतरङ्गिणी ।

1. a) P_2 SR (before corr.) भूषाहीन° (for भूषाभोगि°). —c) I_3 °मुकुटा (for °मुक्ताय). —d) I_3 पुरा° (for हर°).
2. a) P_1 $I_{3,4}$ सम्भृतं (for सम्भृत°). —b) $I_{2,6}$ °जृम्भित° (for °जृम्भितं). —c) SA_1 °कञ्चुकि° (for °कञ्चुक°). Ś °ङ्गनार्धस्य वा (for °स्य वो). —d) Ś भवो (for वामो).
3. a) I_4 स्वधा° (for सुधा°). —c) $I_{1,3,4}$ $P_{1,2}$ D St SG SR SA_1 येना° (for येन).
4. c) I_6 Ś °पातिं; I_3 °पती (for °पतीं°).
5. c) P_2 Ś °दन्यदिव्य° (for °दन्यद्दिव्य°).

कथादैर्घ्याऽनुरोधेन वैचित्र्येऽप्यप्रपञ्चिते ।
तदत्र किंचिदस्त्येव वस्तु यत् प्रीतये सताम् ॥ ६ ॥

श्लाघ्यः स एव गुणवान् रागद्वेषवहिष्कृता ।
भूताऽर्थकथने यस्य स्थेयस्येव सरस्वती ॥ ७ ॥

पूर्वैर्बद्धं कथावस्तु मयि भूयो निबध्नति ।
प्रयोजनमनाकर्ण्य वैमुख्यं नोचितं सताम् ॥ ८ ॥

दृष्टं दृष्टं नृपोदन्तं बद्ध्वा प्रमयमीयुषाम् ।
अर्वाक्कालभवैर्वार्ता यत्प्रबन्धेषु पूर्यते ॥ ९ ॥

दाक्ष्यं कियदिदं तस्मादस्मिन् भूतार्थवर्णने ।
सर्वप्रकारं स्खलिते योजनाय ममोद्यमः ॥ १० ॥

विस्तीर्णाः प्रथमे ग्रन्थाः स्मृत्यै संक्षिपतो वचः ।
सुव्रतस्य प्रबन्धेन च्छिन्ना राजकथाऽऽश्रयाः ॥ ११ ॥

या प्रथामगमन्नैति साऽपि वाच्यप्रकाशने ।
पाटवं दुष्टवैदुष्यतीव्रा सुव्रतभारती ॥ १२ ॥

केनाऽप्यनवधानेन कविकर्मणि सत्यपि ।
अंशोऽपि नास्ति निर्दोषः क्षेमेन्द्रस्य नृपावलौ ॥ १३ ॥

दृग्गोचरं पूर्वसूरिग्रन्था राजकथाऽऽश्रयाः ।
मम त्वेकादश गता मतं नीलमुनेरपि ॥ १४ ॥

दृष्टैश्च पूर्वभूभर्तृप्रतिष्ठावस्तुशासनैः ।
प्रशस्तिपट्टैः शास्त्रैश्च शान्तोऽशेषभ्रमक्लमः ॥ १५ ॥

---

6. b) S' °चित्ये (for °चित्र्ये). —c) I_3 तन्मात्र° (for तदत्र); S' °दस्त्यत्र (for °दस्त्येव).
7. b) S' C T P_2 °ष्कृतः (for °ष्कृता).
8. d) I_4 °मुखं (for °मुख्यम्).
9. b) $P_{2,3}$ बुद्ध्वा; S' I_4 बद्धा (for बद्ध्वा). S' प्रथम° (for प्रमय°). —c) I_4 om. from अर्वाक्काल° to *v.* 29 b.
10. c) T C I_1 S' °कार° (for °कारं). After *v.* 10 युगलकम् ।
13. b) I_3 कर्माणि (for कर्मणि).
14. I_2 repeats *v.* 14 with a change दृष्टैश्च पूर्व° (for दृग्गोचरं पूर्व°) cf. *v.* 15.

द्वापञ्चाशतमाम्नायभ्रंशाद्यान् नाऽस्मरन् नृपान् ।
तेभ्यो नीलमताद् दृष्टं गोनन्दादिचतुष्टयम् ॥ १६ ॥

बद्धा द्वादशभिर्ग्रन्थसहस्रैः पार्थिवावलिः ।
प्राङ्महाव्रतिना येन हेलाराजद्विजन्मना ॥ १७ ॥

तन्मतं पद्ममिहिरो दृष्ट्वाऽशोकादिपूर्वगान् ।
अष्टौ लवादीन् नृपतीन् स्वस्मिन् ग्रन्थे न्यदर्शयत् ॥ १८ ॥

येऽप्यशोकादयः पञ्च श्रीछविल्लाकरोऽब्रवीत् ।
तान् द्वापञ्चाशतो मध्याच्छ्लोकस्तस्य तथा ह्ययम् ॥ १९ ॥

"आऽशोकादभिमन्योर्ये प्रोक्ताः पञ्च महीभुजः ।
ते द्वापञ्चाशतो मध्यादेव लब्धाः पुरातनैः ॥" २० ॥

इयं नृपाणामुल्लासे ह्रासे वा देशकालयोः ।
भवज्यभूतसंवादिकथा युक्तोपयुज्यते ॥ २१ ॥

संक्रान्तप्राक्तनानन्तव्यवहारः सुचेतसः ।
कस्येदृशो न संदर्भो यदि वा हृदयङ्गमः ॥ २२ ॥

क्षणभङ्गिनि जन्तूनां स्फुरिते परिचिन्तिते ।
मूर्धाऽभिषेकः शान्तस्य रसस्याऽत्र विचार्यताम् ॥ २३ ॥

तदमन्दरसस्यन्दसुन्दरेयं निपीयताम् ।
श्रोत्रशुक्तिपुटैः स्पष्टमङ्ग राजतरङ्गिणी ॥ २४ ॥

पुरा सतीसरः कल्पारम्भात् प्रभृति भूरभूत् ।
कुक्षौ हिमाद्रेरर्णोभिः पूर्णा मन्वन्तराणि षट् ॥ २५ ॥

---

16. d) V C T I_2 गोनर्दादि (for गोनन्दादि).
17. b) SA_1 या नृपाव° (for पार्थिवाव°).
18. a) St SA_1 (before corr.) पूर्वमि° (for पद्ममि°). —b) SA_4 marg. °पूर्वजान् (for °पूर्वगान्). $I_{1,2}$ युग्मम् (for युगलकम्) after v. 18.
19. c) P_1 V $I_{1,2}$ तान् स्वाप° (for तान्द्वाप°).
20. a) I_1 अशोका° (1or आशोका°). —c) $I_{1,2,3,6}$ St SA °शतौ(for °शतो).
22. a) P_2 I_3 °प्रार्थना° (for °प्राक्तना°). —b) D I_3 SA_1 (after corr.) सचेतसः (for सुचेतसः).
23. b) S' °चिन्तिनि (for °चिन्तिते).
24. a) C °स्पन्द° (for °स्यन्द°). —d) $I_{1,2,6}$ V C S' °सङ्ग°; T °साङ्ग° (for °मङ्ग). I_3 राजा° (for राज°).
25. a) $I_{1,2,6}$ V पुरः (for पुरा).

अथ वैवस्वतीयेऽस्मिन् प्राप्ते मन्वन्तरे सुरान् ।
द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ॥ २६ ॥

कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम् ।
निर्ममे तत्सरो भूमौ कश्मीरा इति मण्डलम् ॥ २७ ॥

उद्यद्वैतस्तनिष्यन्ददण्डकुण्डाऽऽतपत्रिणा ।
यत् सर्वनागाऽधीशेन नीलेन परिपाल्यते ॥ २८ ॥

गुहोन्मुखी नागमुखापीतभूरिपया रुचिम् ।
गौरी यत्र वितस्तात्वं याताऽप्युज्झति नोचिताम् ॥ २९ ॥

शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः ।
नगरं धनदस्येव निधिभिर्यन्निषेव्यते ॥ ३० ॥

यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम् ।
प्रसारितभुजं पृष्ठे शैलप्राकारलीलया ॥ ३१ ॥

भुक्तिमुक्तिफलप्राप्तिः काष्ठरूपमुमापतिम् ।
पापसूदनतीर्थान्तर्यत्र संस्पृशतां भवेत् ॥ ३२ ॥

सन्ध्यादेवी जलं यस्मिन् धत्ते निस्सलिले गिरौ ।
दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः ॥ ३३ ॥

स्वयम्भूर्यत्र हुतभुक् भुवो गर्भात् समुन्मिषन् ।
जुह्वतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः ॥ ३४ ॥

---

27. d) $P_{1,3}$ S′ कश्मीर (for कश्मीरा). After *v.* 27 युगलकम् ।

28. a) I_6 C T S′ °निष्पन्द° (for °निष्यन्द°). —c) $I_{2,6}$ V C S′ °देशेन (for °धीशेन). —d) SA_2 gloss विरीविषयस्थितेन नीलनागेन विरीनाम इति प्रसिद्धेन; SA_4 gloss विरनागस्थितेन (for नीलेन).

29. a) I_1 C नागमुखी° (for °मुखा°).

32. b) SA_2 gloss कपटेश्वरे marg. कोटिहिरग्रामे कोटहाडाख्यविषये (for काष्ठरूपम्).

33. a) SA_2 gloss भृङ्गनामविषये देवलग्रामसमीपस्थले (for सन्ध्यादेवी). —b) P_{1-3} I_3 D SA_1 (after corr.) SG• SR दत्ते (for धत्ते).

34. a) SA_2 gloss क्रमरा [ज्ये] 'स्वैम्' इति प्रसिद्धे. SA_4 gloss क्रमराज़ क्रमराजाख्ये विषये (for स्वयम्भूः).

देवी भेडगिरेः शृङ्गे गङ्गोद्भेदशुचौ स्वयम् ।
सरोऽन्तर्दृश्यते यत्र हंसरूपा सरस्वती ॥ ३५ ॥

नन्दिक्षेत्रे हरावासप्रासादे द्युचरार्पिताः ।
अद्याऽपि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः ॥ ३६ ॥

आलोक्य शारदां देवीं यत्र संप्राप्यते क्षणात् ।
तरङ्गिणी मधुमती वाणी च कविसेविता ॥ ३७ ॥

चक्रभृद्विजयेशादिकेशवेशानभूषिते ।
तिलांऽशोऽपि न यत्राऽस्ति पृथ्व्यास्तीर्थैर्बहिष्कृतः ॥३८॥

विजीयते पुण्यबलैर्बलैर्यत्तु न शस्त्रिणाम् ।
परलोकात् ततो भीतिर्यस्मिन् निवसतां परम् ॥ ३९ ॥

सोष्मस्नानगृहाः शीते सुस्थतीराऽऽस्पदा रये ।
यादोविरहिता यत्र निम्नगा निरुपद्रवाः ॥ ४० ॥

असंतापार्हतां जानन् यत्र पित्रा विनिर्मिते ।
गौरवादिव तिग्मांऽशुर्धत्ते ग्रीष्मेऽप्यतीव्रताम् ॥ ४१ ॥

विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः ।
द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ॥ ४२ ॥

त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत् तस्मिन्नपि मण्डलम् ॥ ४३ ॥

---

35. a) SA_2 gloss भेडा भाडू इति प्रसिद्धा (for भेडगिरेः). —d) SA_2 gloss हंसवागीश्वरी (for हंसरूपा).

36. a) SA_2 gloss नरनामग्रामे (for नन्दिक्षेत्रे). $I_{1,2,(4}$ स्वरा°$),_6$ C T V S′ सुरावास° (for हरावास°).

37. a) SA_2 gloss श्रीशैले हरेल् इति प्रसिद्धे स्थाने दरदेशाभ्यर्णवर्तिनि (for शारदां).

38. a) SA_2 gloss चक्रभृत् केशवः चक्रधर् इति प्रसिद्धः । विजयेशः ईशानः विज्यभ्राडो इति प्रसिद्धः (for चक्रभृत्°).

39. a) $I_{2,4}$ V S′ C SA_1 मुख्य° (for पुण्य°).

40. b) $I_{1-4,6}$ P_1 St C T V S′ SG स्वस्थतीरा° (for सुस्थतीरा°).

41. a) $I_{1-4,6}$ P_{1-3} D (suggests सन्तापासहतां) C T V S′ SA_1 असन्तापहताम् (for °न्तापार्हताम्).

42. c) P_3 यत्नासा° (for यत्न सा°).

43. a) SG marg. रत्नभूः (for रत्नसूः). —c) I_{2-6} V °गिरिः (for °गुरुः).

तत्र कौरवकौन्तेयसमकालभवात् कलौ ।
आ गोनन्दात् स्मरन्ति स्म न द्वापञ्चाशतं नृपान् ॥ ४४ ॥

तस्मिन् काले ध्रुवं तेषां कुकृत्यैः काश्यपीभुजाम् ।
कर्तारः कीर्तिकायस्य नाऽभूवन् कविवेधसः ॥ ४५ ॥

भुजवनतरुच्छायां येषां निषेव्य महौजसां
जलधिरशना मेदिन्यासीदसावकुतोभया ।
स्मृतिमपि न ते यान्ति क्ष्मापा विना यदनुग्रहं
प्रकृतिमहते कुर्मस्तस्मै नमः कविकर्मणे ॥ ४६ ॥

येऽप्यासन्निभकुम्भशायितपदा येऽपि श्रियं लेभिरे
येषामप्यवसन् पुरा युवतयो गेहेष्वहश्चन्द्रिकाः ।
तांल्लोकोऽयमवैति लोकतिलकान् स्वप्नेऽप्यजातानिव
भ्रातः सत्कविकृत्य किं स्तुतिशतैरन्धं जगत्त्वां विना ॥४७॥

अष्टषष्ट्यधिकामब्दशतद्वाविंशतिं नृपाः ।
अपीपलंस्ते कश्मीरान् गोनन्दाद्याः कलौ युगे ॥ ४८ ॥

भारतं द्वापरान्तेऽभूद्वार्तयेति विमोहिताः ।
केचिदेतां मृषा तेषां कालसंख्यां प्रचक्रिरे ॥ ४९ ॥

लब्धाऽऽधिपत्यसंख्यानां वर्षान् संख्याय भूभुजाम् ।
भुक्तात् कालात् कलेः शेषो नास्त्येवं तद्विवर्जितात् ॥ ५० ॥

---

44. b) $I_{1-4,6}$ V S′ C T St °भवान् कलौ (for भवात्कलौ). —c) I_2 Ś: V C T गोनर्दात् (for गोनन्दात्).
45. b) $I_{1,2,4,6}$ V S′ T St C SA_1 (before corr.) कुकृतैः (for कुकृत्यैः).
46. a) $I_{1,2}$ V C T S′ SA (before corr.) भुजतरुवन° (for भुजवनतरु°).
47. c) SA_3 marg. SR sec. hand सर्वोप्य° (for स्वप्नेप्य°).
48. a) SA_4 gloss adds before v. 48 अन्यमतं युग्मेनाह. —c) $I_{2,6}$ C T S′ काश्मीरान् (for कश्मीरान्). —d) $I_{1,2,6}$ V C S′ T गोनर्दा°; SA_2 gloss द्वापञ्चाशतिसङ्ख्याः (for गोनन्दाद्याः).
49. a) SA_2 gloss युद्धम् (for भारतम्). After v. 49 युग्मम् ।
50. d) T नास्त्येव (for नास्त्येवम्). St $P_{1,2}$ I_3 °वर्जितान् ; P_3 °वर्जनात् ; (for °वर्जितात्).

शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले ।
कलेर्गतेषु वर्षाणामभूवन् कुरुपाण्डवाः ॥ ५१ ॥

लौकिकेऽब्दे चतुर्विंशे शककालस्य सांप्रतम् ।
सप्तत्याऽभ्यधिकं यातं सहस्रं परिवत्सराः ॥ ५२ ॥

प्रायस्तृतीयगोनन्दादारभ्य शरदां तदा ।
द्वे सहस्रे गते त्रिंशदधिकं च शतत्रयम् ॥ ५३ ॥

वर्षाणां द्वादशशती षष्टिः षड्भिश्च संयुता ।
भूभुजां कालसंख्यायां तद्द्वापञ्चाशतो मता ॥ ५४ ॥

ऋक्षादृक्षं शतेनाब्दैर्यात्सु चित्रशिखण्डिषु ।
तच्चारे संहिताकारैरेवं दत्तोऽत्र निर्णयः ॥ ५५ ॥

"आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ ।
षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्यस्य ॥" ५६ ॥

कश्मीरेन्द्रः स गोनन्दो वेल्लद्गङ्गादुकूलया ।
दिशा कैलासहासिन्या प्रतापी पर्युपास्यत ॥ ५७ ॥

---

51. d) $I_{1,2}$ S′ C T °मभवन् (for °मभूवन्).
52. b) SA_3 gloss अद्य जयसिंहसमये (for सांप्रतम्). —c) S′ V $I_{2,6}$ C T °त्यात्यधिकम् ; I_4 °त्याद्यधि° (for °त्याभ्यधि°).
53. a) $I_{2,6}$ S′ V C T °गोनर्दादा° (for °गोनन्दादा°). —b) V I_4 D शरदा (for शरदाम्). P_2 I_3 SA_3 तथा (for तदा).
55. c) $I_{1-4,6}$ C T V S′ SA_1 (before corr.) उच्चारे (for तच्चारे).
56. cf. *Bṛhatsaṁhitā* XIII. 3. SA_2 gloss रत्नकोशाख्ये ज्योतिर्ग्रन्थे एषा आर्या । यत्सारमानीय रत्नमाला विहिता श्रीपतिना; SA SR gloss आसन्मघास्विति । एकैकस्मिन् धिष्ण्ये शतं शतं चरन्ति वर्षाणामिति वचनात् तत्समये मघास्ववस्थानात्सप्तर्षीणां कश्मीरेष्वतिप्रसिद्धलौकिकसंवत्सरपरिज्ञानार्थमेतदुक्तमन्यग्रन्थेपीहानीतम् । षड्द्विकेति । तस्य राज्यस्य युधिष्ठिरीयराज्यस्य यः शककालः पूर्वोक्तः 'शतेषु षट्सु सार्धेषु' इत्यादिकः त्रिपञ्चाशदधिकषट्शतरूपः स षड्द्विकपञ्चद्वियुतः २५२६ । एतावता वर्षवृन्देन युतः गोऽगैकगुणतुल्यो भवति ३१७९. अयं शककालो वर्तमानशककालो भवति इत्यध्याहारः । गणितव्यवहारार्थं लौकिकः शककालः शालिवाहनीयः भवति इत्यर्थः । ३१७९ एतावत्परिमिते कलेर्गताब्दवृन्दे याते शालिवाहनोऽभूदित्यर्थः । तदुक्तं ब्रह्मसिद्धान्ते—

कल्पपरार्धं मनवः षट् तस्याब्दाश्चतु[र्युगं त्रि]घ(दि) नम् ।
त्रीणि कृतादीनि पुनर्गोऽगैकगुणाः शकनृपान्तेऽब्दाः ॥ इति ॥

57. a) I_4 S′ C T काश्मीरेन्द्रः (for कश्मीरेन्द्रः). S′ C T °नर्दो (for °नन्दो). —b) D P_{1-3} St I_3 V °दुगूलया (for °दुकूलया).

विहाय देहं शेषाहेर्विषाश्लेषभयादिव ।
भूर्गारुत्मतरत्नाङ्के भेजे तस्य भुजे स्थितिम् ॥ ५८ ॥

साहायकार्थमाहूतो जरासन्धेन बन्धुना ।
स संरुरोध कंसारेर्मथुरां पृथुभिर्बलैः ॥ ५९ ॥

तेनोपकूलं कालिन्द्याः स्कन्धावारं निबध्नता ।
यादवीहसितैः सार्धं योधानां मीलितं यशः ॥ ६० ॥

एकदा सर्वतो भग्नाः स्वसेनास्त्रातुमुद्यतः ।
तं संरुरोध योद्धारं संगरे लाङ्गलध्वजः ॥ ६१ ॥

तयोस्तुल्यौजसोर्युद्धे चिराय करवर्तिनी ।
मम्लौ विजयसंदेहे वरणस्रग्जयश्रियः ॥ ६२ ॥

अथ शस्त्रक्षतैरङ्गैरालिलिङ्ग रणाङ्गने ।
भुवं काश्मीरको राजा यादवस्तु जयश्रियम् ॥ ६३ ॥

गतिं प्रवीरसुलभां तस्मिन्सुक्षत्रिये गते ।
श्रीमान्दामोदरो नाम तत्सूनुरभृत क्षितिम् ॥ ६४ ॥

भोगयोगोर्जितं राज्यं प्राप्तवानपि भूपतिः ।
ध्यायन्पितृवधं मानी नोपलेभे स निर्वृतिम् ॥ ६५ ॥

अथोपसिन्धु गान्धारैः सज्जे कन्यास्वयंवरे ।
निमन्त्र्य शुश्रावाऽऽनीतान् वृष्णीन् दर्पोष्णदोर्द्रुमः ॥ ६६ ॥

ततस्तस्यातिसंरम्भात् तानदूरस्थितान् प्रति ।
यात्राऽभूद् ध्वजिनीवाजिरेणुग्रस्तनभस्तला ॥ ६७ ॥

---

58. a) $I_{1,2,4,6}$ V S′ C T देशम् (for देहम्). —b) $I_{2,6}$ विपश्ले°; S′ °र्होर्विषाश्ले° (for विषाश्ले°). —c) V S′ °रत्नाङ्गे (for °रत्नाङ्के).
59. c) $I_{1,2,6}$ C समं रु° (for स संरु°).
60. b) I_{1-3} V P_2 St स्कन्दावारम् (for स्कन्धावारम्).
61. a) I_6 भग्राः (for भग्नाः). —b) I_6 स्वसेवा° (for स्वसेना°).
62. d) P_{1-3} St SA_1 SR SG D I_3 S′ किं जयस्र° (for वरणस्र°).
63. c) I_{2-4} P_{1-3} St D. काश्मीरिको (for काश्मीरको).
66. c) P_2 SA शुश्रुवा° (for शुश्रावा°). —d) $I_{1,2,6}$ दर्पोस्र° (sic) (for दर्पोष्ण°).
67. a) $I_{1,2,4,6}$ V S′ C °संभारात् ° (for °संरम्भात्).

तदाहवे विवाहोत्का विघ्न्यते स्म पतिंवरा।
आसोत्तु द्युपुरन्ध्रीणां गान्धारेषु स्वयंवरः ॥ ६८ ॥

तदाऽऽक्रान्तासुहृच्चक्रः स चक्रायुधसङ्गरे।
चक्रधाराऽध्वना धीरश्चक्रवर्ती दिवं ययौ ॥ ६९ ॥

अन्तर्वत्नीं तस्य पत्नीं तदा यदुकुलोद्वहः।
राज्ये यशोवतीं नाम द्विजैः कृष्णोऽभ्यषेचयत् ॥ ७० ॥

तस्मिन्काले स्वसचिवान् सासूयान्विन्यवीवरत्।
इमं पौराणिकं श्लोकमुदीर्य मधुसूदनः ॥ ७१ ॥

"कश्मीराः पार्वती तत्र राजा ज्ञेयः शिवांशजः।
नाऽवज्ञेयः स दुष्टोऽपि विदुषा भूतिमिच्छता ॥" ७२ ॥

पुंसां निर्गौरवा भोज्य इव याः स्त्रीजने दृशः।
प्रजानां मातरं तास्तामपश्यन्देवतामिव ॥ ७३ ॥

अथ वैजनने मासि सा देवी दिव्यलक्षणम्।
निर्दग्धस्यान्वयतरोरङ्कुरं सुषुवे सुतम् ॥ ७४ ॥

तस्य राज्याभिषेकादिविधिभिः सह संभृताः।
द्विजेन्द्रैर्निरवर्त्यन्त जातकर्मादिकाः क्रियाः ॥ ७५ ॥

स नरेन्द्रश्रिया सार्धं लब्धवान्बालभूपतिः।
नाम गोनन्द इत्येवं नप्ता पैतामहं क्रमात् ॥ ७६ ॥

---

68. b) I_4 $P_{1,3}$ D (and suggests विघ्न्यते निघ्न्यते इति वा कथञ्चन समाधेयः पाठः) SG विघ्नति; $I_{1-3,6}$, P_2 V S′ St T C निघ्नाति (for विघ्न्यते). —c) $I_{2,6}$ P_1 C T V S′ आसीत्त° (for °सीत्तु).

69. a) P_2 SA_3 तत्रा° (for तदा°). —b) SA_1 स श्चक्रा° (sic) (for स चक्रा°). —c) $I_{2,6}$ V °राधुना; P_1 °राधना; S′ °राध्यना (for °राध्वना).

70. c) SA_3 यशोमतीं; $I_{2,6}$ यशोवन्तीं (for यशोवतीं). —d) $I_{1,2,6}$ °सूचयत् (for °षेचयत्).

71. b) T °वारयत् (for °वीवरत्).

72. a) P_2 V S′ T D काश्मीराः (for कश्मीराः). —b) $I_{1,2,4,6}$ St C T हरांशजः (for शिवांशजः). —d) P_3 SA_2 marg. S′ स्वात्मनो (for विदुषा).

76. a) $I_{1,2,4,6}$ V S′ C T नगेन्द्र° (for नरेन्द्र°). —c) $I_{1,2,6}$ V S′ C T गोनर्द (for गोनन्द).

आस्तां बालस्य संनद्धे द्वे धात्र्यौ तस्य वृद्धये ।
एका पयःप्रस्रविणी सर्वसंपत्प्रसूः परा ॥ ७७ ॥
तस्यावन्ध्यप्रसादत्वं रक्षन्तः पितृमन्त्रिणः ।
पार्श्वगेभ्यो ददुर्वित्तमनिमित्तस्मितेष्वपि ॥ ७८ ॥
अबुद्ध्वाऽननुतिष्ठन्तस्तस्याव्यक्तं शिशोर्वचः ।
कृतागसमिवात्मानममन्यन्ताधिकारिणः ॥ ७९ ॥
पितुः सिंहासनं तेन क्रामता बालभूभुजा ।
नोत्कण्ठा पादपीठस्य लम्बमानाङ्घ्रिणा हृता ॥ ८० ॥
तं चामरमरुल्लोलकाकपक्षं नृपासने ।
विधाय मन्त्रिणोऽशृण्वन्प्रजानां धर्मसंशयम् ॥ ८१ ॥
इति काश्मीरको राजा वर्त्तमानः स शैशवे ।
साहायकाय समरे न निन्ये कुरुपाण्डवैः ॥ ८२ ॥
आम्नायभङ्गान्निर्घृनामकृत्यास्ततः परम् ।
पञ्चत्रिंशन्महीपाला मग्ना विस्मृतिसागरे ॥ ८३ ॥
अथाभवत् लवो नाम भूपालो भूमिभूषणम् ।
वेल्लद्यशोदुकूलायाः प्रीतिपात्रं जयश्रियः ॥ ८४ ॥
यस्य सेनानिनादेन जगदौन्निद्र्यदायिना ।
निन्यिरे वैरिणश्चित्रं दीर्घनिद्राविधेयताम् ॥ ८५ ॥
तेन षोडशभिर्लक्षैर्विहीनामश्मवेश्मनाम् ।
कोटिं निष्पाद्य नगरं लोलोरं निरमीयत ॥ ८६ ॥
दत्त्वाऽग्रहारं लेदर्यां लेवारं द्विजपर्षदे ।
स द्यामनिन्द्यशौर्यश्रीरारुरोह महाभुजः ॥ ८७ ॥

---

77. c) SA_3 °प्रसविनी (for °प्रस्रविणी).
78. c) $I_{1,2,4,6}$ दवु° (for ददु°).
79. a) I_4 V C अबुद्धयाननुतिष्ठन्तः; T अबुद्धाननुतिष्ठन्तः; SA_3 अबुद्धमनुतिष्ठन्तः (for अबुद्ध्वाऽननुतिष्ठन्तः).
80. d) P_3 हृता; S′ C T कृता (for हृता).
82. d) P_3 नीतः (for निन्ये).
84. c) P_{1-3} I_3 D St °दुगूलायाः (for °दुकूलायाः).
86. a) $I_{1,2,6}$ P_3 V C T लक्ष्यै° (for लक्षै°).
87. b) $I_{2,6}$ V °षटपदे (for °पर्षदे).

कुशेशयाक्षस्तत्पुत्रः प्रतापकुशलः कुशः ।
कुरुहाराग्रहारस्य दाताऽभूत्तदनन्तरम् ॥ ८८ ॥
ततस्तस्य सुतः प्राप रिपुनागकुलान्तकः ।
धुर्यः शौर्यश्रियः श्रीमान् खगेन्द्रः पार्थिवेन्द्रताम् ॥ ८९ ॥
स खागिखोनमुषयोः कर्ता मुख्याग्रहारयोः ।
हरहाससितैः कृत्यैः क्रीताँल्लोकान्क्रमाद्ययौ ॥ ९० ॥
अनर्घमहिमा दीर्घमघवत्तावहिष्कृतः ।
अथ साश्चर्यचर्योऽभूत् सुरेन्द्रस्तत्सुतो नृपः ॥ ९१ ॥
शतमन्युः शान्तमन्योर्गोत्रभिद्गोत्ररक्षिणः ।
लेभे यस्य सुरेन्द्रस्य सुरेन्द्रो नोपमानताम् ॥ ९२ ॥
दरद्देशान्तिके कृत्वा सोरकाख्यं स पत्तनम् ।
श्रीमान्विहारं विदधे नरेन्द्रभवनाभिधम् ॥ ९३ ॥
तेन स्वमण्डलेऽखण्डयशसा पुण्यकर्मणा ।
विहारः सुकृतोदारो निर्मितः सौरसाभिधः ॥ ९४ ॥
तस्मिन्निस्सन्ततौ राज्ञि प्रशान्तेऽन्यकुलोद्भवः ।
बभार गोधरो नाम सभूधरवरां धराम् ॥ ९५ ॥
गोधराहस्तिशालाख्यमग्रहारमुदारधीः ।
स प्रदाय द्विजन्मभ्यः पुण्यकर्मा दिवं ययौ ॥ ९६ ॥
तस्य सूनुः सुवर्णाख्यस्ततोऽभूत्स्वर्णदोऽर्थिनाम् ।
सुवर्णमणिकुल्यायाः कराले यः प्रवर्तकः ॥ ९७ ॥
तत्सूनुर्जनको नाम प्रजानां जनकोपमः ।
विहारमग्रहारं च जालोराख्यं च निर्ममे ॥ ९८ ॥

---

88. a) $I_{2,6}$ S′ C SA कुशेशयाख्य° (for कुशेशयाक्ष°). I_4 om. *v.* 88c–90a. —c) SA_4 gloss कुलर् (for कुरुहाराग्रहार°).
90. a) $I_{1,2,6}$ V S C T खागिखुनमु° (for °खोनमु°).
92. c) SA_1 तस्य (for यस्य). —d) SA_3 marg. न सुरेन्द्रः समानताम् (for सुरेन्द्रो नोपमानताम्).
93. b) V S′ $I_{1,2,4,6}$ C T D सौरकाख्यं; $P_{1,2}$ सरोकाख्यं (for सोरकाख्यं).
94. c) $I_{1,2,6}$ S′ C सुकृतोदारे; I_4 स्वकृतोदारे (for सुकृतोदारः). —d) P_{1-3} V I_3 D SA_3 सोरसाभिधः (for सौरसाभिधः).
95. d) T °वसुन्धराम् (for °वरां धराम्).
96. a) $P_{1,3}$, S′ D C T गोधरोह°; SA_2 gloss गोधर् अस्तीहिल् (for गोधराह°).

शचीनरस्तस्य सूनुः क्षितिं क्षितिशचीपतिः ।
ततः श्रीमान्क्षमाशीलो ररक्षाऽक्षतशासनः ॥ ९९ ॥
राजाग्रहारयोः कर्ता शमाङ्गासाशनारयोः ।
सोऽभूदपुत्रः सुत्रामविष्टरार्धसमाश्रयी ॥ १०० ॥
प्रपौत्रः शकुनेस्तस्य भूपतेः प्रपितृव्यजः ।
अथावहदशोकाख्यः सत्यसन्धो वसुंधराम् ॥ १०१ ॥
यः शान्तवृजिनो राजा प्रपन्नो जिनशासनम् ।
शुष्कलेत्रवितस्तात्रौ तस्तार स्तूपमण्डलैः ॥ १०२ ॥
धर्मारण्यविहारान्तर्वितस्तात्रपुरेऽभवत् ।
यत्कृतं चैत्यमुत्सेधावधिप्राप्त्यक्षमेक्षणम् ॥ १०३ ॥
स षण्णवत्या गेहानां लक्षैर्लक्ष्मीसमुज्ज्वलैः ।
गरीयसीं पुरीं श्रीमांश्चक्रे श्रीनगरीं नृपः ॥ १०४ ॥
जीर्णं श्रीविजयेशस्य विनिवार्य सुधामयम् ।
निष्कल्मषेणाश्ममयः प्राकारो येन कारितः ॥ १०५ ॥
सभायां विजयेशस्य समीपे च विनिर्ममे ।
शान्तावसादः प्रासादावशोकेश्वरसंज्ञितौ॥ १०६ ॥
म्लेच्छैः संच्छादिते देशे स तदुच्छित्तये नृपः ।
तपस्संतोषिताल्लेभे भूतेशात्सुकृती सुतम् ॥ १०७ ॥
सोऽथ भूभृज्जलौकोऽभूद् भूलोकसुरनायकः ।
यो यशस्सुधया शुद्धं व्यधाद्ब्रह्माण्डमण्डलम् ॥ १०८ ॥
यस्य दिव्यप्रभावस्य कथाः श्रुतिपथं गताः ।
आश्चर्याचार्यतां यान्ति नियतं द्युषदामपि ॥ १०९ ॥

---

102. c) $I_{1,2,6}$ V S′ C T °वितस्ताद्रौ (for °वितस्तात्रौ).
103. c) $I_{1,2,4,6}$ V C T यत्कृत्यं (for यत्कृतं).
104. b) $I_{1,2,4,6}$ V S′ C T लक्ष्यै° (for लक्षै°).
105. b) SA_3 gloss सौधम् (for सुधामयम्). —d) SA_3 प्रासादो (for प्राकारो). P_3 निर्मितः (for कारितः).
107. P_2 om. ab.
108. a) $I_{1,2,4,6}$ V C T सोथो (for सोऽथ); $I_{1,2-4,6}$ V S′ C T °ज्जलोको (for °ज्जलौको). —c) $I_{1,2,4,6}$ V C S′ SA_1 °श्रद्धया (for °सुधया).
109. c) $I_{1,2,6}$ आश्चर्याच्च°; P_2 आश्चर्यावा°; SA_3 आश्चर्यच°; I_3 आश्चर्याच°; S′ I_4 C T आश्चर्याश्च° (for आश्चर्याचा°). —d) SA_1 निश्चयं (for नियतं). $I_{1,4,6}$ P_2 SA SR SG द्युसदा° (for द्युषदा°).

कोटिवेधिनि सिद्धे हि स रसे हाटकार्पणैः ।
आसीत्सुषिरतां हर्तुं हेमाण्डस्य ध्रुवं क्षमः ॥ ११० ॥

संस्तम्भ्याम्भः प्रविष्टेन तेन नागसरोऽन्तरम् ।
तारुण्यं फणिकन्यानां निन्ये संभोगभव्यताम् ॥ १११ ॥

तत्कालप्रबलप्रेद्धबौद्धवादिसमूहजित् ।
अवधूतोऽभवत्सिद्धस्तस्य ज्ञानोपदेशकृत् ॥ ११२ ॥

विजयेश्वरनन्दीशक्षेत्रज्येष्ठेशपूजने ।
तस्य सत्यगिरो राज्ञः प्रतिज्ञा सर्वदाऽभवत् ॥ ११३ ॥

ग्रामे ग्रामे स्थितैरश्वैर्धावनं प्रतिषिद्धवान् ।
खेनावहत्तं सततं नागः कोऽपि सुहृत्तया ॥ ११४ ॥

स रुद्धवसुधान्म्लेच्छान्निर्वास्याखर्वविक्रमः ।
जिगाय जैत्रयात्राभिर्महीमर्णवमेखलाम् ॥ ११५ ॥

ते यत्रोज्झटितास्तेन म्लेच्छाः छादितमण्डलाः ।
स्थानमुज्झटडिम्बं तज्जनैरद्यापि गद्यते ॥ ११६ ॥

जित्वोर्वीं कान्यकुब्जाद्यां तत्रत्यं स न्यवेशयत् ।
चातुर्वर्ण्यं निजे देशे धर्म्यांश्च व्यवहारिणः ॥ ११७ ॥

यथावद् वृद्धिमप्राप्तं व्यवहारधनादिभिः ।
सामान्यदेशवद्राज्यं तावदस्मिन्हि मण्डले ॥ ११८ ॥

---

110. a) P_2 SA_3 °वेदिनि (for °वेधिनि). —c) SA_3 सुरिक्तताम् (for सुषिरताम्). $I_{1-4,6}$ S′ V C T SA_1 कर्तुं (for हर्तुं). —d) SA_3 marg. I_3 ब्रह्माण्डस्य ; T हेमाङ्गस्य (for हेमाण्डस्य).

112. I_4 om. *v.* 112.

114. c) $I_{1-3,6}$ V S′ C T °हर्तुं (for °हत्तं).

116. a) $I_{4,6}$ V S′ C स (for ते). $I_{1,2,6}$ V S′ C तत्रो° (for यत्रो°). I_6 C °ज्जूटित° (for °ज्झटिता°). —c) I_6 °मुजुट°; S′ °मुजूट°; I_1 °मुत्कुट°; C °मुज्जूट° (for °मुज्झट°).

117. a) I_3 P_2 SA_3 कन्यकुब्जादौ; $I_{1,2,4,6}$ St S′ V C T कन्यकु° (for कान्यकु°). —b) SA_1 संन्य° (for सन्य°).

118. a) D St P_{1-3} I_3 SG SR °मप्राप्ते (for °मप्राप्तम्). —c) P_2 SA_3 राज्ञां (for राज्यं).

धर्माध्यक्षो धनाध्यक्षः कोशाध्यक्षश्चमूपतिः ।
दूतः पुरोधा दैवज्ञः सत प्रकृतयोऽभवन् ॥ ११९ ॥

कर्मस्थानानि धर्म्याणि तेनाष्टादश कुर्वता ।
ततः प्रभृति भूपेन कृता यौधिष्ठिरी स्थितिः ॥ १२० ॥

स विक्रमप्रभावाभ्यां समुपार्जितया श्रिया ।
विदधे वारबालादीनग्रहारानुदग्रधीः ॥ १२१ ॥

द्वारादिषु प्रदेशेषु प्रभावोग्राण्युदग्रया ।
ईशानदेव्या तत्पत्न्या मातृचक्राणि चक्रिरे ॥ १२२ ॥

श्रुतनन्दिपुराणः स व्यासान्तेवासिनो नृपः ।
सेवनं सोदरादीनां नन्दीशस्पर्धया व्यधात् ॥ १२३ ॥

प्रतिष्ठां ज्येष्ठरुद्रस्य श्रीनगर्यां वितन्वता ।
तेन नन्दीशसंस्पर्धा न मेने सोदरं विना ॥ १२४ ॥

विस्मारितो नित्यकृत्यं कार्यव्यग्रतयैकदा ।
विदूरसोदरजलाप्लावनालाभदुर्मनाः ॥ १२५ ॥

अपश्यन्निर्जलात्स्थानादकस्मादुत्थितं पयः ।
स सोदराविसंवादि वर्णस्वादादिभिर्गुणैः ॥ १२६ ॥

प्रादुर्भूते ततस्तस्मिंस्तीर्थे कृतनिमज्जनः ।
स नन्दिरुद्रस्पर्धायां मानी पर्याप्तिमासदत् ॥ १२७ ॥

तेन जातु परीक्षार्थं निक्षिप्तः सोदरान्तरे ।
सपिधानाननः स्वर्णभृङ्गारः सुषिरोदरः ॥ १२८ ॥

दिनद्वयेन सार्धेन श्रीनगर्युद्भवाम्भसः ।
उन्मग्नः स महीभर्तुस्तस्य चिच्छेद संशयम् ॥ १२९ ॥

---

119. After this *v.* युगलकम् .
121. c) $I_{1,2,6}$ P_2 C T वारवाला°; SA_3 वनबाला°; SR gloss बारवलो (for वारबाला°). —d) P_3 °नुदारधीः (for °नुदग्रधीः).
122. a) $SA_{3,4}$ gloss (ह) स्तिशालादिषु (for द्वारादिषु).
126. c) P_3 सोदर° (for सोदरा°). —d) P_{1-3} T I_3 वर्णास्वा° (for वर्णस्वा°).
After this *v.* युगलकम्.
127. d) $I_{1,2,4,6}$ S′ P_3 C पर्याप्त° (for पर्याप्ति°).
128. a) SA_4 तत्र (for जातु).

नूनं नन्दीश एवासौ भोक्तुं भोगानवातरत् ।
दृष्टादृष्टक्रियासिद्धिर्न भवेत्तादृगन्यथा ॥ १३० ॥

राज्ञस्तस्य कदाचित्तु व्रजतो विजयेश्वरम् ।
ययाचे काचिदबला भोजनं मार्गमध्यगा ॥ १३१ ॥

यथेष्टमशनं दातुं ततोऽनेन प्रतिश्रुते ।
व्यवृणोद्विकृता भूत्वा सा नृमांसाश्रयां स्पृहाम् ॥ १३२ ॥

स सत्त्वहिंसाविरतस्तस्यै मांसं स्वविग्रहात् ।
अनुज्ञां प्रददौ भोक्तुं यदा सैवं तदाऽब्रवीत् ॥ १३३ ॥

बोधिसत्त्वोऽसि भूपाल कोऽपि सत्त्वोर्जितव्रतः ।
कारुण्यं प्राणिषु दृढं यस्येदृक्ते महात्मनः ॥ १३४ ॥

बौद्धभाषामजानानो माहेश्वरतया नृपः ।
को बोधिसत्त्वो यं भद्रे मां वेत्सीति जगाद ताम् ॥ १३५ ॥

पुनर्बभाषे सा भूपं श्रोतव्यं मत्प्रयोजनम् ।
"अहं ह्युत्थापिता बौद्धैः क्रोधाद्विप्रकृतैस्त्वया ॥ १३६ ॥

लोकालोकाद्रिपार्श्वस्थास्तामस्यः कृत्तिका वयम् ।
बोधिसत्त्वैकशरणाः काङ्क्षन्त्यस्तमसः क्षयम् ॥ १३७ ॥

लोके भगवतो लोकनाथादारभ्य केचन ।
ये जन्तवो गतक्लेशा बोधिसत्त्वानवेहि तान् ॥ १३८ ॥

सागसेऽपि न कुप्यन्ति क्षमया चोपकुर्वते ।
बोधिं स्वस्यैव नेच्छन्ति ते विश्वोद्धरणोद्यताः ॥ १३९ ॥

---

132. a) P_2 SA I_3 यथेच्छ° (for यथेष्ट°).
133. b) $I_{1-4,6}$ V S′ C T SA_1 दातुं (for मांसं).
134-135 I_4 om. *v.* 134-135.
136. I_2 om. *v.* 136-140 b. —c) C S′ अहन्तूत्था° (for अहं ह्युत्था°).
137. d) $I_{3,4}$ P_{1-3} D (and suggests तमस इत्युचितः पाठः) SA_2 तपसः (for तमसः).
139. b) SA_3 कृपया (for क्षमया). —c) SA_3 हितं (for बोधिं); $I_{1,3,6}$ P_{1-3} C St V S′ D (and suggests नेच्छन्ति इत्युचितः पाठः) नेष्यन्ति (for नेच्छन्ति). —d) $I_{1,3,4,6}$ $P_{1,2}$ St C T D V S′ °श्वधरणो° (for °श्वोद्धरणो°).

विहारतूर्यनिर्घोषैरुन्निद्रः प्रेरितः खलैः ।
पुरा भवान्व्यधात्क्रोधाद्विहारोद्दलनं यदा ॥ १४० ॥
'महाशाक्यः स नृपतिर्न शक्यो बाधितुं त्वया ।
तस्मिन्दृष्टे तु कल्याणि भविता ते तमःक्षयः ॥ १४१ ॥
अस्मद्गिरा प्रेरणीयो विहारकरणाय सः ।
दत्त्वा स्वहेमसंभारं त्वया मलिनितः खलैः ॥ १४२ ॥
तस्मिन्कृते न जायेत विहारच्छेदवैशसम् ।
तस्य तत्प्रेरकाणां च प्रायश्चित्तं कृतं भवेत् ॥' १४३ ॥
क्रुद्धैर्बौद्धैरनुध्याता त्वद्वधाय प्रधाविता ।
अनुशिष्टा समाहूय बोधिसत्त्वैस्तदेत्यहम् ॥ १४४ ॥
तस्मात्सत्त्वातिरेकस्ते मिषादेवं परीक्षितः ।
क्षीणपापाऽद्य संवृत्ता स्वस्ति ते साधयाम्यहम् ॥'' १४५ ॥
कृतप्रतिश्रवे राज्ञि विहारकृतये पुनः ।
प्रहर्षोत्फुल्लनयना कृत्यादेवी तिरोदधे ॥ १४६ ॥
अथ कृत्याश्रमं कृत्वा विहारं वसुधाधिपः ।
तत्रैव क्षीणतमसं कृत्यादेवीमसन्धयत् ॥ १४७ ॥
विधाय सोऽश्मप्रासादं नन्दिक्षेत्रे क्षमापतिः ।
भूतेशाय समं कोशैः पूजां रत्नमयीं ददौ ॥ १४८ ॥

---

141. a) $I_{1,2,6}$ V S′ C T SA_1, SL महाशक्यः; P_3 SA_3 (SG SR have both °शाक्यः and °सत्त्वः) महासत्वः (for महाशाक्यः).
142. c) I_3 D P_1 दत्त्वाम्ब हेम° (for दत्त्वा स्वहेम°).
144. c) $I_{1,2,4,6}$ V S′ C T अनुदिष्टा (for अनुशिष्टा). —d) D °सत्यै° (for °सत्त्वै°). After this *v.* कुलकम् .
145. c) P_1 SG °पापो° (for °पापा°). P_1 SG संवृत्तः; SA_3 संजाता (for संवृत्ता).
146. b) I_3 SA_2 ततः (for पुनः).
147. a) S′ C St °श्रमे (for °श्रमं). —d) $I_{2,6}$ V °वीं समन्धयत्; $I_{1,4}$ P_1 °ससन्धयत्; S′ C T °मनन्दयत्; P_3 I_3 D SA_2 (SG both readings °मबन्ध° and °मसन्ध°) SR मबन्धयत्; SL °मवन्दयत् (for °मसन्धयत्).
148. a) P_3 सोध्म°; SA_1 सोष्म (for सोऽश्म°). —c) $I_{1,2,4,6}$ V S′ C क्षमं; $P_{1,2}$ St SA_1 D क्षमां (for समं). T कोषैः (for कोशैः). —d) P_2 प्रजां (for पूजां).

चीरमोचनतीर्थान्तर्गणरात्रं तपस्यता ।
ब्रह्मासननिविष्टेन ध्याननिष्पन्दमूर्तिना ॥ १४९ ॥
राज्ञा कनकवाहिन्याः सुचिरात्पुण्यकर्मणा ।
नन्दीशस्पर्शनोत्कण्ठा तेनानीयत कुण्ठताम् ॥ १५० ॥
ह्लादोदयान्नृत्तगीतक्षणे नर्त्तितुमुत्थितम् ।
प्रददौ ज्येष्ठरुद्राय सोऽवरोधवधूशतम् ॥ १५१ ॥
भुक्त्वैश्वर्यं स पर्यन्ते प्रविष्टश्चीरमोचनम् ।
पत्न्या समं ययौ राजा सायुज्यं गिरिजापतेः ॥ १५२ ॥
अथाऽशोककुलोत्पन्नो यद्वाऽन्याभिजनोद्भवः ।
भूमिं दामोदरो नाम जुगोप जगतीपतिः ॥ १५३ ॥
ऋद्धया जाज्वलितस्योच्चैर्माहेश्वरशिखामणेः ।
अद्यापि श्रूयते यस्य प्रभावो भुवनाद्भुतः ॥ १५४ ॥
हरप्रसादपात्रेण सच्चरित्रानुरागिणा ।
बबन्ध सुखिना सख्यं येन वैश्रवणः स्वयम् ॥ १५५ ॥
कुबेर इव यो राज्ञामग्र्यः स्वाज्ञाविधायिनः ।
आदिश्य गुह्यकान्दीर्घं गुद्सेतुमबन्धयत् ॥ १५६ ॥
सूदे दामोदरीये यत्तस्यासीत्स्वकृतं पुरम् ।
सेतुना तेन तत्रैच्छत्कर्तुं सोऽम्भःप्रतारणम् ॥ १५७ ॥

---

149. a) C क्षीर° (for चीर°). —d) I_1 °निस्यन्द°; $I_{4,6}$ V °निस्स्पन्द°; D St $I_{2,3}$ निःस्पन्द° (for निष्पन्द°).
150. a) I_4 SL कनकवाहिन्या (for कनकवाहिन्याः). —c) P_3 SG marg. °स्पर्धनो° (for °स्पर्शनो°). —d) I_1 कुण्टताम्; SA_1 कुण्डताम् (for कुण्ठताम्).
151. a) S′ C T °न्नृत्य° (for °न्नृत्त°). —d) P_3 om; $I_{1,2,6}$ S′ C T St स्वावराध° (for सोऽवरोध°).
152. b) $I_{1,2,4,6}$ V T S′ C प्रतिष्ठंश्ची°; P_2 प्रविष्टञ्ची°, (for प्रविष्टश्ची°).
153. I_2 om. *v.* 153-154 b.
154. b) I_1 P_2 महेश्वर° (for माहेश्वर°). —c) P_1 SA_1 अस्यापि (for अद्यापि).
155. a) SA_1 °प्रासाद° (for °प्रसाद°). $I_{1-4,6}$ V S′ P_2 C T SA_1 °मात्रेण (for °पात्रेण). —cd) $I_{2,6}$ om..
156. d) SA_3 gloss. गुडसुथो इति भाषया (for गुद्सेतु°).
157. a) SA_3 gloss दान्दुर ओडर् (for दामोदरीये).

हितं लोकोत्तरं किंचिच्चिकीर्षोरुन्नतात्मनः ।
रोहन्ति हा धिक्प्रत्यूहा मितपुण्यतया नृणाम् ॥ १५८ ॥

स हि कारयितुं यत्नैर्यतते स्म स्वमण्डले ।
दीर्घानश्ममयान्सेतूंस्तोयविप्लवशान्तये ॥ १५९ ॥

तपोविभूतयोऽचिन्त्या द्विजानामुग्रतेजसाम् ।
तादृशामपि ये कुर्युः प्रभावस्य विपर्ययम् ॥ १६० ॥

दायादादिवलैर्नष्टा दृष्टा भूयः समुत्थिता ।
श्रीर्विप्रावज्ञया राज्ञामपुनःसंभवा पुनः ॥ १६१ ॥

श्राद्धार्थमुत्थितः स्नातुं द्विजैः कैश्चिद् बुभुक्षितैः ।
प्राक्स्नानाद्भोजनं राजा स कदाचिदयाच्यत ॥ १६२ ॥

यियासुना वितस्तान्तर्यदा तेनावधीरितम् ।
तदा प्रभावात्ते तस्य तां धुनीमग्रतो व्यधुः ॥ १६३ ॥

सेयं वितस्ता दृष्ट्वैनां भोजयास्मान्स तैरिति ।
उक्तोऽपि मायाविहितामशासीत्सरिदाहृतिम् ॥ १६४ ॥

भोज्यं ददामि नाऽस्नातो विप्राः सर्पत सांप्रतम् ।
तेनेत्युक्तास्तमशपंस्ततः सर्पो भवेति ते ॥ १६५ ॥

अशेषमेकेनैवाह्ना श्रुत्वा रामायणं तव ।
शापस्य शान्तिर्भवितेत्यूचिरे ते प्रसादिताः ॥ १६६ ॥

स दामोदरसूदान्तर्धावन्दूरमुदन्यया ।
शापोष्णश्वासधूमेन जनैरद्यापि लक्ष्यते ॥ १६७ ॥

---

158. d) P_1 सित° (for मित°).
160. a) $I_{1,2,6}$ V S′ C SA_1 °यश्चित्या (for °योऽचिन्त्या).
161. a) P_3, SA_3 °वलान्न°; (for वलैर्न°).
164. a) P_{1-3} I_3 D SA_3 स्पृष्ट्वै° (for दृष्ट्वै°). —d) T °दाकृतिम् (for °दाहृतिम्).
165. I_4 om. v. 165. —a) $I_{1,2,6}$ V दधानि; S′ C T ददानि (for ददामि).
166. d) D P_{1-3} I_3 SA_3 marg. SG SR च (for ते).
167. b) SA_2 gloss तृष्णया (for उदन्यया). —c) SA_3 शोषोष्ण° for शापोष्ण°).

अथाभवन्स्वनामाङ्कपुरत्रयविधायिनः ।
हुष्कजुष्ककनिष्काख्यास्त्रयस्तत्रैव पार्थिवाः ॥ १६८ ॥

सविहारस्य निर्माता जुष्को जुष्कपुरस्य यः ।
जयस्वामिपुरस्यापि शुद्धधीः संविधायकः ॥ १६९ ॥

ते तुरुष्कान्वयोद्भूता अपि पुण्याश्रया नृपाः ।
शुष्कलेत्रादिदेशेषु मठचैत्यादि चक्रिरे ॥ १७० ॥

प्रांज्ये राज्यक्षणे तेषां प्रायः कश्मीरमण्डलम् ।
भोज्यमास्ते स्म बौद्धानां प्रव्रज्योर्जिततेजसाम् ॥ १७१ ॥

तदा भगवतः शाक्यसिंहस्य परिनिर्वृतेः ।
अस्मिन्महीलोकधातौ सार्धं वर्षशतं ह्यगात् ॥ १७२ ॥

बोधिसत्त्वश्च देशेऽस्मिन्नेको भूमीश्वरोऽभवत् ।
स च नागार्जुनः श्रीमान् षडर्हद्धनसंश्रयी ॥ १७३ ॥

अथ निष्कण्टको राजा कण्टकोत्साग्रहारदः ।
अभीर्बभूवाभिमन्युः शतमन्युरिवापरः ॥ १७४ ॥

स्वनामाङ्कं शशाङ्काङ्कशेखरं विरचय्य सः ।
परार्घ्यविभवं श्रीमानभिमन्युपुरं व्यधात् ॥ १७५ ॥

---

168. c) SA_2 gloss उष्कोरो, जोकोरो, कानेस्पुर् (for हुष्कजुष्ककनिष्का°). $I_{1,2,4,6}$ °ष्काख्यस्त्र° (for °ष्काख्यास्त्र°).

169. c) SA_2 gloss जिहासपुर (for जयस्वामिपुर°).

170. b) P_3 I_3 SA_3 पुण्याशया (for पुण्याश्रया). —c) T शुष्कक्षेत्रा°; SA_2 gloss हुखलेत्रो (for शुष्कलेत्रा°). —d) SA_3 °चैत्यानि (for °चैत्यादि).

171. b) I_4 S′ C T काश्मीर° (for कश्मीर°). —c) $I_{1,2,4,6}$ V स; S′ C T च (for स).

172. a) $I_{1,2,6}$ V S′ C T ततो (for तदा). —b) $I_{1,2,4,6}$ V C पुरनिर्वृतेः; P_{1-3} I_3 S′ D St परनिर्वृतः (for परिनिर्वृतेः). —c) $I_{1,2,4}$ C °सहलोक°; V °सहीलोक°; T °शवलोक° (for °महीलोक°).

173. b) $I_{1,2,4,6}$ V S′ C T °न्नेक° (for °न्नेको). $I_{1,2,4,6}$ V SA_2 भूम्येश्वरो (for °भूमीश्वरो). $I_{2,6}$ V भवेत्; SA_2 °वसत् (for °भवत्). —c) S′ C T तु; I_6 त (for च). —d) I_2 SA_1 °र्हन्वन°; I_4 S′ C °र्हर्वन°; V °र्हत्वन°; SA_2 gloss हर्वन् ग्रामे (for °र्हद्धन°).

174. b) S′ C T कण्टकौत्साग्र°; SA_3 gloss कण्डोर् (for कण्टकोत्साग्र°).

175. a) $I_{1-4,6}$ S′ C SA_1 °नामाङ्क°; P_3 °नामाङ्कां (for °नामाङ्कं). P_3 T SA_2 शशाङ्कार्ध° (for शशाङ्काङ्क°). —c) St T D C परार्ध्य° (for परार्घ्य°).

चन्द्राचार्यादिभिर्लब्ध्वाऽऽदेशं तस्मात्तदाऽगमम् ।
प्रवर्तितं महाभाष्यं स्वं च व्याकरणं कृतम् ॥ १७६ ॥

तस्मिन्नवसरे बौद्धा देशे प्रबलतां ययुः ।
नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः ॥ १७७ ॥

ते वादिनः पराजित्य वादेन निखिलान्बुधान् ।
क्रियां नीलपुराणोक्तामच्छिन्दन्नागमद्विषः ॥ १७८ ॥

मण्डले विप्लुताचारे विच्छिन्नबलिकर्मभिः ।
नागैर्जनक्षयश्चक्रे प्रभूतहिमवर्षिभिः ॥ १७९ ॥

हिमान्यां बौद्धबाधाय पतन्त्यां प्रतिवत्सरम् ।
शीते दार्वाभिसारादौ षण्मासान्पार्थिवोऽवसत् ॥ १८० ॥

तदा प्रभावः कोऽप्यासीद्बलिहोमविधायिनाम् ।
नानशन्यद्वशाद्विप्रा बौद्धाश्च निधनं गताः ॥ १८१ ॥

नीलमुद्दिश्य देशस्य रक्षितारमहीश्वरम् ।
काश्यपश्चन्द्रदेवाख्यस्तपस्तेपे ततो द्विजः ॥ १८२ ॥

तस्य प्रत्यक्षतां यातो नीलस्तुहिनविप्लवम् ।
न्यवारयज्जगादापि स्वपुराणविधिं पुनः ॥ १८३ ॥

आद्येन चन्द्रदेवेन शमितो यक्षविप्लवः ।
द्वितीयेन तु देशेऽस्मिन्दुस्सहो भिक्षुविप्लवः ॥ १८४ ॥

---

176. a b) $I_{1,4}$ C S′ T लब्धादेशं; St (SG SR marg.) SA_1 (before corr.) SA_3 लब्ध्वा देशात्; S′ लब्धादेशे; P_2 लब्धादेशात् (for लब्ध्वाऽऽदेशं). —d) T चन्द्र° (for स्वं च). SA_2 gloss चन्द्रव्याकरणं (for व्याकरणं).

180. c) SA_2 gloss भेम्भेर दानगले देशे (for दार्वाभिसारादौ).

181. b) $I_{1,2,4,6}$ S′ V C T St °विधायिनः (for °विधायिनाम्). —c) $I_{1-4,6}$ V S′ C T St $P_{2,3}$ °नश्यन् (for °नशन्).

182. b) $I_{1,2,4,6}$ S′ V C T °तारं महेश्वरम् (for °तारमहीश्वरम्). —d) SA_1 ततस्तेपे (for तपस्तेपे). P_3 द्विजस्ततः (for ततो द्विजः).

184. b) I_1 पक्ष°; T यज्ञ° (for यक्ष°). —d) I_3 SA_2 बौद्ध°; I_4 निक्ष° P_3 भिक्ष° (for भिक्षु°).

राजा तृतीयगोनन्दः प्राप्तराज्यस्तदन्तरे ।
यात्रायागादि नागानां प्रावर्तयत पूर्ववत् ॥ १८५ ॥

राज्ञा प्रवर्तिते तेन पुनर्नीलोदिते विधौ ।
भिक्षवो हिमदोषाश्च सर्वतः प्रशमं ययुः ॥ १८६ ॥

काले काले प्रजापुण्यैः संभवन्ति महीभुजः ।
यैर्मण्डलस्य क्रियते दूरोत्सन्नस्य योजनम् ॥ १८७ ॥

ये प्रजापीडनपरास्ते विनश्यन्ति सान्वयाः ।
नष्टं तु ये योजयेयुस्तेषां वंशानुगाः श्रियः ॥ १८८ ॥

इत्येतत्प्रतिवृत्तान्तं देशेऽस्मिन्वीक्ष्य लक्षणम् ।
भाविनां भूमिपालानां प्राज्ञैर्ज्ञेयं शुभाशुभम् ॥ १८९ ॥

नवीकृतवतो देशं तस्य वंश्यैरियं मही ।
सिद्धैः प्रवरसेनाद्यैश्चिरं भुक्ता सुकर्मभिः ॥ १९० ॥

गोनन्दान्वयिनामाद्यः स रघूणां रघुर्यथा ।
नृपतिः काश्यपीं वर्षान्पञ्चत्रिंशतिमन्वशात् ॥ १९१ ॥

वर्षषष्टिं सषण्मासैः षड्भिर्वर्षैर्विवर्जिताम् ।
विभीषणाभिधोऽरक्षत्क्षितिं गोनन्दनन्दनः ॥ १९२ ॥

इन्द्रजिद्रावणावास्तां पितापुत्रौ नृपौ क्रमात् ।
पञ्चत्रिंशत्सहार्धाश्च वर्षास्त्रिंशद्वयोर्ययुः ॥ १९३ ॥

बिन्दुरेखाच्छविर्यस्य दृष्टा भाव्यर्थशंसिनी ।
स रावणस्य पूजार्थं लिङ्गं भाति वटेश्वरः ॥ १९४ ॥

चतुःशालामठस्यान्तः कृतायाऽदायि भूभुजा ।
वटेश्वराय निखिलं तेन कश्मीरमण्डलम् ॥ १९५ ॥

---

185. a) $I_{1,2,6}$ V S′ C T °गोनर्दः (for °गोनन्दः). —b) St SA_{13} (before corr.)तृतीयो गोनन्दः प्राप्तो राज्ये तद° (for °प्राप्तराज्यस्तद°).
186. c) I_6 V S′ C हि सदोषाश्च; I_1 P_2 हिमदोषाच्च (for हिमदोषाश्च).
188. b) SA_2 नश्येयुः सहान्वयाः (for विनश्यन्ति सान्वयाः).
189. b) $I_{1-3,6}$ C SA_1 देवे°; I_4 देवी (for देशे°).
190. b) P_3 C वंशै° (for वंश्यै°). —d) $I_{1,4}$ स्वकर्म° (for सुकर्म°).
191. a) $I_{1,2,6}$ S′ C T गोनर्दा° (for गोनन्दा°).
192. d) $I_{1,2,6}$ S′ C T गोनर्द° (for गोनन्द°).
194. c) SA_3 पूजार्हं (for पूजार्थं).
195. a) I_6 V C T °शाल° (for °शाला°). —d) C T काश्मीर° (for कश्मीर°). P_1 om. 195 c—196 b.

पञ्चत्रिंशतमब्दानां क्ष्मां बुभोज महाभुजः ।
रावणक्षोणिभृत्सूनुः सार्धामन्यो विभीषणः ॥ १९६ ॥

किंनरापरनामाऽथ किंनरैर्गीतविक्रमः ।
विभीषणस्य पुत्रोऽभून्नरनामा नराधिपः ॥ १९७ ॥

सदाचारोऽपि स नृपः प्रजाभाग्यविपर्ययैः ।
व्यधाद्विषयदोषेण महानर्थपरंपराम् ॥ १९८ ॥

विहारे निवसन्नेकः किंनरग्रामवर्तिनि ।
तस्य योगबलात्कोऽपि श्रमणोऽपाहरत्प्रियाम् ॥ १९९ ॥

विहाराणां सहस्राणि तत्कोपान्निर्ददाह सः ।
अजिग्रहच्च तद्ग्रामान्द्विजैर्मध्यमठाश्रयैः ॥ २०० ॥

ऋद्धापणं राजपथैर्नीयानोज्ज्वलनिम्नगम् ।
स्फीतपुष्पफलोद्यानं स्वर्गस्येवाभिधान्तरम् ॥ २०१ ॥

दिग्जयोपार्जितैर्वित्तैर्जितवित्तेशपत्तनम् ।
वितस्तापुलिने तेन नगरं निरमीयत ॥ २०२ ॥

तत्रैकस्मिन्किलोद्याने स्वच्छस्वादुजलाञ्चितम् ।
आसीत्सुश्रवसो नाम्नो नागस्य वसतिः सरः ॥ २०३ ॥

कदाचित्तस्य दूराध्वक्लान्तो मध्यन्दिने युवा ।
छायार्थी तत्सरःकच्छं विशाखाख्योऽविशद् द्विजः ॥ २०४ ॥

सच्छायपादपतले समीरैः शमितक्लमः ।
शनैर्जलमुपस्पृश्य भोक्तुं सक्तून्प्रचक्रमे ॥ २०५ ॥

---

196. c) I_2 °क्षीणि°; S′ C T °क्षौणि° (for °क्षोणि°). —d) $I_{1,2,6}$ V सार्ध°; P_2 साधा° (sic); S′ C सार्ध्व°; (for सार्धा°).

199. a) $I_{1,6}$ विकारे; V विकारो (for विहारे). —b) SA_2 gloss कानीर् ग्राम: प्रसिद्धः (for किंनरग्राम°). —d) SA_3 gloss बौद्धः (for श्रमणः).

200. c) P_{1-3} अजिग्रहश्च (for अजिग्रहच्च).

202. b) SA_3 gloss कुबेर (for °वित्तेश°). After v. 202 युगलकम् .

203. b) C T S′ °च्चितः (for °च्चितम्). —d) $I_{2,4,6}$ V सरः (for सरः).

204. a) D (suggests) कदाचिदथ (for कदाचित्तस्य). —b) I_2 मध्या; I_6 मध्ये°; S′ V C T मध्य° (for मध्यं°).

205. c) SA_3 सरोजल° (for शनैर्जल°).

तान्पाणौ गृह्णतैवाथ तेन तीरविहारिभिः ।
पूर्वमाकर्णितो हंसैः शुश्रुवे नूपुरध्वनिः ॥ २०६ ॥

निर्गते मञ्जरीकुञ्जादपश्यत्पुरतस्ततः ।
कन्ये नीलनिचोलिन्यौ स केचिच्चारुलोचने ॥ २०७ ॥

कर्णिकापद्मरागाब्जनाललीलायितस्पृशा ।
मनोज्ञधवलापाङ्गे तनीयोऽञ्जनरेखया ॥ २०८ ॥

हारिनेत्राञ्चलैर्मन्दमारुतान्दोलनाकुलैः ।
सनाथांऽसयुगे रूपपताकापल्लवैरिव ॥ २०९ ॥

ते शशाङ्कानने दृष्ट्वा शनैरभ्यर्णमागते ।
विररामाशनारम्भान्मुहुर्व्रीडाजडीकृतः ॥ २१० ॥

भुञ्जाने कच्छगुच्छानां शिम्बीरम्बुजलोचने ।
ते पुनर्दृष्टवानग्रे किंचिद्व्यापारितेक्षणः ॥ २११ ॥

आकृतेर्हा धिगीदृश्या भोज्यमेतदिति द्विजः ।
ध्यायन्कृपार्द्रः संमान्य स ते सक्तूनभोजयत् ॥ २१२ ॥

उपनिन्ये च संगृह्य पुटकैश्चटसीकृतैः ।
तयोः पानाय पानीयं सरसः स्वच्छशीतलम् ॥ २१३ ॥

आचान्ते शुचितां प्राप्ते कृतासनपरिग्रहे ।
ततश्च वीजयन्पर्णतालवृन्तैरभाषत ॥ २१४ ॥

भवत्यौ पूर्वसुकृतैः कैश्चित्संप्राप्तदर्शनः ।
चापलाद्विप्रसुलभात्प्रष्टुमिच्छत्ययं जनः ॥ २१५ ॥

---

207. a) P_2 निर्गतो (for निर्गते).

208. a) SA_2 gloss कर्णिकायां कर्णाभरणे (for कर्णिका°).

209. a) SA_3 gloss अंशुक (for अञ्चलैः). After *v.* 209 तिलकम्.

210. d) $I_{1, 2, 4, 6}$ V C T व्रीड° (for व्रीडा°).

211. a) SA_3 gloss कच्छवधान्ये (for कच्छगुच्छानां). —b) SA_3 gloss हिम् इति भाषया (for शिम्बीः). —c) $I_{2,6}$ V °र्घृष्टवा°; P_1 °र्सृष्टवा°; I_4 °र्पृष्टवा° (for °र्दृष्टवा°).

212. c) $I_{2, 4, 6}$ V कृपार्द्राः (for कृपार्द्रः).

213. b) $I_{1, 2, 6}$ V S′ C T °श्चाटुसीत्कृतैः; I_4 °श्चाटुमीकृतैः; P_2 °च्चटसीकृतैः; SA_1 °श्चटसीत्कृतैः; SA_3 gloss जलाहरणभाण्डतया विरचितैः पुटकैः पक्षपुटैः (for °श्चटसीकृतैः). —d) SA_1 °शीत्कृतम् (for °शीतलम्).

कल्याणिनीभ्यां कतमा पुण्या जातिः परिष्कृता ।
कुत्र वा क्लान्तमेतादृग्विरसं येन भुज्यते ॥ २१६ ॥

एका तमूचे विद्ध्यावामस्य सुश्रवसः सुते ।
स्वादु भोक्तव्यमप्राप्तं किमीदृङ् नोपभुज्यते ॥ २१७ ॥

पित्रा विद्याधरेन्द्राय प्रदातुं परिकल्पिता ।
इरावत्यहमेषा च चन्द्रलेखा यवीयसी ॥ २१८ ॥

पुनर्द्विजोऽभ्यधादेवं नैष्किञ्चन्यं किमस्ति वः ।
ताभ्यामवादि तातोऽत्र हेतुं वेत्ति स पृच्छ्यताम् ॥ २१९ ॥

ज्येष्ठेऽत्र कृष्णद्वादश्यां यात्रायै तक्षकस्य तम् ।
आगतं चूडया तोयस्यन्दिन्या ज्ञास्यसि ध्रुवम् ॥ २२० ॥

द्रक्ष्यस्यावामपि तदा तदभ्यर्णकृतस्थिती ।
इत्युक्त्वा फणिकन्ये ते क्षणादास्तां तिरोहिते ॥ २२१ ॥

क्रमात्प्रववृते सोऽथ नटचारणसंकुलः ।
प्रेक्षिलोकसमाकीर्णस्तत्र यात्रामहोत्सवः ॥ २२२ ॥

द्विजोऽपि कौतुकाकृष्टः पर्यटन्नङ्गमञ्जसा ।
कन्योक्तचिह्नज्ञातस्य नागस्याऽन्तिकमाययौ ॥ २२३ ॥

पार्श्वस्थिताभ्यां कन्याभ्यां पूर्वमावेदितोऽथ सः ।
द्विजन्मने व्याजहार स्वागतं नागनायकः ॥ २२४ ॥

ततः कथान्तरे क्वाऽपि पृष्टः कारणमापदाम् ।
जगाद तं द्विजन्मानं निःश्वस्य श्वसनाशनः ॥ २२५ ॥

---

216. b) P_2 °र्वहिष्कृता (for °परिष्कृता).
217. P_1 om.; SA_3 marg. *v.* 217. —c) $I_{1,2,6}$ °प्राप्यं; I_4 °माप्राप्यं; S′ C T °मप्राप्य (for °प्राप्तं).
218. c) $I_{1,2,4,6}$ S′ V C T मे (for च).
219. d) P_3 subst. कारणं पृच्छ्यतामिति.
220. a) $P_{2,3}$ St ज्यैष्ठे (for ज्येष्ठे). —c) $P_{1,2}$ SA_1 (before corr.) D I_3 S′ चूलया (for चूडया).
221. b) P_1 T तदा° (for तद°).
222. c) SA_3 gloss प्रेक्षिकः (for प्रेक्षि°).
224. b) SA_3 °वेदिताय (for °वेदितोऽथ).
225. d) SA_3 gloss नागः (for श्वसनाशनः).

अभिमानवतां ब्रह्मन्युक्तायुक्तविवेकिनाम् ।
युज्यतेऽवश्यभोग्यानां दुःखानामप्रकाशनम् ॥ २२६ ॥

परदुःखं समाकर्ण्य स्वभावसुजनो जनः ।
उपकारासमर्थत्वात्प्राप्नोति हृदयव्यथाम् ॥ २२७ ॥

वृत्तिं स्वां बहु मन्यते हृदि शुचं धत्तेऽनुकम्पोक्तिभि-
र्व्यक्तं निन्दति योग्यतां मितमतिः कुर्वन्स्तुतीरात्मनः ।
गर्ह्योपायनिषेवणं कथयति स्थास्नुं वदन्व्यापदं
श्रुत्वा दुःखमरुंतुदां वितनुते पीडां जनः प्राकृतः ॥ २२८ ॥

अत एव विवेक्तॄणां यावदायुः स्वमानसे ।
जीर्णानि सुखदुःखानि दहत्यन्ते चिताऽनलः ॥ २२९ ॥

कः स्वभावगभीराणां लक्षयेद्बहिरापदम् ।
बालापत्येन भृत्येन यदि सा न प्रकाश्यते ॥ २३० ॥

तदस्मिन्नेतयोर्बाल्याद्वस्तुनि व्यक्तिमागते ।
तवाग्रे गोपनं साधो न ममाऽप्युपपद्यते ॥ २३१ ॥

त्वयाऽप्यस्मद्धितार्थाय निसर्गसरलात्मना ।
ईषत्प्रयासः कल्याणिन्क्रियतां यदि शक्यते ॥ २३२ ॥

योऽयं तरुतले मुण्डश्चूडालो दृश्यते व्रती ।
अमुना सस्यपालेन कान्दिशीकाः कृता वयम् ॥ २३३ ॥

अभुक्ते मान्त्रिकैरन्ने नवे नागैर्न भुज्यते ।
अयं नात्ति च तत्तेन समयेन हता वयम् ॥ २३४ ॥

---

227. a) P_{1-3} I_3 यदाकर्ण्य (for समाकर्ण्य). —b) I_1 सुभाव° (for स्वभाव°).

228. b) SA_1 °मतेः (for °मतिः). SA_1 स्तुतेरा° (for स्तुतीरा°). —c) $I_{2-4,6}$ $P_{1,2}$ V °निषेवनं (for °निषेवणं). —d) SA_2 पुनः (for जनः).

229. a) $I_{1,2,4,6}$ S′ V C विवक्तॄणां (for विवेक्तॄणां). —c) $I_{1,2,4,6}$ V दीर्घानि; C S′ दीर्घाणि (for जीर्णानि). —d) I_6 चितानिलः (for चितानलः).

232. a) P_3 SA_2 °दाने (for °र्थाय). —c) $I_{2,3,6}$ $P_{1,2}$ कल्याणि (for कल्याणिन्).

233. ab) $I_{1,4}$, V S′ C T मुण्डचूडालो (for मुण्डश्चूडालो). —c) Ś C T शस्य° (for सस्य°).

234. a) $I_{1,2,6}$ S′ V °रन्नैः (for °रन्ने). I_3 SA_3 subst. अभुक्तं मान्त्रिकैरन्नं नवं नागैर्न भुज्यते (for ab).

क्षेत्राणि रक्षत्येतस्मिन्दृष्ट्वाऽपि फलसंपदम् ।
भोक्तुं नैव समर्थाः स्मः प्रेता इव सरिज्जलम् ॥ २३५ ॥
तथा कुरु यथा भ्रश्येत्समयादेष नैष्ठिकः ।
योग्यां प्रतिक्रियां विद्मो वयमप्युपकर्तृषु ॥ २३६ ॥
स तथेति ततो नागमुक्त्वा यत्नपरो द्विजः ।
अचिन्तयद्दिवारात्रं सस्यपालस्य वञ्चनाम् ॥ २३७ ॥
गूढं तस्य बहिःक्षेत्रकुटीगर्भकृतस्थितेः ।
पच्यमानान्नभाण्डान्तर्नवान्नं न्यक्षिपत्ततः ॥ २३८ ॥
भुञ्जान एव तत्तस्मिन्क्षणादेव जहार सः ।
अहीन्द्रः करकासारवर्षी स्फीतां फलश्रियम् ॥ २३९ ॥
तं च व्युत्क्रान्तदारिद्र्यः सरसोऽभ्यर्णमागतम् ।
कृतोपकारमन्येद्युर्निजोर्वीमनयद् द्विजम् ॥ २४० ॥
स तत्र पितुरादेशात्कन्याभ्यां विहितार्हणः ।
अमर्त्यसुलभैर्भोगैरतोष्यत दिने दिने ॥ २४१ ॥
कालेन सर्वानामन्त्र्य स्वां भुवं गन्तुमुद्यतः ।
प्रतिश्रुतवरं नागं चन्द्रलेखामयाचत ॥ २४२ ॥
संबन्धाऽयोग्यमपि तं कृतज्ञत्ववशंवदः ।
संविभेजे स भुजगः कन्यया च धनेन च ॥ २४३ ॥
एवं नागवराऽवातश्रियस्तस्य द्विजन्मनः ।
महान् नरपुरे कालस्तैस्तैर्नित्योत्सवैर्ययौ ॥ २४४ ॥
भुजगेन्द्रतनूजाऽपि तं पतिं पतिदेवता ।
अतोषयत्परार्घ्यश्रीः शीलाचारादिभिर्गुणैः ॥ २४५ ॥

---

235. a) $I_{1,2}$ S′ V C रक्षत्वे° (for रक्षत्ये°). —b) P_1 सृष्ट्वा (for दृष्ट्वा).
237. c) $I_{1-4,6}$ $P_{1,2}$ S′ V C T SA_1 D दिवारात्रौ (for दिवारात्रम्). —d) S′ C T शस्य° (for सस्य°). $I_{2,6}$, V वञ्चनात् ; $P_{1,3}$ वञ्चनं (for वञ्चनाम्).
238. d) $P_{1,3}$ I_3 V D SG SR SA_1 (after corr.) नवान्नान्यक्षिपत् (for नवान्नं न्यक्षिपत्).
242. c) S′ C T °श्रुतं वरं (for °श्रुतवरं).
245. c) $I_{2,6}$, S′ C T °र्घ्यश्रीः (for °र्घ्यश्रीः).

तस्यां कदाचित्सौधाग्रस्थितायां प्राङ्गनाद्बहिः ।
आतपायोज्झितं धान्यं बुभुजे विहरन्हयः ॥ २४६ ॥

तं वारयितुमाहूता भृत्या नासन्गृहे यदा ।
शिञ्जानमञ्जुमञ्जीरा सा तदाऽवातरत्स्वयम् ॥ २४७ ॥

एकहस्तधृतावेगस्रस्तशीर्षांशुकान्तया ।
तया पाणिसरोजेन धावित्वा सोऽथ ताडितः ॥ २४८ ॥

भोज्यमुत्सृज्य यातस्य फणिस्त्रीस्पर्शतस्ततः ।
सौवर्णी पाणिमुद्राऽङ्के तुरगस्योदपद्यत ॥ २४९ ॥

तस्मिन्काले नरो राजा चारैस्तां चारुलोचनाम् ।
श्रुत्वा द्विजवधूं तस्थौ प्रागेवाऽङ्कुरितस्मरः ॥ २५० ॥

तस्य धावन्तमुन्मत्तमन्तःकरणवारणम् ।
बलान्नियमितुं नासीदपवादभयाङ्कुशः ॥ २५१ ॥

तस्मिन्नुद्वृत्तरागाग्निविप्लवे भूपतेः पुनः ।
उवाह हयवृत्तान्तो हसवातानुकारिताम् ॥ २५२ ॥

चक्रे पर्यस्तमर्यादः सरलाङ्गुलिशोभिना ।
स काञ्चनकराङ्केन शशाङ्केनेव वारिधिः ॥ २५३ ॥

व्रीडानिगडनिर्मुक्तो दूतैराकूतशंसिभिः ।
तामुपच्छन्दयन्सोऽथ सुन्दरीमुदवेजयत् ॥ २५४ ॥

सर्वोपायैरसाध्यां च विप्रस्तत्पतिरप्यसौ ।
तेनाऽयाच्यत लुब्धेन रागान्धानां कुतस्त्रपा ॥ २५५ ॥

अथ निर्भर्त्सनां तस्मादपि प्राप्तवताऽसकृत् ।
हठेन हर्तुं तां राज्ञा समादिश्यन्त सैनिकाः ॥ २५६ ॥

तैर्गृहाग्रे कृतास्कन्दो निर्गत्याऽन्येन वर्त्मना ।
त्राणार्थी नागभवनं सजानिः प्राविशद् द्विजः ॥ २५७ ॥

---

248. a) P_3 एकहस्ते (for एकहस्त°). I_4 om. °धृतावेगस्रस्त°.
249. c) $I_{1,4,6}$ V S′ $P_{1,2}$ C T D (and suggests मुद्राङ्के इत्युचितम्) SA_1 °द्राङ्के; I_3 °त्रांके (for °द्राङ्के).
251. b) P_3 °कारणम् (for °वारणम्).
252. a) $I_{1,3}$ °न्नुद्वृत्त°; C T °न्नुद्वृद्ध° (for °न्नुद्वृत्त°).
257. b) $P_{1,2}$ I_3 वर्त्मणा (for वर्त्मना). —d) T सजामिः (for सजानिः).

ताभ्यामभ्येत्य वृत्तान्ते ततस्तस्मिन्निवेदिते ।
क्रोधाऽन्धः सरसस्तस्मादुज्जगाम फणीश्वरः ॥ २५८ ॥
उद्गर्जज्जिह्मजीमूतजनितध्वान्तसंततिः ।
स घोराशनिवर्षेण ददाह सपुरं नृपम् ॥ २५९ ॥
दग्धप्राण्यङ्गविगलद्वसासृक्स्नेहवाहिनी ।
मयूरचन्द्रकाङ्केव वितस्ता समपद्यत ॥ २६० ॥
शरणाय प्रविष्टानां भयाच्चक्रधरान्तिकम् ।
मुहूर्तान्निरदह्यन्त सहस्राणि शरीरिणाम् ॥ २६१ ॥
मधुकैटभयोर्मेदः प्रागूर्वोरिव चक्रिणम् ।
दग्धानां प्राणिनां तत्तत्तदा सर्वाङ्गमस्पृशत् ॥ २६२ ॥
स्वसा सुश्रवसो नागी रमण्याख्याऽद्रिगह्वरात् ।
साहायकायाऽश्मराशीन्समादाय तदाऽऽययौ ॥ २६३ ॥
सा योजनाधिके शेषे मार्गस्यारात्सहोदरम् ।
कृतकार्यं निशम्याऽश्मवर्षं ग्रामेषु तज्जहौ ॥ २६४ ॥
योजनानि ततः पञ्च जाता ग्रामधरा खिला ।
सा रमण्याटवीत्यद्याऽप्यस्ति स्थूलशिलाविला ॥ २६५ ॥
घोरं जनक्षयं कृत्वा प्रातः सानुशयोऽप्यहिः ।
लोकापवादनिर्विण्णः स्थानमुत्सृज्य तद्ययौ ॥ २६६ ॥
दुग्धाब्धिधवलं तेन सरो दूरगिरौ कृतम् ।
अमरेश्वरयात्रायां जनैरद्यापि दृश्यते ॥ २६७ ॥
श्वशुरानुग्रहान्नागीभूतस्यापि द्विजन्मनः ।
जामातृसर इत्यन्यत्तत्र च प्रथितं सरः ॥ २६८ ॥
प्रजानां पालनव्याजान्निश्शङ्कक्षयकारिणः ।
अकस्मादन्तकाः केचित्संभवन्ति तथाविधाः ॥ २६९ ॥

---

262. a) I_4 °मेंतः (for °मेंदः). c) $I_{3,4}$ SA_3 तं तु (for तत्तत्).
263. c) $I_{1,2,4,6}$ P_3 °राशीः (for °राशीन्).
264. a) $I_{1-4,6}$ C सयो° (for सा यो°). —b) I_3 SA_1 °रान्महोदरम् (for °रात्सहोदरम्).
265. b) $I_{1,2,4,6}$ V S′ C T शिला (for खिला). —c) S′ P_2 C T D रमण्यटवी°; SA_2 gloss रमे आङ् इति प्रसिद्धः (for रमण्याटवी). —d) SA_1 (before corr.) °प्यस्थि° (for °प्यस्ति).

अद्याऽपि तत्पुरं दग्धं श्वभ्रीभूतं च तत्सरः ।
उपचक्रधरं दृष्ट्वा कथेयं स्मर्यते जनैः ॥ २७० ॥

राज्ञां रागः कियान्नाम दोषः स्वल्पदृशां मते ।
तत्तस्य तेन संवृत्तं यन्नाऽभूत्काऽपि कस्यचित् ॥ २७१ ॥

सतीदैवतविप्राणामप्येकस्य प्रकोपतः ।
श्रुतो हि प्रतिवृत्तान्तं त्रैलोक्यस्यापि विप्लवः ॥ २७२ ॥

चत्वारिंशतमब्दान्स मासैश्चोनां त्रिभिः समाम् ।
भुवं भुक्त्वा क्षितिवृषा दुर्नयेन क्षयं ययौ ॥ २७३ ॥

अप्यल्पकालसंदृष्टप्राकाराट्टालमण्डलम् ।
तत्किंनरपुरं लेभे गन्धर्वनगरोपमाम् ॥ २७४ ॥

एकस्तु तनयस्तस्य वैचित्र्यात्कर्मणां गतेः ।
स्वधात्र्या विजयक्षेत्रं नीतः प्राणैर्न तत्यजे ॥ २७५ ॥

राजा सिद्धाभिधः सोऽथ तथा निश्शेषितं जनम् ।
नवीचकार जलदो दावदग्धमिवाचलम् ॥ २७६ ॥

इतिवृत्तं महाश्चर्यं तस्य पित्र्यं महामतेः ।
संसारासारताज्ञाने प्राप पुण्योपदेशताम् ॥ २७७ ॥

भोगयोगेन मालिन्यं नेतुं मध्यगतोऽपि सः ।
न शक्यते स्म पङ्केन प्रतिमेन्दुरिवामलः ॥ २७८ ॥

दर्पज्वरोष्णभूपालमध्ये निर्ध्यायतोऽनिशम् ।
सुधासूतिकलामौलिं तस्यैवोल्लाघतोद्ययौ ॥ २७९ ॥

---

270. b) $I_{2,6}$ S′ V C T शुभ्री° (for श्वभ्री°).

271. a) I_3 SA_3 राज्ञो (for राज्ञां). I_3 P_2 SA SG SR कियन्नाम (for कियान्नाम). —b) $P_{1,3}$ मतः; T मतेः (for मते). —d) I_2 S′ V यत्ना° (for यन्ना°). P_2 S′ C T °त्कापि (for °त्क्वापि).

273. d) S′ C T दुर्णयेन (for दुर्नयेन).

274. a) I_3 P_3 SA_3 अत्यल्प° (for अप्यल्प°).

275. b) S′ C T वैचित्रात् (sic) (for वैचित्र्यात्). —c) S′ C T स्वधात्रा (sic (for स्वधात्र्या).

277. b) S′ C पित्रं (sic) (for पित्र्यं). —c) $I_{1,2,6}$ S′ V C T °ताज्ञेन; I_4 °ताज्ञेन (sic) (for °ताज्ञाने).

279. a) $I_{1,2,6}$ °रोस्म°; C T °रोष्म° (for °रोष्ण°). —b) SL भृशम् (for अनिशम्). —d) C T °ल्लाघतो ययौ (for °ल्लाघतोद्ययौ).

गणितं गुणिना तेन मणींस्तृणमिवोज्झता ।
खण्डेन्दुमण्डनार्चायां मण्डनत्वमखण्डितम् ॥ २८० ॥

राज्ञस्तस्यैव राजश्रीः परलोकानुगाऽभवत् ।
यस्तामयोजयद् भूमौ धर्मेणाऽव्यभिचारिणा ॥ २८१ ॥

षष्टिमब्दान्प्रशास्योर्वीमासन्नानुचरान्वितः ।
आरुरोह सदेहोऽसौ लोकाञ्शशिशिखामणेः ॥ २८२ ॥

भृत्या नरं समाश्रित्य प्रययुः शोचनीयताम् ।
तत्सुतं तु समालंब्य प्रभुं भुवनवन्द्यताम् ॥ २८३ ॥

यात्याश्रितः किल समाश्रयणीयलभ्यां
निन्द्यां गतिं जगति सर्वजनार्चितां वा ।
गच्छत्यधस्तृणगुणः श्रितकूपयन्त्रः
पुष्पाश्रयी सुरशिरोभुवि रूढिमेति ॥ २८४ ॥

सिद्धः सिद्धः सदेहोऽयमिति शब्दं सुरा दिवि ।
प्राघोषयंस्ताडयन्तः पटहं सप्त वासरान् ॥ २८५ ॥

उत्पलाक्ष इति ख्यातिं पेशलाक्षतया गतः ।
तत्सूनुस्त्रिंशतं सार्धां वर्षाणामन्वशान्महीम् ॥ २८६ ॥

तस्य सूनुर्हिरण्याक्षः स्वनामाङ्कं पुरं व्यधात् ।
क्ष्मां सप्तत्रिंशतिं वर्षान्सप्त मासांश्च भुक्तवान् ॥ २८७ ॥

हिरण्यकुल इत्यस्य हिरण्योत्सकृदात्मजः ।
षष्टिं षष्टिं वसुकुलस्तत्सूनुरभवत्समाः ॥ २८८ ॥

---

281. c) $I_{1-3, 6}$ P_{1-3} C °यद्धूतो; S' °यद्भूतौ; T °यद्धुतो; St D °यद्धूतों (for °यद् धूर्धौ or °यद् भूमौ suggested). —d) I_3 P_2 SA_3 धर्मेण व्य° (for धर्मेणाव्य°).

283. d) SA_1 °वन्ध्यताम् (for °वन्द्यताम्).

284. b) $I_{1, 2, 4, 6}$ °चिंतं (for °चिंतां).

285. c) $I_{1, 2, 4, 6}$ $P_{1, 2}$ V S' D (suggests प्राघोषयन्) C T प्रोद्घोष° (for प्राघोष°). $I_{1,2,4,6}$ °तानुयन्तः; S' C T °न्तो ह्यनयन्; V om. (for ताडयन्तः).

286. b) $I_{1, 2, 4, 6}$ V SA_1 पेशलाक्षितया (for पेशलाक्षतया).

287. b) SA_2 gloss रण्येल (for स्वनामाङ्कं) and adds a note substituting for, b, 'स्वनामाङ्कपुरप्रणीः' इत्यपि पाठः. —c) S' C T सप्तत्रिंशतं; I_3 P_2 SA सप्तार्त्रिंशतिं (for सप्तत्रिंशतिं).

288. b) S' C T °ण्याक्षस्य चा° (for °ण्योत्सकृदा°). —c) $I_{1, 2, 4, 6}$ V वसुकुल°; S' वसुष्कुल°; C T च मुकुल° (for वसुकुल°).

अथ म्लेच्छगणाकीर्णे मण्डले चण्डचेष्टितः ।
तस्याऽऽत्मजोऽभून्मिहिरकुलः कालोपमो नृपः ॥ २८९ ॥

दक्षिणां सान्तकामाशां स्पर्धया जेतुमुद्यता ।
यन्मिषादुत्तरहरिद्भिभारान्यमिवान्तकम् ॥ २९० ॥

सान्निध्यं यस्य सैन्यान्तर्हन्यमानाशनोत्सुकान् ।
अजानन्गृध्रकाकादीन्दृष्ट्वाऽग्रे धावतो जनाः ॥ २९१ ॥

दिवारात्रं हतप्राणिसहस्रपरिवारितः ।
योऽभूद् भूपालवेतालो विलासभवनेष्वपि ॥ २९२ ॥

बालेषु करुणा स्त्रीषु घृणा वृद्धेषु गौरवम् ।
न बभूव नृशंसस्य यस्य घोराकृतेर्व्रतः ॥ २९३ ॥

स जातु देवीं संवीतसिंहलांशुककञ्चुकाम् ।
हैमपादाङ्कितकुचां दृष्ट्वा जज्वाल मन्युना ॥ २९४ ॥

सिंहलेषु नरेन्द्राङ्घ्रिमुद्राङ्कः क्रियते पटः ।
इति कञ्चुकिना पृष्टेनोक्तो यात्रामदात्ततः ॥ २९५ ॥

तत्सेनाकुम्भिदानाम्भोनिम्नगाकृतसंगमः ।
यमुनालिङ्गनप्रीतिं प्रपेदे दक्षिणार्णवः ॥ २९६ ॥

स सिंहलेन्द्रेण समं संरम्भादुदपाटयत् ।
चिरेण चरणस्पृष्टप्रियालोकनजां रुषम् ॥ २९७ ॥

दूरात्तत्सैन्यमालोक्य लङ्कासौधैर्निशाचराः ।
भूयोऽपि राघवोद्योगमाशङ्क्य प्रचकम्पिरे ॥ २९८ ॥

स तत्रान्यं नृपं दत्त्वा तीव्रशक्तिरुपाहरत् ।
पटं यमुषदेवाख्यं मार्ताण्डप्रतिमाङ्कितम् ॥ २९९ ॥

---

294. b) SA_2 gloss सिङ्गालद्वीप (for सिंहलां°). —c) $I_{1,2,4,6}$ P_3 V S′ C T हेम° (for हैम°).
295. d) $I_{1,2,4,6}$ °नोक्ता (for °नोक्तो). S′ C T °मधात्ततः (for °मदात्ततः).
297. d) SA_1 (before corr.) रुजम् (for रुषम्).
298. b) P_1 °सौधन्नि° (for °सौधैर्नि°).
299. b) $I_{1,2,4,6}$ V S′ C °शक्तिमपा°; T SA_1 °शक्तिरपा° (for °शक्तिरुपा°). —d) S′ C मार्त्तण्ड° (for मार्ताण्ड°).

व्यावृत्य चोलकर्णाटलाटादींश्च नरेश्वरान् ।
सिन्धुरानिव गन्धेभो गन्धेनैव व्यदारयत् ॥ ३०० ॥

तस्मिन्प्रयाते प्राप्तेभ्यः शशंसुस्तत्पराभवम् ।
नगर्यो नरनाथेभ्यस्त्रुट्यदट्टालमेखलाः ॥ ३०१ ॥

काश्मीरं द्वारमासाद्य श्वभ्रभ्रष्टस्य दन्तिनः ।
श्रुत्वा स त्रासजं घोषं तोषरोमाञ्चितोऽभवत् ॥ ३०२ ॥

तदाकर्णनसंरम्भे सहर्षोऽथ विरुद्धधीः ।
शतमन्यद्गजेन्द्राणां हठेन निरलोठयत् ॥ ३०३ ॥

स्पर्शोऽङ्गानि यथा वाचं कीर्तनं पापिनां तथा ।
संदूषयेदतो नोक्ता तस्यान्याऽपि नृशंसता ॥ ३०४ ॥

को वेत्त्यद्भुतचेष्टानां कृत्यं प्राकृतचेतसाम् ।
धर्मं सुकृतसंप्राप्तिहेतोः सोऽपि यदाददे ॥ ३०५ ॥

श्रीनगर्यां हि दुर्बुद्धिर्विदधे मिहिरेश्वरम् ।
होलाडायां स मिहिरपुराख्यं पृथुपत्तनम् ॥ ३०६ ॥

अग्रहाराञ्जगृहिरे गान्धारब्राह्मणास्ततः ।
समानशीलास्तस्यैव ध्रुवं तेऽपि द्विजाधमाः ॥ ३०७ ॥

---

300. b) C T °नाटादींश्च (for °लाटादींश्च). —d) $I_{1, 2, 4, 6}$ S′ V P_3 C व्यधारयत् (for व्यदारयत्).

302. a) SA_2 gloss तदारभ्य हस्तिवज्ञ इति प्रसिद्धः प्रदेशवर्त्म येन आयातो मिहिरकुलः (for द्वार°). I_4 om. *v.* 302 a—303 b.

305. a) P_3 I_3 SA_3 वेत्युद्वृत्त° (for वेत्यद्भुत°).

306. c) I_2 हीलाडायां; S′ C T होलाह्वायां; St (emended) होलडायां; SL SA होलाळायां cf. vii. 1228, viii 733, 1432 (for होलाडायां).

307. b) P_{1-3} St $I_{3, 4}$ गान्धारा ब्रा° (for गान्धारब्रा°). I_1 S′ V C T ins. after *v.* 307.

भगिनीवर्गसंभोगनिर्लज्जा म्लेच्छवंशजाः ।
स्नुषासंगतिसक्ताश्च दारदाः सन्ति पापिनः ॥ ३०८ ॥

वस्तुभावस्तथा भौट्टा भार्याविक्रयकारिणः ।
परोपभोगितास्तेषां निर्लज्जास्तर्हि योषितः ॥ ३०९ ॥

मेघागमः फणिभुजं प्रथितान्धकारः
प्रीणाति हंसममलो जलदात्ययश्च ।
प्रीतेः समानरुचितैव भवेन्निमित्तं
दातुः प्रतिग्रहकृतश्च परस्परस्य ॥ ३०८ ॥

स वर्षसप्ततिं भुक्त्वा भुवं भूलोकभैरवः ।
भूरिरोगार्दितवपुः प्राविशज्जातवेदसम् ॥ ३०९ ॥

सोऽयं त्रिकोटिहा मुक्तो यः स्वात्मन्यपि निर्घृणः ।
देहत्यागेऽस्य गगनादुच्चचारेति भारती ॥ ३१० ॥

इत्यूचुर्ये मते तेषां स एव परिहारदः ।
खण्डयन्वीतघृणतामग्रहारादिकर्मभिः ॥ ३११ ।

आक्रान्ते दारदैर्भौट्टैर्म्लेच्छैरशुचिकर्मभिः ।
विनष्टधर्मे देशेऽस्मिन्पुण्याचारप्रवर्तनम् ॥ ३१२ ॥

आर्यदेश्यान्स संस्थाप्य व्यतनोद्दारुणं तपः ।
संकल्प्य स्ववपुर्दाहं प्रायश्चित्तक्रियां व्यधात् ॥ ३१३ ॥

अत एवाऽग्रहाराणां सहस्रं प्रत्यपादयत् ।
गान्धारदेशजातेभ्यो द्विजेभ्यो विजयेश्वरे ॥ ३१४ ॥

क्षुरखड्गासिधेन्वादिपूर्णे यः फलके तदा ।
वह्निप्रदीप्ते सहसा पर्यन्ते स्वां तनुं जहौ ॥ ३१५ ॥

इत्येतस्मिञ्जनाम्नाये केचिदव्यभिचारिणि ।
प्राहुः पुरुषसिंहस्य क्रौर्यं तस्याविगर्हितम् ॥ ३१६ ॥

ये नागेन रुषा प्लुष्टे नगरे प्राभवन्खशाः ।
तेषां नाशाय वृत्तान्तं पूर्वोक्तं जगदुः परे ॥ ३१७ ॥

अवतारयतस्तस्य चन्द्रकुल्याभिधां नदीम् ।
अशक्योन्मूलना मध्ये शिलाऽभूद्विघ्नकारिणी ॥ ३१८ ॥

---

308. b) $I_{1,2,6}$ °व्ययश्च (for °ल्ययश्च). —c) $I_{1-4,6}$ P_{1-3} S V C T St SL D (suggests निदानम्) नितान्तं (for निमित्तम्). —d) $I_{1,2,4,6}$ V SA_1 °ग्रहहृतश्च (for °ग्रहकृतश्च).
310. c) S′ C T गगणा° (sic) (for गगना°).
312. a) $I_{2,6}$ V °र्भौट्टै°; V C T °र्भाट्टै° (for °भौट्टै°).
313. a) $I_{1,2,4,6}$ P_3 V S′ C T °देशान् (for °देश्यान्).
315. a) $I_{1,2,6}$ S′ C T खुर°; I_4 खर° (for क्षुर°). T °धन्वादि° (for °धेन्वा°).
316. After this *v.* कुलकम्.

ततः कृततपाः स्वप्ने देवैरुक्तः स भूपतिः ।
यक्षः शिलायां बलवान्ब्रह्मचार्यत्र तिष्ठति ॥ ३१९ ॥
साध्वी स्पृशति चेदेनां निरोद्धुं न स शक्नुयात् ।
ततोऽपरेद्युः स्वप्नोक्तं शिलायां तेन कारितम् ॥ ३२० ॥
तासु तासु कुलस्त्रीषु व्यर्थयत्नास्वथाचलत् ।
चन्द्रवत्याख्यया स्पृष्टा कुलाल्या सा महाशिला ॥ ३२१ ॥
कोटित्रयं नरपतिः क्रुद्धस्तेनागसा ततः ।
सपतिभ्रातृपुत्राणामवधीत्कुलयोषिताम् ॥ ३२२ ॥
इयं चान्यमते ख्यातिः प्रथते तथ्यतः पुनः ।
अभव्या सनिमित्ताऽपि प्राणिहिंसा गरीयसी ॥ ३२३ ॥
एवं क्षुद्रोऽपि यद्राजा संभूय न हतो जनैः ।
तत्कर्म कारयद्भिस्तद्दैवतैरेव रक्षितः ॥ ३२४ ॥
प्रजापुण्योदयैस्तीव्रैश्चिरात्तस्मिन्क्षयं गते ।
बकस्तत्प्रभवः पौरैः सदाचारोऽभ्यषिच्यत ॥ ३२५ ॥
तत्रापि पूर्वसंस्कारादुक्तत्रासं दधे जनः ।
श्मशानविहिते लीलावेश्मनीव नृपास्पदे ॥ ३२६ ॥
अतिसंतापदाज्जातः स जनाह्लादकोऽभवत् ।
जलौघो जलदश्यामात्तपात्ययदिनादिव ॥ ३२७ ॥
लोकान्तरादिवायातं मेने धर्मं तदा जनः ।
अभयं च परावृत्तं प्रवासाद्गृहनादिव ॥ ३२८ ॥

---

319. c) $I_{2,6}$ यक्षा; I_4 S′ C यक्षाः (for यक्षः).
320. a) P_3 चेदेनं (for चेदेनां). —b) $I_{1,2,4,6}$ S′ C T SA_1 न च (for न स).
321. d) $I_{1,2,4,6}$ V स महा° (for सा महा°).
325. c) $I_{1-4,6}$ $P_{1,2}$ S′ V C T D SA SR SG एकस्त° (for बकस्त°).
326. b) $I_{1,2,4,6}$ V °मुक्तत्रासं; $P_{1,3}$ °दुक्तात्रासं; S′ °मुक्तासन्द° (sic); C °मुक्ततासं (sic); T °दुत्त्रासं सं°; SG °दुक्तात्त्रासं (for °दुक्तत्रासं). $I_{1,2,6}$ जनैः (for जनः).
327. a) P_3 अपि (for अति°). $I_{1,2,4,6}$ V जाताः (for जातः). b) T जनाः ह्लादको (for जनाह्लादको). —c d) I_4 °मोत्तापा° (sic); I_6 °मातापा°. I_{1-3} V Ś C T D °मात्तापा° (for °मात्तपा°).

Library Book No. 7869/A

स बकेशं बकश्वभ्रे बकवत्यापगां तथा ।
कृत्वा पुरं परार्घ्यश्रीर्लवणोत्साभिधं व्यधात् ॥ ३२९ ॥
तत्र त्रिषष्टिर्वर्षाणां सत्रयोदशवासरा ।
अत्यवाह्यत भूपेन तेन पृथ्वीं प्रशासता ॥ ३३० ॥
अथ योगेश्वरी काचिद्भट्टाख्या रजनीमुखे ।
कृत्वा कान्ताकृतिं काम्यामुपतस्थे विशां पतिम् ॥ ३३१ ॥
तया मनोहरैस्तैस्तैर्वचनैर्ग्लपितस्मृतिः ।
स यागोत्सवमाहात्म्यं द्रष्टुं हृष्टो न्यमन्त्र्यत ॥ ३३२ ॥
पुत्रपौत्रशतोपेतः प्रातस्तत्र ततो गतः ।
चक्रवर्ती तया निन्ये देवीचक्रोपहारताम् ॥ ३३३ ॥
कर्मणा तेन सिद्धाया व्योमाक्रमणसूचकम् ।
जानुमुद्राद्वयं तस्या दृषद्यद्यापि दृश्यते ॥ ३३४ ॥
देवः शतकपालेशो मातृचक्रं शिला च सा ।
खेरीमठेषु तद्वार्तास्मृतिमद्यापि यच्छति ॥ ३३५ ॥
देव्या कुलतरोः कन्दः क्षितिनन्दोऽवशेषितः ।
ततस्तस्य सुतस्त्रिंशद्वत्सरानन्वशान्महीम् ॥ ३३६ ॥
द्वापञ्चाशतमब्दान्क्ष्मां द्वौ च मासौ तदात्मजः ।
अपासीद्वसुनन्दाख्यः प्रख्यातस्मरशास्त्रकृत् ॥ ३३७ ॥
नरः षष्टिं तस्य सूनुस्तावतोऽक्षश्च तत्सुतः ।
वर्षानभूद्विभुर्ग्रामं योऽक्षवालमकारयत् ॥ ३३८ ॥

---

329. a) T वकेशे (for बकेशं). $I_{2,4,6}$ S′ C T वकः श्वभ्रे (for बकश्वभ्रे).
330. b) $I_{1,2,4,6}$ S′ V C T °वासरान् (for °वासरा). —c) $I_{1,2,6}$ C T V अभ्यवाह्यत; S′ अव्यत्राह्यत (sic) (for अत्यवाह्यत). —d) $I_{2,6}$ V प्रशासतां (for प्रशासता).
331. b) $I_{2,4,6}$ V $P_{2,3}$ D °द्वट्टा° (for °द्भट्टा°).
332. b) S′ P_3 °ग्लपित° (for °ग्लपित°). d) $I_{1,2,4,6}$ न्यमन्त्रत (sic); I_3 न्यसंत्यत (sic) (for न्यमन्त्र्यत).
334. d) $I_{1,2,4,6}$ S′ V C दृषत्यद्यापि; $P_{2,3}$ St दृशद्यद्यापि (for दृषद्यद्यापि).
335. c) $I_{1,2,4,6}$ V C T खीरेमठेषु; S′ खेरेमठेषु (for खेरीमठेषु). —d) $I_{1,4}$ S′ C T गच्छति (for यच्छति).
338. c) I_1 °ग्रामो; $I_{2,4,6}$ S′ V C °श्रामं (for °ग्रामं).

जुगोप गोपादित्योऽथ क्ष्मां सद्वीपां तदात्मजः ।
वर्णाश्रमप्रत्यवेक्षादर्शितादियुगोदयः ॥ ३३९ ॥

सखोलखागिकाहाडिग्रामस्कन्दपुराभिधान् ।
शमाङ्गासमुखांश्चाग्रहारान् यः प्रत्यपादयत् ॥ ३४० ॥

ज्येष्ठेश्वरं प्रतिष्ठाप्य गोपाद्रावार्यदेशजाः ।
गोपाग्रहारान्कृतिना येन स्वीकारिता द्विजाः ॥ ३४१ ॥

भूक्षीरवाटिकायां यो निर्वास्य लशुनाशिनः ।
खासटायां व्यधाद्विप्रान्निजाचारविवर्जितान् ॥ ३४२ ॥

अन्यांश्चानीय देशेभ्यः पुण्येभ्यो वश्चिकादिषु ।
पावनानग्रहारेषु ब्राह्मणान्स न्यरोपयत् ॥ ३४३ ॥

उत्तमो लोकपालोऽयमिति लक्ष्म प्रशस्तिषु ।
यः प्राप्तवान्विना यज्ञं चक्षमे न पशुक्षयम् ॥ ३४४ ॥

सषड्दिनां वर्षषष्टिं पालयित्वा स मेदिनीम् ।
भोक्तुं पुण्यपरीपाकं लोकान्सुकृतिनामगात् ॥ ३४५ ॥

गोकर्णस्तत्सुतः क्षोणीं गोकर्णेश्वरकृद्दधे ।
अष्टपञ्चाशतं वर्षास्त्रिंशत्याऽह्नां विवर्जितान् ॥ ३४६ ॥

---

339. c) $I_{1, 2, 4, 6}$ V SA_1 °प्रत्यवीक्षा° (for °प्रत्यवेक्षा°).
340. a) P_1 °खिला° (for °खोल°). —ab) $I_{1, 2, 4, 6}$ S′ V C °हाडिग्रामे; SA_2 gloss आडेग्राम् (for °हाडिग्राम°). SA_2 gloss खन्दोर् (for °स्कन्दपुरा°). —c) S′ C T शमाङ्गादि°; SA_2 शमाजासा° and adds gloss दिमन् जासव्; SL शमाजाम° (for शमाङ्गास°).
341. b) SA_2 gloss गोपकार् इति प्रसिद्धस्थले (for गोपाद्रावा°).
342. a) SA_2 gloss भूछयेवाडू इति भाषया प्रसिद्धस्थले (for भूक्षीरवाटिकायां). —c) SA_2 gloss सोदरवले (for खासटायां). $I_{1, 2, 6}$ S′ V C T P_1 D SG व्यथान्वि°; I_3 व्यथार्वि°; I_4 वृथान्वि°; SA SR व्यधान्वि° (for व्यधाद्वि°).
343. b) SA_2 gloss वच्यिग्रामादिषु (for वश्चिकादिषु).
345. a) I_3, P_3, SA_3 सषण्मासां (for सषड्दिनां). —c) I_6 T °परिपाकं (submetric); S′ °परोपाकं (sic) (for °परोपाकं)
346. a) P_1 S′ C T D क्षौणीं (for क्षोणीं). —b) $I_{1, 2, 4, 6}$ S′ V C °द्ददे (°द्दधे). —d) S′ C T °त्यह्नां (for °त्याऽह्नां). $I_{2, 6}$ विवर्जनात् (for विवर्जितान्).

सूनुर्नरेन्द्रादित्योऽस्य खिङ्खिलान्याभिधोऽभवत् ।
भूतेश्वरप्रतिष्ठानामक्षयिण्याश्च कारकः ॥ ३४७ ॥

दिव्यानुग्रहभागुग्राभिधो यस्य गुरुर्व्यधात् ।
उग्रेशं मातृचक्रं च प्रभावोदग्रविग्रहः ॥ ३४८ ॥

भूत्वा षट्त्रिंशतं वर्षान् शतं चाह्नां विभुर्भुवः ।
स दीर्घैरनघाँल्लोकानासदत्सुकृतैः कृती ॥ ३४९ ॥

युधिष्ठिराऽभिधानोऽभूदथ राजा तदात्मजः ।
यः सूक्ष्माक्षतया लोकैः कथितोऽन्धयुधिष्ठिरः ॥ ३५० ॥

तेन क्रमागतं राज्यं सावधानेन शासता ।
अनुजग्मे मितं कालं पूर्वभूपालपद्धतिः ॥ ३५१ ॥

काले कियत्यपि ततो यात्यभाग्यवशादसौ ।
सिषेवे श्रीमदक्षीबो यत्किञ्चनविधायिताम् ॥ ३५२ ॥

नान्वग्रहीदनुग्राह्यान्न संजग्राह धीमतः ।
न प्रवृत्तोपचाराणां प्रागिवासीत्प्रियंकरः ॥ ३५३ ॥

दुर्विद्यपर्षदा साकं निर्विशेषं सभाजितैः ।
परिजह्रे स दुर्जातो जाततेजोवधैर्बुधैः ॥ ३५४ ॥

सर्वत्र समदृष्टित्वं गुणोऽयं खलु योगिनः ।
अकीर्तिहेतुः स महान्दोषस्तु पृथिवीपतेः ॥ ३५५ ॥

नयद्भिर्गुणतां दोषान्दोषतां च गुणान्विटैः ।
स लुप्तप्रतिभश्चक्रे शनकैः स्त्रीजितोपमः ॥ ३५६ ॥

---

347. d) SA_1 °मक्षयिन्याश्च; SA_2 gloss (1) अविच्छिन्नमन्नदानमक्षयिणी धर्मभक्तमिति च प्रसिद्धा (2) अक्षयिण्या इति पार्वतीयदेशादौ कश्मीरोपकण्ठवर्तिनि अछ्योण्या इति प्रसिद्धाः। यासु (SA_3 यस्यां) सदक्षिणं भूरिब्राह्मणभोजनं वितीर्यते (3) उद्यापनं यज्ञमित्यक्षयि.....broken afterwards. SA_1 कारसः (for कारकः).
349. a) P_3 °शतिं (for °शतं).
350. c) $P_{1,3}$ SA_1 D सूक्ष्माक्षितया (for सूक्ष्माक्षतया).
351. c) S' C T अनुजज्ञे (for अनुजग्मे). P_2 सितं (for मितं).
354. c) $P_{1,2}$ SA_1 परिजिह्रे (for परिजह्रे).
356. d) $P_{1,3}$ °जितोपमाम् (for °जितोपमः).

वाक् मर्मच्छेदिनी दीर्घं नर्म शश्वत्कथा विटैः ।
अनीश्वरोचिता तस्य क्रीडाऽपि भयदाऽभवत् ॥ ३५७ ॥

पुरो मिथ्या गुणग्राही परोक्षं दोषदर्शकः ।
असुस्थिरादरो भूभृत्सोऽभूद् द्वेष्योऽनुजीविनाम् ॥ ३५८ ॥

मनागनवधानेन स्खलतस्तस्य भूपतेः ।
इत्थं राज्यस्थितिरगादचिरेण विसूत्रताम् ॥ ३५९ ॥

उपेक्षितस्य निर्द्रोहैरयतन्ताऽजितात्मनः ।
अथ लब्धबलास्तस्य नाशाय द्रोहिमन्त्रिणः ॥ ३६० ॥

प्रभोः संकोचिताशैस्तैश्चरद्भिर्निरवग्रहम् ।
राज्यं जिहीर्षवो भूपाश्चक्रिरे भूम्यनन्तराः ॥ ३६१ ॥

तदनुप्राणिताः सर्वे ते ते नानादिगाश्रयाः ।
आसन्राज्यामिषं प्राप्तुं श्येना इव ससंभ्रमाः ॥ ३६२ ॥

अथोत्पन्नभयो राजा न शशाक निजस्थितिम् ।
व्यवस्थापयितुं यन्त्रच्युतां कारुः शिलामिव ॥ ३६३ ॥

चिरक्षुण्णे क्षमाभर्तुस्तस्मिन्राज्ये विसंस्थुले ।
उपायोऽस्य स्थितेर्हेतुर्नैकः कश्चन पप्रथे ॥ ३६४ ॥

दृष्टदोषान्स्थितिं प्राप्तो हन्यादस्मानसंशयम् ।
विचिन्त्येति न सामास्य जगृहुर्निजमन्त्रिणः ॥ ३६५ ॥

---

357. ab) T दीर्घनर्मचासत् तथा (for दीर्घं नर्म शश्वत्कथा).
358. c) $I_{1,2,4,6}$ V अस्वस्थिरादरो (for असुस्थिरादरो).
360. a) S′ C उपेचितास्य (for उपेक्षितस्य). —d) P_3 निज°; P_1 द्रोणि° (for द्रोहि°). I_4 om. v. 360—361 ab.
361. a) P_3 संकुचिता° (for संकोचिता°).
362. ab) SA_3 तदनुप्राणिता वैरिनृपा (for तदनुप्राणिताः सर्वे ते ते).
363. c) SA_2 gloss यन्द्रवद् इति सेनायां युद्धादौ प्रसिद्धम् (for यन्त्र°).
364. a) I_3 $P_{2,3}$ St चिरं (for चिर°). —d) $I_{1,2,4,6}$ $P_{1,3}$ V C T S′ SA_1 कस्य न (for कश्चन). D प्रपथे (sic) (for पप्रथे).
365. a) $I_{1,2,6}$ SA_1 प्राप्तान्; I_3 प्राप्ते; I_4 प्राप्तां (for प्राप्तो). —b) $I_{2,4,6}$ V °स्माद°; P_3 °स्मान्न° (for °स्मान°).

अथ निरुरुधुस्ते संनद्धा बलैर्नृपमन्दिरं
व्यवहितजनाक्रन्दं भेरीरवैरतिभैरवैः ।
मदकरिघटाकेतुच्छायानिरुद्धरविप्रभा
भवनवलभीः संतन्वन्तो दिवाऽपि तमोवृताः ॥ ३६६ ॥

तैर्गन्तुं स्वभुवो निवारितरणैर्दत्तेऽवकाशे तत-
स्त्यक्तश्रीर्नगरान्तरात्स नृपतिस्तात्पर्यतो निर्ययौ ।
आजानेयरजोऽङ्कराजललनाप्रस्थानसंदर्शन-
क्षुभ्यत्पौरजनाश्रुलाजकणिकाकीर्णेन राजाध्वना ॥ ३६७ ॥

राज्याच्च्युतस्य बहुशः परिवाररामा-
कोशादि तस्य रिपवो व्रजतोऽपजह्रुः ।
उर्वीरुहो विगलितस्य नगेन्द्रशृङ्गा-
द्वल्लीफलादि रभसादिव गण्डशैलाः ॥ ३६८ ॥

रम्यैः शैलपथैर्व्रजञ्श्रमवशाच्छायां श्रितः शाखिना-
मासीनप्रचलायितेन सुमहद् दुःखं विसस्मार सः ।
दूरात्पामरपूत्कृतैः श्रुतिपथप्राप्तैः प्रबुद्धस्त्वभूद्
दृष्टो निर्झरवारिभिः सह मनाक् श्वभ्रे निमज्जन्निव ॥३६९॥

नानावीरुत्तृणपरिमलैरुग्रगन्धा वनोर्वी-
रम्भःक्षोभप्रतिहतशिलाः पिच्छिलाश्चाद्रिकुल्याः ।
क्रान्त्वा श्रान्तैर्बिसकिसलयच्छायमुग्धाङ्गलेखै-
रध्युत्सङ्गं निहिततनुभिर्मूर्छितं तस्य दारैः ॥ ३७० ॥

---

367. a) SA_3 gloss धर्मद्वारे (for °दत्तेऽवकाशे). —c) S′ C °रजोङ्गराग°; P_2 °रजोङ्काराज° (for °रजोङ्कराज°). —d) I_1 °नासु°; P_3 °नास्तु°; (for °नाश्रु°). I_1 राजाधुना (for राजाध्वना).

368. a) $I_{1,2,4,6}$ S′ V D C T °रामाः; SA_1 °रामाः (for °रामा°). —b) $I_{1,4,6}$ S′ V C विजहुः (for °पजहुः). —c) P_{1-3} I_3 V विचलितस्य (for विगलितस्य).

369. b) C T °मासीनः प्रचलायितेन; I_6 °मासिनप्रचलायितेन; S′ °मासीनः प्रवलायितेन; P_1 °मासीनप्रलयायितेन; SG Sec. m. °मासीनः प्रलयायितेन (for °मासीनप्रचलायितेन). $I_{1,2,6}$ स्वमहद्दुःखं; P_1 स महद्दुःखं (for सुमहद्दुःखं). —c) $I_{1,2,4,6}$ °फूत्कृतैः; S′ C T °फुत्कृतैः; I_4 हूत्कृतैः (for °पूत्कृतैः). —d) $I_{1,4,6}$ SA_1 $P_{1,3}$ V St SA_3 मनःश्वभ्रे; St. Tr. SL SA_3 (marg.) पुनःश्वभ्रे; C मना श्वभ्रे; T मनाःश्वभ्रे; S′ मानाः श्वभ्रे; P_2 मनःशुभ्रे; D SA_3 *v. l.* महच्छ्वभ्रे. (for मनाक् श्वभ्रे suggested).

370. d) $I_{1,2,4,6}$ S′ C °रत्युत्सङ्गं; D St. °रभ्युत्सङ्गं (for °रध्युत्सङ्गं).

पर्यन्ताद्रितटाद्विलोक्य सुचिरं दूरीभवन्मण्डलं
द्रागामन्त्रयितुं क्षिपत्सु नृपतेर्दारेषु पुष्पाञ्जलीन् ।
क्षोणीपृष्ठविकीर्णपक्षति नमत्तुण्डं स्वनीडस्थितैः
सावेगं गिरिकन्दरासु पततां वृन्दैरपि क्रन्दितम् ॥ ३७१ ॥

स्तनयुगतलनद्धस्रस्तमूर्धांशुकानां
त्रिकवलनविलोलं वीक्ष्य दूरात्स्वदेशम् ।
अवहत रुदतीनां मौलिविन्यस्तहस्तं
पथि नृपवनितानामश्रुभिर्निर्झराम्भः ॥ ३७२ ॥

प्रीतिस्थैर्यैरुचितवचनाक्षिप्तया शोकशान्त्या
निर्व्याजाज्ञाग्रहणगुरुभिस्तैश्च तैश्चोपचारैः ।
तस्य स्नेहादुपगतवतो राज्यविभ्रंशदुःखं
मन्दीचक्रुः स्वभुवि सुजना भूपतेर्भूमिपालाः ॥ ३७३ ॥

—*—

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
प्रथमस्तरङ्गः ॥

—*—

---

371. a) $I_{1,2,4}$ $P_{1,2}$ V S′ C T D पर्यस्ताद्रि° (for पर्यन्ताद्रि°) —b) I_4 जहत्स्वं°; $I_{1-4,6}$ P_{1-3} V S′ C T D जहत्सु (for क्षिपत्सु).

372. a) $I_{1,2,6}$ S′ C °वलनद्ध° (for °तलनद्ध°). b) T °विलोमं (for °विलोलं). —d) P_{1-3} I_3 SA_2 D; बलमबलानां; SA_2 gloss अबलानां बलं कर्तृ (for नृपवनितानां). SA_2 gloss कर्म (for राम्भः).

373. —a) $I_{1,2,4,6}$ S′ C °कान्त्या (for °शान्त्या).

After *v.* 373 insert—

I_1 राजानः ३८; I_2 ३७२ राजानः ३८; I_3 ३८ ग्रं ३७२; I_4 ३७२ राजनः ३८; I_6 ३२ राजनः ३८; SA_3 रा ३८ ग्रं. ३७२; V ३७२ राजनः ३८; P_1 राजानः ३८ ग्रन्थं १२२; SA_1 SL ३८ राजानः; P_3 राजानः ३८, ग्रन्थं ३७२.

Colophon: $I_{2,3,6}$ P_{1-3} V St. D काश्मीरिक (for काश्मीरक); $I_{1,2,4,6}$ S′ C T P_1 चंपक°; P_2 चण्यक°; I_3 श्री चार्पाक° (for चण्पक°).

After colophon a *v.* is inserted in all mss.

चतुर्दशाधिकं वर्षसहस्रं नव वासराः ।
मासाश्च विगता ह्यस्मिन्नेकविंशतिराजसु ॥

a) SA_3 I_3 P_2 चतुर्विंशाधिकं (for चतुर्दशाधिकं). —d) $I_{1-4,6}$ P_{1-3} S V C T SA_1 D °न्नष्टात्रिंशति° (for °न्नेकविंशति°).

अथ

द्वितीयस्तरङ्गः

विहितमजगोश्शृङ्गाग्राभ्यां धनुर्घटितं तथा
नरकरटिनोर्देहार्धाभ्यां गणं प्रतिगृह्णतः ।
द्विविधघटनावाल्लभ्यानां निधेरुचिता विभो-
र्जयति लटभापुंभागाभ्यां शरीरविनिर्मितिः ॥ १ ॥

भूयो राज्यार्जनोद्योगस्तेनात्यज्यत भूभुजा ।
जरसा शमिवाण्या च कर्णमूलमवाप्तया ॥ २ ॥

अनयद्विनयोदात्तः समं स्वविषयेण तान् ।
विषयान्वशिनामग्र्यः स तान्पश्चाऽपि विस्मृतिम् ॥ ३ ॥

धावन्राज्येच्छया दुर्गागलिकायां स्वमन्त्रिभिः ।
कालेन स्थापितो बद्ध्वेत्यभ्यधायि तु कैरपि ॥ ४ ॥

अथ प्रतापादित्याख्यस्तैरानीय दिगन्तरात् ।
विक्रमादित्यभूभर्तुर्ज्ञातिरत्राभ्यषिच्यत ॥ ५ ॥

शकारिर्विक्रमादित्य इति स भ्रममाश्रितैः ।
अन्यैरत्रान्यथाऽलेखि विसंवादकदर्थितम् ॥ ६ ॥

$I_{1,2,4}$ P_1 begin with ओं; V ओं श्रीगणेशाय नमः ।

1. I_3 °शजाशृङ्गा°; $I_{2,4,6}$ V S′ T SA_1 °गोः शृङ्गा° (for °गोशृङ्गा°). —b) I_6 गणे; I_2 गणैः (for गणं). P_1 I_3 SA_1 प्रतिगृह्यतः ; I_4 प्रतिगूह्यतः (for प्रतिगृह्णतः). —c) I_3 P_2 T St विविध° (for द्विविध°). SA_4 gloss अभ्यस्ता (for उचिता). —d) S′ C T St ललना° (for लटभा).
2. c) $I_{1,2,6}$ रजसा (for जरसा). P_2 शंसि°; SA_2 gloss जितेन्द्रियाणाम् (for शमि°).
3. a) $I_{1-4,6}$ V P_3 °दातुः (for °दात्तः).
4. I_4 om. *v.* 4. —ab) SA_2 gloss दुगज्यन् (for दुर्गागलिकायां). —c) I_2 वर्द्धे°; P_1 C T बद्धे° (for बद्ध्वे°).
6. b) P_{1-3} SA_3 I_3 SR SG D स इति भ्रम°; $I_{1,4,6}$ S′ T इति संभ्रम° (for इति स भ्रम°) —d) V I_6 C T St, विसंवादि क° (for विसंवादक°).

इदं स्वभेदविधुरं हर्षादीनां धराभुजाम् ।
चिरकालमभूद्भोज्यं ततः प्रभृति मण्डलम् ॥ ७ ॥

असपूर्वाऽपि तेनोर्वी सपूर्वेव महीभुजा ।
लालिता हृदयज्ञेन पत्या नववधूरिव ॥ ८ ॥

भुक्त्वा द्वात्रिंशतं वर्षान्भुवं तस्मिन्दिवं गते ।
जलौकास्तत्सुतो भूमेर्भूषणं समपद्यत ॥ ९ ॥

पितुरेव समं कालं वृद्धिहेतोः स दिद्युते ।
विषुवत्पूर्णशीतांशुरिव शीतेतरार्चिषः ॥ १० ॥

अथ वाक्पुष्टया सार्धं देव्या दिव्यप्रभावया ।
भुवं तत्प्रभवो भुञ्जंस्तुञ्जीनोऽरञ्जयत्प्रजाः ॥ ११ ॥

दम्पतिभ्यामियं ताभ्यामभूष्यत वसुन्धरा ।
गङ्गामृगाङ्कखण्डाभ्यां जटाभूरिव धूर्जटेः ॥ १२ ॥

मण्डलं साध्वधत्तां तौ नानावर्णमनोरमम् ।
शतह्रदापयोवाहौ माहेन्द्रमिव कार्मुकम् ॥ १३ ॥

चक्राते च महाभागौ विभ्रमाभरणं भुवः ।
तुङ्गेश्वरं हरावासं कतिकाख्यं च पत्तनम् ॥ १४ ॥

क्वचिन्मडवराज्यान्तः स्थाने चण्डातपोज्ज्वले ।
तत्प्रभावेन फलितं वृक्षैस्तत्क्षणरोपितैः ॥ १५ ॥

नाट्यं सर्वजनप्रेक्ष्यं यश्चक्रे स महाकविः ।
द्वैपायनमुनेरंशस्तत्काले चन्दकोऽभवत् ॥ १६ ॥

---

13. a) $I_{1-2,4}$ °दत्तां; I_6 °द्त्तां (sic) (for °धत्तां). —b) $I_{2,4,6}$ V S′ C नानार्णव° (for नानावर्ण°).

14. d) SA_2 gloss कैय् (for कतिका).

15. a) $I_{2,6}$ V मरुवरण्य; S′ C T मारवराज्या° (for मडवराज्या°). —b) I_3 $P_{1,3}$ D SA_3 °तपोल्वणे (for °तपोज्ज्वले). —c) St S′ प्रभावेण (for °वेन).

16. b) $I_{1,2,6}$ यच्चक्रे (for यश्चक्रे). $I_{1-4,6}$ S′ V C T SA_1 °कवेः (for °कविः). —c) $I_{1,2,4,6}$ V °पायने (for °पायन°) —d) S′ C T चन्द्रको°; I_3 चर्मको°. (for चन्दको°).

तयोः प्रभावमाहात्म्यजिज्ञासार्थमिवोद्यता ।
प्रजासु दुस्सहा जातु व्यापद्दैवी व्यजृम्भत ॥ १७ ॥

पाकोन्मुखशरच्छालिच्छन्नकेदारमण्डले ।
मासि भाद्रपदेऽकस्मात्पपात तुहिनं महत् ॥ १८ ॥

तस्मिन्विश्वक्षयोद्युक्तकालाट्टहसितोपमे ।
न्यमज्जन् शालयः साकं प्रजानां जीविताशया ॥ १९ ॥

अथाऽऽसीत्क्षुत्परिक्षामजनप्रेतकुलाकुलः ।
प्रकारो निरयस्येव घोरो दुर्भिक्षविप्लवः ॥ २० ॥

पत्नीप्रीतिं सुतस्नेहं पितृदाक्षिण्यमातुरः ।
कुक्षिम्भरिः क्षुदुत्तप्तो विसस्माराखिलो जनः ॥ २१ ॥

क्षुत्तापाद्व्यस्मरल्लज्जामभिमानं कुलोन्नतिम् ।
अशनाहंक्रियाघ्रातो लोकोऽलक्ष्मीकटाक्षितः ॥ २२ ॥

क्षामं कण्ठगतप्राणं याचमानं सुतं पिता ।
पुत्रो वा पितरं त्यक्त्वा चकार स्वस्य पोषणम् ॥ २३ ॥

स्नाय्वस्थिशेषे बीभत्से स्वदेहेऽहंक्रियावताम् ।
अभूद्भोज्यार्थिनां युद्धं प्रेतानामिव देहिनाम् ॥ २४ ॥

रूक्षाभिभाषी क्षुत्क्षामो घोरो दिक्ष्वक्षिणी क्षिपन् ।
एक एको जगज्जीवैरियेष स्वात्मपोषणम् ॥ २५ ॥

तस्मिन्महाभये घोरे प्राणिनामतिदुस्सहे ।
ददृशे लोकनाथस्य तस्यैव करुणार्द्रता ॥ २६ ॥

---

17. d) $I_{1,4,6}$ V °द्देवी; SA_3 gloss देवैः कृत्वाद्देवानां संबन्धिनी दैवी (for °द्दैवी).
18. b) $I_{1,2,4,6}$ V °छन्ने; S′ °छत्रे (for °च्छन्न°).
20. b) P_3 °समाकुलः (for °कुलाकुलः). —c) $I_{1,4,6}$ V S′ C T St SA_1 (before corr.) प्राकारो; I_3 प्रकरो (for प्रकारो).
22. a) $I_{1,2,4,6}$ S′ व्यस्मरन् (for °स्मरत्). —d) St लोको लक्ष्मी° (for लोकोऽलक्ष्मी°),
23. c) $I_{1,2,4,6}$ S′ V C T सुतो (for पुत्रो).
26. b) $I_{4,6}$ V °मिति दुःसहे (°मार्तदुःसहे).

निवारितप्रतीहारः स रत्नौषधिशोभिना ।
दर्शनेनैव दीनानामलक्ष्मीक्लममच्छिनत् ॥ २७ ॥

सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि ।
क्रीतान्नः स दिवारात्रं प्राणिनः समजीवयत् ॥ २८ ॥

अटवीषु श्मशानेषु रथ्यास्वावसथेषु च ।
क्षुत्क्षामः क्ष्माभुजा तेन नहि कश्चिदुपैक्ष्यत ॥ २९ ॥

ततो निश्शेषितधनः क्षीणान्नां वीक्ष्य मेदिनीम् ।
क्षपायामेकदा देवीमेवमूचे स दुःखितः ॥ ३० ॥

देव्यस्मदपचारेण ध्रुवं केनाऽपि दुस्तरा ।
जाता निरपराधानां जनानां व्यापदीदृशी ॥ ३१ ॥

धिङ्मामधन्यं यस्याग्रे लोकोऽयं शोकपीडितः ।
पश्यन्नशरणामुर्वीमनुग्राह्यो विपद्यते ॥ ३२ ॥

प्रजा निश्शरणा एता अन्योन्यं बान्धवोज्झिताः ।
अरक्षतो भयेऽमुष्मिन् किं कार्यं जीवितेन मे ॥ ३३ ॥

यथाकथञ्चिल्लोकोऽयं दिनान्येतानि यत्नतः ।
मयाऽतिवाहितः सर्वो न च कोऽपि व्यपद्यत ॥ ३४ ॥

अतिक्रान्तप्रभावेयं कालदौरात्म्यपीडिता ।
निष्किञ्चनाऽद्य संजाता पृथिवी गतगौरवा ॥ ३५ ॥

तदिमाः सर्वतो मग्ना दारुणे व्यसनार्णवे ।
उपायः कतमस्तावत्समुद्धर्तुं क्षमः प्रजाः ॥ ३६ ॥

---

27. b) $I_{1,2,4,6}$ S′ V C °शोभिनः (for °शोभिना). P_2 om. cd.
29. d) P_2 °दुपैक्ष्यते; S′ °दुपेक्ष्यत; SA_1 °दुपेक्ष्यते (for °दुपैक्ष्यत).
30. a) $I_{1,2,4,6}$ S′ V C T अतो (for ततो). —d) $I_{1,2,4,6}$ V C T सुदुःखितः (for स दुःखितः).
31. a) $I_{1,2,4,6}$ V देव्यस्स°; (for देव्यस्म°).
32. b) P_2 लोकेयं (for लोकोऽयं).
33. c) $I_{1,2,4,6}$ P_2 V अरक्षितो; S′ C T अरक्षिता (for अरक्षतो).
34. c) $I_{1,2,4,6}$ V T °वाहिताः सर्वे; C °वारिता सर्वे (for °वाहितः सर्वो). S′ om. 34b-35 c.
35. c) P_3 सम्पन्ना (for संजाता)

निरालोको हि लोकोऽयं दुर्दिनग्रस्तभास्करः ।
कालरात्रिकुलैर्विष्वक्परीत इव वर्तते ॥ ३७ ॥

हिमसंघातदुर्लङ्घ्यक्षितिभृद्रुद्धनिर्गमाः ।
बद्धद्वारकुलायस्थखगवद्विवशा जनाः ॥ ३८ ॥

शूराश्च मतिमन्तश्च विद्यावन्तश्च जन्तवः ।
कालदौरात्म्यतः पश्य जाता निहतयोग्यताः ॥ ३९ ॥

आशाः काञ्चनपुष्पकुड्मलकुलच्छन्ना न काः क्ष्मातले
सौजन्यामृतवर्षिभिस्तिलकितं सेव्यैर्न किं मण्डलम् ।
पन्थानः सुचिरोपचाररुचिरैर्व्याप्ता न कैः संस्तुतै-
स्तेषामत्र न सन्ति निह्नुतगुणाः कालेन ये मोहिताः ॥ ४० ॥

तदेष गलितोपायो जुहोमि ज्वलने तनुम् ।
न तु द्रष्टुं समर्थोऽस्मि प्रजानां नाशमीदृशम् ॥ ४१ ॥

धन्यास्ते पृथिवीपालाः सुखं ये निशि शेरते ।
पौरान्पुत्रानिव पुरः सर्वतो वीक्ष्य निर्वृतान् ॥ ४२ ॥

इत्युक्त्वा करुणाविष्टो मुखमाच्छाद्य वाससा ।
निपत्य तल्पे निश्शब्दं रुरोद पृथिवीपतिः ॥ ४३ ॥

निवातस्तिमितैर्दीपैरुद्ग्रीवैः कौतुकादिव ।
वीक्ष्यमाणाऽथ तं देवी जगाद जगतीभुजम् ॥ ४४ ॥

राजन्प्रजानां कुकृतैः कोऽयं मतिविपर्ययः ।
येनेतर इव स्वैरमधीरोचितमीहसे ॥ ४५ ॥

---

37. c) $I_{4,6}$ S′ P_3 St विश्वक्°; I_1 विवष्का° (for विष्वक्°).
38. a) SA_3 हिमसंपातदुर्लक्ष° (for हिमसंघातदुर्लङ्घ्य°). —d) $I_{2,4,6}$ V जनः (for जनाः).
40. a) $I_{1,2,4,6}$ V कः (for काः). —c) SA_3 प्रचुरोपचार° (for सुचिरोपचार°). —d) SA_3 °रेषामत्र with a gloss एषां शूरमतिमदादीनां निह्नुतगुणाः ये शूराद्या अत्रास्मिन्नेव देशे वसन्ति देशान्तरं न गच्छन्ति ते कालेन मोहिताः (for °स्तेषामत्र). P_{1-3} I_3 St D वसन्ति (for न सन्ति). SA_3 ते (for ये).
41. S′. om. *v.* 41. —a) $I_{1-4,6}$ गलितापायो (for गलितोपायो).
43. c) $I_{1,2,4,6}$ Ś V P_2 C T SA_1 निश्शङ्कं (for निश्शब्दं).
44. a) Ś C T निर्वात° (for निवात°). —d) P_3 °पतिम् (for °भुजम्).
45. a) P_2 कुकृत्यैः (for कुकृतैः)

यद्यसाध्यानि दुःखानि च्छेत्तुं न प्रभविष्णुता ।
तन्महीपाल महतां महत्त्वस्य किमङ्कनम् ॥ ४६ ॥

कः शक्रः कतमः स्रष्टा वराकः कतमो यमः ।
सत्यव्रतानां भूपानां कर्तुं शासनलङ्घनम् ॥ ४७ ॥

पत्यौ भक्तिर्व्रतं स्त्रीणामद्रोहो मन्त्रिणां व्रतम् ।
प्रजानुपालनेऽनन्यकर्मता भूभृतां व्रतम् ॥ ४८ ॥

उत्तिष्ठ व्रतिनामग्र्य क्व विपर्येति मद्वचः ।
प्रजापाल प्रजानां ते नास्त्येव क्षुत्कृतं भयम् ॥ ४९ ॥

इति संरम्भतः प्रोक्ते तयाऽनुध्याय देवताः ।
प्रतिगेहं गतप्राणः कपोतनिवहोऽपतत् ॥ ५० ॥

प्रातस्तन्नृपतिर्वीक्ष्य व्यरंसीन्मरणोद्यमात् ।
प्रजाश्च प्रत्यहं प्रातैः कपोतैर्जीवितं दधुः ॥ ५१ ॥

वस्त्वन्तरं किमपि तत्साध्वी नूनं ससर्ज सा ।
जनताजीवितावाप्त्यै न कपोतास्तु तेऽभवन् ॥ ५२ ॥

तादृशां नहि निर्व्याजप्राणिकारुण्यशालिनाम् ।
हिंसया धर्मचर्यायाः शक्यं क्वाऽपि कलङ्कनम् ॥ ५३ ॥

अभवन्निर्मलं व्योम देवीकृत्यैः सह क्रमात् ।
साकं भूपालशोकेन दुर्भिक्षं च शमं ययौ ॥ ५४ ॥

सा भूतिविभवोदग्रमग्रहारं द्विजन्मनाम् ।
सती कतीमुषं चक्रे रामुषं चाऽपकल्मषा ॥ ५५ ॥

वर्षैः षट्त्रिंशता शान्ते पत्यौ विरहजो ज्वरः ।
तत्यजे ज्वलनज्वालानलिनप्रच्छदे तया ॥ ५६ ॥

---

47. c) $P_{1,3}$ भूतानां (for भूपानां). —d) $I_{1-3,6}$ V शासनलङ्घनाम्; I_4 न प्रभविष्णुता (for शासनलङ्घनम्).
50. a) I_3 P_2 प्रोक्ता (for प्रोक्ते). —b) SA_3 देव्या (for तया).
52. d) P_3 SA_3 °पतन् (for °भवन्).
53. a) S′ C तादृशं (for तादृशां). —d) S′ C T चापि (for क्वापि).
55. c) SA_2 gloss कैमोह; $P_{1,3}$ कतीमुषां (for कतीमुषं). —d) $P_{1,3}$ रामुषां; SA_2 gloss रामोह (for रामुषं).
56. c) P_3 दलन° (for ज्वलन°).

सा यत्र शुचिचारित्रा विपन्नं पतिमन्वगात् ।
स्थानं जनैस्तद् वाक्पुष्टाटवीत्यद्यापि गद्यते ॥ ५७ ॥

चारुचारित्रया तत्र तया सत्रेऽवतारिते ।
नानापथागतानाथसार्थैरद्यापि भुज्यते ॥ ५८ ॥

आभ्यामभ्यधिकं कर्तुं शक्तिः कस्येति निश्चितम् ।
विचिन्त्यारोचकी धाता नापत्यं निर्ममे तयोः ॥ ५९ ॥

वेधाः परां धुरमुपैति परीक्षकाणा-
मिक्षोः फलप्रजनने न कृतश्रमो यः ।
विस्मारितोद्धुरसुधारसयोग्यतात् तत्
तस्मादुदेत्य किमिवाभ्यधिकं विदध्यात् ॥ ६० ॥

दीर्घदुर्दिननष्टार्कं राष्ट्रमात्मापचारतः ।
ज्ञात्वा राज्यग्निसाद्देहं सा चकारेति केचन ॥ ६१ ॥

ततोऽन्यकुलजो राजा विजयोऽष्टावभूत्समाः ।
पत्तनेन परीतं यश्चकार विजयेश्वरम् ॥ ६२ ॥

सुतो महीमहेन्द्रस्य जयेन्द्रस्तस्य भूपतेः ।
क्ष्मामाजानुभुजो राजा बुभोजाथ पृथुप्रथः ॥ ६३ ॥

अलोलकीर्तिकल्लोलदुकूलवलनोज्वलाम् ।
बभार यद्भुजस्तम्भो जयश्रीसालभञ्जिकाम् ॥ ६४ ॥

तस्याभूदद्भुतोदन्तो भवभक्तिविभूषितः ।
राज्ञः संधिमतिर्नाम मन्त्री मतिमतां वरः ॥ ६५ ॥

---

57. a) P_3 शुचिचारित्र्या; I_4 शुचिदारिद्रा (for शुचिचारित्रा).
58. c) I_2 नानागतपथागता° (for नानापथागता°).
60. c) $I_{1,6}$ C °मुदारम°; I_2 V °मुदारस°; S′ °मुधारम° (for °सुधारस°). $I_{2,3,6}$ V S′ D °योग्यतात्तु; $I_{1,4}$ C °योग्यता तु; $P_{2,3}$ °योग्यता तत्; T St SA_1 °योग्यतां तत्; P_1 SG (befor corr.) °योग्यतात्तात् (for °योग्यतात्तत्). —d) SA_3 gloss उत्पादयित्वा (for °दुदेत्य).
61. a) $I_{2,4,6}$ V S′ °नष्टार्क° (for °नष्टार्कम्).
64. a) I_2 $P_{1,3}$ SG D आलोल° (for अलोल°). —b) P_{1-3} I_3 St D °दुगूल° (for °दुकूल°). —d) $I_{1,2,4,6}$ SA_1 °स्त्री° (for °श्री°). S′ C T °शालभञ्जिकाम् ; SA_2 gloss पुत्तलिकाम् (for °सालभाञ्जिकाम्).
65. a) I_3 P_2 SA_3 D °दात्तो; (for °दन्तो°). —c) $I_{2,6}$ V राज्ञा (for राज्ञः). D संधिगति° (for संधिमति°).

नास्त्युपायः स संसारे कोऽपि योऽपोहितुं क्षमः ।
भूपालमत्तकरिणामेषां चपलकर्णताम् ॥ ६६ ॥

अत्यद्भुतमतिः शङ्क्यः सोऽयमुक्त्वेति यद्विटैः ।
तस्मिन्धीसचिवे द्वेषस्तेनाग्राह्यत भूभुजा ॥ ६७ ॥

निवारितप्रवेशोऽथ सकोपस्तमहेतुकम् ।
निनाय हृतसर्वस्वं यावदायुर्दरिद्रताम् ॥ ६८ ॥

तस्य भूपतिविद्वेषग्रीष्मोष्मपरिशोषिणः ।
आप्यायं राजपुरुषा वार्तयाऽपि न चक्रिरे ॥ ६९ ॥

गिरं गभीरो गृह्णाति क्ष्माभृद्यावत्तदग्रगाः ।
उक्तानुवादिनस्तावद्व्यक्तं प्रतिरवा इव ॥ ७० ॥

स तु राजविरुद्धत्वदारिद्र्याभ्यां न विव्यथे ।
गतप्रत्यूहया प्रीतः प्राप्तया हरसेवया ॥ ७१ ॥

अथ भाव्यर्थमाहात्म्यात्पप्रथे प्रतिमन्दिरम् ।
राज्यं संधिमतेर्भावीत्यश्रुताऽपि सरस्वती ॥ ७२ ॥

नाचोदिता वाक्चरतीत्याप्तेभ्यः श्रुतवान्नृपः ।
ततः संभूतसंत्रासः कारावेश्मनि तं न्यधात् ॥ ७३ ॥

तत्र तस्योग्रनिगडैः पीडिताङ्घ्रेर्विशुष्यतः ।
पूर्णोऽभूद्दशमो वर्षो भूपतेश्चायुषोऽवधिः ॥ ७४ ॥

निष्पुत्रः स महीपालो मुमूर्षुर्दाहमादधे ।
रोगोत्थया पीडया च चिन्तया च तदीयया ॥ ७५ ॥

---

66. b) $I_{1,2,4,6}$ S′ V योपिहितुं (for योऽपोहितुं).
67. a) $I_{1,6}$ P_1 शक्यः (for शङ्क्यः).
68. b) P_3 I_3 SA_3 स कोपात्त° (for सकोपस्त°).
71. b) $P_{1,2}$ °दारिद्राभ्यां (for °दारिद्र्याभ्यां). —d) P_3 हरिसेवया (for हरसेवया).
72. b) SA_1 नवम° (for प्रतिम°).
73. c) P_1 SA_1 सद्भूत° (for संभूत°). —d) $I_{1-3,6}$ P_2 S′ V C T SA_1 व्यधात् (for न्यधात्).
75. b) $I_{1,2,4,6}$ S′ V C T °माददे (for °मादधे).

ऊष्मायमाणो विद्वेषवह्निना ज्वलताऽनिशम् ।
न विना तद्वधं मेने भवितव्यप्रतिक्रियाम् ॥ ७६ ॥

भाव्यर्थस्याऽबुधाः कुर्युरुपायं स्थगनाय यम् ।
स एवाऽपावृतं द्वारं ज्ञेयं दैवेन कल्पितम् ॥ ७७ ॥

दग्धाङ्गारकदम्बके विलुठतः स्तोकोन्मिषत्तेजसो
वेधा वह्निकणस्य शक्तिमतुलामाधातुकामो हठात् ।
तन्निर्वापणमिच्छतः प्रतनुते पुंसः समीपस्थिते
संतापद्रुतभूरिसर्पिषि घटे पानीयकुम्भभ्रमम् ॥ ७८ ॥

अथ राजाज्ञया क्रूरैर्वधकर्माधिकारिभिः ।
निशि संधिमतिः शूले समारोप्य विपादितः ॥ ७९ ॥

प्रोतशूले श्रुते तस्मिन् शोकशङ्कुर्महीपतेः ।
निरगाद्रोगभग्नस्य पूर्वं पश्चात्तु जीवितम् ॥ ८० ॥

सप्तत्रिंशतिवर्षेषु यातेष्वस्मिन्निरन्वये ।
प्रशान्तभूमिपालाऽभूत्कतिचिद्दिवसानि भूः ॥ ८१ ॥

अथ संधिमतिं बुद्ध्वा तथा व्यापादितं गुरोः ।
ईशानाख्यस्य हृदयं विवशं वशिनोऽप्यभूत् ॥ ८२ ॥

शिरीष इव संसारे सुखोच्छेद्ये मनीषिणाम् ।
हन्ताऽऽनृशंस्यं तद्वृन्तमिवैकमवशिष्यते ॥ ८३ ॥

स श्मशानभुवं प्रायादनाथस्येव शुष्यतः ।
कर्तुं विनयिनस्तस्य स्वोचितामन्तसत्क्रियाम् ॥ ८४ ॥

तं चाऽस्थिशेषमद्राक्षीत्कृष्यमाणं बलाद् वृकैः ।
शूलमूलावबद्धास्थिखण्डावष्टम्भनिश्चलम् ॥ ८५ ॥

---

77. a) $I_{1,2,4,6}$ S' V C T SA_1 (before corr.) °स्य बुधाः (for °स्याऽबुधाः).

78. c) $I_{1,4,6}$ P_{1-3} V C D °स्थितेः (for °स्थिते).

83. c) $I_{1,2,6}$ तद्वृत्तामि°; I_4 तद्वृत्यामि° (for तद्वृन्तामि°).

समीरणसमीकीर्णमुण्डरन्ध्राग्रनिर्गतैः ।
ध्वनितैरनुशोचन्तमिवाऽवस्थां तथाविधाम् ॥ ८६ ॥

हा वत्स द्रष्टुमीदृक्ते जीवाम्यद्येति वादिना ।
तस्याऽऽकृष्यत शूलान्तःप्रोतं तेनाऽथ कीकसम् ॥ ८७ ॥

वेष्टिताङ्घ्रिः शिरश्शीर्णैस्तत्कचैर्धूलिधूसरैः ।
अनैषीत्तं स कङ्कालं वारयन्भषतो वृकान् ॥ ८८ ॥

उचितां सत्क्रियां कर्तुं ततस्तस्य समुद्यतः ।
भाले विधातृलिखितं श्लोकमेतमवाचयत् ॥ ८९ ॥

'यावज्जीवं दरिद्रत्वं दश वर्षाणि बन्धनम् ।
शूलस्य पृष्ठे मरणं पुना राज्यं भविष्यति' ॥ ९० ॥

पादत्रयस्य दृष्टार्थः श्लोकस्याऽऽसीत्स योगवित् ।
द्रष्टव्ये तुर्यपादार्थप्रत्यये कौतुकान्वितः ॥ ९१ ॥

अचिन्तयच्च संभ्रान्तः कथमेतद्भविष्यति ।
उवाच च विधेः शक्तिमचिन्त्यां कलयंश्चिरम् ॥ ९२ ॥

तत्तत्कर्मव्यतिकरकृतः पारतन्त्र्यानुरोधा-
त्सज्जाः सर्वे व्यवसितहठोन्मूलनाय प्रयत्नात् ।
चित्रं तत्राऽप्युदयति विधेः शक्तिरत्यद्भुतेयं
यन्माहात्म्याद्विविधघटनासिद्धयो निर्निरोधाः ॥ ९३ ॥

मणिपूरपुरे पार्थं निहतं समजीवयत् ।
फणिकन्याप्रभावेन सर्वाश्चर्यनिधिर्विधिः ॥ ९४ ॥

द्रोणपुत्रास्त्रनिर्दग्धं मातुर्गर्भे परीक्षितम् ।
जीवयन्कृष्णमाहात्म्याद्धाता धुर्योऽधिकारिणाम् ॥ ९५ ॥

---

86. a) $I_{1,2,4,6}$ S′ P_2 °समाकीर्णं; SA_2 समापूर्ण° (for समाकीर्ण°).
88. a) T वेष्टिताङ्घ्रिं (for वेष्टिताङ्घ्रिः). —c) S′ C स्वकं कालं (for स कङ्कालं). —d) $I_{3,6}$ S′ C भाषतो (for भषतो).
90. d) I_{3-4} S′ P_{1-3} SA_3 पुनराज्यं; I_6 V पुनः राज्यं (for पुना राज्यं).
91. a) $I_{1-2,4,6}$ S′ V C SA_1 (before corr.) दृष्टार्थे (for दृष्टार्थः). —c) SA_2 gloss चतुर्थ (for तुर्य). $I_{1,2,4,6}$ S′ P_3 SA_1 (before corr.) °पादार्थे (for °पादार्थ°).
92. b) SA_1 कार्यमे° (for कथमे°).
94. c) $I_{1,2,6}$ V S′ T St °वेण [sic] (for °वेन).

कचं भस्मीकृतं दैत्यैर्नागांस्तार्क्ष्येण भक्षितान् ।
पुनर्जीवयितुं को वा दैवादन्यः प्रगल्भते ॥ ९६ ॥

इत्युक्त्वा भाविनोऽर्थस्य द्रष्टुं सिद्धिं समुद्यतः ।
तत्रैव बद्धवसतिः कङ्कालं स ररक्ष तम् ॥ ९७ ॥

अथार्धरात्रे निर्निद्रस्तयैवाद्भुतचिन्तया ।
धूपाधिवासमीशानो घ्रातवान्दिव्यमेकदा ॥ ९८ ॥

उच्चण्डलाडनादण्डोद्घृष्टघण्टौघटांकृतैः ।
चण्डैर्डमरुनिर्घोषैर्घर्घरं श्रुतवान्ध्वनिम् ॥ ९९ ॥

उद्घाटिततमोरिः स ततः पितृवनावनौ ।
ददर्श योगिनीस्तेजःपरिवेषान्तरस्थिताः ॥ १०० ॥

तासां संभ्रममालक्ष्य कङ्कालं चापवाहितम् ।
ईशानस्तां श्मशानोर्वीं धृतासिश्चकितो ययौ ॥ १०१ ॥

अथाऽपश्यत्तरुच्छन्नः शायितं मण्डलान्तरे ।
सन्धीयमानसर्वाङ्गं कङ्कालं योगिनीगणैः ॥ १०२ ॥

उल्लसद्वरसंभोगवाञ्छा मद्यपदेवताः ।
वीरालाभात्समन्विष्य कङ्कालं तमपाहरन् ॥ १०३ ॥

एकमेकं स्वमङ्गं च विनिधाय क्षणादथ ।
कुतोऽप्यानीय पुंलक्ष्म पूर्णाङ्गं तं प्रचक्रिरे ॥ १०४ ॥

---

98. d) P_{1-3} °मेकत: (for °मेकदा).

99. a) $I_{1,3,4}$ P_3 उश्च° (for उच्च°). C T °वादना°; $I_{1,2,4,6}$ V °लाद्रना°; S′ °वदना°; SA_3 gloss लाडना अन्तर्गता शलाका आण्टु इति भाषया (for °लाडना°). —c) SA_3 °डमरुघोष्यैश्च (for °डमरुनिर्घोषै°).

100. a) SA_2 gloss तमोरिः त्राव् इति भाषया (for °तमोरिः). —c) $I_{1,2,4,6}$ S′ V C दर्शयन् (for ददर्श). —d) I_1 Ś C T °स्थित: (for °स्थिताः).

101. a) $I_{1,2,4,6}$ S′ V T °माकर्ण्य (for °मालक्ष्य).

103. a) S′ T °संयोग° (for °सम्भोग°). —b) SA_1 मध्यमदेवता; SA_2 marg. मद्यमदेन ताः इत्यन्यादर्शे; SL मुद्यमदेव ताः (for मद्यपदेवताः). —d) P_2 SA_1 तमुपाहरन् (for तमपाहरन्).

104. c) SA_1 (before corr.) ततो° (for कुतो°). SA_1 पुंलिङ्ग° (for पुंलक्ष्म).

अथ पुर्यष्टकभ्राम्यदनाक्रान्तान्यविग्रहम् ।
योगेनाकृष्य योगिन्यस्तत्र संधिमतेर्न्यधुः ॥ १०५ ॥

ततः सुप्तोत्थित इव प्रत्तदिव्यविलेपनः ।
समभुज्यत ताभिः स यथेच्छं चक्रनायकः ॥ १०६ ॥

ईशानस्तस्य देवीनां वितीर्णाङ्गहृतिं पुनः ।
क्षपायां क्षीयमाणायां चकितः पर्यशङ्कत ॥ १०७ ॥

नदंस्तद्रक्षया धीरः स च तत्स्थानमाययौ ।
तच्च योगेश्वरीचक्रं क्षिप्रमन्तरधीयत ॥ १०८ ॥

अथाऽश्रूयत वाक्तासां मा भूदीशान भीस्तव ।
नास्त्यङ्गहानिरस्माकं वृते चास्मिन्न वञ्चना ॥ १०९ ॥

अस्मद्वराद्दिव्यवपुः संधितः संधिमानसौ ।
आर्यत्वादार्यराजश्च ख्यातो भुवि भविष्यति ॥ ११० ॥

ततो दिव्याम्बरः स्रग्वी दिव्यभूषणभूषितः ।
ववन्दे संधिमान्प्रह्वः प्राप्तपूर्वस्मृतिर्गुरुम् ॥ १११ ॥

ईशानोऽपि तमालिङ्ग्य स्वप्नेष्वपि सुदुर्लभम् ।
भूमिकामाललम्बे कामिति को वक्तुमर्हति ॥ ११२ ॥

असारं च विचित्रं च संसारं ध्यायतोर्मिथः ।
विवेकविशदा तत्र प्रावर्तत तयोः कथः ॥ ११३ ॥

अथ वार्तां विदित्वेमां कुतोऽपि नगरौकसः ।
सबालवृद्धाः सामात्यास्तमेवोद्देशमाययुः ॥ ११४ ॥

---

105. a) P_{1-3} St C D पुर्यष्टकं (for पुर्यष्टक°). SA_1 (before corr.) भ्राम्यन्म° (for भ्राम्यद°). —c) $I_{1,2,4,6}$ V St योगेश्यः; P_2 योगेस्य°; S′ C योगेभ्यः (for योगिन्यः).
106. a) I_4 $P_{2,3}$ स्वप्नो° (for सुप्तो°). —b) S′ C T प्रमुदिं° (for प्रत्तादि°).
107. a) SA_1 ईशानतस्य (for ईशानस्तस्य). —b) P_{1-3} V G T St D °र्णाङ्गाहृतिं (for °र्णाङ्गहृतिं).
110. c) $I_{1,4,6}$ S′ C T °राजाख्यः; I_2 V °राजाख्य° [sic] (for °राजश्च).
d) SA_3 राजा (for भुवि).
112. c) $I_{1,2,4,6}$ S′ V $P_{2,3}$ C T °ललम्भे (for °ललम्बे).

पूर्वाकृतिविसंवादाद् भ्रमो नाऽयं स इत्यथ ।
तेनाच्छिद्यत संवादि निखिलान्पृच्छता वचः ॥ ११५ ॥

अर्थनां शासितुं राष्ट्रं पौराणामपराजकम् ।
सोऽन्वमन्यत कृच्छ्रेण निस्स्पृहः शासनाद्गुरोः ॥ ११६ ॥

प्रापय्योपवनोपान्तं तं दिव्याकृतिशोभिनम् ।
सतूर्यं स्नापयामासुरभिषेकाम्बुभिर्द्विजाः ॥ ११७ ॥

नवराजोचिताचारे न स शिक्षामपैक्षत ।
दृष्टकर्मा समस्तास्तु निस्तुषाः प्रक्रिया व्यधात् ॥ ११८ ॥

स राजोचितनेपथ्यः पौराशीर्घोषशोभिनीम् ।
सौधोन्मिषल्लाजवर्षां ससैन्यः प्राविशत्पुरीम् ॥ ११९ ॥

तस्मिन्विरजसि प्राज्यमाक्रामति नृपासनम् ।
आचक्राम प्रजा व्यापन्न दैवी न च मानुषी ॥ १२० ॥

अहरन्हृदयं तस्य शृङ्गारहितविभ्रमाः ।
नितम्बिन्यो वनभुवः शमिनो न तु योषितः ॥ १२१ ॥

वनप्रसूनसंपर्कपुण्यगन्धैस्तपस्विनाम् ।
कर्पूरधूपसुरभिः करैः स्पृष्टः स पिप्रिये ॥ १२२ ॥

भूतेशवर्धमानेशविजयेशानपश्यतः ।
नियमो राजकार्येषु तस्याऽभूत्प्रतिवासरम् ॥ १२३ ॥

हरायतनसोपानक्षालनाम्भःकणाञ्चितैः ।
संस्पृष्टः पवनैः सोऽभूदानन्दास्पन्दविग्रहः ॥ १२४ ॥

---

115. c) $I_{2,6}$ S′ C T संवासि (for संवादि).
116. a) $I_{1,2,6}$ S′ P_2 C T अर्थानां (for अर्थनां).
118. b) $I_{1,2,4,6}$ S′ V °पेक्षत (for °पैक्षत).
119. c) P_{1-3} I_3 सौधोर्मि° (for सौधोन्मि°). —d) $I_{1,2,6}$ S′ V C T SA_1 ससैन्यां (for ससैन्यः).
121. d) SA_3 gloss शृङ्गेषु अरहितः न त्यक्तः वीनां पक्षिणां भ्रमः भ्रमणं याभिः ताः (for शृङ्गारहितविभ्रमाः). SA_3 gloss शान्तस्य (for शमिनः).
122. d) $I_{1,2,4,6}$ S′ C पृष्टः (for स्पृष्टः).

पूर्वपूजापनयने निराडम्बरसुन्दरः ।
तेनैव द्रष्टुमज्ञायि स्नपितो विजयेश्वरः ॥ १२५ ॥

लिङ्गपीठलुठत्स्नानकुम्भाम्भःक्षोभभूर्ध्वनिः ।
शयानस्याऽप्यभूत्तस्य वल्लभो वल्लकीद्विषः ॥ १२६ ॥

तापसैर्भस्मरुद्राक्षजटाजूटाङ्कितैर्बभौ ।
तस्य माहेश्वरी पर्षदिव भूमिपतेः सभा ॥ १२७ ॥

शिवलिङ्गसहस्रस्य प्रतिष्ठाकर्मणि प्रभोः ।
प्रतिज्ञा प्रत्यहं तस्य नाऽभूद्विघटिता क्वचित् ॥ १२८ ॥

प्रमादात्तदनिष्पत्तौ शिलामुत्कीर्य कल्पिता ।
सहस्रलिङ्गी तद्भृत्यैः सर्वतोऽद्यापि दृश्यते ॥ १२९ ॥

तासु तासु स वापीषु लिङ्गव्याजादरोपयत् ।
स्वपुण्यपुण्डरीकाणां जन्मनेऽक्षपरम्पराम् ॥ १३० ॥

स्थाने स्थाने जलान्तश्च बहुसंख्यैर्निवेशितैः ।
अनयन्नर्मदाभङ्गिं शिवलिङ्गैस्तरङ्गिणीः ॥ १३१ ॥

प्रतिलिङ्गं महाग्रामाः प्रत्यपाद्यन्त तेन ये ।
पर्षदामद्य तद्भोगः कालेनान्तर्धिमागतः ॥ १३२ ॥

अकरोत्स महाहर्म्यैर्महालिङ्गैर्महावृषैः ।
महात्रिशूलैर्महतीं महामाहेश्वरो महीम् ॥ १३३ ॥

कृत्वा सन्धीश्वरं देहसंधानपितृकानने ।
ईशानस्य गुरोर्नाम्ना व्यधादीशेश्वरं हरम् ॥ १३४ ॥

---

125. b) P_3 विराडम्बर°; SA_1 निजडम्बर° (for निराडम्बर°). —d) I_4P_3 स्नापितो (for स्नपितो).
126. d) $I_{1,2,4,6}$ V वल्लभीं; S′ वल्लभां (for वल्लभो).
129. a) T प्रसादा° (for प्रमादा°).
130. c) S′ C स पुण्य°; P_2; सुपुण्य° (for स्वपुण्य°). —d) SA_1 °पुण्डरीकाक्ष°; $I_{1-4,6}$ $P_{1,2}$ S′ V St °कानां [sic] (for °काणां).
134. d) SA_2 gloss ईशभ्राङ् इति प्रसिद्धस्थले (for °दीशेश्वरं).

थेदां च भीमादेवीं च देशांश्चान्यान्पदे पदे ।
स मठप्रतिमालिङ्गैर्हर्म्यैर्निन्ये महार्घताम् ॥ १३५ ॥

स्वयंभूभिश्च तीर्थैश्च पूतं भक्तिविभूषितः ।
स एव भोक्तुमज्ञासीत्प्राज्ञः कश्मीरमण्डलम् ॥ १३६ ॥

स्नातस्य निर्झराम्भोभिः पुष्पलिङ्गार्चनोत्सवैः ।
राज्ञस्तस्य वनोर्वीषु मासः पुष्पाकरो ययौ ॥ १३७ ॥

स चातिरम्यः काश्मीरो ग्रीष्मस्त्रिदिवदुर्लभः ।
हिमलिङ्गार्चनैः प्रायाद्घनान्तेषु कृतार्थताम् ॥ १३८ ॥

फुल्लाब्जषण्डरुद्धाशाः प्राप्य पुष्करिणीतटीः ।
लक्ष्मीसखः स खण्डेन्दुचूडध्यानपरोऽभवत् ॥ १३९ ॥

नीलोत्पलवतीर्वापीरगस्त्योदयनिर्विषाः ।
अवगाह्य हरार्चाभिः शरदं निर्विवेश सः ॥ १४० ॥

सार्धं तपोधनैस्तैस्तैर्भजतो जागरोत्सवान् ।
तस्याऽभूवन्भुवो भर्तुरमोघा माघरात्रयः ॥ १४१ ॥

अत्यद्भुतं राज्यलाभमित्थं सफलयन्कृती ।
पञ्चाशतं त्रिवर्षोनामत्यक्रामत्स वत्सरान् ॥ १४२ ॥

शमव्यसनिनस्तस्य राज्यकार्याण्यपश्यतः ।
तस्मिन्काले प्रकृतयो विरागं प्रतिपेदिरे ॥ १४३ ॥

अन्वैष्यत नृपस्ताभिः कश्चिद्राज्याय शुश्रुवे ।
राजपुत्रो जिगीषुश्च श्रीमान्यौधिष्ठिरे कुले ॥ १४४ ॥

---

135. a) S′ C T खेदां (for थेदां). —d) S C T महार्घ्य° (for महार्घ°).
136. b) P_{1-3} I_3 C T D °विशेषितः; SA_3 विशेषतः (for °विभूषितः). —c) P_2 एवं (for एव). —d) $I_{1,2,4,6}$ S′ V C T SA_1 प्राज्यः; P_2 प्राण्यः (for प्राज्ञः). $I_{3,6}$ S′ C T SA_1 काश्मीर° (for कश्मीर°).
138. b) T काश्मीरोऽग्रीष्मत्रिदिव° (for काश्मीरो ग्रीष्मस्त्रिदिव°).
139. a) I_6 पुल्लाज्वर° [sic] (for फुल्लाब्ज°). S′ V C I_6 °खंड° (for °षण्ड°). —d) $I_{1,2,6}$ V S′ C SA_1 (before corr.) °चूडाध्या° (for °चूडध्या°).
143. a) S′ C सम° (for शम°).

जुगोप गोपादित्याख्यं कश्मीरेन्द्रजिगीषया ।
युधिष्ठिरप्रपौत्रं हि गान्धाराधिपतिस्तदा ॥ १४५ ॥

वसन्नप्राप्तसाम्राज्यः स तत्र तनयं क्रमात् ।
अवाप लक्षणैर्दिव्यैरमोघं मेघवाहनम् ॥ १४६ ॥

स युवा पितुरादेशाद्वैष्णवान्वयजन्मनः ।
राष्ट्रं प्राग्ज्योतिषेन्द्रस्य ययौ कन्यास्वयंवरे ॥ १४७ ॥

तत्र तं वारुणं छत्रं छायया राजसंनिधौ ।
भेजे वरस्रजा राजकन्यका चाऽमृतप्रभा ॥ १४८ ॥

तेन तस्य निमित्तेन वृद्धिमागामिनीं जनाः ।
अजानन्नम्बुवाहस्य पाश्चात्येनेव वायुना ॥ १४९ ॥

राज्ञा हि नरकेणैतद्गुरुणादुष्णवारणम् ।
आनीतमकरोच्छायां न विना चक्रवर्तिनम् ॥ १५० ॥

तमन्तिकं पितुः प्राप्तं पत्न्या लक्ष्म्या च संश्रितम् ।
भुवा निमन्त्रयामासुर्मन्त्रिणो वंशयोग्यया ॥ १५१ ॥

अथाऽऽर्यराजो विज्ञाय स्वराज्यं भेदजर्जरम् ।
प्रतिचक्रे न शक्तोऽपि तस्थौ तु त्यक्तुमुत्सुकः ॥ १५२ ॥

अचिन्तयच्च सत्यं मे संप्रीतो भूतभावनः ।
सिद्धिविघ्नानमून्दीर्घानपाकर्तुं समुद्यतः ॥ १५३ ॥

कृत्ये बहुनि निष्पाद्ये श्रमात्कौसीद्यमाश्रयन् ।
प्रावृषीवाध्वगो दिष्ट्या मोहितोऽस्मि न निद्रया ॥ १५४ ॥

---

145. a) $I_{1,2,4,6}$ S′ V C T SA_1 (before corr.) °दित्याख्यः (for °दित्याख्यं). —b) S′ C T काश्मीरेन्द्र° (for कश्मीरेन्द्र°).
146. $I_{1,2,4,6}$ S′ V P_{1-3} C T SA_1 D °पास्त° (for °प्राप्त°).
147. a) $I_{1,2,4,6}$ S′ V $P_{1,2}$ St T तत्र (for युवा).
151. d) $I_{1,4,6}$ S′ V C T वंश्य° (for वंश°). $I_{1,2,6}$ V योग्यवा; C S योग्यवान् (for योग्यया).
152. d) S′ C T तत् (for तु).
154. b) SA_2 gloss आलस्यम् and न कर्म कौसीद्यं; $I_{1,2,4,6}$ कौमीद्य° (for कौसीद्य°). SA_1 °श्रयम् (for °श्रयन्).

स्वकाले त्यजता लक्ष्मीं विरक्तां बन्धकीमिव ।
हठनिर्वासनव्रीडा दिष्ट्या नासादिता मया ॥ १५५ ॥

शैलूषस्येव मे राज्यरङ्गेऽस्मिन् वल्गतश्चिरम् ।
निर्व्यूढावपि वैरस्यं दिष्ट्या न प्रेक्षका गताः ॥ १५६ ॥

दिष्ट्या सदैव वैमुख्यमुच्चैरुद्घोषयञ्श्रियः ।
त्यागक्षणे न भीतोऽस्मि विकत्थन इवाऽऽहवे ॥ १५७ ॥

इति संचिन्तयन्नन्तः सर्वत्यागोन्मुखो नृपः ।
मनोराज्यानि कुर्वाणो दरिद्र इव पिप्रिये ॥ १५८ ॥

अन्येद्युः प्रकृतीः सर्वाः संनिपत्य सभान्तरे ।
ताभ्यः प्रत्य(त्या)र्पयन्न्यासमिव राज्यं सुरक्षितम् ॥१५९॥

उज्झितं स्वेच्छया तच्च प्रयत्नेनापि नाऽशकत् ।
तं स्वीकारयितुं कश्चित्फणीन्द्रमिव कञ्चुकम् ॥ १६० ॥

अर्चालिङ्गमुपादाय सोऽथ प्रायादुदङ्मुखः ।
धौतवासा निरुष्णीषः पद्भ्यामेव प्रजेश्वरः ॥ १६१ ॥

तस्य पादार्पितदृशो व्रजतो मौनिनः प्रभोः ।
पन्थानं जगृहुः पौरा निश्शब्दस्रवदस्रवः ॥ १६२ ॥

स विलङ्घितगव्यूतिरुपविश्य तरोरधः ।
जनमेकैकमुद्बाष्पं न्यवर्तयत सान्त्वयन् ॥ १६३ ॥

---

155. a) $I_{2,4,6}$ V सुकाले; C T S′ SA_3 स्वकुले (for स्वकाले). —b) SA_1 सरक्तां (for विरक्तां).

156. a) $I_{1,2,4,6}$ शैलूषस्यैव (for शैलूषस्येव). —c) I_3 निर्व्यूढाम°; $P_{1,3}$ C T St SA_1 D SA_2 (after corr.) SG SR निर्व्यूढमपि (for निर्व्यूढावपि). S′ C वैराज्यं (for वैरस्यं). —d) P_1 नः (for न).

159. b) SL संनिपात्य (for संनिपत्य). —c) All Mss. read प्रत्यर्पयत् but D suggests प्रत्यार्पयत्.

160. a) $I_{1,4}$ SA_1 (before corr.) तं च; $I_{2,6}$ ते च (for तच्च).

162. b) P_1 मानिनः (for मौनिनः).

पथि शिखरिणां मूले मूले विलम्ब्य जहज्जनान्-
मितपरिकरो गच्छन्नूर्ध्वं क्रमात्समदृश्यत ।
गहनवसुधाः संपूर्योच्चैर्व्रजन्स निजात्पदा-
न्नद इव विनिर्यातः स्तोकैः कृतानुगमो जलैः ॥ १६४ ॥

निश्शेषं निकटात्स लोकमटवीमध्ये निरुन्धन्पदं
शोकावेशसबाष्पगद्गदपदं संमान्य चोत्सार्य च ।
भूर्जत्वक्परिरोधमर्मरमरुन्निद्राणसिद्धाध्वग-
श्रेणीमौलिमणिप्रभोज्ज्वलगुहागेहं जगाहे वनम् ॥१६५॥

अथ वनसरसीतटद्रुमाधः
पुटकघटोदरसंभृताम्बुपूराम् ।
वसतिमकृत वासरावसाने
शुचितरुपल्लवकल्पितोच्चतल्पाम् ॥ १६६ ॥

शृङ्गासक्तमितातपाः शबलितच्छायाभुवः शाद्वलै-
रुत्फुल्लामलमल्लिकातलमिलत्सुप्तव्रजस्त्रीजनाः ।
सध्वाना वनपालवेणुरणितोन्मिश्रैः प्रपाताम्बुभिः
श्रान्तं दृक्पथमागतास्तमनयन्निद्रामदूराद्रयः ॥ १६७ ॥

वनकरिरसितैः पदे पदे स
प्रतिभटतां पटहध्वनेर्दधानैः ।
अमनुत रटितैश्च कर्करेटोः
परिगलितां गमनोन्मुखस्त्रियामाम् ॥ १६८ ॥

---

164. b) $I_{1,2,4,6}$ P_3 V °सित° (for °मित°). —d) SA_1 स्तोकानुगमो (for कृतानुगमो).

165. a) $I_{1,2,6}$ P_2 S′ V C T निरुध्यत् ; P_1 निरुन्धत्; I_4 निरुत्पत्; D निरुन्धत्; SA निरुद्धयत् (for निरुन्धन्). —c) SA_1 भूर्यत्वत्प° (for भूर्जत्वक्प°). $I_{1,2,6}$ V °मन्दर°; I_4 °मर्दर°; SA_1 °मर्जर° (for °मर्मर°). d) SA_4 gloss भोमजोवो (for °गुहागेहं).

166. d) $I_{1,2,4,6}$ V °तल्पम् (for °तल्पाम्).

167. a) I_3 C T P_1 St °सितातपाः (for °मितातपाः). —b) SA_1 °रुल्लासा° (for °रुत्फुल्ला°). —c) $I_{1,6}$ P_2 C S′ V SA SR °पालरेणु° (for °पालवेणु°).

168. a) P_3 C T I_3 S′ SA_3 वनहरि° (for वनकरि°). —b) SA_1 (before corr.) °ध्वनैर्द° (for °ध्वनेर्द°).

अन्येद्युर्विधिवदुपास्य पूर्वसंध्या-
मासन्ने नलिनसरस्यपास्तनिद्रः ।
क्ष्मापालः परिचितसोदराम्बुतीर्थं
नन्दीशाध्युषितमवाप भूतभर्तुः ॥ १६९ ॥

नन्दिक्षेत्रे त्रिभुवनगुरोः सोऽग्रतस्तत्र याव-
त्तस्थौ तावत्स्वयमभिमतावाप्तये जायते स्म ।
भस्मस्मेरः सुघटितजटाजूटबन्धोऽक्षसूत्री
रुद्राक्षाङ्को जरठमुनिभिः सस्पृहं वीक्ष्यमाणः ॥ १७० ॥

भ्राम्यञ्श्रीकण्ठदत्तव्रतजनितमहासत्क्रियो भैक्षहेतो-
र्भिक्षादानोद्यतासु प्रतिमुनिनिलयं संभ्रमात्तापसीषु ।
वृक्षैर्भिक्षाकपाले शुचिफलकुसुमश्रेणिभिः पूर्यमाणे
मान्यो वैराग्ययोगेऽप्यनुपनतपरप्रार्थनालाघवोऽभूत् ॥१७१॥

—※—

इति श्रीकाश्मीरिकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
द्वितीयस्तरङ्गः ॥

—※—

---

171. a) $I_{2,3,6}$ S′ V C $P_{2,3}$ SA_3 भ्राम्यच्छ्री° (for भ्राम्यञ्श्री°). —d) SA_1 °योग्यो° (for °योगे°). $I_{1,6}$ C V °नुपतन°; T °नुपनन° [sic] S′ °नपतन° [sic] (for °नुपनत°).

After *v.* 171 insert—

I_1 P_2 राजानः ६ आदितः रा. ४४; I_2 राजानः ४४, ग्रन्थाणि आदितः ५४२; P_2 राजानः ६, आदितः ४४, T राजानः ६, आदितः राजानः ४४, ग्रन्था आदितः ५४३; $P_{1,3}$ ६,१७१ आदितः ४३, ग्रन्थ ५४३.

Colophon: $I_{1,2,4,6}$ °चम्पक°; P_2 चण्यक (for °चण्पक°).

अथ

तृतीयस्तरङ्गः

मुञ्चेभाजिनमस्य कुम्भकुहरे मुक्ताः कुचाग्रोचिताः
किं भालज्वलनेन कज्जलमतः स्वीकार्यमक्ष्णोः कृते।
संधाने वपुरर्धयोः प्रतिवदन्नेवं निषेधेऽप्यहेः
कर्तव्ये प्रिययोत्तरानुसरणोद्युक्तो हरः पातु वः ॥ १ ॥

अथोल्लसत्पृथुश्लाघमानिन्युर्मेघवाहनम्।
गान्धारविषयं गत्वा सचिवाधिष्ठिताः प्रजाः ॥ २ ॥

रक्तप्रजस्य भूभर्तुः पश्चाल्लोकानुरञ्जनम्।
तस्याज्ञायि जनैर्धौतक्षौमक्षालनसंनिभम् ॥ ३ ॥

स पुनर्बोधिसत्त्वानामपि सत्त्वानुकम्पिनाम्।
चर्यामुदात्तचरितैरत्यशेत महाशयः ॥ ४ ॥

तस्याभिषेक एवाज्ञां धारयन्तोऽधिकारिणः।
सर्वतोऽमारमर्यादापटहानुदघोषयन् ॥ ५ ॥

कल्याणिना प्राणिवधे तेन राष्ट्रान्निवारिते।
निष्पापां प्रापिता वृत्तिं स्वकोशात्सौनिकादयः ॥ ६ ॥

तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः।
क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥ ७ ॥

I_4 begins with श्रीगणेशाय नमः.

1. a) SA_2 gloss इभस्य (for °अस्य).

5. c) I_3 S °सार°; T °मान°; SA_3 gloss अमारः अहिंसा (for °मार°).

6. c) S′ निष्पायां; P_2 निष्पापा; P_3 निष्पापं (for निष्पापां). S′ C प्रापितां (for प्रापिता). —d) C °शात्शौ°; T S′ °षात्शौ°; P_2 °शात्सो° (for °शात्सौ°).

7. a) I_4 राज्यं (for राज्ये).

स मेघवननामानमग्रहारं विनिर्ममे ।
मयुष्टग्रामकृत्पुण्यज्येष्ठं मेघमठं तथा ॥ ८ ॥

भोगाय देश्यभिक्षूणां वल्लभाऽस्याऽमृतप्रभा ।
विहारमुच्चैरमृतभवनाख्यमकारयत् ॥ ९ ॥

देश्यैकदेशालोर्नाम्नः प्राप्तस्तस्याः पितुर्गुरुः ।
स्तुन्पा तद्भाषया प्रोक्तो लोस्तोन्पास्तूपकार्यभूत् ॥ १० ॥

चक्रे नडवने राज्ञो यूकदेव्यभिधा वधूः ।
विहारमद्भुताकारं सपत्नीस्पर्धयोद्यता ॥ ११ ॥

अर्धे यद्भिक्षवः शिक्षाचारास्तत्राऽर्पितास्तया ।
अर्धे गार्हस्थ्यगर्ह्याश्च सस्त्रीपुत्रपशुश्रियः ॥ १२ ॥

अथेन्द्रदेवीभवनमिन्द्रदेव्यभिधा व्यधात् ।
विहारं सचतुःशालं स्तूपं भूपप्रियाऽपरा ॥ १३ ॥

अन्याभिः खादनासम्माप्रमुखाभिर्निजाख्यया ।
देवीभिस्तस्य महिता विहारा बहवः कृताः ॥ १४ ॥

अर्वाक्कालोद्भवस्यापि राज्यकालोऽस्य भूपतेः ।
न्यक्कृतादिनृपोदन्तैर्वृत्तान्तैरद्भुतोऽभवत् ॥ १५ ॥

स बहिर्विहरञ्जातु भूभृद्भीतैरुदीरितम् ।
चौरश्चौरोऽयमित्यारादशृणोत्क्रन्दितध्वनिम् ॥ १६ ॥

---

8. c) C T I_4 S′ सयुष्ट° (for मयुष्ट°). —d) P_3 I_3 S′ SA_3 °ज्येष्ठो (for °ज्येष्ठं). P_1 I_4 St तदा (for तथा).

9. a) $I_{3,4}$ P_1 SA_1 D चैष्य°; P_2 चैष्ट° (for देश्य°).

10. a) I_4 St SA_1 (before corr.) देशैक° (for देश्यैक°). —c) C T S′ स्तुत्या; I_3 P_3 I_4 SA_2 स्तुम्पा; P_2 स्तन्या (for स्तुन्पा). —d) C T लोस्तो-न्या°; D (suggests लोःस्तुन्पा°); I_3 लोस्तुर्पा° (for लोस्तोन्पा°). $P_{1,3}$ S′ St C T D °र्यकृत् (for °र्यभूत्).

11. b) SA_3 यूख° (for यूक°).

12. a) S′ पद्भि° (for यद्भि°). —ab) D suggests शिष्टाचार° (for शिक्षाचार°). —d) All Mss. read °स्त्रियः but D suggests °श्रियः (for °श्रियः).

14. a) D I_3 °मम्मा°; C T $P_{1,3}$ S′ I_4 °मस्मा° (for सम्मा). —c) C T P_1 $I_{3,4}$ S′ सहिता (for महिता).

कः कोऽत्र बध्यतां चौर इत्युक्ते तेन सक्रुधा ।
शशामाक्रन्दितध्वानो न च चौरो व्यभाव्यत ॥ १७ ॥
पुनर्द्वित्रैर्दिनैस्तस्य निर्गतस्याग्रतस्ततः ।
अभवन्नभयार्थिन्यो द्वित्रा दिव्यप्रभाः स्त्रियः ॥ १८ ॥
ताः संश्रुतेप्सितास्तेन रुद्धाश्वेन कृपालुना ।
अभ्यभाषन्त सीमन्तपुञ्जिताञ्जलयो वचः ॥ १९ ॥
देव दिव्यप्रभावेन भुवने भवता धृते ।
अपरस्माद्भयं जातु कस्य स्यात्करुणानिधे ॥ २० ॥
तदानीं तोयदा भूत्वाच्छादयन्तो नभस्तलम् ।
अकाण्डकरकापातशङ्किभिः कार्पकैर्मृषा ॥ २१ ॥
पक्वशालिवनस्फीतिरक्षाक्षुभितमानसैः ।
नागास्त्वत्कोपसंरम्भभूमितां गमिताः प्रभो ॥ २२ ॥
तेऽस्माकं पतयश्चौरश्चौर इत्यार्तभाषितम् ।
श्रुत्वा देवेन बध्यन्तामित्यवादि यदा क्रुधा ॥ २३ ॥
तदा त्वदाज्ञामात्रेण न्यपतन्पाशवेष्टिताः ।
प्रसादः क्रियतां तेषामस्मत्करुणयाऽधुना ॥ २४ ॥
तदाकर्ण्याऽवदद्राजा प्रसादविशदाननः ।
सर्वे ते बन्धनान्नागास्त्यज्यन्तामिति सस्मितः ॥ २५ ॥
तया तस्याज्ञया राज्ञो नागा विधुतबन्धनाः ।
प्रणम्य चरणौ तूर्णं प्रययुः सपरिग्रहाः ॥ २६ ॥
अथ ग्राहयितुं भूपानाज्ञां हिंसानिवृत्तये ।
स दिग्जयाय निर्व्याजधर्मचर्यो विनिर्ययौ ॥ २७ ॥

---

17. b) P_3 भूभुजा (for सक्रुधा).
20. a) St T S′ °वेण (for वेन).
21. ab) St भूत्वा छा° (for भूत्वाच्छा°). —d) C T S′ कृपकै°; D कार्षिकै° (for कार्पकै°).
22. a) I_3 SA_3 °स्फाति° (for °स्फीति°). —d) C T S′ I_3 SA_3 भूमिं ते (for भूमितां).
24. After v. 24 T S′ add चतुर्भिः कुलकम्; St D चक्कलकम्.
27. d) C S′ °धर्म्मा° (for °धर्म°).

अभूदभीतजनतावेक्षणश्लाघ्यविक्रमः ।
स्पृहणीयो जिनस्यापि तदीयविजयोद्यमः ॥ २८ ॥

प्रभावविजितान्कृत्वा सोऽहिंसादीक्षितान्नृपान् ।
अर्णसां पत्युरभ्यर्णमवापावर्णवर्जितः ॥ २९ ॥

तत्र तालीवनच्छायासुखविश्रान्तसैनिकः ।
युक्तिं द्वीपान्तराक्रान्तौ क्षणमन्तर्व्यचिन्तयत् ॥ ३० ॥

अथ वेलावनोपान्तात्तेनार्ताक्रन्दितध्वनिः ।
मेघवाहनराज्येऽपि हतोऽयमिति शुश्रुवे ॥ ३१ ॥

तप्तायःशङ्कुनेवान्तर्व्रणितः स द्रुतं ततः ।
संचारिणाऽऽतपत्रेण सत्रा तां वसुधामगात् ॥ ३२ ॥

अपश्यदथ केनापि चण्डिकायतनाग्रतः ।
नरं शबरसेनान्या हन्यमानमधोमुखम् ॥ ३३ ॥

अनात्मज्ञ धिगेतत्ते कुकर्मेति महीभुजा ।
तर्जितः स भयादेवं शबरस्तं व्यजिज्ञपत् ॥ ३४ ॥

शिशुर्मुमूर्षुर्मे राजन्नयं रोगार्दितः सुतः ।
कर्मैतद्दैवतैरुक्तमस्य श्रेयोलवावहम् ॥ ३५ ॥

उपहारनिरोधेन सद्य एष विपद्यते ।
बन्धुवर्गमशेषं च विद्धेयतज्जीवजीवितम् ॥ ३६ ॥

---

28. a) C S′ अभूत° (for अभूद°). —c) C T St D P_{1-3} S′ $I_{3,4}$ जनस्यापि (for जिनस्यापि). —d) C T S′ त्वदीय° (for तदीय°).

30. b) I_4 SA_1 (before corr.) °सैनिकैः (for °सैनिकः). —c) C T S′ °क्रांत्यै (for °क्रान्तौ).

31. a) T °पान्ते ते° (for °पान्तात्ते°). —d) St हतोह° (for हतोऽय°).

32. b) C S′ °तस्य (for °तः स). $P_{1,2}$ I_3 श्रुतं (for द्रुतं). —d) C स तत्र; I_4 संत्रातां; I_3 सद्रातां (for सत्रा तां).

33. c) SA SG SR here and elsewhere शवर° (for शबर°).

34. a) $P_{2,3}$ I_3 अनात्मज्ञा (for अनात्मज्ञ). —c) D C T P_{1-3} $I_{3,4}$ S′ °देव (for °देवं).

36. b) D St $P_{1,3}$ I_4 SA_3 एव (for एष).

अरण्यगहनाल्लब्धमनाथं देव रक्षसि ।
बहुलोकाश्रयं बालं कथमेतमुपेक्षसे ॥ ३७ ॥

अथाभ्यधान्महात्मा स वचोभिः शवरस्य तैः ।
वध्यस्य दृष्टिपातैश्च विक्लवैर्विवशीकृतः ॥ ३८ ॥

किरात कातरो मा भूः स्वयं संरक्ष्यते मया ।
बहुबन्धुस्तव सुतो वध्योऽप्ययमबान्धवः ॥ ३९ ॥

उपहारीकरोम्येष चण्डिकायै स्वविग्रहम् ।
मयि प्रहर निश्शङ्कं जीवत्वेतज्जनद्वयम् ॥ ४० ॥

तदद्भुतमहासत्त्वचित्तोदात्तत्वविस्मितः ।
उन्मिषद्रोमहर्षस्तं ततः स शवरोऽभ्यधात् ॥ ४१ ॥

अतिकारुण्यमिषतस्तवायं पृथिवीपते ।
कश्चिन्मतिविपर्यासप्रकारो हृदि रोहति ॥ ४२ ॥

त्रैलोक्यजीवितेनापि यो रक्ष्यो हेलयैव तम् ।
पृथिवीभोगसुभगं कथं कायमुपेक्षसे ॥ ४३ ॥

न मानं न यशो नार्थान्न दारान्न च बान्धवान् ।
न धर्मं न सुतान्भूपा रक्षन्ति प्राणतृष्णया ॥ ४४ ॥

तत्प्रसीद प्रजानाथ मा वध्येऽस्मिन्कृपां कृथाः ।
शिशुश्चैष प्रजाश्चैता जीवन्तु त्वयि जीवति ॥ ४५ ॥

उपाजिहीर्षुरात्मानं दन्तद्योतार्घडम्बरैः ।
अर्चयन्निव चामुण्डामथोवाच स पार्थिवः ॥ ४६ ॥

सदाचारसुधास्वादे के भवन्तो वनौकसः ।
जाह्नवीमज्जनप्रीतिं न जानन्ति मरुस्थिताः ॥ ४७ ॥

---

38. ab) S' सुवचोभिः (for स वचोभिः).
39. d) C S' बाध्यो° (for वध्यो°).
40. b) C सुवि° (for स्वावि°).
43. d) C T S' कार° (for काय°).

ध्रुवापायेन कायेन क्रीणतः कीर्तिमव्ययाम् ।
ममाभीष्टं प्रमार्ष्टुं ते मूढ रूढोऽयमाग्रहः ॥ ४८ ॥

मा वोचः किंचिदपरं प्रहर्तुं चेद्घृणा तव ।
न किं निजः कृपाणो मे शक्तः प्रक्रान्तसिद्धये ॥ ४९ ॥

इत्युक्त्वा स स्वयं देहमुपहर्तुं समुद्यतः ।
खण्डनाय स्वमुण्डस्य विकोशं शस्त्रमादधे ॥ ५० ॥

ततः प्रहर्तुकामस्य तस्य द्युकुसुमैः शिरः ।
करश्च दिव्यवपुषा रुद्धः केनाप्यजायत ॥ ५१ ॥

अथापश्यत्तथाभूतः कंश्चिद्दिव्याकृतिं पुरः ।
न चण्डिकां न तं वध्यं न किरातं न दारकम् ॥ ५२ ॥

स तं दिव्यस्तदाऽवादीन्मां त्वं सत्त्ववशीकृतम् ।
विद्धि मध्यमलोकेन्दो वरुणं करुणानिधे ॥ ५३ ॥

यदेतत्त्वामुपास्तेऽद्य छत्रं तन्मत्पुरात्पुरा ।
महाबलोऽहरद्भौमः पुराणश्वशुरस्तव ॥ ५४ ॥

रसातलैकतिलकं माहात्म्यवदिदं विना ।
उपद्रवाः प्राणहराः पौराणां नः पदे पदे ॥ ५५ ॥

तदिदं प्राप्तुकामेन त्वदौदार्यं परीक्षितुम् ।
कारुण्यमय मायेयं निरमायि मयेदृशी ॥ ५६ ॥

त्वदादिर्यो व्यधाज्जन्तून्व्यसून्वसुकुलात्मजः ।
प्रायश्चित्तममारेण चरसीव तदेनसः ॥ ५७ ॥

---

48. c) I_4 SA_1 (before corr.) °भीष्टां (for °भीष्टं). —d) S′ मूढो° (for रूढो°).
50. d) C T S′ °ददे (for °दधे).
52. b) I_4 पुनः (for पुरः).
53. b) C S′ त्वां (for त्वं).
56. c) C T S′ करुणामय (for कारुण्यमय).
57. SA_1 om. न्व्यसून्वसुकु and मारेण चरसीव तदेनसः.

भयस्पृहाजनकयोर्धरणीधारणोचिते ।
शेषदेहे विषोद्गारफणारत्नौघयोरिव ॥ ५८ ॥

तमःप्रकाशावहयोस्तेजःक्रान्तदिगन्तरे ।
उषर्बुधे धूमजालज्वालापल्लवयोरिव ॥ ५९ ॥

क्रमाप्यायक्रियाभाजो रुद्धतेजस्विमण्डले ।
प्रावृट्पयोदच्छन्नेऽह्नि संतापासारयोरिव ॥ ६० ॥

द्वयोरालोकितं चित्रं जन्मैकस्मिन्महाकुले ।
तस्य त्रिकोटिहन्तुश्च तवाऽहिंस्रस्य च प्रभोः ॥ ६१ ॥

नम्रः सम्राडथैवं स वदतो यादसां प्रभोः ।
चकार पूजां स्तोत्रेण छत्रेण च कृताञ्जलिः ॥ ६२ ॥

तं च स प्रतिगृह्णन्तं प्रणयादुष्णवारणम् ।
जगाद गुणिनामग्र्यो वरुणं धरणीधवः ॥ ६३ ॥

कल्पद्रुमाश्च सन्तश्च नार्हन्ति समशीर्षिकाम् ।
अर्थिनां प्रार्थिताः पूर्वं फलन्त्यन्ये स्वयं यतः ॥ ६४ ॥

अवालम्बिष्यत छत्रं कथं नः पुण्यपण्यताम् ।
तत्प्रार्थयिष्यत न चेदार्तोपकृतये भवान् ॥ ६५ ॥

वदान्यः संविभाग्येभ्यः पूर्णं कुर्यादनुग्रहम् ।
छाययाऽऽप्याययन्दद्यात्फलान्यपि महीरुहः ॥ ६६ ॥

---

58. b) C T P_1 S′ °धरणोचिते (for °धारणोचिते).
59. b) C S′ क्रान्त° (for क्रान्त°).
60. P_1 om.
61. c) P_1 °हर्तश्च; P_2 °हर्तुश्च (for °हन्तुश्च). —d) D C T St P_{1-3} $I_{3,4}$ अहिंस° (for अहिंस्र°). After *v.* 61 S′ T add चतुर्भिः कुलकम्; D St चक्कलकम्.
62. I_4 om. ab.
63. d) C T S′ St °धरः (for °धवः).
65. b) T S′ $P_{1,3}$ न (for नः).
66. a) D P_{1-3} $I_{3,4}$ SA SR SG (before corr.) वदन्यः (for वदान्यः). D C T $P_{1,3}$ I_4 S′ °भागेभ्यः; SA_1 gloss अर्थिभ्यः (for भाग्येभ्यः). —c) P_3 SA_1 दध्यात् (for दद्यात्).

तदेवं विहितोदात्तसंविभागाभिचोदितः ।
जनोऽयं भगवन्किंचिद्वरं प्रार्थयतेऽपरम् ॥ ६७ ॥

वशीकृतेयं पृथिवी कृत्स्ना भवदनुग्रहात् ।
जेतुं द्वीपान्कथ्यतां तु युक्तिः पाथोधिलङ्घने ॥ ६८ ॥

इत्यर्थ्यमानोऽकथयद्भूमिपालं जलेश्वरः ।
तितीर्षौ भवति स्तम्भं नीयतेऽम्भो मयाऽम्बुधेः ॥ ६९ ॥

ततो महान्प्रसादोऽयमित्युक्ते पृथिवीभुजा ।
तिरोबभूव भगवान्वरुणः सोष्णवारणः ॥ ७० ॥

अन्येद्युर्विस्मयस्मेरैर्बलैः सीमन्तयञ्जलम् ।
प्रभावस्तम्भितक्षोभं प्रोत्तताराऽ स वारिधिम् ॥ ७१ ॥

गुणरत्नाकरः शैलं स रत्नाकरशेखरम् ।
नानारत्नाकरं सैन्यैरारुरोहाऽथ रोहणम् ॥ ७२ ॥

तत्र तालीतरुवनच्छायाध्यासितसैनिकम् ।
प्रीत्या लङ्काधिराजस्तमुपतस्थे विभीषणः ॥ ७३ ॥

समागमः स शुशुभे नरराक्षसराजयोः ।
बन्दिनादाश्रुतान्योन्यप्रथमालापसंभ्रमः ॥ ७४ ॥

अथ रक्षःपतिर्लङ्कां नीत्वाऽलंकरणं क्षितेः ।
अमर्त्यसुलभाभिस्तं विभूतिभिरुपाचरत् ॥ ७५ ॥

यदासीत्पिशिताशा इत्यन्वर्थं नाम रक्षसाम् ।
तदा तदाज्ञाग्रहणे प्राप तद्रूढिशब्दताम् ॥ ७६ ॥

रक्षश्शिरःप्रतिच्छन्दैः स्थिरप्रणतिसूचकैः ।
सनाथशिखरान्प्रादात्तस्मै रक्षःपतिर्ध्वजान् ॥ ७७ ॥

---

67. a) P_2 तदेव; P_3 तद्वयं; SA_1 तदयं (for तदेवं). —d) St परम् (for अपरम्).
69. c) $P_{1,3}$ तितीर्षौ (for तितीर्षौ).
71. c) C T S′ P_3 I_3 SA_3 °जलं (for °क्षोभं).
76. d) All Miss. read प्रापि but D suggests प्राप (for प्राप).
77. a) SA_1 gloss प्रतिमाभिः (for प्रतिच्छन्दैः).

पाराद्वारिनिधेः प्राप्ताः कश्मीरेष्वधुनापि ये ।
राज्ञां यात्रासु निर्यान्ति ख्याताः पारध्वजाः पुरः ॥७८॥

इत्थमाराक्षसकुलं प्राणिहिंसां निषिध्य सः ।
स्वमण्डलं प्रति कृती न्यवर्तत नराधिपः ॥ ७९ ॥

ततःप्रभृति तस्याज्ञा सार्वभौमस्य भूपतेः ।
हिंसाविरतिरूपा सा न कैश्चिदुदलङ्घ्यत ॥ ८० ॥

क्षुद्रैरुद्रादिभिर्नाप्सु सिंहाद्यैर्गहने न च ।
न श्येनप्रमुखैर्व्योम्नि तद्राज्ये जन्तवो हताः ॥ ८१ ॥

अतिक्रामति कालेऽथ कोऽपि शोकाकुलो द्विजः ।
पुत्रं गदार्तमादाय द्वारि चक्रन्द भूपतेः ॥ ८२ ॥

दुर्गया प्रार्थितं राजन्पश्वाहारं विनैष मे ।
अनन्यसंततेः सूनुर्ज्वरेणाद्य विपद्यते ॥ ८३ ॥

यद्यहिंसाऽऽग्रहेणेमं क्षितिपाल न रक्षसि ।
एतद्विपत्तौ तत्कोऽन्यो निमित्तं प्रतिभाति मे ॥ ८४ ॥

निर्णयो वर्णगुरुणा त्वयैवैष प्रदीयताम् ।
ब्राह्मणस्य पशोर्वा स्यात्प्राणानां कियदन्तरम् ॥ ८५ ॥

तपःस्थानपि ये जघ्नुर्ब्राह्मणप्राणलब्धये ।
हा मातस्तेऽधुना भूमे प्रजापालास्तिरोहिताः ॥ ८६ ॥

इति ब्रुवति साक्षेपं शोकरूक्षाक्षरं द्विजे ।
आपन्नार्तिहरो राजा चिरमेवं व्यचिन्तयत् ॥ ८७ ॥

---

78. d) C S′ T काश्मीर° (for कश्मीरे°).
80-81. SA SA_1 SA_2 SL I_4 om.; SA_3 in marg.
81. a) C T St SA_3 $P_{1,2}$ I_3 S′ °रुध्रा° (for °रुद्रा°).
82. c) C T S′ गतासु°; $P_{1,2}$ गदात्त°; I_3 गदातु° (for गदार्त°).
83. b) C T S′ P_3 I_3 SA_3 राजन्नुपहारं (for राजन्पश्वाहारं).
85. d) I_4 प्राणिनां (for प्राणानां).
86. a) $P_{2,3}$ $I_{3,4}$ उपस्स्था° (for तपःस्था°). —c) C S′ भूमेः (for भूमे).

न वध्याः प्राणिन इति प्राङ्मया समयः कृतः ।
विप्रार्थमपि किं कुर्यां संप्रतिज्ञातविप्लवम् ॥ ८८ ॥

निमित्तीकृत्य मामद्य विपद्येत द्विजो यदि ।
तत्राऽप्यत्यन्तपापीयानर्थः संकल्पविप्लवः ॥ ८९ ॥

नैति मे संशयभ्रान्तमेकपक्षावलम्बनम् ।
संभेदावर्तपतितं प्रसूनमिव मानसम् ॥ ९० ॥

तत्स्वदेहोपहारेण दुर्गां तोषयता मया ।
प्रतिज्ञया समं न्याय्यं रक्षितुं जीवितं द्वयोः ॥ ९१ ॥

इति संचिन्त्य सुचिरं देहदानोद्यतो नृपः ।
श्वः प्रियं तव कर्ताऽस्मीत्युक्त्वा विप्रं व्यसर्जयत् ॥ ९२ ॥

क्षपायां क्षमापतिमथ स्वमुपाहर्तुमुद्यतम् ।
निषिध्य दुर्गा व्यधित प्रकृतिस्थं द्विजन्मजम् ॥ ९३ ॥

इत्याद्यद्यतनस्यापि चरितं तस्य भूपतेः ।
पृथग्जनेष्वसंभाव्यं वर्णयन्तस्त्रपामहे ॥ ९४ ॥

अथवा रचनानिर्विशेषमार्षेण वर्त्मना ।
प्रस्थिता नानुरुन्धन्ति श्रोतृचित्तानुवर्तनम् ॥ ९५ ॥

तस्मिन्नस्तं गते भुक्त्वा क्ष्मां चतुस्त्रिंशतं समाः ।
अनादित्यमिवाऽशेषं निरालोकमभूज्जगत् ॥ ९६ ॥

अथ क्ष्माभृद्ररक्ष क्ष्मां श्रेष्ठसेनस्तदात्मजः ।
प्राहुः प्रवरसेनं यं तुञ्जीनं चाञ्जसा जनाः ॥ ९७ ॥

दोःस्तम्भसंभृतासक्तौ कृपाणमणिदर्पणे ।
संक्रान्तेवोन्मुखी यस्य भुवनश्रीर्व्यभाव्यत ॥ ९८ ॥

---

88. b) C T S′ P_3 I_3 SA_3 प्राग्योऽस्मि समकल्पयम् (for प्राङ्मया समयः कृतः).
d) D C T SA P_{1-3} $I_{3,4}$ S′ स प्रति° (for संप्रति°).

91. d) T I_4 जीवितुं (for जीवितं).

95. SA SA_1 SA_2 I_4 om.; SA_3 in marg. —c) SA_3 gloss जनाः (for प्रस्थिता).

97. c) St P_{1-3} $I_{3,4}$ आहुः (for प्राहुः).

समातृचक्रं निर्माय यः पूर्वं प्रवरेश्वरम् ।
पुण्याः पुराणाधिष्ठाने प्रतिष्ठा विविधा व्यधात् ॥ ९९ ॥
गृहाङ्गनमिव क्षोणीं गणयन्वशवर्तिनीम् ।
त्रिगर्तोर्वीं ग्रामसख्ये प्रवरेशाय यो ददौ ॥ १०० ॥
ईशो नृपाणां निश्शेषक्ष्माकेदारकुटुम्बिनाम् ।
स समास्त्रिंशतं भूभृदनिस्त्रिंशाशयोऽभवत् ॥ १०१ ॥
हिरण्यतोरमाणाख्यौ व्यधत्तामथ तत्सुतौ ।
साम्राज्ययुवराजत्वभाजने रञ्जनं क्षितेः ॥ १०२ ॥
भ्रात्राहतानां प्राचुर्यं विनिवार्यासमञ्जसम् ।
तोरमाणेन दीन्नाराः स्वाहताः संप्रवर्तिताः ॥ १०३ ॥
मामवज्ञाय राज्ञेव कस्मादेतेन वल्गितम् ।
इति तं पूर्वजो राजा क्रोधनो बन्धने व्यधात् ॥ १०४ ॥
चिरं स्थितित्यक्तशुचस्तत्र तस्याऽञ्जनाभिधा ।
ऐक्ष्वाकस्याऽऽत्मजा राज्ञी वज्रेन्द्रस्याऽऽस्त गुर्विणी ॥ १०५ ॥
आसन्नप्रसवा भर्त्रा सा त्रपार्तेन बोधिता ।
सुतं प्रविष्टा प्रासोष्ट कुलालनिलये क्वचित् ॥ १०६ ॥
स कुम्भकारगेहिन्या काक्येव पिकशावकः ।
पुत्रीकृतो राजपुत्रः पर्यातं पर्यवर्धत ॥ १०७ ॥
जनयित्र्याः कुलाल्याश्च रक्षित्र्या विदितोऽभवत् ।
रत्नसूतेर्भुजंग्याश्च प्रच्छन्न इव शेवधिः ॥ १०८ ॥

---

99. SL om.
100. c) St SA_3 °मध्ये (for °सख्ये). —d) I_4 दधौ (for ददौ).
103. a) $I_{3,4}$ P_2 St SA वलाह°; D (suggests भ्रात्राह°); C T S′ P_1 वालाह° (for भ्रात्राह°). —c) SA_3 gloss सुवर्णमया रजतताम्रमयाश्च (for दीन्नाराः). —d) SA_3 gloss स्वाहताः स्वनामाक्षरमुद्राङ्कदानेन आहताः संप्रवर्तिताः व्यवहारविषयाः कृता (for स्वाहताः).
104. b) SA_3 gloss तोरमाणेन (for एतेन).
106. b) C T P_1 S′ सत्रपं तेन (for सा त्रपार्तेन). SA_3 gloss त्रपार्तेन सलज्जेन (for त्रपार्तेन).
108 c) SA_3 gloss भूमेः (for रत्नसूतेः). —d) C T S′ सेवाधिः (for शेवधिः).

पौत्रः प्रवरसेनस्य गिरा मातुर्नृपात्मजः ।
पैतामहेन नाम्नैव कुलाल्या ख्यापितोऽभवत् ॥ १०९ ॥

वर्धमानः स संपर्कं न सेहे सहवासिनाम् ।
तेजस्विमैत्रीरसिकः शिशुः पद्म इवाऽम्भसाम् ॥ ११० ॥

तं कुलीनैश्च शूरैश्च विद्याविद्भिश्च दारकैः ।
अन्वीतमेव ददृशुः क्रीडन्तं विस्मयाज्जनाः ॥ १११ ॥

स्ववृन्दस्याऽत्युदारौजा राजा चक्रे स दारकैः ।
मृगेन्द्रशावः क्रीडद्भिर्वने बालमृगैरिव ॥ ११२ ॥

संविभेजेऽनुजग्राह वशीचक्रे च सोऽर्भकान् ।
अराजोचितमाचारं नैव कंचिदसेवत ॥ ११३ ॥

भाण्डादि कर्तुं मृत्पिण्डं कुम्भकारैः समर्पितम् ।
स्वीकृत्य चक्रिरे तेन शिवलिङ्गपरम्पराः ॥ ११४ ॥

तथा साश्चर्यचर्यः स क्रीडञ्जातु व्यलोक्यत ।
मातुलेन जयेन्द्रेण सादरं चाभ्यनन्द्यत ॥ ११५ ॥

आवेद्यमानं शिशुभिस्तं जयेन्द्रोऽयमित्यसौ ।
भूपालवत्सावहेलं पश्यन्नन्वग्रहीदिव ॥ ११६ ॥

संभाव्य सत्त्वावष्टम्भात्तमसामान्यवंशजम् ।
सादृश्याद्भगिनीभर्तुर्भागिनेयमशङ्कत ॥ ११७ ॥

सत्वरस्तत्त्वजिज्ञासारसेनाऽनुससार तम् ।
प्राप्तस्तद्गृहमौत्सुक्यात्स्वसारं च व्यलोकयत् ॥ ११८ ॥

सा स चान्योन्यमुन्मन्यू पश्यन्तौ भ्रातरौ चिरात् ।
निश्श्वासद्विगुणोष्माणि मुहुरश्रूण्यमुञ्चताम् ॥ ११९ ॥

---

112. a) SA_2 gloss अतिशयेन उदारं ओजः यस्य (for अत्युदारौजा).
113. d) C T S′ $I_{3,4}$ SA (before corr.) किञ्चि° (for कांचि°).
116. b) SA_3 gloss प्रवरसेनः (for असौ).
118. a) C T S′ I_4 °स्तर्क° (for °स्तत्त्व°).
119. c) T S′ I_4 निःश्वासात् (for निश्श्वास°).

कुलाल्या दारको मातः कावेताविति पृष्टवान् ।
अकथ्यतेत्थं वत्सैषा माताऽयं मातुलश्च ते ॥ १२० ॥

पितुर्बन्धेन सक्रोधं तं कालापेक्षयाऽक्षमम् ।
शिक्षयित्वा जयेन्द्रोऽथ कार्यशेषाय निर्ययौ ॥ १२१ ॥

उत्पिञ्जोत्पादनासज्जे तस्मिन्भ्रात्रा यदृच्छया ।
बन्धात्त्यक्तो नृतरणिस्तोरमाणोऽस्तमाययौ ॥ १२२ ॥

निवार्य मरणोद्योगं मातुर्निर्वेदखेदितः ।
ययौ प्रवरसेनोऽथ तीर्थौत्सुक्याद्दिगन्तरम् ॥ १२३ ॥

रक्षित्वा दशमासोनाः क्ष्मामेकत्रिंशतिं समाः ।
तस्मिन्क्षणे हिरण्योऽपि शान्तिं निस्संततिर्ययौ ॥ १२४ ॥

तत्रानेहस्युज्जयिन्यां श्रीमान्हर्षापराभिधः ।
एकच्छत्रश्चक्रवर्ती विक्रमादित्य इत्यभूत् ॥ १२५ ॥

भूपमद्भुतसौभाग्यं श्रीर्बद्धरभसाऽभजत् ।
विहाय हरिबाहूंश्च चतुरः सागरांश्च यम् ॥ १२६ ॥

लक्ष्मीं कृत्वोपकरणं गुणे येन प्रवर्धिते ।
श्रीमत्सु गुणिनोऽद्यापि तिष्ठन्त्युद्धुरकंधराः ॥ १२७ ॥

म्लेच्छोच्छेदाय वसुधां हरेरवतरिष्यतः ।
शकान्विनाश्य येनाऽऽदौ कार्यभारो लघूकृतः ॥ १२८ ॥

नानादिगन्तराख्यातं गुणवत्सुलभं नृपम् ।
तं कविर्मातृगुप्ताख्यः सर्वास्थानस्थमासदत् ॥ १२९ ॥

---

122. a) $P_{2,3}$ °त्पादनसज्जे; D °त्पादनात् सज्जे; SA_1 (marg.) °द्वासनासज्जे; SA_3 °त्पादने सज्जे and adds gloss द्वन्द्वयुद्धस्य कोलाहले सज्जे सति (for °त्पादनासज्जे). —c) C T S′ बन्धान्सु° (for बन्धात्त्य°).
125. b) I_4 हर्षाभिधः पुरा (for हर्षापराभिधः).
127. b) C T S′ P_3 SG गुणो (for गुणे). $P_{1,3}$ C T S′ SG प्रवर्धते (for प्रवर्धिते). —d) C S′ T °न्त्युद्धत° (for °न्त्युद्धुर°).
128. b) SA_3 gloss कर्किनाम्नः (for हरेः). —d) S′ लघु° (for लघू°).
129. d) S′ C T P_3 SG (after corr). सभास्था° (for सर्वास्था°).

स गम्भीरस्य भूभर्तुरनुभावं महाद्भुतम् ।
विविधास्थानसंवृद्धस्तस्याऽभ्यूह्य व्यचिन्तयत् ॥ १३० ॥

सोऽयमासादितः पुण्यैः क्षोणिपालो गुणिप्रियः ।
परभागोपलम्भाय पूर्वेऽमुष्य महीभुजः ॥ १३१ ॥

यस्मिन्राजनि तत्त्वज्ञैः सूरिभिः संभृतश्रुतैः ।
नाञ्जलिर्दीयते जातु मानाय च गुणाय च ॥ १३२ ॥

भङ्ग्याऽमुष्मिन्विदधती स्वाभिप्रायप्रकाशनम् ।
वैदग्ध्यवन्ध्यतां नैति बुद्धिः कुलवधूरिव ॥ १३३ ॥

खिलीकृतखलालापे युक्तायुक्तविवेक्तरि ।
नायाति सेव्यमानेऽस्मिन्स्वगुणोऽनर्थकारिताम् ॥ १३४ ॥

अनाप्नुवद्भिः सावद्यदुर्विद्यसमशीर्षिकाम् ।
जीवन्मरणमस्याग्रे गुणिभिर्नानुभूयते ॥ १३५ ॥

संभावनानुसारेण प्रवृत्तोऽस्माद्विवेकिनः ।
शोच्यते नाश्रितोच्छ्वासं प्रीतिदायो महाशयैः ॥ १३६ ॥

गृह्णन्यथागुणं स्वान्तमुचितप्रतिपत्तिभिः ।
अन्तरङ्गः समस्तानामयमुत्साहवर्धनः ॥ १३७ ॥

सेवया दृष्टकष्टस्य दाक्षिण्योत्पादने श्रमः ।
अस्य यो न स भृत्यानां हिमाद्रौ हिमविक्रयः ॥ १३८ ॥

मिथ्याख्यातगुणो नाप्तो नामात्यः कलहप्रियः ।
असत्यसंधः स्थेयो वा नास्थानेऽस्य महीपतेः ॥ १३९ ॥

अश्लीलालापिनोऽन्योन्यं नर्मोक्त्या मर्मभेदिनः ।
अन्यप्रवेशासहनाः संहता नास्य सेवकाः ॥ १४० ॥

---

130. b) C T S′ I_4 गुणा° (for महा°).
131. b) T S′ क्षौणि° (for क्षोणि°). —c) C S′ I_4 °रंभाय (for °लम्भाय).
132. a) C T I_3 S′ SA_3 अस्मिन् (for यस्मिन्).
136. a) I_4 SA om. संभावनानुसा.
137. a) C S′ शान्त°; T स्वन्त° (for स्वान्त°).
140. b) C S′ नर्मोक्ता (for नर्मोक्त्या).

छन्दानुवर्तिनामेष निजविज्ञानबन्दिनाम् ।
सर्वज्ञंमन्यतान्धानां मुखप्रेक्षी न पार्थिवः ॥ १४१ ॥

अनेन सह संजातः संलापो विपुलोदयः ।
लभ्यते नान्तरा छेत्तुं दुर्जातैर्जातु दुर्जनैः ॥ १४२ ॥

सर्वदोषोज्झितं सेव्यं नृपमेवमिमं मम ।
समासादयतः पुण्यैरदूरे स्वार्थसिद्धयः ॥ १४३ ॥

गम्भीरश्च गुणज्ञश्च स्थिरबुद्धिश्च पार्थिवः ।
एष क्लेशभयं त्यक्त्वा निषेव्यः प्रतिभाति मे ॥ १४४ ॥

न चास्माद्धनमादाय रञ्जितादन्यराजवत् ।
भ्राम्यतो भूतलेऽमुष्मिन्सेव्योऽन्यः प्रतिभाति मे ॥ १४५ ॥

इति संचिन्त्य सुदृढं स नवामिव तां सभाम् ।
नारञ्जयन्न चास्ते स्म गुणिगोष्ठीषु मध्यगः ॥ १४६ ॥

मृदुपूर्वं गुणानेव दर्शयन्तं विशां पतिः ।
विशिष्टयोग्यताज्ञप्त्यै विवेदाराधनोन्मुखम् ॥ १४७ ॥

अचिन्तयच्च नाऽयं स्याद्गुणिमात्रं महाशयः ।
उदात्तं सत्क्रियार्हत्वं वदत्यस्य गभीरता ॥ १४८ ॥

इति संचिन्त्य राज्ञाऽपि ज्ञातुं तस्यान्तरं मतेः ।
नाक्रियन्त परीक्षार्थं यथावल्लाभसत्क्रियाः ॥ १४९ ॥

स तेनानुपचारेण तमुदात्ताशयं नृपम् ।
स्वीकर्तारं विदन्धीमान्सिषेवे प्रीतिमाश्रितः ॥ १५० ॥

क्रमोपचीयमानेन सेवाभ्यासेन धीमतः ।
तस्य नोद्वेगमगमत्स्वकाय इव पार्थिवः ॥ १५१ ॥

---

144. c) C S' I_4 श्लेष° (for क्लेश°).
145. a) C नचास्य; I_4 नचास्म° (for नचास्मा°). —c) I_4 SA_1 भ्राम्यते (for भ्राम्यतो).
146. c) C S' नानुरञ्जन्न; SA_1 नारञ्जन्न° (for नारञ्जयन्न).
147. a) C St I_4 °नेवं (for °नेव). —b) I_4 °पतिम् (for °पतिः).

नातीव स्वल्पया स्थित्या नातीवाऽप्यथ दीर्घया।
शरन्निशाक्षणेनेव राजा निन्ये प्रसन्नताम् ॥ १५२ ॥

नर्मभिर्गर्भचेटानां द्वाःस्थानां विक्रियाक्रमैः।
मिथ्यास्तवैर्विटानां च न स क्षोभमनीयत ॥ १५३ ॥

प्रसन्नालापसंप्राप्तौ छायाग्रह इवाचलः।
प्रतिस्पर्धीव च क्रुध्यन्नावज्ञायामभूत्प्रभोः ॥ १५४ ॥

वीक्षणं राजदासीनां राजद्विष्टैः सहासनम्।
राजाऽग्रे च कथां नीचैः कालविन्नाचचार सः ॥ १५५ ॥

स्वभावाद्राजपुरुषैः सजनै राजनिन्दकैः।
नास्मात्प्रभोरुपालम्भो लेभे पैशुन्यजीविभिः ॥ १५६ ॥

वदद्भिरादरात्स्थैर्ये वैफल्याद्यन्वहं प्रभोः।
निन्ये नोत्साहशैथिल्यं सेवोत्साहासहिष्णुभिः ॥ १५७ ॥

अन्योत्कर्षानपि वदन्प्रसङ्गेन निराग्रहः।
स्वविद्याद्योतकः सोऽभूत्सभ्यानां हृदयंगमः ॥ १५८ ॥

एवं स सेवमानस्तमुद्योगेन बलीयसा।
अनिर्विण्णो मातृगुप्तः षड्ऋतूनत्यवाहयत् ॥ १५९ ॥

अथ तं कृशसर्वाङ्गं धूसरं जीर्णवाससम्।
बहिर्जातु विनिर्यातो राजा वीक्ष्य व्यचिन्तयत् ॥ १६० ॥

वैदेशिको निश्शरणो गुणवान्बान्धवोज्झितः।
दार्ढ्यं जिज्ञासुना कष्टं सोऽयमायासितो मया ॥ १६१ ॥

कोऽस्याश्रयः किमशनं कानि प्रावरणानि वा।
इत्यैश्वर्यविमूढेन मया हन्त न चिन्तितम् ॥ १६२ ॥

---

156. b) विजने (suggested) (for सजनैः). —c) C S′ $I_{3,4}$ नास्मत°; SA_3 gloss मातृगुप्तात् (for नास्मात्).
157. c) C I_4 S′ सोत्साह° (for नोत्साह°).
158. d) C S′ I_4 सत्यानां (for सभ्यानां).
159. c) SA_1 अनिर्विन्नो (for अनिर्विण्णो).
161. d) C T S′ °वासितो (for °यासितो).

वसन्तेनेव न मया शोभयाऽद्यापि योजितः ।
शीतवातातपैः शुष्यन्सोऽयं पुरुषपादपः ॥ १६३ ॥

अस्य ग्लानस्य भैषज्यं निर्विण्णस्य विनोदनम् ।
श्रान्तस्य वा क्लमच्छेदं को विदध्यादसंपदः ॥ १६४ ॥

नास्मै चिन्तामणिं दद्यां नामृतं वा निषेवितः ।
मया यदयमेतावद्व्यामूढेन परीक्ष्यते ॥ १६५ ॥

तदमुष्य गुणित्वस्य तीव्रसेवाश्रमस्य च ।
प्रतिपत्त्या कतमया तावदानृण्यमाप्नुयाम् ॥ १६६ ॥

इति चिन्तयतस्तस्य राज्ञस्तं सेवकं प्रति ।
स्वप्रसादोचिता काचित्प्रत्यभान्नैव सत्क्रिया ॥ १६७ ॥

ततः प्रावर्तत स्फारनीहारलववाहिभिः ।
दहन्निवाङ्गं प्रालेयपवमानैर्हिमागमः ॥ १६८ ॥

संततध्वान्तमिषतस्तीव्रशीतवशीकृताः ।
आशाश्चकाशिरे नीलनिचोलाच्छादिता इव ॥ १६९ ॥

शीतार्त्या द्युमणावौर्वदहनोष्माभिलाषतः ।
द्रुतं यातीव जलधिं दिनानि लघुतां ययुः ॥ १७० ॥

अथ दीपोज्ज्वले धाम्नि लसद्दीप्तहसन्तिके ।
कदाचिन्नृपतिर्दैवादर्धरात्रे व्यबुध्यत ॥ १७१ ॥

स हेमन्तानिलैर्भूरिभांकारपरुषैः पुरः ।
दीपान्प्रकम्पितानीषत्प्रविष्टैर्धाम्नि दृष्टवान् ॥ १७२ ॥

तानुज्ज्वलयितुं भृत्यानन्विष्यन्नभ्यधात्ततः ।
यामिकेषु बहिः सज्जः को वर्तत इति स्फुटम् ॥ १७३ ॥

सुखसुप्तेषु सर्वेषु बाह्यकक्ष्यान्तरात्ततः ।
राजन्नयमहं मातृगुप्त इत्यशृणोद्वचः ॥ १७४ ॥

---

165. a) C St $P_{1,2}$ $I_{3,4}$ S′ दध्यां (for दद्यां).
166. c) SA_3 gloss सत्क्रियया (for प्रतिपत्त्या). —d) C I_4 S′ °प्नुयात् (for °प्नुयाम्).
171. b) SA_3 gloss मन्मन्त्रिका (for हसन्तिका).
173. S′ om. 173c-174 b.

प्रविशेति स्वयं राज्ञा दत्तानुज्ञस्ततो गृहम् ।
लक्ष्मीसांनिध्यरम्यं तदद्दष्टोऽन्यैर्विवेश सः ॥ १७५ ॥

दीपानुज्ज्वलयेत्युक्तो निष्पाद्य चतुरैः पदैः ।
बहिर्यियासुरूचेऽथ क्षणं तिष्ठेति भूभुजा ॥ १७६ ॥

स भयद्विगुणीभूतशीतकम्पः प्रभोः पुरः ।
किंस्विद्वक्तीति विमृशन्नातिदूरेऽभ्युपाविशत् ॥ १७७ ॥

अथ पप्रच्छ भूपालः कियत्यस्ति निशेति तम् ।
सोऽभ्यधाद्देव यामिन्या यामः सार्धोऽवशिष्यते ॥ १७८ ॥

ततो भूभृदुवाचैनं कथं सम्यङ्निशाक्षणः ।
त्वयाऽवधारितो निद्रा कथं नाभूच्च ते निशि ॥ १७९ ॥

अथ कृत्वा क्षणाच्छ्लोकमेतं तं स व्यजिज्ञपत् ।
अवस्थावेदनादाशां दैन्यं वा त्यक्तुमुद्यतः ॥ १८० ॥

शीतेनोद्धृषितस्य माषशिमिवच्चिन्तार्णवे मज्जतः
शान्ताग्निं स्फुटिताधरस्य धमतः क्षुत्क्षामकण्ठस्य मे ।
निद्रा काऽप्यवमानितेव दयिता संत्यज्य दूरं गता
सत्पात्रप्रतिपादितेव वसुधा न क्षीयते शर्वरी ॥ १८१ ॥

तदाकर्ण्य महीपालः साधुवादैः परिश्रमम् ।
अभिनन्द्य कवीन्द्रं तं पूर्वस्थानं व्यसर्जयत् ॥ १८२ ॥

अचिन्तयच्च धिङ्मां यः सगुणात्खिन्नचेतसः ।
दुःखोत्तप्तं वचः शृण्वन्नेवमेवाधुना स्थितः ॥ १८३ ॥

निरर्थकान्साधुवादानन्यस्येव विदन्मम ।
अयमज्ञातहृदयो दुःखमास्ते ध्रुवं बहिः ॥ १८४ ॥

---

175. d) C P_1 S′ St °पृष्टो (for °दृष्टो).
176. c) C T S′ °र्थयौ स उचेथ; I_4 SA_1 °र्यियासुरूचे च (for °र्यियासुरूचेथ).
177. a) C S′ मय° (for भय°).
180. c) SA_1 gloss अवस्थायाः आवेदनं तस्मात् (for अवस्थावेदनात्).
181. a) C T S′ मासमशिवं (for माषशिमिव°).
182. d) T S′ I_4 पूर्वस्थाने (for पूर्वस्थानं).

चिरं चिन्तयतो यत्नात्सदृशीमस्य सत्क्रियाम् ।
देयं महार्हमद्यापि न किंचित्प्रतिभाति मे ॥ १८५ ॥

अथवाऽस्यैव सूक्तेन स्मारितोऽस्म्यधुना यथा ।
वर्तते राजरहितं काश्मीरमण्डलम् ॥ १८६ ॥

पात्रायास्मै मही तस्मात्सा मया प्रतिपाद्यते ।
अवधीर्य महीपालान्महतोऽप्यर्थनापरान् ॥ १८७ ॥

इति निश्चित्य चतुरं क्षपायामेव पार्थिवः ।
गूढं व्यसर्जयद्दूतान्काश्मीरीः प्रकृतीः प्रति ॥ १८८ ॥

आदिदेश च तान्यो वो दर्शयेच्छासनं मम ।
मातृगुप्तभिधो राज्ये निश्शङ्कं सोऽभिषिच्यताम् ॥ १८९ ॥

अथ दूतेषु यातेषु लेखयित्वा स्वशासनम् ।
क्ष्मापतिस्तं क्षपाशेषं कृतकृत्योऽत्यवाहयत् ॥१९० ॥

मातृगुप्तस्तु नृपतेः संलापमपि निष्फलम् ।
ध्यायन्गृहीतनैराश्यस्त्यक्तभार इवाभवत् ॥ १९१ ॥

अन्तर्दध्यौ च कर्तव्यं कृतं शान्तोऽद्य संशयः ।
आशापिशाचिकात्यक्तश्चरिष्याम्यधुना सुखम् ॥ १९२ ॥

गतानुगतिकत्वेन कोऽयमासीन्मम भ्रमः ।
जनप्रवादात्सेव्यत्वं येनास्य ज्ञातवानहम् ॥ १९३ ॥

भुञ्जानाः पवनं सरीसृपगणाः प्रख्यापिता भोगिनो
गायद्भृङ्गनिवारका निगदिता विस्तीर्णकर्णा गजाः ।
यश्चाभ्यन्तरसंभृतोष्मविकृतिः प्रोक्तः शमी स द्रुमो
लोकेनेति निरर्गलं प्रलपता सर्वं विपर्यासितम् ॥ १९४ ॥

---

186. d) C T S′ काश्मी° (for कश्मी°).
188. d) SA_3 gloss सचिवान् प्रति (for प्रकृतीः).
189. a) C T S′ I_4 वा (for वो).
194. a) C S′ प्रख्यायिता (for प्रख्यापिता).

अथवा विद्यतेऽमुष्य न काऽप्यनभिगम्यता ।
लक्ष्मीप्रणयिनो येन कृताः प्रणयिनां गृहाः ॥ १९५ ॥

त्यागिनो निष्कलङ्कस्य को दोषोऽस्य महीपतेः ।
ममापुण्यं तु तन्निन्द्यं यच्छ्रेयःप्रतिबन्धकम् ॥ १९६ ॥

रत्नोज्ज्वलाः प्रविकिरंल्लहरीः समीरै-
रब्धिः क्रियेत यदि रुद्धतटाभिमुख्यः ।
दोषोऽर्थिनः स खलु भाग्यविपर्ययाणां
दातुर्मनागपि न तस्य तु दातृतायाः ॥ १९७ ॥

उत्तानफललुब्धानां वरं राजोपजीविनः ।
न तु तत्स्वामिनस्तीव्रपरिक्लेशैः फलन्ति ये ॥ १९८ ॥

तिष्ठन्ति ये पशुपतेः किल पादमूले
संप्राप्यते झटिति तैर्नहि भस्मनोऽन्यत् ।
ये तद्वृषस्य तु समुज्ज्वलजातरूप-
प्राप्त्या न कानि सुदिनानि सदैव तेषाम् ॥ १९९ ॥

चिन्तयन्नपि पश्यामि न कंचिद्दोषमात्मनः ।
यातो विरक्तिं यं ज्ञात्वा सेव्यमानोऽप्ययं नृपः ॥ २०० ॥

अथवाऽनादृतोऽन्येन संप्राप्तोऽन्तिकमाप्नुयात् ।
कः फलेनाभिसंबन्धं गतानुगतिकात्प्रभोः ॥ २०१ ॥

अन्तर्ये सततं लुठन्त्यगणितास्तानेव पाथोधरै-
राक्षानापततस्तरङ्गवलयैरालिङ्ग्य गृह्णन्नसौ ।
व्यक्तं मौक्तिकरत्नतां जलकणान्संप्रापयत्यम्बुधिः
प्रायोऽन्येन कृतादरो लघुरपि प्राप्तोऽर्च्यते स्वामिभिः ॥२०२॥

---

197. a) C S′ प्रविकरेल्ल°; T P_3 प्रविकरल्ल° (for प्रविकिरंल्ल°). —c) SA_3 °पर्ययेण (for °पर्ययाणां).

200. b) C T S′ किं° (for कं°).

202. a) C T S′ SA_1 (before corr.) लुठन्ति ग° (for लुठन्त्यग°). —b) C P_1 S′ I_4 °रार्त्ता° (for °राक्षा°). C T S′ I_4 °पतितां° (for °पतत°). —d) P_1 I_4 SA_1 °र्थ्यते (for °र्च्यते).

इदं संचिन्तयन्सोऽभूत्सेव्ये तस्मिन्निरादरः ।
खिन्नस्य हि विपर्येति तत्त्वज्ञस्यापि शेमुषी ॥ २०३ ॥

प्रभातायां विभावर्यामथाऽऽस्थानस्थितो नृपः ।
आकार्यतां मातृगुप्त इति क्षत्तारमादिशत् ॥ २०४ ॥

ततः प्रधावितानेकप्रतीहारप्रवेशितः ।
प्रविवेश महीभर्तुस्त्यक्ताश इव सोऽन्तिकम् ॥ २०५ ॥

तस्मै कृतप्रणामाय मुहूर्तादेव पार्थिवः ।
भ्रुसंज्ञितेन व्यतरल्लेखं लेखाधिकारिणा ॥ २०६ ॥

स्वयं च तमुवाचाङ्ग कश्मीरान्वेत्ति किं भवान् ।
गत्वा तत्राधिकारिभ्य एतच्छासनमर्प्यताम् ॥ २०७ ॥

स शापितोऽस्मद्देहेन यो लेखं वाचयेत्पथि ।
संविदेषा प्रयत्नेन विस्मर्तव्या न जातुचित् ॥ २०८ ॥

अविज्ञाताशयो राज्ञस्तामाज्ञां क्लेशशङ्कितः ।
सोऽबुद्ध दहनज्वालां न तु रत्नाङ्कुरद्युतिम् ॥ २०९ ॥

यथादेशस्तथेत्युक्त्वा मातृगुप्ते विनिर्गते ।
निर्गर्वः पूर्ववद्राजा तस्थावात्तैः सहालपन् ॥ २१० ॥

अथाक्लेशोचितं क्षाममपाथेयमबान्धवम् ।
दृष्ट्वा यान्तं मातृगुप्तं निनिन्देति नृपं जनः ॥ २११ ॥

अहो नरेश्वरस्येयं यत्किंचनविधायिता ।
पृथग्जनोचिते कर्मण्यर्हतो निदधाति यः ॥ २१२ ॥

दुराशया धृतक्लेशं सेवमानमहर्निशम् ।
ध्रुवं क्लेशार्हमेवैनं ज्ञातवानबुधो नृपः ॥ २१३ ॥

---

204. d) SA gloss द्वास्थं (for क्षत्तारं).
208. c) SA_3 gloss शिक्षा (for संविद्).
211. a) C I_4 S' SA_1 (before corr.) अथ क्ले° (for अथाक्ले°).

उपायं यं पुरस्कृत्य सेवते सेवकः प्रभुम् ।
अनन्तरज्ञस्तत्रैव योग्यं तं किल मन्यते ॥ २१४ ॥

सुखार्थी नागारिप्रतिभयशमात्प्रत्युत सुखं
जहौ शेषस्तल्पीकृततनु निषेव्यासुररिपुम् ।
यतस्तेनामुष्मिन्नधिगतवता क्लेशसहतां
श्रमाधायि न्यस्तं निरवधि धराभारवहनम् ॥ २१५ ॥

अयमेतद्गृहीतेषु गुणवत्सु गुणाधिकम् ।
आत्मानं गुणवान्पश्यन्नास्थयैनमशिश्रियत् ॥ २१६ ॥

अनन्तरज्ञः कोऽन्योऽस्माद्गुणान्दर्शयतेऽधिकान् ।
अस्मै गुणवते पूजां यश्चकार किलेदृशीम् ॥ २१७ ॥

यो नानाद्युतिमत्पदार्थरसिकोऽसारेपि शक्रायुधे
सप्रेमा स विलोक्य बर्हमिह मे किं किं न कुर्यात्प्रियम् ।
इत्याविष्कृतबर्हराजि नटते यो बर्हिणेऽम्भोलवा-
न्नान्यन्मुञ्चति तं विहाय जलदं कोऽन्योऽस्ति शून्याशयः २१८॥

गच्छतो मातृगुप्तस्य निर्दैन्यस्यैव वर्त्मसु ।
नाभूद्भाव्यर्थमाहात्म्याद्विकल्पः कोऽपि चेतसि ॥ २१९ ॥

अहंपूर्विकयोद्यद्भिर्निमित्तैः शुभशंसिभिः ।
स वितीर्णकरालम्ब इव न श्रममाददे ॥ २२० ॥

अपश्यत्स फणाकोटौ खञ्जरीटमहेः पथि ।
स्वप्ने प्रासादमारुह्य स्वं चोल्लङ्घितसागरम् ॥ २२१ ॥

अचिन्तयच्च शास्त्रज्ञो निमित्तैः शुभशंसिभिः ।
एतैर्भूभर्तुरादेशो ध्रुवं मे स्याच्छुभावहः ॥ २२२ ॥

---

214. a) C T $P_{1,3}$ I_3 S' D उपायं तं; P_2 SA_4 SR SG उपायनं (for उपायं यं).

215. d) All Mss. read श्रमादायि (for श्रमाधायि suggested).

218. c) T St $P_{1,3}$ बर्हिणो° (for बर्हिणे°). —d) SA_3 विलोक्य जलदमित्यन्यादर्शे (for विहाय जलदं).

220. c) T St P_{1-3} S' $I_{3,4}$ SA SL °लम्भ (for °लम्ब). —d) P_3 °मादधे (for °माददे).

221. b) P_1 °महो (for °महेः).

फलं मम तनीयोऽपि कश्मीरेषु भवेद्यदि ।
अनर्घदेशमाहात्म्यात्किं किं नातिशयेत तत् ॥ २२३ ॥

अकृच्छ्रलङ्घ्याः पन्थानो वल्लभातिथयो गृहाः ।
उपानमन्गच्छतोऽस्य सत्क्रियाश्च पदे पदे ॥ २२४ ॥

इत्थं विलङ्घिताध्वा स लोलानोकहशाद्वलम् ।
मङ्गल्यदधिपात्राभं ददर्शाग्रे हिमाचलम् ॥ २२५ ॥

सरलस्यन्दसुभगा गङ्गाशीकरवाहिनः ।
प्रत्युद्ययुस्तं मरुतः पाल्यायाः संस्तुता भुवः ॥ २२६ ॥

क्रमवर्ताभिधाने स प्रदेशे प्राप्तवांस्ततः ।
ढक्कं काम्बुवनामानं योऽद्य शूरपुरे स्थितः ॥ २२७ ॥

नानाजनपदाकीर्णे स्थाने तत्राथ शुश्रुवान् ।
काश्मीरिकान्महामात्यान्स्थितान्केनापि हेतुना ॥ २२८ ॥

ततोऽपनीतप्राग्वेषः प्रावृतो धवलांशुकैः ।
स जगामान्तिकं तेषां दातुं नृपतिशासनम् ॥ २२९ ॥

तं प्रयान्तं समुद्यद्भिः शकुनैः सूचितोदयम् ।
पान्थाः केऽप्यन्वयुर्द्रष्टुं निमित्तानां फलोद्गमम् ॥ २३० ॥

श्रुत्वाऽथ विक्रमादित्यदूतः प्राप्त इति द्रुतम् ।
द्वाःस्थाः काश्मीरमन्त्रिभ्यस्तमासन्नं न्यवेदयन् ॥ २३१ ॥

आगच्छत प्रविशतेत्युच्यमानोऽथ सर्वतः ।
स तान्समस्तसामन्तानाससादानिवारितः ॥ २३२ ॥

---

223. b) C T S′ काश्मीर° (for कश्मीर°).
225. a) C T S′ °काशं; I_3 °श्वा स (for °ध्वा स); —b) D $P_{1,2}$ I_3 SA_3 SG SR °नौकह° (for °नोकह°).
226. d) SA_1 gloss पाल्याया इति प्रभूभविष्यता तेनैवेत्यर्थः (for पाल्यायाः).
227. a) P_1 °वत्ता° (for °वर्ता°).
228. c) I_4 S′ °श्मीर° (for °श्मीरि°).
229. b) C T S′ प्रवृत्तो (for प्रावृतो).
230. d) C T $P_{1,3}$ S′ फलोद्गमे (for फलोद्गमम्).

यथाप्रधानं सचिवैर्विहितोचितसत्क्रियः ।
ततः परार्घ्यमध्यास्त तन्निदर्शितमासनम् ॥ २३३ ।

कृतार्हणैरथामात्यैराज्ञां पृष्टो महीभुजः ।
शनैस्तच्छासनं तेभ्यो लज्जमान इवार्पिपत् ॥ २३४ ॥

तेऽभिवन्द्य प्रभोर्लेखमुपांशु मिलितास्ततः ।
उन्मुच्य वाचयित्वैतमवोचन्विनयानताः ॥ २३५ ॥

मातृगुप्त इति श्लाघ्यं भवतामेव नाम किम् ।
एवमेवैतदित्यूचे सोऽपि तान्विहितस्मितः ॥ २३६ ॥

कः कोऽत्र संनिधातॄणामित्यश्रूयत वाक्ततः ।
राज्याभिषेकसंभारो दृश्यते स्म च संभृतः ॥ २३७ ॥

ततः कलकलोत्तालभूरिलोकसमाकुलः ।
प्रदेशः क्षणमात्रेण सोऽभूत्क्षुभ्यन्निवार्णवः ॥ २३८ ॥

अथ प्राङ्मुखसौवर्णभद्रपीठप्रतिष्ठितः ।
संनिपत्य प्रकृतिभिर्मातृगुप्तोऽभ्यषिच्यत ॥ २३९ ॥

तस्य विन्ध्यतटव्यूढवक्षसः परिनिर्लुठत् ।
सशब्दमभिषेकाम्बु रेवास्रोत इवाबभौ ॥ २४० ॥

अथ स्नातानुलिप्ताङ्गं सर्वाङ्गामुक्तभूषणम् ।
व्यजिज्ञपंस्तं राजानं क्रान्तराजासनं प्रजाः ॥ २४१ ॥

अर्थितेन स्वयं त्रातुं विक्रमादित्यभूभुजा ।
निर्दिष्टः स्वसमानस्त्वं शाधि नः पृथिवीमिमाम् ॥ २४२ ॥

---

234. d) S′ °वार्पय° (for °वार्पिप°).
235. b) SA gloss I_4 marg. परैर्न श्रूयते यत्तदुपांशु परिकीर्तितम् ; SA_3 adds मन्त्रकरणे (for उपांशु). —d) C T S′ I_4 °न्विताः (for °नताः).
237. d) C S′ P_3 स (for स्म).
240. d) C I_4 S′ SA_1 (after corr.) °स्रव; SA_1 (before corr.) °स्रेव; P_2 °स्रेता (for °स्रोत).

मण्डलानि विलभ्यन्ते येनानेन प्रतिक्षणम् ।
मा मंस्था मण्डलं राजन्विलब्धं तदिदं परैः ॥ २४३ ॥
कर्मभिः स्वैरवातस्य जन्मनः पितरौ यथा ।
राज्ञां तथाऽन्ये राज्यस्य प्रवृत्तावेव कारणम् ॥ २४४ ॥
इत्थं स्थिते परं कंचित्त्वदीयोऽस्मीति शंसता ।
न नेया भवता राजन्वयमात्मा च लाघवम् ॥ २४५ ॥
इति तैस्तथ्यमुक्तोऽपि संस्मरन्स्वामिसत्क्रियाम् ।
मातृगुप्तो महीपालः क्षणमासीत्कृतस्मितः ॥ २४६ ॥
दानेन सुदिनं कुर्वन्नवराज्योर्जितेन सः ।
तत्रैव मङ्गलोदग्रं तदहो निरवर्तयत् ॥ २४७ ॥
पुरप्रवेशायान्येद्युरर्थ्यमानोऽथ मन्त्रिभिः ।
अद्भुतप्राभृतं दूतं राज्यदातुर्व्यसर्जयत् ॥ २४८ ॥
देशौन्नत्यानुसारेण स्पर्धामिव च तां विदन् ।
स्वामिनो मनसि ह्रीतः सागसं स्वममन्यत ॥ २४९ ॥
अथाहूयापरान्भृत्यान्वक्तुं सेवास्मृतिं प्रभोः ।
अल्पार्घाण्यपि सात्म्यानि प्राहिणोत्प्राभृतानि सः ॥ २५० ॥
असामान्यान्गुणांस्तस्य स्मरन्पर्यश्रुलोचनः ।
स्वयं लिखित्वा श्लोकं च स्वकमेकं व्यसर्जयत् ॥ २५१ ॥
नाकारमुद्वहसि नैव विकत्थसे त्वं
दित्सां न सूचयसि मुञ्चसि सत्फलानि ।
निःशब्दवर्षणमिवाम्बुधरस्य राज-
न्संलक्ष्यते फलत एव तव प्रसादः ॥ २५२ ॥

---

243. a) SA_1 विदीयन्ते (for विलभ्यन्ते). —b) C T S′ यैर्नतेन (for येनानेन). —d) SA_1 SL विदत्तं; C S′ विलक्षं (for विलब्धं).
244. b) C T S′ I_4 पितरो (for पितरौ). —c) T S′ राज्ञा (for राज्ञां).
245. a) St अपरं (for परं). C I_4 कंश्चि°; I_3 किंचि°; S′ कश्चि° (for कंचि°). —c) P_1 SA_1 राजा (for राजन्).
246. c) T S′ SA_1 (before corr.) मातृगुप्तम° (for मातृगुप्तो म°).
250. c) S′ I_4 अल्पार्घ्याण्य°; SL अनर्घाण्य° (for अल्पार्घाण्य°). C T S′ रवाद्यानि; P_{1-3} I_4 SA_3 SG SR स्वात्म्यानि (for सात्म्यानि).

ततः प्रविश्य नगरं सैन्यैः पिहितदिक्तटैः ।
क्रमागतामिव महीं यथावत्पर्यपालयत् ॥ २५३ ॥

त्यागे वा पौरुषे वाऽपि तस्यौचित्योन्नतात्मनः ।
क्ष्माभुजस्तर्कुकस्येव नाभूत्परिमितेच्छता ॥ २५४ ॥

यष्टुं यज्ञान्धृतोद्योगस्त्यागी विततदक्षिणान् ।
पशुबन्धमनुध्याय करुणाकूणितोऽभवत् ॥ २५५ ॥

अमारमादिदेशाथ यावद्राज्यं स्वमण्डले ।
चूर्णीकृत्य सुवर्णादि प्रददौ च करम्भकम् ॥ २५६ ॥

करम्भके कीर्यमाणे मातृगुप्तेन भूभुजा ।
वैतृष्ण्यमुन्मिषत्तोषो न को नाम न्यषेवत ॥ २५७ ॥

गुणी च दृष्टकष्टश्च वदान्यश्च स पार्थिवः ।
विक्रमादित्यतोऽप्यासीदभिगम्यः शुभार्थिनाम् ॥ २५८ ॥

विवेचकतया तस्य श्लाघ्यया सुरभीकृताः ।
लक्ष्मीविलासाः क्ष्माभर्तुरशोभन्त मनीषिषु ॥ २५९ ॥

हयग्रीववधं मेण्ठस्तदग्रे दर्शयन्नवम् ।
आसमाप्ति ततो नापत्साध्वसाध्विति वा वचः ॥ २६० ॥

अथ ग्रथयितुं तस्मिन्पुस्तकं प्रस्तुते न्यधात् ।
लावण्यनिर्याणभिया तदधः स्वर्णभाजनम् ॥ २६१ ॥

अन्तरज्ञतया तस्य तादृश्या कृतसत्कृतिः ।
भर्तृमेण्ठः कविर्मेने पुनरुक्तं श्रियोऽर्पणम् ॥ २६२ ॥

---

254. b) SA_1 (before corr.) °चित्यौन्नतात्मनः; P_3 °न्नत्योचितात्मनः (for °चित्योन्नतात्मनः). —c) SA_3 gloss याचकस्येव (for तर्कुकस्येव).
255. d) C T S′ °कुञ्चितो; $P_{1,2}$ SG SR °कूजितो (for °कूणितो).
257. c) D I_3 वैतृष्य° (for वैतृष्ण्य°).
258. b) P_{1-3} $I_{3,4}$ SA SR SG वदन्य° (for वदान्य°).
261. a) C T S′ ग्रन्थयितुं (for ग्रथयितुं). —d) C T S′ SA_3 राजाधः (for तदधः).

स मातृगुप्तस्वाम्याख्यं निर्ममे मधुसूदनम् ।
कालेनादत्त यद्ग्रामान्मम्मः स्वसुरसद्मने ॥ २६३ ॥

इत्यासादितराज्यस्य शासतः क्ष्मां क्षमापतेः ।
त्रिमासोना ययुस्तस्य सैकाहाः पञ्च वत्सराः ॥ २६४ ॥

कृतार्थतां तीर्थतोयैराञ्जनेयो नयन्पितॄन् ।
जातं तादृशमश्रौषीत्स्वस्मिन्देशे पराक्रमम् ॥ २६५ ॥

पितृशोकार्द्रता तस्य क्रोधेनान्तरधीयत ।
तरोरिवाऽर्कतापेन नैशाम्बुलवसिक्तता ॥ २६६ ॥

श्रीपर्वते पाशुपतव्रतिवेषस्तमागतम् ।
आचख्यावश्वपादाख्यः सिद्धः कन्दाशनं ददत् ॥ २६७ ॥

जन्मान्तरे लब्धसिद्धिस्त्वामस्म्युपरिसाधकम् ।
वाञ्छामपृच्छं राज्यार्थमभिलाषस्तु तेऽभवत् ॥ २६८ ॥

सयत्नं तव कर्तुं तन्मनोरथमनन्यथा ।
अथ मामित्थमादिक्षत्क्षपारमणशेखरः ॥ २६९ ॥

गणोऽयं मामकः सिद्धो यस्तवोपरिसाधकः ।
जन्मान्तरेऽस्य राज्येच्छां कुर्यामहमनन्यथा ॥ २७० ॥

भावं भवस्तद्भवतो भगवान्दत्तदर्शनः ।
साफल्यं नेष्यतीत्येवमभिधाय तिरोदधे ॥ २७१ ॥

साम्राज्येच्छोः समामेकां तत्र तस्य तपस्यतः ।
लब्धस्मृतिः सिद्धगिरा प्रददौ दर्शनं शिवः ॥ २७२ ॥

---

263. d) T °नम्भः; $P_{2,3}$ I_3 °मस्मः (for मम्मः). S′ C श्वशुर°; SA_1 gloss: स्वदेवगृहाय (for स्वसुर°).
265. b) SA_3 gloss प्रवरसेनः (for आञ्जनेयः); S′ P_3 अनयत् (for नयन्).
—d) SA_3 पराभवम् (for पराक्रमम्).
268. b) T °साधकः (for °साधकम्).
271. a) C S′ I_4 भावे (for भावं).
272. c) D P_{1-3} SR SA_1 (after corr.) °स्मृतेः (for °स्मृतिः).

व्रतिवेषं तमादिष्टवाञ्छितार्थसमर्पणम् ।
स जगन्निर्जयोन्निद्रं नरेन्द्रत्वमयाचत ॥ २७३ ॥

उपेक्ष्य मोक्षं किं क्ष्माभृद्भोगानिच्छसि भङ्गुरान् ।
इति जिज्ञासुना भावं शंभुना सोऽभ्यधीयत ॥ २७४ ॥

स तं बभाषे शंभुं त्वां बुद्ध्वा व्याजतपोधनम् ।
अभ्यधामिदमद्धा त्वं न स देवो जगद्गुरुः ॥ २७५ ॥

महान्तो ह्यर्थिताः स्वल्पं फलन्त्यल्पेतरत्स्वयम् ।
उदन्यया वदान्योऽदादुग्धाब्धिं स पयोऽर्थिने ॥ २७६ ॥

अस्य वैकल्यकैवल्यलाभनिश्चलचेतसः ।
नो वेत्स्यभिजनस्याभिभूतिं मर्मव्यथावहाम् ॥ २७७ ॥

जगत्परिवृढः प्रौढप्रीतिस्तं सफलार्थनम् ।
कृत्वा प्रादुष्कृतवपुस्ततो भूयोऽभ्यभाषत ॥ २७८ ॥

मज्जतो राज्यसौख्येषु सायुज्यावाप्तिदूतिकाम् ।
मदाज्ञयाऽश्वपादस्ते संज्ञां काले करिष्यति ॥ २७९ ॥

इत्युक्त्वाऽन्तर्हिते देवे स कृतव्रतपारणः ।
अगच्छदश्वपादं तमापृच्छ्याऽभिमतां भुवम् ॥ २८० ॥

ततो विदितवृत्तान्तो मातृगुप्ताभिषेणनात् ।
निषिध्य सविधायातानमात्यानब्रवीद्वचः ॥ २८१ ॥

---

276. a) P_2 पूर्णं (for स्वल्पं). —c) SA_1 gloss पिपासया (for उदन्यया). D P_{1-3} $I_{3,4}$ SA SR SG वदन्यो° (for वदान्यो°).

277. a) C T $P_{1,2}$ I_4 वैकल्प° (for वैकल्य°). C T S′ °कैवल्या° (for °कैवल्य°).

278. b) SA_1 (before corr.) C T S′ P_{1-3} I_4 D (before suggestion) सफलार्थिनम् (for सफलार्थनम्). —d) C T S′ I_4 °प्यभाषत (for °भ्यभाषत).

279. a) C T S′ सजनो (for मज्जतो). —b) C T $P_{2,3}$ SA_1 (after corr.) सांयुज्या° (for सायुज्या°).

280. c) St आगच्छ° (for अगच्छ°).

विक्रमादित्यमुत्सिक्तमुच्छेत्तुं यतते मनः ।
मातृगुप्तं प्रति न नो रोषेणारूषितं मनः ॥ २८२ ॥

अप्रियैरपि निष्पिष्टैः किं स्यात्क्लेशासहिष्णुभिः ।
ये तदुन्मूलने शक्ता जिगीषा तेषु शोभते ॥ २८३ ॥

यान्यब्जान्युदयं द्विषन्ति शशिनः कोऽन्यस्ततोऽसंमत-
स्तन्निर्माथिकरीन्द्रदन्तदलनं यन्नाम कोऽयं नयः ।

सामर्थ्यप्रथनाय चित्रमसमैः स्पर्धां विधूयोन्नता
ये तेषु प्रभवन्ति तत्र जहति व्यक्तं प्ररूढा रुषः ॥ २८४ ॥

त्रिगतानां भुवं जित्वा स व्रजन्नथ भूपतिः ।
विक्रमादित्यमश्रृणोत्कालधर्ममुपागतम् ॥ २८५ ॥

तस्मिन्नहनि भूभर्त्रा शोकान्निश्श्वसताऽनिशम् ।
नास्नायि नाशि नास्वापि स्थितेनावनताननम् ॥ २८६ ॥

अन्येद्युर्भुवमुत्सृज्य कश्मीरेभ्यो विनिर्गतम् ।
शुश्राव मातृगुप्तं स नातिदूरे कृतस्थितिम् ॥ २८७ ॥

कैश्चिन्निर्वासितो मा स्विन्मदीयैरिति शङ्कितः ।
ययौ प्रवरसेनोऽस्य पार्श्वं मितपरिच्छदः ॥ २८८ ॥

कृतार्हणं सुखासीनं ततः पप्रच्छ तं शनैः ।
विनयावनतो राजा राज्यत्यागस्य कारणम् ॥ २८९ ॥

बभाषे तं क्षणं स्थित्वा स निश्वस्य विहस्य च ।
गतः स सुकृती राजन् येन भूमिभुजो वयम् ॥ २९० ॥

---

283. b) I_4 S' क्लेशस° (for क्लेशास°).

284. a) SA_3 gloss तेभ्यः (for ततः). —c) SA_3 gloss नीचैः (for असमैः). T विधाय (for विधूय).

286. b) SA P_2 I_4 °न्निश्वस° (for °न्निश्श्वस°). —c) $P_{1,2}$ नाम्नायि; I_4 मान्नायि (for नास्नायि).

यावन्मूर्ध्नि रवेः पादास्तावद् द्योतयते दिशः ।
द्योतयेन्नान्यथा किं न ग्रावैव तपनोपलः ॥ २९१ ॥

अथ राजाऽभ्यधात्केन राजन्नपकृतं तव ।
यत्प्रत्यपचिकीर्षायै तमीशमनुशोचसि ॥ २९२ ॥

मातृगुप्तस्ततोऽवादीत्कोपस्मितसिताधरः ।
अस्मानुत्सहते कश्चिन्नापकर्तुं बलाधिकः ॥ २९३ ॥

नयता गण्यतामस्मानन्तरज्ञेन तेन हि ।
न भस्मनि हुतं सर्पिर्नोप्तं वा सस्यमूषरे ॥ २९४ ॥

उपकारं स्मरन्तस्तु कृतज्ञत्ववशंवदाः ।
पदवीमुपकर्तॄणां यान्ति निश्चेतना अपि ॥ २९५ ॥

निर्वाणमनु निर्वाति तपनं तपनोपलः ।
इन्दुमिन्दुमणिः किंच शुष्यन्तमनु शुष्यति ॥ २९६ ॥

पुण्यां वाराणसीं गत्वा तस्माच्छमसुखोन्मुखः ।
इच्छामि सर्वसंन्यासं कर्तुं द्विजजनोचितम् ॥ २९७ ॥

मणिदीपमिवेशं तमन्तरेणान्धकारिताम् ।
बिभेमि द्रष्टुमप्युर्वीं भोगयोगे कथैव का ॥ २९८ ॥

इत्यौचित्यनिधेस्तस्य वाणीमाकर्ण्य विस्मितः ।
धीरः प्रवरसेनोऽपि व्याजहारोचितं वचः ॥ २९९ ॥

सत्यं विश्वंभरा देवी भूपते रत्नसूरियम् ।
उत्पत्त्या द्योतते धर्म्यैः कृतज्ञैर्या भवादृशैः ॥ ३०० ॥

---

291. c) SA_1 (before corr.) St substitute द्योतते नान्यथा किंचिद्.
292. c) C T S′ यत्प्रत्यय°; I_4 SA_1 (before corr.) यत्प्रत्युप° (for यत्प्रत्यप°).
295. b) I_3 SA_3 °वशीकृताः (for °वशंवदाः).
298. d) P_3 तु का कथा (for कथैव का).
300. c) C T S′ I_4 धन्यैः (for धर्म्यैः).

अन्तरज्ञतया श्लाघ्यः कोऽन्यस्तस्मान्महीभुजः।
इत्थं जडे जगत्येकस्त्वां यथावद्विवेद यः ॥ ३०१ ॥

चिरं खलु खिलीभूताः कृतज्ञत्वस्य वीथयः।
धीर त्वयैव न त्वासु संचारो यदि दृश्यते ॥ ३०२ ॥

पाकश्चेन्न शुभस्य मेऽद्य तदसौ प्रागेव नादात्किमु
स्वार्थश्चेन्न मयाऽस्य किं न भजते दीनान्स्ववन्धूनयम् ।
मत्तो रन्ध्रदृशोऽस्य भीर्यदि न तल्लुब्धः किमेष त्यजे-
दित्यन्तः पुरुषाधमः कलयति प्रायः कृतोपक्रियः ॥ ३०३ ॥

अत्युदात्तगुणेष्वेषा कृतपुण्यैः प्ररोपिता।
शतशाखीभवत्येव यावन्मात्राऽपि सत्क्रिया ॥ ३०४ ॥

तत्त्वं गुणवतामग्र्यस्तत्त्वज्ञैश्चाभिनन्दितः।
परीक्षितो मणिरिव व्यक्तं बहुमतः सताम् ॥ ३०५ ॥

तस्मादनुगृहाणास्मान्मा स्म त्याक्षीर्नरेन्द्रताम्।
ममापि ख्यातिमायातु गुणवत्पक्षपातिता ॥ ३०६

पूर्वं तेनाथ चरमं मयाऽपि प्रतिपादिताम्।
भवान् पाणिप्रणयिनीं विदधातु पुनर्भुवम् ॥ ३०७ ॥

अव्याजौदार्यचर्यस्य श्रुत्वेति नृपतेर्वचः।
कृतस्मितो मातृगुप्तः शनैर्वचनमब्रवीत् ॥ ३०८ ॥

यान्यक्षराण्यन्तरेण वाच्यं वक्तुं न पार्यते।
का गतिस्तदुपादाने मर्यादोल्लङ्घनं विना ॥ ३०९ ॥

अतः परुषमप्यद्य किंचिदेव मयोच्यते।
अव्याजार्जवमप्येतदार्यत्वमवधीर्यते ॥ ३१० ॥

---

302. d) SA_1 I_4 om. दृश्यते.
303. d) D P_1 S' °पत्क्रियः (for °पक्रियः).
305. b) C T S' °पिनन्दितः (for °भिनन्दितः).
307. c) D St $P_{1,2}$ SA_1 प्रति° (for पाणि°)
309. a) SA_1 यान्यक्षारा° (for यान्यक्षरा°).
310. I_4 SA_1 (before corr.) om. and supplied by SA_3 in marg.

सर्वः स्मरति सर्वस्य प्रागवस्थासु लाघवम् ।
आत्मैव वेत्ति माहात्म्यं वर्तमाने क्षणे पुनः ॥ ३११ ॥

पूर्वावस्था मदीया ते त्वदीया या च मे हृदि ।
ताभ्यां विमोहितावावां न विद्वोऽन्योन्यमाशयम् ॥ ३१२ ॥

राजा भूत्वा कथं मादृक्प्रतिगृह्णातु संपदः ।
कथमेकपदे सर्वमौचित्यं परिमार्जतु ॥ ३१३ ॥

असाधारणमौदार्यमाहात्म्यं तस्य भूपतेः ।
भोगमात्रकृते मादृक्कि साधारणतां नयेत् ॥ ३१४ ॥

अपि च स्पृहयालुः स्यां भोगेभ्यो यदि भूपते ।
ध्रियमाणेऽभिमाने मे केन ते विनिवारिताः ॥ ३१५ ॥

यन्ममोपकृतं तेन तद्विना प्रत्युपक्रियाम् ।
जीर्णमेवाधुनाऽङ्गेषु प्रभवत्वेष निश्चयः ॥ ३१६ ॥

या गतिर्भूभुजोऽमुष्य मया तामनुगच्छता ।
पात्रापात्रविवेकृत्वंख्यातिर्नेया प्रकाश्यताम् ॥ ३१७ ॥

एतावत्येव कर्तव्ये यातेऽस्मिन्कीर्तिशेषताम् ।
भोगमात्रपरित्यागाद्विदध्यां सत्यसंधताम् ॥ ३१८ ॥

इत्युक्त्वा विरते तस्मिञ्जगाद जगतीपतिः ।
त्वदीया न मया स्पृश्यास्त्वयि जीवति संपदः ॥ ३१९ ॥

अथ वाराणसीं गत्वा कृतकाषायसंग्रहः ।
सर्वं संन्यस्य सुकृती मातृगुप्तोऽभवद्यतिः ॥ ३२० ॥

राजा प्रवरसेनोऽपि काश्मीरोत्पत्तिमञ्जसा ।
निखिलां मातृगुप्ताय प्राहिणोद् दृढनिश्चयः ॥ ३२१ ॥

---

315. c) $P_{1,3}$ ते (for मे).
317. d) D °शताम् (for °श्यताम्).
321. b) D C T $P_{1,3}$ S' I_4 कश्मीरो° (for काश्मीरो°).

स हठापतितां लक्ष्मीं भिक्षाभुक् प्रतिपादयन् ।
सर्वार्थिभ्यः कृती वर्षान्दश प्राणानधारयत् ॥ ३२२ ॥

अन्योन्यं साभिमानानामन्योन्यौचित्यशालिनाम् ।
त्रयाणामपि वृत्तान्त एष त्रिपथगापयः ॥ ३२३ ॥

राजा प्रवरसेनोऽथ नमयन्नवनीधरान् ।
अकृच्छ्रलङ्घ्याः ककुभो वृद्धस्य यशसो व्यधात् ॥ ३२४ ॥

पीताब्धिर्लङ्घितोर्वीभृत्कुम्भयोनिरिवाऽनयत् ।
तस्य प्रतापः प्रभवन्भुवनानि प्रसन्नताम् ॥ ३२५ ॥

शुष्यत्तमालपत्राणि शीर्णताडीदलानि च ।
तत्सेनाऽर्णवतीराणि चक्रेऽरिस्त्रीमुखानि च ॥ ३२६ ॥

स गङ्गाऽऽलिङ्गिताङ्गस्य पूर्ववारिनिधेर्व्यधात् ।
सैन्येभमदनिष्यन्दैः कालिन्दीसंगमश्रियम् ॥ ३२७ ॥

रोधस्यपरपाथोधेः कटकैः स्पृष्टदिक्तटैः ।
चकारोत्पाट्य सौराष्ट्रानसौ राष्ट्रविपाटनम् ॥ ३२८ ॥

यशोऽर्थिनः पार्थिवेषु द्वेषरागबहिष्कृतः ।
ववृधे धर्मविजयस्तस्य क्षितिशतक्रतोः ॥ ३२९ ॥

वैरिनिर्वासितं पित्र्ये विक्रमादित्यजं न्यधात् ।
राज्ये प्रतापशीलं स शीलादित्यापराभिधम् ॥ ३३० ॥

सिंहासनं स्ववंश्यानां तेनाहितहृतं ततः ।
विक्रमादित्यवसतेरानीतं स्वपुरं पुनः ॥ ३३१ ॥

---

322. a) P_2 I_3 हारा° (for हठा°).
324. b) D suggests °न्नवनीभृतः (for °न्नवनीधरान्). —d) C T S′ न्यधात् (for व्यधात्).
325. d) SA_3 gloss जलान्यपि (for भुवनानि).
326. I_3 S′ om. cd.
327. c) St °निष्पन्दैः (for °निष्यन्दैः).
330. b) $P_{1,3}$ व्यधात् (for न्यधात्).

हेतूनुदीर्य विविधानमन्वानं पराजयम् ।
सप्त वारान्स तत्याज जित्वा मुम्मुनिभूभुजम् ॥ ३३२ ॥

धाष्ट्र्यादथाष्टमे वारे हेतुमाख्यातुमुद्यतम् ।
धिक्पशून्वध्यतां सोऽयमित्यूचे नृपतिः क्रुधा ॥ ३३३ ॥

अवध्योऽहं पशुत्वेन वीरेत्युक्त्वा भयोत्सुकः ।
मध्येसभं ननर्तास्य सोऽनुकुर्वन्कलापिनम् ॥ ३३४ ॥

नृत्तं केकां च शिखिनो दृष्ट्वाऽस्मै द्रविणं नृपः ।
अभयेन समं प्रादात्तालार्धचरणोचितम् ॥ ३३५ ॥

वसतोऽस्य दिशो जित्वा नप्तुः पैतामहे पुरे ।
कर्तुं पुरं स्वनामाङ्कं प्रथते स्म मनोरथः ॥ ३३६ ॥

रात्रौ क्षेत्रं च लग्नं च दिव्यं ज्ञातुमथैकदा ।
स वीरो वीरचर्यायां निर्ययौ पार्थिवार्यमा ॥ ३३७ ॥

गच्छतः क्ष्मापतेस्तस्य मौलिरत्नाग्रबिम्बितः ।
बभार ताराप्रकरो रक्षासर्षपविभ्रमम् ॥ ३३८ ॥

अथानन्तचितालोकस्पष्टभीमतटद्रुमाम् ।
श्मशानप्रान्ततटिनीं पर्यटन्नाससाद सः ॥ ३३९ ॥

ततस्तस्य सरित्पारे मुक्तसंरावमग्रतः ।
ऊर्ध्वबाहु महद् भूतं प्रादुरासीन्महौजसः ॥ ३४० ॥

नृपतिस्तस्य दृक्पातैर्ज्वलद्भिः कपिशीकृतः ।
उल्काज्योतिःकृताश्लेषः कुलाद्रिरिव दिद्युते ॥ ३४१ ॥

---

332. d) I_4 SA_1 have blank space (for मुम्मुनि). It is filled up by SA_3 as जित्वाऽमुं । मुनि° in SA_1 and SA_3 also adds gloss *Int.* प्रतापशीलम् for अमुम्. For the name मुम्मुनि see IV. 167, 516; VIII. 2179 *infra*.

333. c) C T P_3 S′ पशुर्व (for °पशून्व°).

335. a) SA_3 gloss शिखिवत् (for शिखिनः). —d) St I_4 SA_1 °त्तालावच° (for °त्तालार्धच°).

336. d) C T S′ I_4 पप्रथे स (for प्रथते स्म).

338. b) C T P_1 I_4 S′ SA_1 °रत्नाङ्ग° (for °रत्नाग्र°).

तमथ प्रतिशब्देन घोरेणापूरयन्दिशः ।
अत्रासं विहसन्नुच्चैरुवाच क्षणदाचरः ॥ ३४२ ॥

संत्यज्य विक्रमादित्यं सत्त्वोद्रिक्तं च शूद्रकम् ।
त्वां च भूपाल पर्याप्तं धैर्यमन्यत्र दुर्लभम् ॥ ३४३ ॥

वसुधाधिपते वाञ्छासिद्धिस्तव विधीयते ।
सेतुमेतं समुत्तीर्य पार्श्वमागम्यतां मम ॥ ३४४ ॥

इत्युदीर्य निजं जानुं रक्षः पारात्प्रसारयत् ।
तन्महासरितो वारि सेतुसीमन्तितं व्यधात् ॥ ३४५ ॥

अङ्गेन रक्षःकायस्य ज्ञात्वा सेतुं प्रकल्पितम् ।
वीरः प्रवरसेनोऽथ विकोशां क्षुरिकां दधे ॥ ३४६ ॥

स तयोत्कृत्य तन्मांसं कृतसोपानपद्धतिः ।
अतरद्यत्र तत्स्थानं क्षुरिकाबल उच्यते ॥ ३४७ ॥

पार्श्वस्थं तं लग्नमुक्त्वा प्रातर्मत्सूत्रपातनम् ।
दृष्ट्वा पुरं विधेहीति वदद् भूतं तिरोदधे ॥ ३४८ ॥

देव्या शारिकयाऽट्टेन यक्षेणाधिष्ठिते च सः ।
ग्रामे शारीटकेऽपश्यत्सूत्रं वेतालपातितम् ॥ ३४९ ॥

भक्त्या प्रतिष्ठां प्राक्तस्मिन्निनीषौ प्रवरेश्वरम् ।
जयस्वामी स्वयं पीठे भित्त्वा यन्त्रमुपाविशत् ॥ ३५० ॥

वेतालावेदितं लग्नं जानतो जगतीभुजा ।
स्थपतेः स जयाख्यस्य नाम्ना प्रख्यापितोऽभवत् ॥ ३५१ ॥

---

345. b) C T S′ I_4 SA_3 °यन् (for °यत्).
346. P_1 om. ab.
347. d) C D S′ $P_{1,3}$ I_4 SG SL °बाल; SA_1 °भाल; T °वार (for °बल).
349. b) SA_1 (before corr.) C S′ I_4 °ष्ठितं (for °ष्ठिते). —c) SA_2 gloss हारटट् (for शारीटके).
351. a) C T S′ I_3 वेताल° (for वेताला°). —c) $P_{1,2}$ I_3 जयास्यख्य° (for जयाख्यस्य).

नगराप्रातिलोम्याय भक्त्या तस्य विनायकः ।
प्रत्यङ्मुखः प्राङ्मुखतां भीमस्वामी स्वयं ययौ ॥ ३५२ ॥

सद्भावश्र्यादिका देव्यस्तेन श्रीशब्दलाञ्छिताः ।
पञ्च पञ्चजनेन्द्रेण पुरे तस्मिन्निवेशिताः ॥ ३५३ ॥

वितस्तायां स भूपालो बृहत्सेतुमकारयत् ।
ख्याता ततः प्रभृत्येव तादृङ्नौसेतुकल्पना ॥ ३५४ ॥

श्रीजयेन्द्रविहारस्य बृहद्बुद्धस्य च व्यधात् ।
मातुलः स नरेन्द्रस्य जयेन्द्रो विनिवेशनम् ॥ ३५५ ॥

बुभोज सिंहलादीन्यो द्वीपान्स सचिवोऽकरोत् ।
मोराकनामा मोराकभवनं भुवनाद्भुतम् ॥ ३५६ ॥

षट्त्रिंशद्गृहलक्षाणि पुरं तत्पप्रथे पुरा ।
यस्यास्तां वर्धनस्वामी विश्वकर्मा च सीमयोः ॥ ३५७ ॥

दक्षिणस्मिन्नेव पारे वितस्तायाः पुरा किल ।
निर्मितं तेन नगरं विभक्तैर्युक्तमापणैः ॥ ३५८ ॥

ते तत्राभ्रंलिहाः सौधा यानध्यारुह्य दृश्यते ।
वृष्टिस्निग्धं निदाघान्ते चैत्रे चोत्कुसुमं जगत् ॥ ३५९ ॥

तद्विना नगरं कुत्र पवित्राः सुलभा भुवि ।
सुभगाः सिन्धुसंभेदाः क्रीडावसथवीथिषु ॥ ३६० ॥

दृष्टः क्रीडानगोऽन्यत्र न मध्येनगरं क्वचित् ।
यतः सर्वौकसां लक्ष्मीः संलक्ष्या द्युपथादिव ॥ ३६१ ॥

---

354. I_3 om. vv. 354-55. —c) SA_1 तदा (for ततः).
357. a) D षट्त्रिंशगृह° (for षट्त्रिंशद्गृह°). —d) C I_3 S′ सोमयोः; T स मयः (for सीमयोः).
358. a) I_4 दक्षिणे (for दक्षिण°).
359. d) S′ वोत्कु° (for चोत्कु°).
360. c) P_3 सुलभाः (for सुभगाः).

वैतस्तं वारि वास्तव्यैर्वहत्तुहिनशर्करम् ।
ग्रीष्मोग्रेऽह्नि स्ववेश्माग्रात्क ततोऽन्यत्र लभ्यते ॥ ३६२ ॥

प्रतिदेवगृहं कोशास्ते तस्मिन्नर्पिता नृपैः ।
सहस्रशः शक्यते यैः क्रेतुं भूः सागराम्बरा ॥ ३६३ ॥

पुरे निवसतस्तस्मिंस्तस्य राजप्रजासृजः ।
शनैः साम्राज्यलाभस्य षष्टिः संवत्सरा ययुः ॥ ३६४ ॥

ललाटे शूलमुद्राङ्के जराशुक्लाः शिरोरुहाः ।
तस्य शंभुभ्रमासङ्गिगङ्गाम्भोविभ्रमं दधुः ॥ ३६५ ॥

अथाश्वपादेनेशाननिदेशात्तत्क्षणागतः ।
काश्मीरिको जयन्ताख्यो द्विजन्माऽयोजि पार्श्वगः ॥ ३६६ ॥

श्रान्तोऽस्यध्वन्य नान्यस्माद्देशात्तेऽभिमतं भवेत् ।
राज्ञे प्रवरसेनाय लेख एष प्रदर्श्यताम् ॥ ३६७ ॥

इत्युक्त्वाऽर्पितलेखोऽसावसमर्थः पथः पृथून् ।
गन्तुं प्रस्थानखिन्नोऽस्मि सद्यस्तेनेत्यगद्यत ॥ ३६८ ॥

स्नाह्यद्य तावत्त्वं स्पृष्टो द्विजः कापालिना मया ।
उक्त्वेति तेन क्षिप्तोऽसावासन्ने दीर्घिकाजले ॥ ३६९ ॥

उन्मीलितेक्षणोऽद्राक्षीत्स्वं स्वदेशादथोत्थितम् ।
तस्थुषश्चार्चने राज्ञो भृत्यान्व्यग्राञ्जलाहृतौ ॥ ३७० ॥

स्वमावेदयितुं नद्या नीयमाने नृपान्तिकम् ।
अव्याक्षिप्तोऽक्षिपल्लेखं स स्नानकलशे ततः ॥ ३७१ ॥

प्रवरेशं स्नापयता स्रस्तं तत्कलशात्पुनः ।
राज्ञा लेखं वाचयित्वा जयन्तः प्रापितोऽन्तिकम् ॥ ३७२ ॥

---

362. b) C T St I_4 S′ P_3 °बृहत्तु° (for °वहत्तु°). —c) T ग्रीष्मोष्णे°; C S′ श्रीष्मोग्रे° (for ग्रीष्मोग्रे°). —d) C S′ °त्क्रतुतो°; (for °त्क ततो°).
366. b) C T S′ I_4 SA_1 °निर्दे° (for °निदे°). —c) S′ °श्मीरको (for °श्मीरिको).
367. a) I_4 °ध्वनि (for °ध्वन्य). —b) C T S′ °शतो° (for °शात्ते°).

कृतं कृत्यं महद्दत्तं भोगा भुक्ता वयो गतम् ।
किमन्यत्करणीयं त एहि गच्छ शिवालयम् ॥ ३७३ ॥

ततस्तं वृत्तसंकेतः संतोष्याभिमतार्पणात् ।
भित्त्वा तमश्मप्रासादं जगाहे विमलं नभः ॥ ३७४ ॥

जनैः स ददृशे गच्छन् कैलासतिलकां दिशम् ।
विशदे घटयन् व्योम्नि द्वितीयतपनोदयम् ॥ ३७५ ॥

जयन्तेनाद्भुतोदन्तहेतुनाऽवाप्य संपदः ।
स्वनामाङ्काग्रहारादिकर्मभिर्निर्मलाः कृताः ॥ ३७६ ॥

एवं स भुवनैश्वर्यं भुक्त्वा भूमिभृतां वरः ।
अनेनैव शरीरेण भेजे भूतपतेः सभाम् ॥ ३७७ ॥

प्रासादे प्रवरेशस्य सिद्धिक्षेत्रे क्षमापतेः ।
स्वर्गद्वारप्रतिभटं द्वारमद्यापि लक्ष्यते ॥ ३७८ ॥

तस्य रत्नप्रभादेव्यां जातो राजा युधिष्ठिरः ।
अपासीन्नवमासोनाः क्ष्मां चत्वारिंशतिं समाः ॥ ३७९ ॥

सर्वरत्नजयस्कन्दगुप्तशब्दाङ्किताभिधाः ।
आसन् विहारचैत्यादिकृत्यैस्तत्सचिवा वराः ॥ ३८० ॥

भवच्छेदाभिधं ग्रामं स्तुत्यं चैत्यादिसिद्धिभिः ।
यो व्यधात् सोऽस्य वज्रेन्द्रोऽप्यासीन्मन्त्री जयेन्द्रजः ॥ ३८१ ॥

दिक्कामिनीमुखोत्कीर्णकीर्त्तिचन्दनचित्रकाः ।
आसन् कुमारसेनाद्याः तस्यान्येऽप्यग्र्यमन्त्रिणः ॥ ३८२ ॥

---

377. b) SA_1 त्यक्त्वा (for भुक्त्वा).
378. S′ om. ab. —d) P_3 I_3 SA_3 च्छिद्र° (for द्वार°).
379. d) C T S′ च द्वाविंश°; SA_1 (before corr.) चतुर्विंश° (for चत्वारिंश°).
381. a) SA_1 gloss भौछो (for भवच्छेदा°).
382. S′ om. vv. 382-411. —b) C T °चन्द्र°; $P_{1,3}$ °चन्द्रि° (for °चित्र°).

पद्मावत्यां सुतस्तस्य नरेन्द्रादित्य इत्यभूत् ।
लःखणापरनामा यो नरेन्द्रस्वामिनं व्यधात् ॥ ३८३ ॥

वज्रेन्द्रतनयौ वज्रकनकौ यस्य मन्त्रिणौ ।
अभूतां सुकृतोदन्तौ राज्ञी च विमलप्रभा ॥ ३८४ ॥

स विधायाधिकरणं लिखितस्थितये निजम् ।
द्यां त्रयोदशभिर्वर्षैरारुरोह महाभुजः ॥ ३८५ ॥

तस्याऽनुजो धरणिभृत् रणादित्यस्ततोऽभवत् ।
तुञ्जीनापरनामानं यं जनाः प्राहुरञ्जसा ॥ ३८६ ॥

जगद्विलक्षणं यस्य शङ्खमुद्राङ्कितं शिरः ।
अपूर्वशर्वरीशान्तर्लीनभानुश्रियं दधे ॥ ३८७ ॥

रिपुकण्ठाटवीष्वासीत् यस्य धाराधरः पतन् ।
तद्वधूनेत्रकुण्डैस्तु जलाधिक्यमधार्यत ॥ ३८८ ॥

अपूर्वो यत्प्रतापाग्निः प्रविश्योर्वीं द्विषां न्यधात् ।
नारीनेत्रेषु नीरोर्मीन् मन्दिरेषु तृणाङ्कुरान् ॥ ३८९ ॥

यस्य पाणिप्रणयितां कृपाणे समुपागते ।
कबन्धेभ्यः परो नृत्तं न व्यधत्त द्विषद्बले ॥ ३९० ॥

तस्याव्यपोह्यमाहात्म्या देवी दिव्याकृतेः प्रिया ।
विष्णुशक्तिः क्षितिं प्राप्ता रणारम्भाभिधाऽभवत् ॥ ३९१ ॥

स हि जन्मान्तरे पूर्वं द्यूतकारोऽभवत्किल ।
कदाऽपि प्राप निर्वेदं सर्वस्वं कितवैर्जितः ॥ ३९२ ॥

देहत्यागोद्यतोऽप्यासीत् प्राप्यं किंचिद्विचिन्तयन् ।
न पर्यन्तेऽप्युपेक्षन्ते कितवाः स्वार्थसाधनम् ॥ ३९३ ॥

---

383. c) C लक्षणा°; T लःक्षणा°; P_3 I_3 लख्खणा°; SA_1 लःखणा° (for लःखणा°).

390. cd) SA_3 adds a *varia lectio* in marg. अन्यत् कबन्धेभ्यः परं नृत्तं न व्यधत्त द्विषद्बलम् and over the last word द्विषद्बलम् the gloss कर्तृ by the same hand. (for कबन्धेभ्यः परो नृत्तं न व्यधत्त द्विषद्बले).

अवन्ध्यदर्शनां विन्ध्ये देवीं भ्रमरवासिनीम् ।
द्रष्टुमैच्छद्वराकाङ्क्षी निर्व्यपेक्षः स्वजीविते ॥ ३९४ ॥

भ्रमरैः शङ्कुपुच्छाद्यैः खण्ड्यमानस्य देहिनः ।
तदास्पदं हि विशतो दुर्लङ्घ्या पञ्चयोजनी ॥ ३९५ ॥

स वज्रशङ्कुपुच्छानां धीमांस्तेषां प्रतिक्रियाम् ।
देहेऽवश्यपरित्याज्ये मन्वानोऽभूददुष्कराम् ॥ ३९६ ॥

प्रागयोवर्मणा देहं ततो महिषचर्मणा ।
तेन छादयता दत्तो मृल्लेपोऽथ सगोमयः ॥ ३९७ ॥

अथ भानुकरोच्छुष्कमृल्लेपाम्रेडिताङ्गकः ।
स लोष्ट इव संचारी प्रतस्थे क्रूरनिश्चयः ॥ ३९८ ॥

सरलां सरणिं त्यक्त्वा जीवितस्पृहया समम् ।
गुहा तेन ततः सान्द्रतमोभीमा व्यगाह्यत ॥ ३९९ ॥

अथोदतिष्ठन् गर्तेभ्यो घोरा भ्रमरमण्डलाः ।
पक्षशब्दैः श्रुतिं घ्नन्तो मृत्युतूर्यरवैरिव ॥ ४०० ॥

ते तमुच्छुष्कमृल्लेपरेणुव्रणितलोचनाः ।
सहसा नाक्रमन्ते स्म प्रहरन्तोऽपि बाधितुम् ॥ ४०१ ॥

रेणुभिर्येऽन्धितदृशः ते न्यवर्तन्त षट्पदाः ।
तेऽखण्डयंस्तु मृल्लेपं न्यपतन् ये नवा नवाः ॥ ४०२ ॥

तैः खण्ड्यमानमुच्चण्डैः व्रजतो योजनत्रयीम् ।
क्रमान्मृत्कवचं तस्य पथि संक्षयमाययौ ॥ ४०३ ॥

ततो मुहुः प्रहरतां तेषां महिषचर्मणि ।
घोरश्चटचटाघोषः प्रादुरासीद्भयंकरः ॥ ४०४ ॥

चतुर्थयोजनस्यार्धमतिक्रम्य विवेद सः ।
रणत्कारैर्द्विरेफांस्तान् अयोवर्मणि पातिनः ॥ ४०५ ॥

---

395. a) St. Tr. emends °पुच्छाढ्यैः (for °पुच्छाद्यैः).
398. b) C $I_{3,4}$ °प्रेडिताङ्गकः; T °पीडिताङ्गकः (for °म्रेडिताङ्गकः).
402. a) C T °र्बाधित° (for °र्यैन्धित°).
405. d) St P_2 $I_{3,4}$ °वर्मानिपा° (for °वर्मणि पा°).

धावंस्ततोऽतिवेगेन खण्ड्यमानेन षट्पदैः ।
स शस्त्रवर्मणाऽमोचि चित्तं धैर्येण नो पुनः ॥ ४०६ ॥

गव्यूतिमात्रमासन्ने देवीधामनि धैर्यवान् ।
धुन्वन् कराभ्यां मधुपान् धावति स्म स धीरधीः ॥ ४०७ ॥

अथ स्नाय्वस्थिशेषाङ्गो लूनमांसः षडङ्घ्रिभिः ।
कराभ्यामक्षिणी रक्षन् देव्यायतनमासदत् ॥ ४०८ ॥

प्रशान्ते भृङ्गसंपाते प्रकाशमवलोकयन् ।
स देव्याः पादयोरग्रे पपातोद्भ्रान्तजीवितः ॥ ४०९ ॥

स्तोकावशेषप्राणं तं देव्याश्वासयितुं ततः ।
अभिरामं वपुः कृत्वा पस्पर्शाङ्गेषु पाणिना ॥ ४१० ॥

दिव्येन पाणिस्पर्शेन तेन पीयूषवर्षिणा ।
स क्षिप्रासादितस्वास्थ्यो दिक्षु चिक्षेप चक्षुषी ॥ ४११ ॥

प्रविष्टमात्रः प्रैक्षिष्ट सिंहविष्टरसीम्नि याम् ।
घोराकारां स तां देवीं तदाऽद्राक्षीन्न तां पुनः ॥ ४१२ ॥

ददर्श पुनरुद्यानलतावासे विलासिनीम् ।
स्थितां पुष्करिणीतीरे श्यामां पुष्करलोचनाम् ॥ ४१३ ॥

गृहीतहारमुक्तार्घां बद्ध्वा पीनस्तनाञ्जलिम् ।
महार्हैः कान्तिकुसुमैः यौवनेनार्चिताङ्गकाम् ॥ ४१४ ॥

यावकाहारिणौ पादौ दधतीं कृच्छ्रचारिणौ ।
स्तनच्छन्नमुखं द्रष्टुं तपस्यन्ताविवाऽन्वहम् ॥ ४१५ ॥

---

406. d) SA_3 चित्रं; P_1 $I_{3,4}$ चित्त° (for चित्तं). C T I_4 पुरः (for पुनः).
412. d) P_{1-3} SA_3 SG D (before suggestion) पुरः (for पुनः).
414. a) P_3 गृहीत्वा (for गृहीत°). C S' °क्तार्घ्यां; SA_3 (after corr.) °क्तार्घान् (for °क्तार्घां). —b) C T D P_1 I_3 SA_3 (after corr.) बद्धा°; P_2 बद्ध° (for बद्ध्वा). SA_3 reads in marg. °मुक्तार्घां बद्ध° with a gloss मुक्ता एव अर्घाः.

भास्वद्बिम्बाधरां कृष्णकेशीं सितकराननाम् ।
हरिमध्यां शिवाकारां सर्वदेवमयीमिव ॥ ४१६ ॥

तां विभाव्यानवद्याङ्गीं निर्जने यौवनोर्जिताम् ।
निन्येऽवारितवामेन स कामेन विधेयताम् ॥ ४१७ ॥

दधती रूपमाधुर्यपूरच्छन्नामधृष्यताम् ।
अप्सराः प्रत्यभात्तस्य सा हि चित्ते न देवता ॥ ४१८ ॥

कृपामृदुरवादीत्तं व्यथितोऽसि चिरं पथि ।
मुहुः सौम्य समाश्वस्य प्रार्थ्यतामुचितो वरः ॥ ४१९ ॥

स तां बभाषे शान्तो मे भवत्या दर्शनाच्छ्रमः ।
अदेवी किं तु भवती वरं दातुं कथं क्षमा ॥ ४२० ॥

देवी जगाद तं भद्र कोऽयं ते मनसि भ्रमः ।
देवी वा स्यामदेवी वा वरीतुं त्वां तु शक्नुयाम् ॥ ४२१ ॥

इति सोऽभीष्टसंप्राप्तौ कारयित्वा प्रतिश्रवम् ।
दूरमुत्क्रान्तमर्यादः संगमं तामयाचत ॥ ४२२ ॥

तमभ्यधात्सा दुर्बुद्धे कोऽयं तेऽनुचितो विधिः ।
प्रार्थयस्वेतरद्यस्मात् साऽहं भ्रमरवासिनी ॥ ४२३ ॥

देवीं तां जानतोऽप्यस्य नाभूदवहितं मनः ।
निरुद्धा वासनाः केन जन्मान्तरनिबन्धनाः ॥ ४२४ ॥

स तामुवाच सत्यां चेद्देवि स्वां गिरमिच्छसि ।
प्रमाणीकुरु मद्वाणीमहमन्यन्न कामये ॥ ४२५ ॥

पूर्वमेव हि जन्तूनां योऽधिवासो निलीयते ।
तिलानामिव तेषां स पर्यन्तेऽपि न शीर्यते ॥ ४२६ ॥

देवी वा भव कान्ता वा भीमा वा शोभनाऽपि वा ।
यादृशीं पूर्वमद्राक्षं तादृश्येवाऽवभासि मे ॥ ४२७ ॥

---

417. c) All Mss. except SA_1 read निन्ये वारि° (for निन्येऽवारि°).
419. c) C $P_{1,3}$ S′ $I_{3,4}$ सोम्य (for सौम्य);
425. a) C T I_4 S′ SA_1 (before corr.) सत्यं (for सत्यां).

तमित्थं कथयन्तं सा ज्ञात्वा निश्चलनिश्चयम् ।
एवं जन्मान्तरे भावीत्यभ्यधादनुरोधतः ॥ ४२८ ॥

उत्सहन्ते हि संस्प्रष्टुं न दिव्या मर्त्यधर्मिणः ।
तद्गच्छ क्रूरसंकल्पेत्युक्त्वा साऽन्तर्दधे ततः ॥ ४२९ ॥

अशून्यजन्मा भूयासं तया देव्येति चिन्तयन् ।
प्रयागवटशाखाग्रादहासीत्स वपुस्ततः ॥ ४३० ॥

सोऽजायत रणादित्यो रणारम्भा च सा भुवि ।
मर्त्यभावेऽपि या नैव जहौ जन्मान्तरस्मृतिम् ॥ ४३१ ॥

रतिसेनाभिधश्चोलराजः सज्जोऽब्धिपूजने ।
तां तरङ्गान्तराल्लेभे रत्नराजिमिवोज्ज्वलाम् ॥ ४३२ ॥

आ बाल्याद्व्यक्तदिव्योक्तिं तामलंकृतयौवनाम् ।
दिव्यार्हां पृथिवीशेभ्यो नार्थिभ्योऽपि ददौ नृपः ॥ ४३३ ॥

रणादित्यनृपामात्ये दूत्यायाते तथैव तम् ।
प्रत्याख्यानेच्छुमाचख्यौ सैव तद्वरणं वरम् ॥ ४३४ ॥

तदर्थमेव कथितस्वोत्पत्तिं तां ततः पिता ।
द्रुतं कुलूतभूभर्तुः सुहृदः प्राहिणोद् गृहान् ॥ ४३५ ॥

प्रहृष्टोऽविप्रकृष्टं तं देशं गत्वा व्यधत्त ताम् ।
परिणीय रणादित्यः शुद्धान्तस्याधिदेवताम् ॥ ४३६ ॥

मर्त्यसंस्पर्शभीरुः सा महादेवीभवन्त्यपि ।
तं मायया मोहयन्ती न पस्पर्श कदाचन ॥ ४३७ ॥

व्यधान्मायामयीं राज्ञस्तल्पे स्वसदृशीं स्त्रियम् ।
स्वयं सा भ्रमरीरूपा निर्जगाम बहिर्निशि ॥ ४३८ ॥

---

429. a) C T S' I_4 संस्रप्टुं (for संस्प्रष्टुं). —b) P_2 I_3 SA_3 देव्यो (for दिव्या). P_3 °धर्मिणम् (for °धर्मिणः).
430. d) T P_1 I_4 स्व° (for स).
431. c) C T S' I_4 यन्नैव (for या नैव).
436. a) All Mss. read प्रकृष्टो विप्र° except St. Tr. (for अविप्रकृष्टं).

स नाम्ना स्वस्य देव्याश्च कृत्वा सुरगृहद्वयम् ।
माहेश्वरः शैललिङ्गे कारयामास कारुभिः ॥ ४३९ ॥

श्वः प्रतिष्ठाप्रसङ्गेऽथ सज्जे तल्लिङ्गयोर्द्वयम् ।
देशान्तरागतः कश्चित् दूषयामास दैववित् ॥ ४४० ॥

स दृष्टप्रत्ययः शश्वत् तयोर्घटितलिङ्गयोः ।
अश्मखण्डैः समण्डूकैः बभाषे गर्भमावृतम् ॥ ४४१ ॥

किंकर्तव्यतया मूढं प्रतिष्ठाविघ्नविह्वलम् ।
दिव्यदृष्टिः स्वयं देवी ततो राजानमब्रवीत् ॥ ४४२ ॥

राजन्गिरिसुतोद्वाहे पौरोहित्यं पुरा भजन् ।
स्वमर्चादेवमादत्त पूजाभाण्डात्प्रजापतिः ॥ ४४३ ॥

तां विष्णोः प्रतिमां वीक्ष्य पूजितां तेन धूर्जटिः ।
शून्यामिव तदा मेने शक्तिरूपां विना शिवम् ॥ ४४४ ॥

निमन्त्रितैर्ढौकितानि रत्नान्यथ सुरासुरैः ।
पिण्डीकृत्य स्वयं चक्रे लिङ्गं भुवनवन्दितम् ॥ ४४५ ॥

तां विष्णुप्रतिमां तच्च लिङ्गमीशानपूजितम् ।
स्वयं प्रजासृजः पूज्यं कालेनादत्त रावणः ॥ ४४६ ॥

तेनाप्यभ्यर्च्यमानं तत् लङ्कायामभवच्चिरम् ।
देवद्वयं रावणान्ते नीतमासीच्च वानरैः ॥ ४४७ ॥

तिर्यक्तया ते कपयो मुग्धा हिमनगौकसः ।
शान्तौत्सुक्याः शनैः देवौ न्यधुरुत्तरमानसे ॥ ४४८ ॥

---

439. a) C T S′ स्व (for स). —b) C T S′ पर°; I_4 स्वर° (for सुर°). —c) D $P_{2,3}$ माहेश्वरे (for माहेश्वरः).

441. c) C T S′ अश्व° (for अश्म°).

443. c) T समर्चीद्देवमादितं (for स्वमर्चादेवमादत्त). P_2 SA_1 °धत्त (for °दत्त).

444. c) P_2 शून्यामेव (for शून्यामिव).

448. b) C T S′ हिमानसौकसः; P_3 हिमवनौकसः (for हिमनगौकसः). —c) C S′ I_4 देव्यो; (for देवौ).

प्रागेव सरसस्तस्मात्कुशलैः शिल्पिभिर्मया ।
तावुद्धृतौ प्रातरत्र प्राप्तौ द्रक्ष्यस्यसंशयम् ॥ ४४९ ॥

तयोः प्रतिष्ठा क्रियतामित्युक्त्वा पृथवीभुजम् ।
देवी प्रयाता शुद्धान्तं सिद्धान्सस्मार खेचरान् ॥ ४५० ॥

ते ध्यातमात्राः संप्राप्ता देव्यादेशेन पाथसः ।
उद्धृत्य नृपतेर्धाम्नि देवौ हरिहरौ न्यधुः ॥ ४५१ ॥

दिव्यैः प्रसूनैः संवीतौ हरनारायणौ जनः ।
प्रातर्नृपगृहे दृष्ट्वा परं विस्मयमाययौ ॥ ४५२ ॥

सज्जे प्रतिष्ठालग्नेऽथ माहेश्वरतया नृपः ।
रणेश्वरप्रतिष्ठायां पूर्वं यावत्समुद्यतः ॥ ४५३ ॥

रणारम्भानुभावेन तावदेवाद्भुतावहः ।
स्वयं पीठे रणस्वामी भित्त्वा यन्त्रमुपाविशत् ॥ ४५४ ॥

कर्तुं प्रभावजिज्ञासां राज्ञ्या दत्तधनस्ततः ।
स स्वयंभूः स्वयं भक्तैः तांस्तान्ग्रामानदापयत् ॥ ४५५ ॥

कुम्भदासतया छन्नः सिद्धो ब्रह्माभिधो वसन् ।
परिज्ञाय तयोर्देव्या प्रतिष्ठाकर्म कारितः ॥ ४५६ ॥

स वृत्तप्रत्यभिज्ञः सन्प्रतिष्ठाप्य रणेश्वरम् ।
व्योम्ना व्रजन् रणस्वामिप्रतिष्ठां गूढमादधे ॥ ४५७ ॥

जनास्त्वलक्षयन् यत्स स्वयं पीठमवातरत् ।
इति केषामपि हृदि प्रवादोऽद्यापि वर्तते ॥ ४५८ ॥

---

449. c) C T S′ °द्यतौ (for °द्धृतौ).
451. ab) SA_1 (before corr.) तं °मात्र° and पाथस (for ते °मात्राः and पाथसः). —d) P_1 I_4 SA_1 व्यधुः (for न्यधुः).
453. a) SA_3 C T S′ I_4 °लिङ्गे (for °लग्ने).
455. b) D C T P_{1-3} S′ I_1 SA_1 (before corr.) राज्ञा (for राज्ञ्या). —c) C T St S′ P_3 I_3 SA_3 भक्तां° (for भक्तै°).
458. d) D $P_{1,2}$ I_3 SA_1 प्रवचो° (for प्रवादो°).

सा ब्रह्मप्रतिमं सिद्धं देवी ब्रह्मविदां वरम्।
अकारयत्तमुद्दिश्य पराध्यं ब्रह्ममण्डपम् ॥ ४५९ ॥

रणारम्भास्वामिदेवौ दंपतिभ्यां व्यधीयत ।
मठः पाशुपतानां च ताभ्यां प्रद्युम्नमूर्धनि ॥ ४६० ॥

आरोग्यशाला निरघाऽप्युल्लाघत्वाय रोगिणाम्।
तेन सेनामुखीदेवीभयशान्त्यै च कारिता ॥ ४६१ ॥

ख्यातिं रणपुरस्वामिसंज्ञया सर्वतो गतम्।
स सिंहरोत्सिकाग्रामे मार्ताण्डं प्रत्यपादयत् ॥ ४६२ ॥

अमृतप्रभया तस्य राज्ञः पत्न्याऽन्यया कृतः।
दक्षिणेऽस्मिन् रणेशस्य पार्श्वे देवोऽमृतेश्वरः ॥ ४६३ ॥

मेघवाहनभूभर्तृपत्न्या भिन्नाऽऽख्यया कृते।
विहारेऽपि तया बुद्धबिम्बं साधु निवेशितम् ॥ ४६४ ॥

राज्ञे देव्यनुरक्ताय सानुक्रोशाय सैकदा।
पातालसिद्धिदं मन्त्रं प्रददौ हाटकेश्वरम् ॥ ४६५ ॥

मा भून्मोघाऽस्य मत्प्राप्तिरिति मत्वा तयाऽर्पितम्।
असाधयत्स तं प्राप्य वशान्तं वत्सरान्बहून् ॥ ४६६ ॥

कृत्वेष्टिकापथे कष्टं तपो नन्दिशिलां गतः।
भूरिभिर्वत्सरैर्मन्त्रसिद्धेः प्रणयितां ययौ ॥ ४६७ ॥

---

459. a) I_4 SA_1 (before corr.) स (for सा). —d) $P_{1,2}$ I_4 SA (before corr.) पराख्यं; S′ पराद्धं (for पराध्यं). C T $P_{1,2}$ I_4 S′ SA_1 °सत्तमम् (for °मण्डपम्).

460. a) I_4 °देवो (for °देवौ). —b) C T S′ दम्पतीभ्यां (for दम्पतिभ्यां). —d) SA_3 gloss शारिकागिरौ (for प्रद्युम्नमूर्धनि).

462. d) C T St S′ मार्तण्डं (for मार्ताण्डं).

466. d) C S′ वसन्तं; T वसन्तु; SR SG P_3 वंशान्तं (for वशान्तं).

467. a) C S′ कृत्वष्टि° (for कृत्वेष्टि°). —b) D C S′ T $P_{1,3}$ $I_{3,4}$ ततो (for तपो).

स्वप्नैश्च सिद्धिलिङ्गैश्च जाताभङ्गुरनिश्चयः ।
चन्द्रभागाजलं भित्त्वा नमुचेः प्राविशद्बिलम् ॥ ४६८ ॥

बिलेऽपावृततां याते दिवसान्येकविंशतिम् ।
प्रवेश्य पौरान्प्राङ्निन्ये दैत्यस्त्रीभोगभागिताम् ॥ ४६९ ॥

स एवं भूपतिर्भुक्त्वा भुवं वर्षशतत्रयम् ।
निर्वाणश्लाघ्यनिर्व्यूढि पातालैश्वर्यमासदत् ॥ ४७० ॥

सानुगे नृपतौ याते दैतेयदयितान्तिकम् ।
देवी सा वैष्णवी शक्तिः श्वेतद्वीपमगाहत ॥ ४७१ ॥

राजवंशेष्वनेकेषु राज्ञोर्वंशद्वये परम् ।
द्वयोरेवात्र निर्व्यूढिं प्रजावात्सल्यमागतम् ॥ ४७२ ॥

रणादित्यस्य गोनन्दवंशे रामस्य राघवे ।
लोकान्तरसुखस्यापि ययोरंशभुजः प्रजाः ॥ ४७३ ॥

विक्रमाक्रान्तविश्वस्य विक्रमेश्वरकृत्सुतः ।
तस्यासीत् विक्रमादित्यः त्रिविक्रमपराक्रमः ॥ ४७४ ॥

राजा ब्रह्मगलूनाभ्यां सचिवाभ्यां समं महीम् ।
सोऽपासीद्वासवसमो द्वाचत्वारिंशतिं समाः ॥ ४७५ ॥

चक्रे ब्रह्ममठं ब्रह्मा गलूनो लूनदुष्कृतः ।
रत्नावल्याख्यया वध्वा विहारं निरमापयत् ॥ ४७६ ॥

राज्ञोऽनन्तरजस्तस्य राजाऽभूत्तदनन्तरम् ।
तापितारातिभूपालो बालादित्यो बलोर्जितः ॥ ४७७ ॥

---

468. c) SA_1 (before corr.) चान्द्र° (for चन्द्र°).
469. b) $P_{2,3}$ दिवसानेक° (for दिवसान्येक). —c) All Mss. (except SL) read प्रविश्य (for प्रवेश्य). —d) C T St P_{1-3} $I_{3,4}$ °भोगिताम् (for °भागिताम्).
470 a) T St P_{1-3} एवं स (for स एवं). C T $P_{1,2}$ I_4 S′ SA_1 (before corr.) भूत्वा (for भुक्त्वा). —c) T S′ I_4 निर्व्यूढ° (for निर्व्यूढि). —d) C T $P_{1,2}$ S′ I_4 SA_1 °लेश्वरं (for °लैश्वर्य°).
475. a) P_{1-3} $I_{3,4}$ SA SG SR D (before suggestion) °गलूरा° (for °गलूना°).

लवणार्णवपानेन तर्षोत्कर्षमिवोद्वहन् ।
यत्प्रतापो रिपुस्त्रीणां सनेत्राम्भोऽभजन्मुखम् ॥ ४७८ ॥

आसन् येऽरिमनोऽगाधबोधदण्डा इवाहृताः ।
यस्याद्यापि जयस्तम्भाः सन्ति ते पूर्ववारिधौ ॥ ४७९ ॥

प्रभावाङ्केन वङ्कालान् जित्वा येन व्यधीयत ।
काश्मीरिकनिवासाय कालम्ब्याख्यो जनाश्रयः ॥ ४८० ॥

कश्मीरेषु धनोदग्रमग्रहारं द्विजन्मनाम् ।
राजा मडवराज्ये यो भेडराख्यमकारयत् ॥ ४८१ ॥

विशां विपाटितारिष्टमरिष्टोत्सादने व्यधात् ।
वल्लभा यस्य बिम्बोष्ठी बिम्बा बिम्बेश्वरं हरम् ॥ ४८२ ॥

भ्रातरो मन्त्रिणस्तस्य त्रयो मठसुरौकसोः ।
सेतोश्च कारका आसन् खङ्गशत्रुघ्नमालवाः ॥ ४८३ ॥

बभूव तस्य भूभर्तुः भुवनाद्भुतविभ्रमा ।
तनयाऽनङ्गलेखाख्या शृङ्गारोदधिकौमुदी ॥ ४८४ ॥

तां वीक्ष्य लक्षणोपेतां मृगाक्षीं पितुरन्तिके ।
अमोघप्रत्ययो व्यक्तं व्याजहारेति दैववित् ॥ ४८५ ॥

भविता तव जामाता जगतीभोगभाजनम् ।
त्वदन्तमेव साम्राज्यं गोनन्दान्वयजन्मनाम् ॥ ४८६ ॥

सुतासंतानसाम्राज्यमनिच्छन्नथ पार्थिवः ।
दैवं पुरुषकारेण जेतुमासीत्कृतोद्यमः ॥ ४८७ ॥

अराजान्वयिने दत्ता नेयं साम्राज्यहारिणी ।
मत्वेति प्रददौ कन्यां न कस्मैचन भूभुजे ॥ ४८८ ॥

---

480. a) S′ वंकालो; D C T I_4 P_{1-3} वङ्कालां (for वङ्कालान्).
481. d) I_4 SA_1 (before corr.) भेरडा° (for भेडरा°).
482. a) P_{1-3} विपटि°; I_3 विपाति° (1or विपाटि°). —b) SA_3 gloss रट्टोसाने (for अरिष्टोत्सादने).
483. b) C T S′ °रौकसः (for °रौकसोः).
484. b) C T S′ I_4 °विक्रमा (for °विभ्रमा).

हेतुं सरूपतामात्रं कृत्वा जामातरं नृपः ।
अथाश्वघासकायस्थं चक्रे दुर्लभवर्धनम् ॥ ४८९ ॥

मातुः कार्कोटनागेन सुस्नातायाः समीयुषा ।
राज्यायैव हि संजातो राज्ञा नाज्ञायि तेन सः ॥ ४९० ॥

निश्चिन्वते हि ज्ञंमन्या यमेवायोग्यमाग्रहात् ।
जिगीषयेव तत्रैव निदधाति विधिः शुभम् ॥ ४९१ ॥

मात्सर्येण जहद् ग्रहान्विसदृशे धूमध्वजे योग्यतां
ज्ञात्वा स्वां निदधत् त्विषं दिनपतिर्हास्यः प्रशान्त्युन्मुखः ।
दैवं वेत्ति न यः शिखी स परतो नामास्तु तत्संभवाः
स्युर्दीपा अपि यद्वशेन जगतस्तिग्मांशुविस्मारकाः ॥ ४९२ ॥

धिया भाग्यानुगामिन्या चेष्टमानो नयोचितम् ।
अभूत्सर्वस्य चक्षुष्यः स तु दुर्लभवर्धनः ॥ ४९३ ॥

प्रज्ञया द्योतमानं तं प्रज्ञादित्य इति प्रथाम् ।
कौबेरभाग्यसाम्यं च शनकैः श्वशुरोऽनयत् ॥ ४९४ ॥

पित्रोः प्रेयस्तयोद्वृत्ता तारुण्यादिमदेन च ।
राजपुत्री यथावत्तु गणयामास नैवं तम् ॥ ४९५ ॥

स्वैरिणीसंगमो भोगा युवानोऽग्रे पितुर्गृहम् ।
पत्युर्मृदुत्वमित्यस्याः किं नाभूच्छीलविघ्नकृत् ॥ ४९६ ॥

---

489. a) S′ स्वभूप°; St स रूप° (for सरूप°).

490. a) C T S′ I_4 कर्को° (for कार्को°). —b) I_4 SA_1 (before corr.) समेयुषा (for समीयुषा). —c) C S′ संजाता (for संजातो). —d) C S′ $I_{3,4}$ SA_1 (before corr.) सा (for सः).

491. a) C S′ निश्चिन्वाते (for निश्चिन्वते). P_2 ज्ञांमन्या; S′ संमन्या; P_1 ज्ञंमत्या (for ज्ञंमन्या).

492. a) $P_{1,3}$ $I_{3,4}$ SA SR SG जहन्ग्र° (for जहद् ग्र°). —c) St SA_3 I_3 तु (for सः). SA_3 gloss दूरे इत्यर्थः (for परतो).

494. c) C S′ St SA SL $P_{2,3}$ $I_{3,4}$ कौवीर° (for कौबेर°). St P_2 $I_{3,4}$ स्वाम्यं (for साम्यं).

495. a) SA_3 gloss उल्लंघितमर्यादा (for उद्वृत्ता).

सा नित्यदर्शनाभ्यासाच्छनकैर्विशता मनः ।
अनङ्गलेखा खड्गेन संप्रायुज्यत मन्त्रिणा ॥ ४९७ ॥

छन्नप्रेमसुखाभ्यासनष्टह्रीभीतिसंभ्रमा ।
धार्ष्ट्यं दिनाद्दिनं यान्ती ततस्तन्मयतां ययौ ॥ ४९८ ॥

स मन्त्री दानमानाभ्यां वशीकृतपरिच्छदः ।
अन्तःपुरे यथाकामं विजहार तया सह ॥ ४९९ ॥

उपलेभे च शनकैस्तस्यास्तं शीलविप्लवम् ।
विरागलिङ्गैरुद्यद्भिः धीमान् दुर्लभवर्धनः ॥ ५०० ॥

सखीमध्ये रहः स्मेरा विवर्णा भर्तृदर्शने ।
अकाण्ड एव प्रोत्थाय पश्यन्ती सस्मितं पथः ॥ ५०१ ॥

पत्युः कोपे कृतावज्ञा भ्रूनेत्रचिबुकाञ्चनैः ।
तदप्रियं भाषमाणे सस्मितं न्यस्तलोचना ॥ ५०२ ॥

तत्तुल्यगुणनिर्विण्णा तद्विपक्षस्तुतौ रता ।
रिरंसां तस्य संलक्ष्य सखीभिर्बद्धसंकथा ॥ ५०३ ॥

तच्चुम्बने भुग्नकण्ठी तदाश्लेषासहाङ्गका ।
तत्संभोगे त्यक्तहर्षा तत्तल्पे व्याजनिद्रिता ॥ ५०४ ॥

भवेद्धि प्रायशो योषित् प्रेमविक्रीतचेतना ।
निवेदयन्ती दौःशील्यपिशाचावेशवैकृतम् ॥ ५०५ ॥

---

497. d) D SA P_{1-3} $I_{3,4}$ संप्रयु° (for संप्रायु°).
499. d) I_3 SA_3 समम् (for सह).
500. I_4 SA_1 om. *v.* 500d-507d.
501. c) C T S′ प्रोक्ताय (for प्रोत्थाय).
502. b) C T S′ °ञ्चलैः (for °ञ्चनैः).
503. a) P_1 तत्तुत्य° (for तत्तुल्य°).
504. b) C S′ °श्लेषस°; St $P_{1,3}$ I_3 °श्लेषेस° (for °श्लेषास°). —d) P_{1-3} I_3 SA_1 °निद्रता (for °निद्रिता).
505. After this *v.* कुलकम्.

निगूढदारदौरात्म्यचिन्ताकृशवपुस्ततः ।
शुद्धान्तमविशज्जातु निशि दुर्लभवर्धनः ॥ ५०६ ॥
सोऽपश्यत्सुरतक्लान्तिसुलभस्वापनिस्सहाम् ।
दुर्जारभर्तुरङ्केषु प्रत्युप्तामिव वल्लभाम् ॥ ५०७ ॥
श्वासैरगलितावेगैः कम्पयद्भिः कुचाङ्कुरौ ।
निवेदयन्तीं तत्कालमेव निर्वहणं रतेः ॥ ५०८ ॥
अन्यस्यापि क्रोधहेतुं पुनरप्यक्षमावहाम् ॥
तां तथाऽवस्थितां वीक्ष्य स प्रजज्वाल मन्युना ॥ ५०९ ॥
प्रजिहीर्षुः स रोषेण विमर्शेन निवारितः ।
प्रहृत्येव प्रहृत्येव निवृत्तं स्वममन्यत ॥ ५१० ॥
ततस्तथाविधः क्षुभ्यन् प्रकोपावेशसागरः ।
विचारवेलया तस्य बलाच्छममनीयत ॥ ५११ ॥
नमस्तस्मै ततः कोऽन्यो गण्यते वशिनां धुरि ।
जीर्यन्ते येन पर्याप्ता ईर्ष्याविषविषूचिकाः ॥ ५१२ ॥
सोऽचिन्तयदहो कष्टाश्चेष्टा रागानुगा इमाः ।
विचारवन्ध्याः क्षिप्यन्ते क्षिप्रं याभिरधो नराः ॥ ५१३ ॥
स्त्रीति नामेन्द्रियार्थोऽयमिन्द्रियार्था यथा परे ।
तथैव सर्वसामान्या वशिनामत्र काः क्रुधः ॥ ५१४ ॥

---

506. c) C T S′ ज्ञातुं (for जातु).
507. a) C T S′ योऽपश्यत् (for सोऽपश्यत्). —c) C T S′ SA_3 दुर्जात° (for दुर्जार°).
508. c) D (before suggestion) C T I_4 S′ SA_1 (before corr.) °दयन्तौ; P_3 I_3 °दयन्ती (for °दयन्तीं).
509. a) C T S′ I_4 क्रुधो (for क्रोध°). —b) D suggests मुनेः (for पुनः).
510. a) C S′ T स्म (for स).
511. b) St $P_{1,2}$ C T S′ $I_{3,4}$ क्षुभ्यत्प्र° (for क्षुभ्यन्प्र°).
513. a) I_4 SA_1 (before corr) कष्टाः श्रेष्ठा (for कष्टाश्चेष्टा).

निसर्गतरला नारीः को नियन्त्रयितुं क्षमः ।
नियन्त्रणेन किं वा स्याद्यत्सतां स्मरणोचितम् ॥ ५१५ ॥

यः शुनोरिव संघर्ष एकार्थाभिनिविष्टयोः ।
रागिणोर्यदि मानः स कोऽवमानस्ततः परः ॥ ५१६ ॥

ममकारो मृगाक्षीषु क इवायं सचेतसाम् ।
स्वदेहेऽनुपपन्नोऽपि यः सोऽन्यत्र कथं मतः ॥ ५१७ ॥

उद्वेगोत्पादनादेषा वध्या चेत्प्रतिभाति मे ।
रागस्तद्विस्मृतः कस्मान्मूलमुद्वेगशाखिनः ॥ ५१८ ॥

सप्तपातालनिक्षिप्तमूलो रागमहीरुहः ।
भूमिभूतमनुत्पाट्य द्वेषमुन्मूल्यते कथम् ॥ ५१९ ॥

द्वेषो नामैष दुर्धर्षो जितो येन विवेकिना ।
क्षणार्धेनैव रागस्य तेन नामापि नाशितम् ॥ ५२० ॥

वीक्ष्यैतद्दिव्यया दृष्ट्या रागिणां वाच्यमौषधम् ।
ईर्ष्या जेया ततो रागः स्वयमाशाः पलायते ॥ ५२१ ॥

इति ध्यात्वाऽलिखद्वर्णान् खड्गस्यांशुकपल्लवे ।
'वध्योऽपि न हतो यत्त्वं स्मर्तव्यं तत्तवे'त्यसौ ॥ ५२२ ॥

जनैरलक्ष्यमाणेऽथ याते दुर्लभवर्धने ।
त्यक्तनिद्रः स मन्त्री तान् दृष्ट्वा वर्णानवाचयत् ॥ ५२३ ॥

दाक्षिण्यात्प्राणदस्यास्य खड्गः स मनसा तदा ।
विसस्मारानङ्गलेखां दध्यौ तु प्रत्युपक्रियाम् ॥ ५२४ ॥

---

519. c) C S′ °नुत्पाद्य (for °नुत्पाट्य).
521. b) C S′ T शस्य° (for वाच्य°).
522. b) SA_1 (before corr.) खङ्गस्यां° (for खड्गस्यां°).
523. c) I_4 SA_1 om. मन्त्री त. All Mss. except SL read तद् (for तान्).

तस्योपकर्तुरुचितं प्रतिकारमिच्छोः
चिन्ताऽविशन्न तु मनः स्मरबाणपङ्क्तिः ।
दृग्गोचरे परिचयप्रणयं प्रपेदे
निर्निद्रता न तु कदाचन राजपुत्री ॥ ५२५ ॥

भूत्वा सप्तत्रिंशतिमब्दान्स चतुर्भि-
र्मासैर्वन्ध्यां मूर्धनि रत्नं नृपतीनाम् ।
तस्मिन्काले लोकमवापोज्ज्वलकृत्यो
बालादित्यो बालशशाङ्काङ्कितमौलेः ॥ ५२६ ॥

पूर्वं विपन्नतनयेऽभिजनस्य शेषे
गोनन्दसंततिरजायत तत्र शान्ते ।
प्राग्दन्तिभुग्नलिनाऽथ हठप्रविष्ट-
तोयौघपाटितबिसा नलिनीव दीना ॥ ५२७ ॥

अथ शिथिलितमुख्यामात्यवैमत्यविघ्नः
कनकघटविमुक्तैः पावनं तीर्थतोयैः ।
कथमपि स कृतज्ञो राजजामातुरुच्चै-
र्व्यधित विधिवदिष्टं मूर्ध्नि राज्याभिषेकम् ॥ ५२८ ॥

कार्कोटप्रभवः प्रभुः स मुकुटप्रत्युप्तमुक्ताकण-
द्योतश्रेणिफणाङ्कुराङ्कितबृहद्बाहुर्महीमुद्वहन् ।
ज्ञातिप्रीतिसतोषशेषफणभृत्संफुल्लदृक्पल्लव-
न्यासावर्जकहाटकाब्जपटलस्रग्दामशोभोऽभवत् ॥ ५२९ ॥

---

526. a) $P_{1,3}$ SA_3 (after corr.) सप्तत्रिं° (for सप्तत्रिं°). —b) SA_3 gloss ऊनामित्यर्थः (for वन्ध्यां).

529. a) C T S′ I_4 SA_1 (before corr.) कर्कोट° (for कार्कोट°). —c) C T S′ °हृत्प° (for °दृक्प°). —d) C T S′ °वर्तक° (for °वर्जक°). C T S′ St $P_{1,2}$ I_3 °स्रग्धाम°; I_4 °स्रद्धाम° (for °स्रग्दाम°).

अथ विगलिता गोनन्दोर्वीभुजोऽभिजनाच्छुचे-
रतिशुचिनि भूः कार्कोटाहेः कुले व्यधित स्थितिम् ।
चिरपरिचितात्स्वर्गाभोगाध्वनः पतनं श्रिता
त्रिभुवनगुरोः शंभोर्मौलाविवामरनिम्नगा ॥ ५३० ॥

—*—

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
तृतीयस्तरङ्गः ॥

—*—

---

530. b) C S′ T I_4 कर्कोटा° (for काकार्टो°).

After *v.* 530 insert—

(St. १० ॥५३६॥ आदितः ५३ ॥ ग्रं १०६९ ॥; SA SL ग्रं ५३६ आदितः १०६९; S′ T राजानः । १० आदितः ५३ ग्रन्थाः ५२५; $P_{1,2}$ १०, ५३६ आदितः ५३ ग्रं १०६९; P_3 रा० १० ग्रं ५३६ आदितः रा० ५४ ग्रं १०६९ ॥; I_4 राजानः १० आदितः ५४ ग्रंथानि ५२५ आदितः १०७०; I_3 १०,५३९ ॥ आदितः ॥ ५३ ॥ ग्रं ॥ १०६९ ॥ (for १० ॥ ५३० ॥ आदितः ५४ ॥ १०७४ ॥).

Colophon: C T S′ °चम्पक° (for °चण्पक°). SA_1 adds लिखितश्चैष मया राजानकरत्नकण्ठेन. After colophon a *v.* is inserted in SA by *sec. m.*

सैकोननवतिश्चात्र वर्षाणां शतपञ्चकः ।
दशमासाश्च सैकाहा गता दशसु राजसु ॥

अथ

चतुर्थस्तरङ्गः

तद्वीतव्यतिरेकमद्रितनयादेहेन मिश्रीभव-
न्निष्प्रत्यूहमिह व्यपोहतु वपुः स्थाणोरभद्राणि वः ।
वेण्या भोगिवधूशरीरकुटिलश्यामत्विषा वेष्टिता
जूटाहेरपि यत्र भाति दयितामूर्त्येव पृक्ता तनुः ॥ १ ॥

स महीं राजकन्यां च प्राप्तवानेकतः कुलात् ।
रत्नानां च सुतानां च राजाऽभूद्भाजनं शनैः ॥ २ ॥

पतिगोपितदौश्शील्या तुल्यसौभाग्यगौरवा ।
अनङ्गभवनं चक्रे विहारं नृपतिप्रिया ॥ ३ ॥

शिशुरेवायुषोऽल्पत्वं दैवज्ञोक्तं विचिन्तयन् ।
राज्ञः सुतो मह्णाख्यो मह्णस्वामिनं व्यधात् ॥ ४ ॥

पारेविशोककोटादौ प्रदत्तप्रतिपत्तिना ।
अदीयत द्विजेन्द्रेभ्यः चन्द्रग्रामः क्षमाभुजा ॥ ५ ॥

I_2 begins with श्रीगणेशाय नमः; I_7 V ओं श्रीगणेशाय नमः; I_3 ओम्; I_4 ओं स्वस्ति ॥ श्रीगुरवे नमः P_3 ओम् नमो भगवद्भ्याम् ॥.

1. a) $I_{1,2,4,7}$ V S′ C सिद्धीभव° (for मिश्रीभव°). —b) $I_{1,2,4,7}$ P_2 V व्यपोहत (for व्यपोहतु). —c) I_7 चेष्टिता (for वेष्टिता). —d) I_4 माति (for भाति).

3. a) $I_{2,7}$ S′ C पतिर्गोपित°; T पत्युर्गोपित° (for पतिगोपित°). $I_{1,2}$ S′ C T °दौःशील्यात् (for °दौःशील्या).

4. b) I_3 दैवज्ञोऽर्थं (for दैवज्ञोक्तम्). —c) I_4 om. मह्णाख्यो. —d) I_7 न्यधात् (for व्यधात्).

5. a) D °विशोकं कोटाद्रौ; I_4 °विशोककोटाद्रौ (for °विशोककोटादौ). —c) S′ C आदीयत (for अदीयत).

श्रीनगर्यां प्रतिष्ठाप्य दुर्लभस्वामिनं हरिम् ।
षट्त्रिंशता स वर्षाणां क्ष्मावृषाऽस्तमुपाययौ ॥ ६ ॥

अनङ्गदेव्यां संभूतस्तस्य दुर्लभकः सुतः ।
शशास वासवसमस्ततो वसुमतीं कृती ॥ ७ ॥

मातामहस्य यो मात्रा दौहित्रस्तनयीकृतः ।
प्रतापादित्य इत्याख्यां तत्कुलानुगुणां दधे ॥ ८ ॥

औडेनैडविडात् प्राप्तश्रिया यन्मन्त्रिणा कृताः ।
अग्रहारा हनुमता पुण्यानुमतसंपदा ॥ ९ ॥

प्रतापतापितारातिः प्रतापपुरपत्तनम् ।
मघवन्नगरस्पर्धि दीर्घबाहुर्व्यधत्त सः ॥ १० ॥

नानादिगन्तरायाततत्तत्क्रयिकसंकुले ।
नोणाभिधोऽवसत्तस्य देशे रौहीतको वणिक् ॥ ११ ॥

रौहीतदेशे जातानां निवेशाय द्विजन्मनाम् ।
महागुणो नोणमठं पुण्यज्येष्ठं चकार सः ॥ १२ ॥

स जातु राजभवने राज्ञा प्रीत्या निमन्त्रितः ।
अर्चितोऽभवदेकाहमुपचारैर्नृपोचितैः ॥ १३ ॥

प्रातः सुखासिकां प्रेम्णा पृष्टोऽथ पृथिवीभुजा ।
शीर्षव्यथामकथयत् प्रजातां दीपकज्जलैः ॥ १४ ॥

---

6. b) I_7 दुर्लभ°; S′ दुर्ल्लभ° (for दुर्लभ°). —c) $I_{1,2,7}$ वत्सराणाम्; I_4 V सत्सराणाम् (sic); P_3 मवर्षाणाम् (sic) (for स वर्षाणाम्). —d) T क्ष्मावृषो° (for क्ष्मावृषा°).

7. a) I_3 °देव्या (for °देव्याम्).

8. d) $I_{1,2,7}$ तत्कुलानुगुणम्; V तत्कलानुगुणं (for तत्कुलानुगुणां).

9. a) I_2 गैडेनैड°; I_7 औडैनै°; V औडेंडनै°; S′ ओडेनै° (for औडेनैड°). —d) $I_{1,2,4,7}$ S′ V C T पुण्यानम° (for पुण्यानुम°).

10. b) SA_3 gloss तापर् (for प्रतापपुर).

12. I_4 om. *vv.* 12 cd and 13c-14d.

14. d) $I_{1,2,3,7}$ V S′ C P_2 SA_1 (before corr.) प्रजानां (for प्रजातां).

ततः क्रमेण नृपतिस्तेन जातु कृतार्थनः ।
वसंस्तदास्पदेऽद्राक्षीत्क्षपायां मणिदीपकान् ॥ १५ ॥

विलासित्वेन लक्ष्म्या च तादृश्या तस्य विस्मितः ।
अथ द्वित्राण्यहान्यासीत्तत्रैव स कृतार्हणः ॥ १६ ॥

एकदा तेन तत्कान्ता व्यलोकि ललिताकृतिः ।
श्रीनरेन्द्रप्रभा नाम हर्म्ये हिमकरानना ॥ १७ ॥

उरोजपूर्णकुम्भाङ्का सदूर्वाहितविभ्रमा ।
मूर्तिमन्मङ्गलमिव स्मरस्य च गृहस्य च ॥ १८ ॥

हर्म्यस्य निर्जनतया स निःशङ्कविहारिणीम् ।
तां विलोक्यानवद्याङ्गीमभिलाषेण पस्पृशे ॥ १९ ॥

साऽपि दर्शितमालीभिः किंचित्साचीकृतानना ।
अपश्यत्काश्यपीकान्तं श्रोत्रविश्रान्तया दृशा ॥ २० ॥

प्राग्जन्मप्रेमबन्धाद्वा निदेशाद्वा मनोभुवः ।
सपक्षपातं सा तस्य दृष्ट्वैव विदधे मनः ॥ २१ ॥

क्षणादलब्धस्पर्शोऽपि तां सौभाग्यसुधामयीम् ।
मज्जानमपि संस्पृश्य स्थितामिव विवेद सः ॥ २२ ॥

हर्म्यस्तम्भच्छन्नगात्री क्षणं भूत्वा जगाम सा ।
व्यावर्त्य वक्त्रं पश्यन्ती पार्थिवं तं मुहुर्मुहुः ॥ २३ ॥

---

15. b) SA_1 (before corr.) कृताननः (for कृतार्थनः).

17. b) I_2 S′ C विलोक्य (for व्यलोकि).

18. a) $I_{1,2,4}$ V S′ C T °कुम्भाङ्क° (for °कुम्भाङ्का). —b) $I_{1,2,4,7}$ V S′ C °विभ्रमः; T °विभ्रमं (for °विभ्रमा). SA_1 gloss सन्तौ च तावूरू सदरू ताभ्यामाहितो विभ्रमो यया (for सदूर्वाहितविभ्रमा). —c) I_1 °लदिनं; $I_{2,7}$ V °लमूर्तिं; C S′ °लं तस्यै (for °लमिव). —d) $I_{2,7}$ C S′ V वरस्य; I_1 पुरस्य (for स्मरस्य).

21. b) $I_{1,2,4,7}$ V SA_1 (before corr.) निर्देशाद्वा (for निदेशाद्वा). —c) $I_{1,2,4,7}$ C T तस्यै (for तस्य).

22. c) $I_{1-3,7}$ C T P_{1-3} SA_1 (before corr.) मज्जानामपि; T I_4 अज्ञातामपि (for मज्जानमपि).

गृहीतहृदयस्तन्व्या तावतैव महीपतिः ।
स चिन्ताजिह्मनयनो राजधानीं शनैर्ययौ ॥ २४ ॥

तत्र तस्य तदाकारध्यानावहितचक्षुषः ।
सममन्तःपुरप्रीत्या प्रपेदे तानवं तनुः ॥ २५ ॥

अचिन्तयत्स धिक्कष्टं रूढोऽयमशुभावहः ।
अस्मिन्मे मानसोद्याने रागनामा विषद्रुमः ॥ २६ ॥

अहो नु सुभगा रागवृत्तिश्चित्तं विजित्य या ।
विवेकादीन्व्यधाद् दूरे सुहृदः परिपन्थकान् ॥ २७ ॥

भाव्यं कौलीनभीतेन येन भूमिभृता सता ।
तस्य मे दुस्सहः कोऽयं सदाचारविपर्ययः ॥ २८ ॥

यत्र दारापहरणं राजैव कुरुते विशाम् ।
परः को नाम तत्रास्तु शासिता नीत्यतिक्रमे ॥ २९ ॥

विमृष्यन्निति भूपालो विस्मर्तुमभवत्क्षमः ।
न पद्धतिं साधुसेव्यां न च तां दीर्घलोचनाम् ॥ ३० ॥

तमथ प्रथितास्वास्थ्यं नेदीयोमरणं वणिक् ।
स जनाज्ज्ञातवृत्तान्तः सुजनो विजनेऽब्रवीत् ॥ ३१ ॥

इमामवस्थां प्राप्तोऽसि किं धर्मेण निरुध्यसे ।
न प्राणसंशये जन्तोरकृत्यं नाम किंचन ॥ ३२ ॥

यन्मतानि प्रतीक्ष्यन्ते विबुधैर्धर्मसंशये ।
तेषामपीदृशे कृत्ये श्रूयते संयमव्ययः ॥ ३३ ॥

---

24. a) All Mss. except P_3 read तन्मा: (for तन्व्या).

27. a) $I_{1,2,4,7}$ V सुभगः (for सुभगा). —b) $I_{1,2,7}$ S′ V C T यः (for या).

29. d) $I_{1,2,4,7}$ V S′ C शमिना; T शमिता (for शासिता).

31. a) $I_{2,7}$ S′ C T V °तास्वस्थं (for °तास्वास्थ्यं). —d) $I_{1,2,7}$ V विजनो° (for विजने°).

यशोऽनुरोधादुचितं नापि देहमुपेक्षितुम् ।
स्वकीर्तिर्न परासूनां कीर्णा कर्णरसायना ॥ ३४ ॥

मा भून्मदनुरोधस्ते त्वत्प्रियार्थं हि पार्थिव ।
प्राणा अपि न मे गण्या इन्द्रियार्थेषु का कथा ॥ ३५ ॥

एवमुक्तोऽपि नादत्से तां चेत्तत्सा सुरास्पदात् ।
गृह्यतां नर्तकीभूता नृत्यज्ञत्वान्मयाऽर्पिता ॥ ३६ ॥

तेनेति प्रेर्यमाणः स वलिना च मनोभुवा ।
प्राग्लज्जामथ जग्राह कथंचित्तां सुलोचनाम् ॥ ३७ ॥

कृत्यैरुदात्तैः साऽपास्ततादृक्चारित्रलाघवा ।
नरेन्द्रमहिषी चक्रे श्रीनरेन्द्रेश्वरं हरम् ॥ ३८ ॥

क्रमेण च प्रजापुण्यैः चन्द्रापीडाभिधं सुतम् ।
प्रासोष्ट पार्थिववधूर्निधानमिव मेदिनी ॥ ३९ ॥

तस्याभिजनमालिन्यं स्वच्छैरच्छेदि तद्गुणैः ।
शाणाश्मकषणैः कार्ष्ण्यमाकरोत्थं मणेरिव ॥ ४० ॥

धूमाद् गाढमलीमसाच्छुचि पयः सूते घनस्योद्गमो
लोहस्यातिशितस्य जातिरचलात्कुण्ठाश्ममालामयात् ।
किं चात्यन्तजडाज्जलाद् द्युतिमतो ज्वालाध्वजस्योद्भवो
जन्मावन्यनुकारिणो न महतां सत्यं स्वभावाः क्वचित् ॥४१॥

---

34. a) P_2 SA_1 (before corr.) °दुदितं (for °दुचितं). —d) D (after suggestion) $I_{1-4,7}$ S′ V C SA_1 (before corr.) कीर्णक° (for कीर्णा क°).

36. a) $I_{1,2,4,7}$ S′ V C T °धत्से (for °दत्से). —b) SA_3 I_3 चेत्तदा (for चेत्तत्सा). —c) D (before suggestion) and all other Mss. read नर्तकीभूत्वा (for नर्तकीभूता).

40. c) $I_{1,2,7}$ S′ V C T SA_1 (before corr.) °ककणैः (for °कषणैः).

41. a) SA_1 (before corr.) धूमोद्गा° (धूमाद्गा°). —b) S′ C T °सितस्य (for °शितस्य). —c) I_7 ज्वालध्वजस्योद्भभो; P_3 ज्वालाध्वजस्योद्गमः; SA_1 (before corr.) °ध्वलस्योद्भवो (for ज्वालाध्वजस्योद्भवो). —d) $I_{1,2,7}$ V जन्मावश्य°; C T P_1 SR SG S′ जन्मावध्य° (for जन्मावन्य°). SA_3 gloss भूमि (for °अवनि).

तारापीडोऽपि तनयः क्रमात्तस्यामजायत ।
अविमुक्तापीडनामा मुक्तापीडोऽपि भूपतेः ॥ ४२ ॥

वज्रादित्योदयादित्यललितादित्यसंज्ञकाः ।
प्रतापादित्यजाः ख्याताश्चन्द्रापीडादयोऽपि ते ॥ ४३ ॥

वर्षान्पञ्चाशतं भुक्त्वा भुवं दुर्लभभूपतिः ।
पुण्यनिश्रेणिभिः पुण्यामारुरोह दिवं शनैः ॥ ४४ ॥

राजचूडामणिः श्रीमांश्चन्द्रापीडस्ततोऽभवत् ।
पीडितेन्दुत्विषा कीर्त्या कलेः पीडां चकार यः ॥ ४५ ॥

एकपादाकृतिर्धर्मः समस्येवोज्झितो नृपैः ।
शुद्धश्लोककृता येन पादैः संयोजितस्त्रिभिः ॥ ४६ ॥

यं क्षमाविक्रममुखाः परस्परविरोधिनः ।
सिषेविरे गुणास्तुल्यं दिव्योद्यानमिवर्तवः ॥ ४७ ॥

स्थाने स्थाने यदीया श्रीस्तुल्यमाप्याययन्त्यभूत् ।
द्रुमानुद्यानकुल्येव निखिलाननुजीविनः ॥ ४८ ॥

दोषांस्त्यक्त्वाऽन्यभूपेषु यं शुद्धा श्रीरशिश्रियत् ।
मार्गाद्रिष्वोघकालुष्यं क्षिप्त्वा सिन्धुरिवार्णवम् ॥ ४९ ॥

कार्यज्ञो यो न तच्चक्रे यत्फलेऽभूद्विविग्नधीः ।
परं समाचरन्स्तुत्यं स्तूयमानस्त्रपां दधे ॥ ५० ॥

व्यनीयत न योऽमात्यैर्विनयं तान्स्वशिक्षयत् ।
वज्रं न भिद्यते कैश्चिच्छिनत्त्यन्यान्मणींस्तु तत् ॥ ५१ ॥

---

48. c) $I_{1,2,4,7}$ C V S′ श्रमा° (for द्रुमा°).

50. a) $I_{2-4,7}$ V C T P_2 नतश्चक्रे (for न तच्चक्रे). —b) $I_{1,2,7}$ C V S′ यत्फली° (for यत्फले). P_1 विविग्न°; $I_{2,4}$ S′ विविग्र°; T विविज्ञ° (for विविग्न°). —c) $I_{1,7}$ S′ C SA_1 °चरत्स्तुत्यं (for °चरन्स्तुत्यं).

51. a) SA_1 $I_{1,2,7}$ V °मान्यैः (for °मात्यैः). —d) P_2 $I_{3,4}$ St °च्छिनत्त्य° (for °च्छिनत्त्य°).

यस्याधर्मभयादासीत्संत्याज्यो धर्मसंशये ।
निजोऽपि पक्षः कुलिशत्रासादिव गरुत्मतः ॥ ५२ ॥

न्याय्यं दर्शयता वर्त्म तेन राज्ञा प्रवर्तिताः ।
स्थितयो वीतमन्देहा भास्वतेव दिनक्रियाः ॥ ५३ ॥

नियन्त्रिता यद्भणितिस्तद्गुणोदीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नेयत्तावाप्तितः पुनः ॥ ५४ ॥

तस्य त्रिभुवनस्वामिप्रासादारम्भकर्मणि ।
चर्मकृत्कोऽपि न प्रादात्कुटीं क्षेत्रोपयोगिनीम् ॥ ५५ ॥

शश्वत्प्रतिश्रुतार्थानां नवकर्माधिकारिणाम् ।
नैसर्गिकाग्रहग्रस्तः सूत्रपातं न चक्षमे ॥ ५६ ॥

विज्ञापितोऽथ तैरेत्य तमर्थं पृथिवीपतिः ।
तानेव सागसो मेने चर्मकारं न तं पुनः ॥ ५७ ॥

सोऽभ्यधात्तान् धिगेतेषामप्रेक्षापूर्वकारिताम् ।
प्रागेव यैरपृष्ट्वा तं प्रविष्टं नवकर्मणि ॥ ५८ ॥

नियम्यतां विनिर्माणं यद्वाऽन्यत्र विधीयताम् ।
परभूम्यपहारेण सुकृतं कः कलङ्कयेत् ॥ ५९ ॥

ये द्रष्टारः सदसतां ते धर्मविगुणाः क्रियाः ।
वयमेव विदध्मश्चेद्यातु न्याय्येन कोऽध्वना ॥ ६० ॥

इत्युक्तवति भूपाले प्रेषितो मन्त्रिपर्षदा ।
पार्श्वात्पादूकृतस्तस्य दूतः प्राप्तो व्यजिज्ञपत् ॥ ६१ ॥

---

52. a) $I_{1,2,4,7}$ S′ V C T SA_1 (before corr.) यस्य ध° (for यस्याध°). —d) $I_{1,2,4,7}$ S′ V T SA_1 P_1 गरुत्मता; I_3 गरुमत्तां (for गरुत्मतः).

53. c) D C T $P_{1,3}$ S′ V वीतसन्देहा (for वीतमन्देहा). वीत– + मन्देह– (=मन्द– + ईहा–[चेष्टा–], पक्षे =[प्रकाशनिवारक–] राक्षसविशेष– [cf. SA_1 gloss; Rām IV. 32.33; VP II. 4.15]) >बस., श्लेषानुप्राणितोपमा.

56. c) P_2 C T S′ नैसर्गिकग्रह° (for नैसर्गिकाग्रह°). —d) St सूत्रा° (for सूत्र°).

60. d) $I_{1,2,4,7}$ C T P_{1-3} S′ V D (before suggestion) न्यायेन (for न्याय्येन). C P_2 S′ कोऽधुना (for कोऽध्वना).

इच्छति स्वामिनं द्रष्टुं स च ब्रूते न चेन्मम।
युक्तः प्रवेश आस्थाने बाह्याल्यवसरेऽस्तु तत् ॥ ६२ ॥

अन्येद्युरथ भूपेन स बहिर्दत्तदर्शनः।
पुण्यकर्मणि नो विघ्नः किं त्वमेवेत्यपृच्छयत ॥ ६३ ॥

प्रतिभाति गृहं तच्चेद्रम्यं तव ततोऽधिकम्।
तदर्थ्यतां धनं वाऽपि भूर्यैवं चाभ्यधीयत ॥ ६४ ॥

तूष्णीं स्थितं ततो भूपं चर्मकारो व्यजिज्ञपत्।
दन्तांशुसूत्रैस्तत्सत्त्वमानं ज्ञातुमिवोद्यतः ॥ ६५ ॥

राजन् विज्ञाप्यते किंचिद्यदस्माभिर्यथाशयम्।
न स्थेयमवलिप्तेन तत्र द्रष्ट्रा सता त्वया ॥ ६६ ॥

नाहमूनः शुनो नास्ति काकुत्स्थात् पार्थिवः पृथुः।
क्षुभ्यन्तीवाद्य तत्सभ्याः संलापेऽस्मिन्किमावयोः ॥ ६७ ॥

जातस्य जन्तोः संसारे भङ्गुरः कायकञ्चुकः।
अहंताममताख्याभ्यां शङ्कुभ्यामेव बध्यते ॥ ६८ ॥

कङ्कणाङ्गदहारादिशोभिनां भवतां यथा।
निष्किंचनानामस्माकं स्वदेहेऽहंक्रिया तथा ॥ ६९ ॥

देवस्य राजधान्येषा यादृशी सौधहासिनी।
कुटी घटमुखानद्धतमोरिस्तादृशी मम ॥ ७० ॥

आ जन्मनः साक्षिणीयं मातेव सुखदुःखयोः।
मठिका लोठ्यमानाऽद्य नेक्षितुं क्षम्यते मया ॥ ७१ ॥

नृणां यद्देशमहरणे दुःखमाख्यातुमीश्वरः।
तद्विमानच्युतोऽमर्त्यो राज्यभ्रष्टोऽथ पार्थिवः ॥ ७२ ॥

---

62. d) S′ C T बाह्याल्पा° (for बाह्याल्य°).
63. d) I_{1-3} C T V S′ °पृच्छत (for °पृच्छयत).
66. a) SA_3 विज्ञप्यसे (for विज्ञाप्यते). $I_{1,2,4,7}$ V S′ C T कश्चि° (for किञ्चि°). —b) SA_1 (before corr.) यथायथम् (for यथाशयम्).
67. a) I_3 SA_3 नासि (for नास्ति);
70. b) S′ C सौम्य° (for सौध°).

एवमप्येत्य मद्देश्म सा चेद्देवेन याच्यते ।
सदाचारानुरोधेन दातुं तदुचितं मम ॥ ७३ ॥

इति तेनोत्तरे दत्ते भूभृद्दत्त्वा तदास्पदम् ।
कुटीं जग्राह वित्तेन नाभिमानः शुभार्थिनाम् ॥ ७४ ॥

अवोचच्चर्मकारस्तं तत्र स व्यञ्जिताञ्जलिः ।
राजन् धर्मानुरोधेन परवत्ता तवोचिता ॥ ७५ ॥

श्वविग्रहेण धर्मेण पाण्डुसूनोः पुरा यथा ।
धार्मिकत्वं तथा तेऽद्य मयाऽस्पृश्येन वीक्षितम् ॥ ७६ ॥

स्वस्ति तुभ्यं चिरं स्थेया धर्म्या वृत्तान्तपद्धतीः ।
दर्शयन्नीदृशीः शुद्धाः श्रद्धेया धर्मचारिणाम् ॥ ७७ ॥

एवं निष्कलमषाचारः स चक्रे पावनीं भुवम् ।
राजा त्रिभुवनस्वामिकेशवस्य प्रतिष्ठया ॥ ७८ ॥

कृत्यैः प्रकाशदेव्याख्या प्रकाशाकाशकान्तिभिः ।
प्रकाशिकाविहारस्य तत्पत्नी कारयिन्त्र्यभूत् ॥ ७९ ॥

गुरुर् मिहिरदत्ताख्यः तस्योदात्तगुणोऽभवत् ।
विश्वंभरस्य गम्भीरस्वामिनाम्नो विधायकः ॥ ८० ॥

सर्वाधिकरणस्थैर्योच्छेत्ता छलितकाभिधः ।
नगराधिकृतस्तस्य छलितस्वामिनं व्यधात् ॥ ८१ ॥

कदाचन सभासीनं पृष्टा धर्माधिकारिभिः ।
प्रायोपविष्टा राजानं ब्राह्मणी काचिदब्रवीत् ॥ ८२ ॥

---

73. a) SA_3 °मुपेत्य (for °मप्येत्य). —b) $I_{1,2,4,7}$ S′ V C मां; P_{1-3} स (for सा). $I_{1,7}$ S′ SA_1 (before corr.) देव न (for °देवेन).

75. b) SA_3 ततः (for तत्र).

76. a) C T S′ अविग्रहेण (for श्वविग्रहेण). —b) P_3 यथा पुरा (for पुरा यथा).

80. c) T SA_3 gloss नारायणस्य (for विश्वंभरस्य). —cd) SA_2 gloss गम्भीरसङ्गम् (for गम्भीरस्वामि°).

81. a) T °करणा°; $P_{2,3}$ °कारिण° (for °करण°).

त्वयि प्रशासति महीमहो गर्हानिबर्हणे ।
सुखसुप्तस्य मे पत्युर्हृतं केनापि जीवितम् ॥ ८३ ॥

एषैव महती लज्जा सदाचारस्य भूपतेः ।
यदकालभवो मृत्युस्तस्य संस्पृशति प्रजाः ॥ ८४ ॥

कलिकालबलात्तच्चेत्त्वादृशैरपि दृश्यते ।
पापात्पापतरेऽमुष्मिन्दोषे कथमुदास्यते ॥ ८५ ॥

चिन्तयन्त्यपि नावैमि भर्तुः कंचिद्विरोधिनम् ।
निर्दोषस्य हि तस्याऽऽसन्सर्वतः शीतला दिशः ॥ ८६ ॥

अनसूयो निरुत्सेकः प्रियवाग्गुणवत्सलः ।
पूर्वाभिभाषी निर्लोभो न विद्वेष्यो हि कस्यचित् ॥ ८७ ॥

तस्य तुल्यवया बाल्यात्प्रभृत्यध्ययनेऽधमः ।
माक्षिकस्वामिवास्तव्यो विप्रः शङ्क्योऽभिचारवित् ॥ ८८ ॥

गुणदारिद्र्यनिर्निद्रैः क्षुद्रैः कौशलशालिनाम् ।
प्रसिद्धिस्पर्धया वन्ध्यैर्बाध्यन्तेऽसूययाऽसवः ॥ ८९ ॥

नापौंश्चलीयो दुःशीलो नाद्रोहो नित्यशङ्कितः ।
नावाचालो मृषाभाषी नाकायस्थः कृतघ्नधीः ॥ ९० ॥

नादातृगृहजो लुब्धो नानीर्ष्यो नित्यदुःखितः ।
नास्त्रीजितः सर्वहास्यो नावृद्धः स्निग्धभाषितः ॥ ९१ ॥

नानन्यजः पितृद्वेषी नारागी निरपत्रपः ।
नाक्षुद्रविद्यः पापीयानिति भूतार्थसंग्रहः ॥ ९२ ॥

---

83. c) SA_1 *varia lectio* मत्पत्युः (for मे पत्युः).
84. c) $P_{1,2}$ I_7 यदाका° (for यदका°).
85. a) SA_3 gloss अकालमरणं (for तत्).
87. a) T अनहंकारः; SA_3 gloss निरहंकारः (for निरुत्सेकः). —d) $I_{1,2,4,7}$ S C T विद्वेषो (for विद्वेष्यो).
89. c) SA_3 gloss रहितैः (for वन्ध्यैः).
90. a) D St P_{1-3} I_3 नापुंश्चलेयो; St Tr. suggests नापुंश्चलीयो and D नापौंश्चलेयो (for suggested नापौंश्चलीयो).
92. a) $I_{1,7}$ C °दोषी (for °द्वेषी). —c) $I_{1,2,4,7}$ V °विद्याः (for °विद्यः). After this *v.* तिलकम् .

इत्युक्तवत्यां ब्राह्मण्यां तच्छङ्कावसतिं द्विजम् ।
आनीय परिशुध्यस्वेत्यभ्यधाद्वसुधाधिपः ॥ ९३ ॥

भूयो ब्राह्मण्यवादीत्तं ख्यातः खार्खोदविद्यया ।
निस्संभ्रमः स्तम्भयितुं देव दिव्यक्रियामयम् ॥ ९४ ॥

म्लायद्वक्त्र इवावादीत्ततस्तां मेदिनीपतिः ।
अदृष्टदोषे किं कुर्मो वयमत्राधिकारिणः ॥ ९५ ॥

नान्यस्मिन्नपि दण्डस्य प्रसङ्गोऽनिश्चितागसि ।
किं पुनर्ब्राह्मणो दण्ड्यो यो दोषेऽपि वधं विना ॥ ९६ ॥

उक्त्वेति विरते तस्मिन् द्विजजायाऽब्रवीत्पुनः ।
चतस्रः क्षणदाः क्षीणा राजन्नपि न शस्यते ॥ ९७ ॥

नान्वगां परिणेतारं हन्तुः प्रतिचिकीर्षया ।
तत्राविहितदण्डेऽस्मिंस्त्यजाम्यनशनैरसून् ॥ ९८ ॥

तथा स्थितायां ब्राह्मण्यां कृतप्रायोपवेशनः ।
स्वयं त्रिभुवनस्वामिपादानुद्दिश्य सोऽभवत् ॥ ९९ ॥

त्रिरात्रोपोषितं तत्र राजानं रजनीक्षये ।
स्वप्नेऽस्वप्नोत्तमोऽवोचत्सत्योक्तिं सत्यवाहनः ॥१००॥

ईदृङ्न युज्यते राजन् सत्यस्यान्वेषणं कलौ ।
निशीथे कस्य सामर्थ्यं कर्तुं दिवि विकर्तनम् ॥१०१॥

भवच्छक्त्यनुरोधेन सकृदेतत्प्रवर्त्यते ।
मत्प्रासादाङ्गनेऽमुष्मिन् शालिचूर्णं विकीर्यताम् ॥१०२॥

---

94. b) C T I_7 ख्यातोद°; I_2 V खातोद° (for खार्खोद°).
95. b) SA_1 (before corr.) $I_{1,2,4,7}$ S′ C P_1 °स्तं (for °स्तां).
96. a) SA_3 gloss शूद्रादौ (for अन्यस्मिन्). —c) D suggests ब्राह्मणे (for ब्राह्मणो).
97. d) St SA_3 P_3 I_3 राजन्ननशनस्य मे (for राजन्नपि न शस्यते).
100. d) SA_3 gloss नारायणः and सत्यस्तु गरुडे ध्रुवे (for सत्यवाहनः).
101. c) SA_1 (before corr.) निषीथे (for निशीथे). —d) SA_3 gloss सूर्ये (for विकर्तनम्).
102. a) SA_3 भवद्भ° (for भवच्छ°).

प्रदक्षिणं कुर्वतोऽस्य त्रिरत्र यदि दृश्यते ।
ब्रह्महत्यापादमुद्रा पादमुद्रानुयायिनी ॥१०३॥

तदैष वधको भूत्वा सदृशं दण्डमर्हति ।
रात्रावेष विधिः कार्यो दिने पापहृदर्यमा ॥१०४॥

अथ तत्कारयित्वा स दृष्टदोषे द्विजन्मनि ।
दण्डं दण्डधरश्चक्रे द्विजत्वाद्वधवर्जितम् ॥१०५॥

महीमघोना भर्तृघ्ने तस्मिन् विहितशासने ।
ततो द्विजन्मजाया सा कृताशीरभ्यधादिदम् ॥१०६॥

इयत्यवनिभृत्सर्गे गूढपापानुशासनम् ।
कार्तवीर्यस्य वा दृष्टं तव वा पृथिवीपते ॥१०७॥

दण्डधारे त्वयि क्ष्माप क्षितिमेतां प्रशासति ।
को वैरस्नेहयोः पारमनासाद्यावसीदति ॥१०८॥

इत्थं कृतयुगध्येयैर्धर्म्यवृत्तान्तवस्तुभिः ।
स्वल्पोऽपि राज्यकालोऽस्य पर्याप्तैः पर्यपूर्यत ॥१०९॥

स्रष्टुर्विष्टरपाथोजसंसर्गेण निरर्गलः ।
निबिडं जडिमा जाने व्यधत्त धियि संनिधिम् ॥११०॥

विभक्तवर्णशोभस्य तस्यासावन्यथा कथम् ।
माहेन्द्रस्येव धनुषो विदधे दृष्टनष्टताम् ॥१११॥

कारयित्वाऽभिचारं तं निग्रहोग्ररुषं द्विजम् ।
तं यशश्शेषतामीशं तारापीडोऽनुजोऽनयत् ॥११२॥

दुष्कर्मदुर्भगान् भोगान्भोक्तुं पापा गुणोन्नतम् ।
मृद्नन्ति कण्टकान्प्राप्तुं करभा इव केतकम् ॥११३॥

---

103. d) SA_3 gloss द्विजसंबन्धि (for पादमुद्रा).
104. a) P_{1-3} $I_{1-3,7}$ V D St तदेष (for तदैष).
111. a) $I_{1,2,4,7}$ V विविक्त° (for विभक्त°). —d) SA_3 gloss आदौ दृष्टः पश्चान्नष्टः (for दृष्टनष्टताम्).
113. ab) $I_{1,2,4,7}$ S′ V भोक्तुं भोगान् (for भोगान्भोक्तुं). —c) T P_2 S′ प्राप्तं (for प्राप्तुं).

ततः प्रभृति भूपानां राज्येच्छूनां गुरून् प्रति ।
दुष्टाः प्रवृत्ता राज्येऽस्मिन्नभिचारादिकाः क्रियाः ॥ ११४ ॥

श्रीचन्द्रापीडदेवस्य तत्क्षमित्वमपश्चिमम् ।
संस्मर्यमाणं कुरुते न कस्योत्पुलकं वपुः ॥ ११५ ॥

मुमूर्षुर्यत्स लब्ध्वाऽपि तं कृत्याधायिनं द्विजम् ।
वराकेऽन्यप्रयुक्तेऽस्मिन्को दोष इति नावधीत् ॥ ११६ ॥

विस्मृतः स कृतक्ष्माभृत्पङ्क्तिमध्येऽद्य वेधसा ।
दत्त्वा काकपदं नूनं न्यस्तः कलिनृपावलौ ॥ ११७ ॥

अष्टौ वर्षान् साष्टमासाननुगृह्येति मेदिनीम् ।
प्रविवेश वशी स्वर्गमनिशं च सतां मनः ॥ ११८ ॥

भ्रातृद्रोहास्रसुहृदा प्रतापेन भयावहः ।
उवाह तारापीडः स चण्डः क्ष्मामण्डलीं ततः ॥ ११९ ॥

पूर्णपात्रप्रतिभटं द्विषां लुण्टयता यशः ।
शिशोः प्रतापस्योत्पत्तौ कबन्धा येन नर्तिताः ॥ १२० ॥

तस्यातिदुष्टचेष्टस्य लक्ष्मीर्दीप्ताऽपि सर्वतः ।
अभूदुद्वेगजननी श्मशानाग्नेरिव द्युतिः ॥ १२१ ॥

मन्त्रैः प्रभावसांनिध्यं देवानां क्रियते द्विजैः ।
मत्वेति देवद्वेषी स द्विजानां दण्डमत्यजत् ॥ १२२ ॥

---

116. b) D C T P_1 I_3 S′ कृत्याध्यायि° (for कृत्याधायि°).
117. c) SA_3 gloss कावछेदो इति भाषया लिपिर्यथा; $I_{1,2,7}$ C T V S′ कार्यपदं (for काकपदं). $I_{1,2,4,7}$ V S′ P_1 न्यूने (for नूनं).
118. cd) P_3 स्वर्गं विषादं; SA_3 स्वर्गं विषदं (⌊ *विषादं⌋ for स्वर्गमनिशं). P_3 स च तां (for च सतां).
119. a) T °हास्रसुहृदा; SA_3 °हासुसुहृदा (for °हास्रसुहृदा). —c) $I_{1,4}$ SA_1 (before corr.) उवाच; $I_{2,7}$ V उवास (for उवाह). —d) $I_{1,2,4,7}$ S′ V T St SA_1 °मण्डलं (for °मण्डलीं).
121. a) $I_{1,2,4,7}$ V °देष्टस्य; C T S′ °दिष्टस्य (for °चेष्टस्य).
122. d) SA_3 gloss अक्षिपदित्यर्थः (for °मत्यजत्).

मासं षड्भिर्दिनैरूनं चतस्रश्च समा भुवि ।
स प्राभवद् गुरुद्रोहप्ररोहत्सुकृतात्ययः ॥ १२३ ॥

अथ गूढाभिचारेण विहितायुःक्षयो द्विजैः ।
स भ्रातुः सदृशीं शान्तिं प्रपेदे न पुनर्गतिम् ॥ १२४ ॥

योऽयं परापकरणाय सृजत्युपायं
तेनैव तस्य नियमेन भवेद्विनाशः ।
धूमं प्रसौति नयनान्ध्यकरं यमग्नि-
र्भूत्वाऽम्बुदः स शमयेत्सलिलैस्तमेव ॥ १२५ ॥

राजा श्रीललितादित्यः सार्वभौमस्ततोऽभवत् ।
प्रादेशिकेश्वरस्त्रष्टुर्विधेर्बुद्धेरगोचरः ॥ १२६ ॥

प्रतापांशुच्छटाकूटैः पटवाससधर्मभिः ।
जम्बुद्वीपद्विपेन्द्रस्य येनातन्यत मण्डनम् ॥ १२७ ॥

नयाञ्जलिषु बद्धेषु राजभिर्विजयोद्यमे ।
पार्थिवः पृथुविक्रान्तिर्युधि क्रोधं मुमोच यः ॥ १२८ ॥

विनिस्सरज्जनतया भयाद्गर्भानिवामुचन् ।
द्विषां वसतयो यस्य निशम्यास्कन्ददुन्दुभिम् ॥ १२९ ॥

विलोलतिलकान्तैर्यः सनेत्राम्भोभिराननैः ।
निवापाञ्जलिदानानि द्विषां नारीरकारयत् ॥ १३० ॥

क्षितिं प्रदक्षिणयतो रवेरिव महीपतेः ।
जिगीषोः प्रायशस्तस्य यात्रास्वेव वयो ययौ ॥ १३१ ॥

---

123. a) $I_{1,2,4,7}$ V SA_1 (before corr.) मासैः (for मासं).
124. a) $I_{1,2,4,7}$ V om. *v.* after अथ गूढा; SA_1 om. from अथ गूढा upto नयनान्ध्यकरं यम in *v.* 125 *c*.
125. c) $I_{1,2,4,7}$ S′ V T च यो° (for यम°).
126. c) D P_{1-3} V प्रादेशक° (for प्रादेशिक°).
129. I_4 om.
130. I_4 om. *ab*. —d) SA_1 (before corr.) $I_{1,2,4,7}$ V °कारयन् (for °कारयत्).

करं पूर्वदिशो गृह्णन्प्रतापानलसंनिधौ ।
अन्तर्वेद्यां महाराजः स कीर्त्युष्णीषभृद्बभौ ॥ १३२ ॥

कन्यानां यत्र कुब्जत्वं व्यधाद् गाधिपुरे मरुत् ।
तत्रैव शंसनीयः स पुंसां चक्रे भयस्पृशाम् ॥ १३३ ॥

यशोवर्माद्रिवाहिन्याः क्षणात्कुर्वन्विशोषणम् ।
नृपतिर् ललितादित्यः प्रतापादित्यतां ययौ ॥ १३४ ॥

मतिमान् कन्यकुब्जेन्द्रः प्रत्यभात्कृत्यवेदिनाम् ।
दीप्तं यत् ललितादित्यं पृष्ठं दत्त्वा न्यषेवत ॥ १३५ ॥

तत्सहायास्ततोऽप्यासन्निकाममभिमानिनः ।
कुसुमाकरतोऽप्युच्चैः सुरभिश्चन्दनानिलः ॥ १३६ ॥

श्रीयशोवर्मणः संधौ सांधिविग्रहिको न यत् ।
नयं नियमनालेखे मित्रशर्माऽस्य चक्षमे ॥ १३७ ॥

सोऽभूत्संधिर् यशोवर्मललितादित्ययोरिति ।
लिखितेनादिनिर्देशादनर्हत्वं विदन्प्रभोः ॥ १३८ ॥

सुदीर्घविग्रहाशान्तैः सेनानीभिरसूयिताम् ।
औचित्यापेक्षितां तस्य क्षितिभृद्ब्रह्ममन्यत ॥ १३९ ॥

प्रीतः पञ्चमहाशब्दभाजनं तं व्यधत्त सः ।
यशोवर्मनृपं तं च समूलमुदपाटयत् ॥ १४० ॥

---

132. c) SA_3 gloss प्रयागदेशे गङ्गायमुनयोरन्तरालभूमिरन्तर्वेदी (for अन्तर्वेद्यां). —d) C T S′ St स्व° (for स).
133. b) $I_{1,2,4,7}$ V °पुरो (for °पुरे). —d) $I_{1,2,4,7}$ S′ V C पुमांश्चक्रे (for पुंसां चक्रे).
134. d) D I_3 SA_3 प्रलयादि° (for प्रतापादि°).
135. a) P_3 C T S′ कान्य° (for कन्य°).
137. b) T °कोऽभवत् (for °को न यत्).
138. d) $I_{1,2,4,7}$ V °र्थत्वं; S′ °र्धत्वं; C T °र्धत्वं (for °र्हत्वं). After this *v.* युगलकम् .
139. a) D suggests °विग्रहश्रान्तैः (for °विग्रहाशान्तैः). —b) $I_{1,2,4,7}$ V SA_1 (before corr.) °तम् (for °ताम्). —c) D St $P_{1-3}I_{3,4}$ SA SG SR °पेक्षतां (for °पेक्षितां).
140. c) D St P_{1-3} I_3 तु (for च).

अष्टादशानामुपरि प्राक्सिद्धानां तदुद्भवैः ।
कर्मस्थानैः स्थितिः प्राप्ता ततः प्रभृति पञ्चभिः ॥ १४१ ॥

महाप्रतीहारपीडा स महासंधिविग्रहः ।
महाश्वशालाऽपि महाभाण्डागारश्च पञ्चमः ॥ १४२ ॥

महासाधनभागश्चेत्येता यैरभिधाः श्रिताः ।
शाहिमुख्या येष्वभवन्नध्यक्षाः पृथिवीभुजः ॥ १४३ ॥

कविर् वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥ १४४ ॥

किमन्यत् कन्यकुब्जोर्वी यमुनापारतोऽस्य सा ।
अभूदाकालिकातीरं गृहप्राङ्गनवद्वशे ॥ १४५ ॥

यशोवर्माणमुल्लङ्घ्य हिमाद्रिमिव जाह्नवी ।
सुखेन प्राविशत्तस्य वाहिनी पूर्वसागरम् ॥ १४६ ॥

पश्यद्भिर्जन्मवसुधां सेर्ष्याधोरणभर्त्सितैः ।
तन्मातङ्गैः कलिङ्गेभ्यः कथंचित्प्रस्थितं पथि ॥ १४७ ॥

आकृष्टलक्ष्मीपर्यङ्कदन्तिसख्यादिवागताः ।
अशिश्रियंस्तं निश्शेषा दन्तिनो गौडमण्डलात् ॥ १४८ ॥

कटकेभघटाहस्तकृतवीचिकचग्रहः ।
अदृश्यताग्रगैस्तस्य गृहीतः पूर्ववारिधिः ॥ १४९ ॥

वनराजिश्यामलेन दिशं वैवस्वताङ्किताम् ।
स प्रतस्थेऽब्धितीरेण तत्कृपाणेन तु द्विषः ॥ १५० ॥

तस्योर्ध्वजूटाः कर्णाटाः कृतप्रणतयोऽनयन् ।
सुवर्णकेतकीस्त्यक्त्वा प्रतापमवतंसताम् ॥ १५१ ॥

---

142. a) St suggests °पीठं (for °पीडा) cf. IV. 485.
145. a) SA_1 (before corr.) $I_{1-4,7}$ S′ V C T कान्य° (for कन्य°). —c) D P_{1-3} $I_{1,2,4,7}$ V SA_1 (before corr.) °दशालिका° (after corr.) °दाशालिका° (for °दाकालिका°).
148. a) $I_{2,7}$ S′ V P_1 C °पर्यङ्का° (for °पर्यङ्क°). —c) $I_{1,2,4,7}$ V S′ C T St अशिश्रयन् (for अशिश्रियन्).
150. b) D P_3 वैवस्विता° (for वैवस्वता°).
151. a) $I_{1,2,7}$ V °टः कर्णाटः (for °टाः कर्णाटाः).

तस्मिन्प्रसङ्गे रट्टाख्या कर्णाटी चटुलेक्षणा ।
अपासीत् नृपतिर्भूत्वा पृथुश्रीर्दक्षिणापथम् ॥ १५२ ॥

विन्ध्याद्रिमार्गाः पर्याता निष्पर्यन्तप्रभावया ।
दुर्गयेव तया देव्या कृता निहतकण्टकाः ॥ १५३ ॥

ललितादित्यपादाब्जनखदर्पणमण्डले ।
स्वमूर्तिं वीक्ष्य संक्रान्तां प्रणता साऽपि पिप्रिये ॥ १५४ ॥

तालीतरुतलाचान्तनालिकेररसोर्मयः ।
कावेरीतीरपवनैः तद्योधाः क्लममत्यजन् ॥ १५५ ॥

चन्दनाद्रेः तदास्कन्दत्रासभ्रश्यदहिच्छलात् ।
श्रीखण्डद्रुमदोःषण्डान्मण्डलाग्रा इवापतन् ॥ १५६ ॥

उत्तराश्मस्विव पदं क्षिप्त्वा द्वीपेष्वविघ्नतः ।
स कुल्याया इवाम्भोधेः क्षिप्रं चक्रे गतागतम् ॥ १५७ ॥

ततोऽब्धिवीचिनिर्घोषैरुद्गीतजयमङ्गलः ।
प्रतस्थे पश्चिमामाशां जिगीषूणामपश्चिमः ॥ १५८ ॥

आक्रम्य क्रमुकश्यामान् कोङ्कणान् सप्त तापयन् ।
तुरगानिव तिग्मांशोः प्रतापस्तस्य पप्रथे ॥ १५९ ॥

पश्चिमाब्धेर्मरुद्व्यस्तवीचेराविर्भवन्त्यभूत् ।
द्वारका तस्य सैन्यानां प्रवेशौत्सुक्यदायिनी ॥ १६० ॥

विन्ध्याद्रिस् तद्बलक्षुण्णधातुरेण्वावृताम्बरः ।
प्रत्यभात् त्यक्तमर्यादः कोपताम्र इवोन्नमन् ॥ १६१ ॥

---

152. d) SA_1 (before corr.) पृथुश्रीद° (for पृथुश्रीर्द°).

155. b) $I_{1,2,4,7}$ S′ V C T नारिकेल°; St नारिकेर° (for नालिकेर°). SA_3 St °सुरोमयः; I_3, °सुरोदयः (for °रसोर्मयः).

159. a) $I_{1,2,4,7}$ V S′ St C T SA_1 क्रमुकान्सप्त° (for क्रमुकश्यामान्). —b) St P_1 $I_{1-4,7}$ V कौङ्क° (for कोङ्क°). —c) $I_{1,2,4}$ V S′ T SA_1 तिग्मांशुः (for तिग्मांशोः).

161. b) $I_{1,2,4,7}$ V S′ SA_1 (before corr.) T °रेणुवृता°; P_2 रेण्ववृता° (for °रेण्वावृता°).

विशतां दशनश्रेण्यस्तस्यावन्तिषु दन्तिनाम् ।
महाकालकिरीटेन्दुज्योत्स्नया खण्डिताः परम् ॥ १६२ ॥

सर्वतोदिक्कमालोक्य जितप्रायांस्ततो नृपान् ।
स प्राविशत् सुविस्तीर्णमपथेनोत्तरापथम् ॥ १६३ ॥

राजभिस्तस्य तत्रोग्रैः संग्रामोऽभूत्पदे पदे ।
कुलाद्रिभिरिवेन्द्रस्य पक्षच्छेदोद्यमस्पृशः ॥ १६४ ॥

काम्बोजानां वाजिशाला जायन्ते स्म हयोज्झिताः ।
ध्वान्तच्छलात्तद्विरुद्धैर्निरुद्धा महिषैरिव ॥ १६५ ॥

तुःखाराः शिखरश्रेणीर्यान्तः संत्यज्य वाजिनः ।
कुण्ठभावं तदुत्कण्ठां निन्युर्दृष्ट्वा हयाननान् ॥ १६६ ॥

त्रीन्वारान्समरे जित्वा जितं मेने स मुम्मुनिम् ।
सकृज्जयमरेर्वीरा मन्यन्ते हि घुणाक्षरम् ॥ १६७ ॥

चिन्ता न दृष्टा भौट्टानां वक्त्रे प्रकृतिपाण्डुरे ।
वनौकसामिव क्रोधः स्वभावकपिले मुखे ॥ १६८ ॥

तस्य प्रतापो दरदां न सेहेऽनारतं मधु ।
दरीणामोषधिज्योतिः प्रत्यूषेऽर्क इवोदितः ॥ १६९ ॥

कस्तूरीमृगसंस्पर्शी धूतकुङ्कुमकेसरः ।
सैन्यसीमन्तिनीस्तस्य संचस्कारोत्तरानिलः ॥ १७० ॥

---

163. a) C T S′ °दिश° (for °दिक्क°).

166. a) $I_{3,4,7}$ P_3 SA_3 SG SR मुख्खाराः; D C T P_1 भुःखाराः; SA_1 तुःखाराः (for तुःखाराः). —c) $I_{1,2,7}$ V SA_1 (before corr.) कुण्ठभावां (for कुण्ठभावं). —d) SA_1 P_3 $I_{1,3,7}$ V S′ हयाननाम् (for हयाननान्).

167. b) I_1 मुन्नतिम् ; I_4 मुस्तुनिं; I_7 V मुस्मुनिम् ; C T $P_{1,2}$ S′ SG SR दुस्सनिम् ; P_3 सुःमुनिम् ; SA_4 gloss सुमेन् खान् (for मुम्मुनिम्) cf. III. 332; IV. 516; VIII. 2179.

168. a) I_3 भट्टानां; I_4 भोदानां; P_1 भौट्ठानां; SA_1 (after corr.) भोट्टानां (for भौट्टानां). —c) SA_3 gloss वानराणाम् (for वनौकसाम्). $I_{1,2,4,7}$ S′ V C T क्रोधाः (for क्रोधः).

169. d) $I_{1,2,4,7}$ V °त्यूषः क; C T S′ °त्यूषोर्क; St P_{1-3} I_3 °त्यूषार्क (for °त्यूषेऽर्क).

शून्ये प्राग्ज्योतिषपुरे निर्जिहानं ददर्श सः ।
धूपधूमं वनप्लुष्टात्कालागुरुवनात्परम् ॥ १७१ ॥

मरीचिकावितीर्णार्णोविभ्रमे वालुकाम्बुधौ ।
तद्गजेन्द्रा महाग्राहसमूहसमतां ययुः ॥ १७२ ॥

तद्योधान्विगलद्धैर्यान् स्त्रीराज्ये स्त्रीजनोऽकरोत् ।
तुङ्गौ स्तनौ पुरस्कृत्य न तु कुम्भौ कवाटिनाम् ॥ १७३ ॥

स्त्रीराज्यदेव्यास्तस्याग्रे वीक्ष्य कम्पादिविक्रियाम् ।
संत्रासमभिलाषं वा निश्चिकाय न कश्चन ॥ १७४ ॥

उत्तराः कुरवोऽविक्षंस्तद्भयाज्जन्मपादपान् ।
उरगान्तकसंत्रासाद् बिलानीव महोरगाः ॥ १७५ ॥

जयार्जितधनः सोऽथ प्रविवेश स्वमण्डलम् ।
भिन्नेभमौक्तिकापूर्णपाणिः सिंह इवाचलम् ॥ १७६ ॥

जालंधरं लोहरं च मण्डलानीतराणि च ।
प्रसादीकृत्य विदधे राजत्वं सोऽनुजीविनाम् ॥ १७७ ॥

पराजयव्यञ्जनार्थं नानालिङ्गानि पार्थिवाः ।
उग्रेण ग्राहितास्तेन वहन्त्यद्यापि निर्मदाः ॥ १७८ ॥

बन्धमुद्राभिधानाय पश्चाद्बाहू तदाज्ञया ।
तुरुष्का दधते व्यक्तं मूर्धानं चार्धमुण्डितम् ॥ १७९ ॥

क्षितिभृद् दाक्षिणात्यानां तिर्यक्त्वज्ञापनाय सः ।
पुच्छं महीतलस्पर्शि चक्रे कौपीनवाससि ॥ १८० ॥

न तत्पुरं न स ग्रामो न सा सिन्धुर्न सोऽर्णवः ।
न स द्वीपोऽस्ति यत्रासौ प्रतिष्ठां न विनिर्ममे ॥ १८१ ॥

---

171. c) D suggests बलप्लुष्ट° (for वनप्लुष्टा°).
172. b) P_3 °कार्णवे (for °काम्बुधौ).
173. d) T कराटिनाम् (for कवाटिनाम्).

78 19/11

क्वचिच्चेष्टासमुचितं क्वचिच्च समयानुगम् ।
बाहुल्येन प्रतिष्ठानां स मानी नाम संदधे ॥ १८२ ॥

सुनिश्चितपुरं चक्रे दिग्जये कृतनिश्चयः ।
सगर्वो दर्पितपुरं कृतवाक् कृतकेशवम् ॥ १८३ ॥

फलं गृह्णन् फलपुरं पर्णोत्सं पर्णमाददत् ।
क्रीडारामविहारं च क्रीडन् राजा विनिर्ममे ॥ १८४ ॥

एकमूर्ध्वं नयद्रत्नमधः कर्षत्तथापरम् ।
बद्ध्वा व्यधान्निरालम्बं स्त्रीराज्ये नृहरिं च सः ॥ १८५ ॥

दिगन्तरस्थे भूपाले तस्मिंस्तत्कर्मकृत्किल ।
पुरं विधाय तन्नाम्ना तत्कोपफलमन्वभूत् ॥ १८६ ॥

ललिताख्ये पुरे तस्मिन्नादित्याय स भूपतिः ।
सग्रामां कन्यकुब्जोर्वीमभिमानोर्जितो ददौ ॥ १८७ ॥

तेन हुष्कपुरे श्रीमान् मुक्तस्वामी व्यधीयत ।
बृहद्विहारो भूपेन सस्तूपश्च महात्मना ॥ १८८ ॥

एकां कोटिं गृहीत्वा स दिग्जयाय विनिर्गतः ।
भूतेशाय ददौ शुद्ध्यै कोटीरेकादशाऽऽगतः ॥ १८९ ॥

स तत्र ज्येष्ठरुद्रस्य शिलाप्रासादयोजनम् ।
भूमिग्रामप्रदानं च विदधे वसुधाधिपः ॥ १९० ॥

---

182. d) $I_{1,2,4,7}$ V SA_1 (before corr.) मुनी (for मानी).
183. c) I_3 SA_3 सदर्पो (for सगर्वो). —d) P_3 SA_3 I_3 कृतधीः कृ°; St $I_{1,2,4,7}$ S′ V P_2 C T कृतवान्कृ° (for कृतवाक् कृ°).
184. S′ om. 184*b*—185*b*. —c) P_3 SA_3 क्रीडाराज° (for क्रीडाराम°).
185. c) $I_{1,2,4,7}$ V S′ C T $P_{1,2}$ SA_1 (before corr.) बुद्ध्वा (for बद्ध्वा).
186. b) SA_4 gloss पुरनिर्माणाधिकारी (for कर्मकृत्). —d) $I_{1,2}$ V तत्तत्फलप्रदमभूत्; I_7 तत्तत्फलदमन्वभूत् (for तत्कोपफलमन्वभूत्).
187. a) SA_2 gloss लितपुर् (for ललिताख्ये पुरे).
190. I_7 om. *vv.* 190—216 *b*. —c) $I_{1,2,4}$ V SA_1 (before corr.) भूमिग्रामे (for भूमिग्राम°).

चक्रे चक्रधरे तेन वितस्ताम्भःप्रतारणम् ।
विनिर्मायारघट्टालीस्तांस्तान्ग्रामान्प्रयच्छता ॥ १९१ ॥

सोऽखण्डिताश्मप्राकारं प्रासादान्तर्व्यधत्त च ।
मार्ताण्डस्याद्भुतं दाता द्राक्षास्फीतं च पत्तनम् ॥ १९२ ॥

लोकपुण्ये पुरं कृत्वा नानोपकरणावलीम् ।
प्रतिपादितवाञ्जिष्णुर्ग्रामैः साकं स विष्णवे ॥ १९३ ॥

ततः परं परीहासशीलो भूलोकवासवः ।
विहसद्वासवावासं परिहासपुरं व्यधात् ॥ १९४ ॥

विरेजे राजतो देवः श्रीपरीहासकेशवः ।
लिप्तो रत्नाकरस्वापे मुक्ताज्योतिर्भरैरिव ॥ १९५ ॥

नाभीनलिनकिञ्जल्कपुञ्जेनेवानुरञ्जितः ।
अचकात्काञ्चनमयः श्रीमुक्ताकेशवो हरिः ॥ १९६ ॥

महावराहः शुशुभे काञ्चनं कवचं दधत् ।
पाताले तिमिरं हन्तुं वहन्निव रविप्रभाः ॥ १९७ ॥

गोवर्धनधरो देवो राजतस्तेन कारितः ।
यो गोकुलपयःपूरैरिव पाण्डुरतां दधे ॥ १९८ ॥

चतुष्पञ्चाशतं हस्तान् रोपयित्वा महाशिलाम् ।
ध्वजाग्रे दितिजारातेस्तार्क्ष्यस्तेन निवेशितः ॥ १९९ ॥

---

191. a) D I_{1-4} P_{1-3} V SA_1 चक्रधरः (चक्रधरे).
192. c) C T S′ St मार्त्तण्ड° (for मार्ताण्ड°).
193. a) $I_{1,2,4}$ V SA_1 (before corr.) पुरे (for पुरं). —cd) $I_{1,2}$ V S′ SA_1 जिष्णुग्रामैः (for जिष्णुर्ग्रामैः).
194. a) $I_{1,2,4}$ V SA_1 (before corr.) पारं (for परं).
196. c) P_2 SA_3 अकचत् with gloss कच दीप्तिबन्धनयोः (for अचकात्).
197. c) I_4 SA_1 (before corr.) हर्तुं (for हन्तुं). —d) St SG *Sec. m.* रविः प्रभाः (for रविप्रभाः).
199. b) C P_3 S′ SA_1 (before corr.) °द्रोप° (for °त्रोप°).

चक्रे बृहच्चतुश्शालाबृहच्चैत्यबृहज्जिनैः ।
राजा राजविहारं स विरजाः सततोर्जितम् ॥ २०० ॥

तोलकानां सहस्राणि चतुर्भिरधिकानि सः ।
अशीतिं निदधे हेम्नो मुक्ताकेशवविग्रहे ॥ २०१ ॥

तावन्त्येव सहस्राणि पलानां रजतस्य च ।
संधाय शुद्धधीश्चक्रे श्रीपरीहासकेशवम् ॥ २०२ ॥

रीतिप्रस्थसहस्रैस्तु तेन तावद्भिरेव सः ।
व्योमव्यापिवपुः श्रीमान् बृहद्बुद्धो व्यधीयत ॥ २०३ ॥

चतुश्शालां च चैत्यं च तावता तावता व्यधात् ।
धनेनैवेति तस्यासन्पञ्च निर्मितयः समाः ॥ २०४ ॥

राजतान् क्वापि सौवर्णान् क्वापि देवान् विनिर्ममे ।
पार्श्वेषु मुख्यदेवानां पार्षदो धनदोपमः ॥ २०५ ॥

कियन्ति तत्र रत्नानि ग्रामान्परिकरं तथा ।
स प्रादादिति कः शक्तः परिच्छेत्तुमियत्तया ॥ २०६ ॥

अवरोधैरमात्यैश्च सेवकैश्च नरेश्वरैः ।
तत्र प्रतिष्ठाः शतशो विहिता भुवनाद्भुताः ॥ २०७ ॥

राज्ञी कमलवत्यस्य कमलाहट्टकारिणी ।
राजतं विपुलाकारं कमलाकेशवं व्यधात् ॥ २०८ ॥

अमात्यो मित्रशर्माऽपि चक्रे मित्रेश्वरं हरम् ।
श्रीकय्यस्वामिनं चक्रे लाटः कय्याभिधो नृपः ॥ २०९ ॥

---

201. a) $I_{1,2,4}$ V SA_1 om. from सहस्राणि to सहस्राणि in 202 *a*.
205. d) D C T $P_{2,3}$ I_3 S′ SA_3 पार्थिवो (for पार्षदो).
206. b) St SA_3 $P_{2,3}$ °करांस्तथा (for °करं तथा).
208. a) SA_3 °देव्यस्य (for °वत्यस्य).

श्रीमान् कय्यविहारोऽपि तेनैव विदधेऽद्भुतः ।
भिक्षुः सर्वज्ञमित्रोऽभूत् क्रमाद्यत्र जिनोपमः ॥ २१० ॥

तुःखारश्चङ्कुणश्चक्रे स चङ्कुणविहारकृत् ।
भूपचित्तोन्नतं स्तूपं जिनान् हेममयांस्तथा ॥ २११ ॥

ईशानदेव्या तत्पत्न्या खाताम्बु प्रतिपादितम् ।
सुधारसमिव स्वच्छमारोग्याधायि रोगिणाम् ॥ २१२ ॥

ललितादित्यभूभर्तुर्वल्लभा चक्रमर्दिका ।
सहस्राण्योकसां सप्त तत्र चक्रपुरं व्यधात् ॥ २१३ ॥

आचार्यो भप्पटो नाम विदधे भप्पटेश्वरम् ।
अन्येऽपि रक्छटेशाद्या बहवो बहुभिः कृताः ॥ २१४ ॥

अधिष्ठानान्तरेऽप्यत्र चङ्कुणेनाग्र्यमन्त्रिणा ।
सचैत्यः सुकृतोदारो विहारो निरमीयत ॥ २१५ ॥

भिषगीशानचन्द्राख्यः स्यालश्चङ्कुणमन्त्रिणः ।
विहारमकरोल्लब्ध्वा तक्षकानुग्रहाच्छ्रियम् ॥ २१६ ॥

एवं हेममयीमुर्वीं स कुर्वन्नुर्वरापतिः ।
गुणैरौदार्यशौर्याद्यैर्मघवानमलङ्घयत् ॥ २१७ ॥

हेलयाऽपि विनिर्यान्ती वक्त्राद्वसुमतीपतेः ।
न कदाचन तस्याज्ञा दैवैरप्युदलङ्घयत ॥ २१८ ॥

तथाहि पूर्वपाथोधेस्तटे सकटको वसन् ।
आनीयन्तां कपित्थानीत्यादिदेश स जातुचित् ॥ २१९ ॥

---

211. a) D $I_{1,2}$ V भुःखा°; SA_1 तुःखा° (for तुःखा°).
212. c) SA_1 (before corr.) सुधासर° (for सुधारस°).
213. a) D P_{1-3} I_{1-4} V SA_1 (SG SR ललिता also) वल्लभा (for ललिता).
214. a) D $P_{1,2}$ I_{2-4} V SA भपटो (for भप्पटो). —b) D P_1 भपटे° (for भप्पटे°). —c) C T P_3 I_3 S′ SA_3 कर्कटे° (for रक्छटे°).
216. b) D I_7 C T S′ श्याल° (for स्याल°).
217. b) $I_{1,2,7}$ V P_1 SA_1 (before corr.) उर्वरी° (for उर्वरा°).

किंकर्तव्यतयाऽन्धेषु पुरोगेषु स्थितेष्वथ ।
उपानयत्कपित्थानि दिव्यः कोऽपि पुमान् पुरः ॥ २२० ॥

अग्रादुपायनं गृह्णन् कृतसंज्ञो भ्रुवा प्रभोः ।
कस्य त्वमिति पप्रच्छ प्रतीहारः प्रसृत्य तम् ॥ २२१ ॥

सोऽभ्यधात्तं कपित्थानि दत्त्वा राज्ञः प्रियाण्यहम् ।
प्रहितोऽद्य महेन्द्रेण नन्दनोद्यानपालकः ॥ २२२ ॥

रहो महेन्द्रसंदिष्टं वक्तव्यं किंचिदस्ति मे ।
इति श्रुत्वा प्रतीहारः सभां चक्रे स निर्जनाम् ॥ २२३ ॥

ततो दिव्यः पुमानूचे शक्रस्त्वां वक्ति भूपते ।
क्षन्तव्यं पथ्यमप्येतत्सौजन्यान्निष्ठुरं वचः ॥ २२४ ॥

तुर्ये युगेऽपि भूपाल दिक्पाला अपि ते वयम् ।
विभ्रमो यत्प्रणम्याज्ञां श्रूयतां तत्र कारणम् ॥ २२५ ॥

पुरा ग्रामगृहस्थस्य कस्यचित्पृथुसंपदः ।
जन्मान्तरे कर्मकरो हालिकोऽभूद्भवान्किल ॥ २२६ ॥

एकदा तस्य ते ग्रीष्मे वाहयित्वा महावृषान् ।
श्रान्तस्य निर्जलेऽरण्ये क्षीणप्रायमभूदहः ॥ २२७ ॥

ततः स्वामिगृहात् क्षुत्तृट्खिन्नस्य भवतोऽन्तिकम् ।
वारिकुम्भीमपूपं च गृहीत्वा कश्चिदाययौ ॥ २२८ ॥

निर्धौतपाणिपादस्त्वं भोक्तुं संप्रस्तुतस्ततः ।
विप्रं कण्ठगतप्राणमपश्यः पुरतोऽतिथिम् ॥ २२९ ॥

स त्वामवोचत् मा भुङ्क्ष्व दुर्भिक्षोपहतस्य मे ।
कण्ठे यियासवः प्राणा वर्तन्ते भोजनं विना ॥ २३० ॥

वारितः पार्श्वगेनापि तस्मै त्वं प्रीतिपूर्वकम् ।
पूपार्धं वारिकुम्भीं च प्रादाः प्रियमुदीरयन् ॥ २३१ ॥

---

220. a) SA_3 °यार्तेषु (for °यान्धेषु). —c) SA_1 (before corr.) उपानयन्क° (for उपानयत्क°).
223. P_3 om. *cd*.
226. a) $I_{1-4,7}$ T S′ V SA_1 (before corr.) ग्रामे (for ग्राम°).
230. a) $I_{1,2,4,7}$ V SA_1 मुंक्ता (for मुङ्क्ष्व).

पात्रे प्रसन्नचित्तस्य काले दानेन तेन ते।
अखण्डितानामाज्ञानां शतमासीत् त्रिविष्टपे ॥ २३२ ॥

तेन वारिप्रदानेन वाञ्छामात्रेऽपि दर्शिते।
प्रादुर्भवन्ति सुस्वादा नद्यो मरुपथेष्वपि ॥ २३३ ॥

सत्क्षेत्रप्रतिपादितः प्रियवचोबद्धालवालावलि-
र्निर्दोषेण मनःप्रसादपयसा निष्पन्नसेकक्रियः।
दातुस्तत्तदभीप्सितं किल फलन्कालेऽतिबालोऽप्यसौ
राजन् दानमहीरुहो विजयते कल्पद्रुमादीनपि ॥ २३४ ॥

अल्पावशेषास्तास्त्वद्य सन्त्याज्ञास्तव भूपते।
वचोऽलङ्घ्यं क्षपयतो यत्र तत्राविचारतः ॥ २३५ ॥

अपि चेतरभूपालसुलभं महतः सतः।
कस्माद्विचारशून्यत्वं तवापि हृदि रोहति ॥ २३६ ॥

दिनानि कतिचिद्यानि कश्मीरेषु घनागमे।
जायन्ते तानि पूर्वाब्धौ फलानि शिशिरे कुतः ॥ २३७ ॥

विगाहसे दिशं यां यां तत्र तत्रैव तत्पतेः।
त्वदाज्ञाग्रहणे यत्नः पूर्वदानप्रभावतः ॥ २३८ ॥

आशां श्रितस्य माहेन्द्रीमाज्ञा स्वल्पाऽपि तेऽधुना।
गृहीता कथमप्येषा शक्रेणाभग्नशक्तिना ॥ २३९ ॥

विना प्रयोजनं मुख्यं तस्मादाज्ञास्त्वया क्वचित्।
नैवमेव पुनर्देया विरलाः सन्ति ता यतः ॥ २४० ॥

इत्युक्त्वाऽन्तर्हिते तस्मिन् भूपालो विपुलाशयः।
चिन्तयन् दानमाहात्म्यं परं विस्मयमाययौ ॥ २४१ ॥

---

234. [a]) P_3 SA_3 °रोपितः (for °पादितः). —[c]) SA_3 दत्ते तत्तदभीप्सितं किल फलं काले इत्यन्यादर्शे (for दातुस्तत्तदभीप्सितं किल फलन्काले).

236. [a]) $I_{1-4,7}$ S′ V P_2 C SA_1 चेतसि भू° (for चेतरभू°).

239. I_7 om. *ab*.

240. [b]) $I_{1,2}$ S′ P_1 SA_1 °दाज्ञा त्व° (for °दाज्ञास्त्व°).

ततः प्रभृति तादृक्षयोग्यार्थप्राप्तिलालसः ।
परिहासपुरे चक्रे स्थिरां गुर्वीं स पर्विणीम् ॥ २४२ ॥

सहस्रभक्तमित्येवं प्रख्यातायां सदक्षिणम् ।
लक्षमेकोत्तरं भक्तपात्राणां यत्र दीयते ॥ २४३ ॥

अभिप्रायेण तेनैव पत्तनान्यूषरेषु सः ।
चक्रे यद्येषु तृष्णार्तः कश्चिज्जातु पिबेदपः ॥ २४४ ॥

संजग्राह स देशेभ्यस्तांस्तानन्तरविघ्नरान् ।
विकचान्सुमनःस्तोमान्पादपेभ्य इवानिलः ॥ २४५ ॥

तेन कङ्कणवर्षस्य रससिद्धस्य सोदरः ।
चङ्कुणो नाम तुःखारदेशानीतो गुणोन्नतः ॥ २४६ ॥

स रसेन समातन्वन् कोशे बहुसुवर्णताम् ।
पद्माकर इवाब्जस्य भूभृतोऽभूच्छुभावहः ॥ २४७ ॥

रुद्धः पञ्चनदे जातु दुस्तरैः सिन्धुसंगमैः ।
तटे स्तम्भितसैन्योऽभूद्राजा चिन्तापरः क्षणम् ॥ २४८ ॥

ततोऽम्बुतरणोपायं तस्मिन्पृच्छति मन्त्रिणः ।
अगाधेऽम्भसि रोधस्थश्चङ्कुणो मणिमक्षिपत् ॥ २४९ ॥

तत्प्रभावाद् द्विधाभूतं सरिन्नीरं ससैनिकः ।
उत्तीर्णो नृपतिस्तूर्णं परं पारं समासदत् ॥ २५० ॥

मणिमन्येन मणिना चङ्कुणोऽप्याचकर्ष तम् ।
सलिलं प्रागवस्थं च क्षणेन सरितामभूत् ॥ २५१ ॥

परिभाव्याद्भुतं तत्स प्रशंसामुखराननः ।
प्रणयाच्चङ्कुणं राजा मणियुग्ममयाचत ॥ २५२ ॥

---

242. b) D °योग्यार्थि° (for °योग्यार्थ°).

245. b) $I_{1,2,4,7}$ S′ V C T °ज्जनान् (for °न्नरान्).

246. c) D I_{1-3} P_1 St C T S′ V SA_1 भुःखार°; $P_{2,3}$ I_4 भुख्खार°; SA भुश्खार° (for तुःखार°). —d) St SA_3 SA_1 (after corr.) °न्नीतो (for °नीतो). C T गुणोत्तरः; I_7 गुणान्न° (for गुणोन्नतः).

248. c) I_3 SA_2 स्तिमित° (for स्तम्भित°).

252. a) SA_3 प्रतिभाव्या° (for परिभाव्या°). —b) D प्रशंशा° (for प्रशंसा°).

स तमाह स्म विहसन् कर्मैमौ कुरुतो मणी ।
योग्यौ मत्पाणिगावेव किं स्यात् स्वीकरणेन वः ॥ २५३ ॥

सामान्येष्वेव लभते सोत्कर्षं वस्तु संप्रथाम् ।
महत्सु तस्य का शोभा विविधोत्कृष्टवस्तुषु ॥ २५४ ॥

प्रस्यन्दनं शशिमणेर्गणयन्ति ताव-
द्यावत्स्थितो जलनिधेः पुलिनैकदेशे ।
स स्वीक्रियेत यदि तेन ततस्तदाऽस्य
स्यन्दः स्फुरन्नपि न तत्सलिले विभाव्यः ॥ २५५ ॥

इत्युक्त्वा विरते तस्मिन् राजा सस्मितमब्रवीत् ।
संभावयसि किं रत्नमाभ्यामभ्यधिकं मम ॥ २५६ ॥

अतोऽधिकतरं यद्वा किंचित्त्वं मम पश्यसि ।
तदादाय प्रयच्छेदं निष्क्रयेण मणिद्वयम् ॥ २५७ ॥

ततो महान्प्रसादोऽयमित्युक्त्वा चङ्कुणोऽब्रवीत् ।
स्वायत्ते स्वामिनो रत्ने मह्यमिष्टं तु दीयताम् ॥ २५८ ॥

गजस्कन्धेऽधिरोप्यैतन्मागधेभ्यो यदाहृतम् ।
दत्त्वा सुगतबिम्बं तज्जनोऽयमनुगृह्यताम् ॥ २५९ ॥

सलिलोत्तरणोपायो मणी देवेन गृह्यताम् ।
संसारोत्तरणोपायः सुगतो मह्यमर्प्यताम् ॥ २६० ॥

---

254. d) SA_3 °त्कृष्टभूमिषु (for °त्कृष्टवस्तुषु).

255. d) $I_{1,4}$ SA_1 (before corr.) स्यन्दं; C S′ स्यन्दैः; I_2 स्यन्दन् (for स्यन्दः). SA_1 (before corr.) वभाव्यः (for विभाव्यः).

257. a) $I_{1,2,4,7}$ V S′ C T SA_1 ततो° (for अतो°). —b) C T S′ कोषोत्थं; SA_3 [marg. I_3 कोशे त्वं (for किंचित्त्वं). —d) $I_{1,2,4,7}$ V निष्क्रियेण (for निष्क्रयेण).

258. d) $I_{1,2,4,7}$ C T V प्रदी° (for तु दी°).

259. b) D suggests मगधेभ्यो (for मागधेभ्यो).

260. ab) SA_2 gloss मणी एव संसारतरणोपाय इत्यारोपः अत एव गृह्यतामित्येकवचनान्तं क्रियापदम् । मणी एव संसारतरणोपायस्त्वया गृह्यतामित्यन्वयः (for *ab*).

इति तेनार्थितो युक्त्या जिनबिम्बं ददौ नृपः ।
वाग्मिनां कस्य सामर्थ्यं परिपन्थयितुं वचः ॥ २६१ ॥

स्वविहारेऽथ भगवान् स तेन विनिवेशितः ।
कपिशाभिः सकाषाय इव यो भाति कान्तिभिः ॥ २६२ ॥

दृश्यतेऽद्यापि कटकैरायसैः परिवेष्टितः ।
गजस्कन्धनिबद्धस्य सूचको यस्य विष्टरः ॥ २६३ ॥

अभिप्रायानुसारेण प्रकटीकुरुते प्रियम् ।
अहो महाप्रभावानां भूपतीनां वसुंधरा ॥ २६४ ॥

अशिक्षितं कदाचित्स स्वयं दमयितुं हयम् ।
निनायारण्यमेकाकी हयविद्याविशारदः ॥ २६५ ॥

दूरान्निर्मानुषे तत्र ललनां ललिताकृतिम् ।
एकां ददर्श गायन्तीं नृत्यन्तीमपरामपि ॥ २६६ ॥

क्षणाच्च ते समापय्य गीतनृत्ते मृगीदृशौ ।
प्रणम्य किंचिद्गच्छन्त्यावपश्यद्दमयन्हयम् ॥ २६७ ॥

तुरगं तं समारुह्य तत्रागच्छद्दिने दिने ।
दृष्ट्वा तथैव ते कान्ते गत्वाऽपृच्छत्सविस्मयः ॥ २६८ ॥

तमूचतुस्ते नर्तक्यावावां देवगृहाश्रिते ।
यः शूरवर्धमानोऽयं ग्रामस्तत्राऽऽवयोर्गृहम् ॥ २६९ ॥

इहत्यजीवनभुजां मातॄणामुपदेशतः ।
अस्मत्कुलेन नियतं नृत्तमत्र विधीयते ॥ २७० ॥

रूढिः परम्परायाता सेयमस्मद्गृहे स्थिता ।
आवामन्योऽपि वा नात्र निमित्तं ज्ञातुमीश्वरः ॥ २७१ ॥

---

261. c) $I_{1,2,4,7}$ V SA_1 (before corr.) यस्य (for कस्य).

263. c) $I_{1,4}$ SA_1 °स्कन्द°; $I_{2,7}$ °स्कन्दा° (for °स्कन्ध°). —d) I_3 SA_3 सूचकैर्य° (for सूचको य°).

एवं वचस्तयोः श्रुत्वा नृपोऽन्येद्युः सविस्मयः ।
तदुक्त्या मेदिनीं कृत्स्नां कारुभिर्निरदारयत् ॥ २७२ ॥

दूरं निर्हृतमृद्भिस्तैरथाद्राक्षीन्निवेदितम् ।
नृपतिः पिहितद्वारं जीर्णं देवगृहद्वयम् ॥ २७३ ॥

उद्घाटितारर्विर्णैः पीठोत्कीर्णैर्निवेदितौ ।
अपश्यत्केशवौ तत्र रामलक्ष्मणनिर्मितौ ॥ २७४ ॥

परिहासहरेः पार्श्वे पृथक्कृत्वा शिलागृहम् ।
स रामस्वामिनः श्रीमान् प्रतिष्ठाकर्म निर्ममे ॥ २७५ ॥

देवोऽपि लक्ष्मणस्वामी तथैवाभ्यर्थ्य पार्थिवम् ।
चक्रमर्दिकया चक्रेश्वरपार्श्वे निवेशितः ॥ २७६ ॥

दिग्जये पुरुषः कश्चिद् वृत्तप्रत्यग्रनिग्रहः ।
अग्रे न्यक्षिपदात्मानं गजारूढस्य भूभुजः ॥ २७७ ॥

तं कृत्तपाणिघ्राणादिव्रणैः शोणितवर्षिणम् ।
त्राणार्थिनं कारुणिकः खोदन्तं पृष्टवान्नृपः ॥ २७८ ॥

स तस्मै सिकतासिन्धुसविधस्थस्य भूपतेः ।
प्रख्यातमूचे सचिवमात्मानं हितकारिणम् ॥ २७९ ॥

प्रणतिर्ललितादित्यनृपतेः क्रियतामिति ।
हितं कथयतः स्वस्य निग्रहं च ततो नृपात् ॥ २८० ॥

प्रतिजज्ञे च भूपेन ततस्तत्स्वामिनिग्रहः ।
रूढव्रणोऽगदंकारैः स चाकार्यत सत्कृतैः ॥ २८१ ॥

---

272. c) C T P I_3 S′ SA_3 तदुक्तां; SA_1 (before corr.) तदुक्तौ (for तदुक्तया). $P_{1,2}$ SA_1 कृच्छ्रां (for कृत्स्नां).
273. a) P_3 I_3 SA_1 (after corr.) दूरान्नि° (for दूरं नि°).
274. a) C T S′ °तारैर्° (for °तारैरि° [अरिः a door-leaf]). —b) C S′ °त्कीर्णौ° (for °त्कीर्णैं°).
279. d) $I_{1,2,4,7}$ V S′ C SA_1 (before corr.) °माख्यातं (for °मात्मानं).
280. After this v. युग्मम् .
281. c) $I_{1,4}$ गूढव्रणो° (for रूढव्रणो°).

ततो विहितयात्रं तं स मन्त्री कृतसत्क्रियः।
कदाचिदेवमवदद्विजने जगतीभुजम् ॥ २८२ ॥

एवंविधस्य कायस्य राजन् यत्परिरक्षणम्।
तत्र वैरविशुद्ध्याशा विडम्बयति मामियम् ॥ २८३ ॥

बाष्पैर्जलाञ्जलिं दत्त्वा दुःखाय च सुखाय च।
कृतकृत्यो ध्रुवं जह्यामवमानहतानसून् ॥ २८४ ॥

अपकृत्याधिकं शत्रोरपकारं जयेन्मितम्।
गम्भीरं प्रतिनद्येव निनादं नदतो गिरिः ॥ २८५ ॥

इतो मासैस्त्रिभिर्गम्या भूः प्राप्या त्वरितं कथम्।
यदा वा प्राप्यते वैरी तदा तत्रैव किं वसेत् ॥ २८६ ॥

मासार्धलङ्घ्यं पन्थानं तस्मादुपदिशामि ते।
गृहीत्वा स जलं गम्यश्चमूनां किंतु निर्जलः ॥ २८७ ॥

तद्भूमिजा बन्धवो मे न वक्ष्यन्ति त्वदागमम्।
सामात्यान्तःपुरो राजा छद्मनाऽनेन गृह्यते ॥ २८८ ॥

इत्युक्त्वा सोऽकरोत्तस्य प्रवेशं वालुकार्णवे।
पक्षे क्षीणे च कटको निस्तोयः समपद्यत ॥ २८९ ॥

तत्राप्यहानि द्वित्राणि वहन्नेवाभवन्नृपः।
तृष्णार्तं वीक्ष्य सैन्यं च मन्त्रिणं तमभाषत ॥ २९० ॥

उक्तकालाधिका यावद् वासरा गमिताः पथि।
मुमूर्षु तृष्णया सैन्यं तदध्वा शिष्यते कियान् ॥ २९१ ॥

---

282. d) $I_{1,2,4,7}$ V C SA_1 °द्विजेन (for °द्विजने).
284. c) D C T $I_{1-4,7}$ P_{1-3} V S′ SA_1 जह्याद° (for जह्याम°).
285. b) $I_{1,2,4,7}$ जयेहितम् ; C S′ जयोहितम्° ; T जयोन्मितम् ; $P_{1,2}$ जयोर्मितम् ; I_3 जयेन्दितम् (for जयेन्मितम्). —d) C S′ गिरेः; I_3 गिरः (for गिरिः).
288. d) T °ना तेन (for °नाऽनेन).
289. c) $I_{1,2,7}$ C T S′ क्षीणे तु (for क्षीणे च).

ततो विहस्य सोऽवादीज्जिगीषो शेषमध्वनः ।
किं पृच्छत्यरिराष्ट्रस्य यमराष्ट्रस्य वा भवान् ॥ २९२ ॥

त्वं हि स्वामिहितायैव समुपेक्ष्य स्वजीवितम् ।
मृत्युवक्त्रं सकटको मया युक्त्या प्रवेशितः ॥ २९३ ॥

नेदं मरुमहीमात्रं भीमोऽयं वालुकार्णवः ।
नाम्भोऽत्र लभ्यते क्वापि कस्त्राता तेऽद्य भूपते ॥ २९४ ॥

श्रुत्वेति पृतना कृत्स्ना समभूद्भीतसौष्ठवा ।
करकाभ्रंशितफला स्तम्बशेषेव शालिभूः ॥ २९५ ॥

संत्यक्तजीविताशानां भीरूणां क्रन्दितध्वनिम् ।
भुजमुद्यम्य शमयंस्ततो नृपतिरब्रवीत् ॥ २९६ ॥

अमात्य तव कृत्येन प्रीताः स्वामिहितैषिणः ।
मरावप्यत्र शीतार्ता इव रोमाञ्चिता वयम् ॥ २९७ ॥

अभेद्यसारे मयि तु व्यक्तमेवंविधोऽपि ते ।
प्रयोगः कुण्ठतां यातो लोहं वज्रमणाविव ॥ २९८ ॥

मणिभ्रमाद्वह्निकणं गृह्णन्दग्धा इवाङ्गुलीः ।
त्वं मिथ्यावयवाँल्लूनानद्य शोचिष्यसि ध्रुवम् ॥ २९९ ॥

निदेशेनैव मे पश्य पयः सूतेऽद्य मेदिनी ।
रसितेनाम्बुवाहस्य रत्नं वैदूर्यभूरिव ॥ ३०० ॥

---

292. b) C T I_{2-7} °गीषोः (for °गीषो).
295. d) $I_{1-4,7}$ V S' T St $P_{1,2}$ स्तम्भ° (for स्तम्ब°).
297. b) $I_{1,2,4,7}$ V S' C T °प्रीतः (for प्रीताः).
298. b) SA_3 (before corr.) SA_1 I_3 °मेवोविधोपि तु (for °मेवंविधोऽपि ते). —c) St P_3 SA_3 प्रयासः (for प्रयोगः).
299. a) $P_{1,2}$ $I_{1,2,4,7}$ V SA_1 (before corr.) °ञ्रकणं (for °ह्निकणं).
300. a) SA SR SG(before corr.) दिनेशेनैव (for निदेशेनैव). —d) $I_{2,3}$ St $P_{1,2}$ वैडूर्य° (for वैदूर्य°).

इत्युक्त्वा सोऽम्बु निष्कष्टुं कुन्तेनोर्वीं व्यदारयत् ।
उज्जिहीर्षुर्वितस्ताम्भः शूलेनेव त्रिलोचनः ॥ ३०१ ॥

अथोज्जगाम पातालल्क्ष्मीलीलास्मितच्छविः ।
रसातलात्सरित् साकं सैन्यानां जीविताशया ॥ ३०२ ॥

तस्य सेनाचराणां सा क्लमं चिच्छेद वाहिनी ।
वृथाव्ययीकृताङ्गस्य मन्त्रिणस्तस्य चेप्सितम् ॥ ३०३ ॥

लूनाङ्गोऽमङ्गलाशंसी स मन्त्री विफलश्रमः ।
स्वस्य भर्तुर्विवेशाऽऽदौ नगरीमन्तकस्ततः ॥ ३०४ ॥

राज्ञाऽपि कुटिलाचारो निगृह्य स महीपतिः ।
निजस्य मन्त्रिणस्तस्य तुल्यावस्थो व्यधीयत ॥ ३०५ ॥

यथोपयोगं तेनैव स्थाने स्थाने प्रवर्तिताः ।
अद्यापि कुन्तवाहिन्यः प्रवहन्त्युत्तरापथे ॥ ३०६ ॥

सहस्रशः संभवन्तोऽप्यपरे भुवनाद्भुताः ।
अतिप्रसङ्गभङ्गेन तद्वृत्तान्ता न दर्शिताः ॥ ३०७ ॥

यन्निश्शब्दजला घनाश्मपरुषे देशेऽतिघोरारवा
यच्चाच्छाः समये पयोदमलिने कालुष्यसंदूषिताः ।
दृश्यन्ते कुलनिम्नगा अपि परं दिग्देशकालाविमौ
तत्सत्यं महतामपि स्वसदृशाचारप्रवृत्तिप्रदौ ॥ ३०८ ॥

कलेर्वाऽयं प्रभावः स्यान्नरनाथासनस्य वा ।
यत्सोऽपि भीमकलुषाः प्रवृत्तीः समदर्शयत् ॥ ३०९ ॥

अवरोधसखो राजा परिहासपुरे स्थितः ।
स जातु मदिराक्षीवः सचिवानेवमन्वशात् ॥ ३१० ॥

कृतं प्रवरसेनेन यदेतत् प्रवरं पुरम् ।
तन्निर्दहथ मन्यध्वे मत्पुरस्यैव चेच्छ्रियम् ॥ ३११ ॥

---

308. c) SA_1 (before corr.) धिग्देश° (for दिग्देश°).
309. After this *v.* युग्मम् .
311. d) $I_{1,2,7}$ St SA_1 °पुरस्येव (for °पुरस्यैव).

घोरामलङ्घिताज्ञस्य श्रुत्वेत्याज्ञां महीपतेः ।
गत्वाऽश्वघासकूटानि तेऽदहन्वातुलानके ॥ ३१२ ॥
हर्म्याग्राद्वीक्षमाणस्तद्वह्निज्वालोज्ज्वलाननः ।
उल्कामुख इवाऽभूत् स हर्षाट्टहसितोत्कटः ॥ ३१३ ॥
द्वेषादिवैकृतवतः प्रतिभासतेऽन्यो
मिथ्यैव चित्रमधिको विशदात्मनोऽपि ।
चन्द्रादि पश्यति पुरो द्विगुणं प्रकृत्या
तेजोमयं तिमिरदोषहतं हि चक्षुः ॥ ३१४ ॥
नैवं चेदेकमपि तत्पुरं प्रवरभूपतेः ।
असंख्यपुरनिर्माता स विवेदाऽधिकं कुतः ॥ ३१५ ॥
क्षीणक्षैब्योऽथ निर्ध्याय नगरप्लोषकिल्बिषम् ।
उष्णनिःश्वाससुहृदा पस्पर्शेऽनुशयाग्निना ॥ ३१६ ॥
तत्कुर्वतेऽन्तःसुषिरा गूढं येनाऽऽतनुक्षयम् ।
दह्यन्ते जीर्णतरवः कोटरस्थानला इव ॥ ३१७ ॥
प्रातस्तमथ शोचन्तं सदुःखं वीक्ष्य मन्त्रिणः ।
चिन्तानिवर्तनायोचुः पुरप्लोषं मृषैव तत् ॥ ३१८ ॥
श्रुतेऽप्रनष्टे नगरे निश्शोकोऽभून्महीपतिः ।
स्वप्नान्तर्हारिते पुत्रे प्रबुद्धोऽग्र इव स्थिते ॥ ३१९ ॥
कार्यं न जातु तद्वाक्यं यत्क्षीवेण मयोच्यते ।
तान् युक्तकारिणोऽमात्यान् प्रशंसन्निति सोऽब्रवीत् ॥ ३२० ॥
प्रियमनुचितं क्ष्मापण्यस्त्रीक्षणप्रभुरीश्वरो
रमयति यतो धिक्तान्भृत्यान्स्ववृत्तिसुखार्थिनः ।
नृपमपथगं पान्ति प्राणानुपेक्ष्य निजानपि
प्रसभमिह ये तैः पूतेयं महात्मभिरुर्वरी ॥ ३२१ ॥

---

312. c) C T $I_{1,2,7}$ S′ V SA_1 (before corr.) गत्वाशु (for गत्वाश्व°).
315. After this *v.* युग्मम्.
317. SA_3 gloss कर्मकर्तरि लकारः स्वयमेव दह्यन्ते । अन्तश्छिद्राः पुरुषाः तत्कार्यं कुर्वते येन कार्येण अतनुक्षयं यथा भवति तथा स्वयमेव दह्यन्ते । यथा कोटरस्थाश्रयस्तरवः गूढमन्तरेव दह्यन्ते (for this *v.*). —b) St Tr. adopts अतनुक्षयम् (for आतनुक्षयम्).
320. a) D C T P_3 I_4 जातु न (for न जातु). —b) St °वेन (for °बेण).

अतीन्द्रमपि माहात्म्यं राज्ञस्तस्याधितिष्ठतः ।
अयमन्योऽपि दोषोऽभूदितरक्षितिपोचितः ॥ ३२२ ॥

दत्त्वाऽपि यत्स मध्यस्थं श्रीपरीहासकेशवम् ।
जघान तीक्ष्णपुरुषैस्त्रिग्राम्यां गौडपार्थिवम् ॥ ३२३ ॥

[illegible]ोपजीविनामासीत्सत्त्वमत्यद्भुतं तदा ।
जहुर्ये जीवितं धीराः परोक्षस्य प्रभोः कृते ॥ ३२४ ॥

शारदादर्शनमिषात् कश्मीरान् संप्रविश्य ते ।
मध्यस्थदेवावसथं संहताः समवेष्टयन् ॥ ३२५ ॥

दिगन्तरस्थे भूपाले प्रविविक्षूनवेक्ष्य तान् ।
परिहासहरिं चक्रुः पूजकाः पिहितारिम् ॥ ३२६ ॥

ते रामस्वामिनं प्राप्य राजतं विक्रमोर्जिताः ।
परिहासहरिभ्रान्त्या चक्रुरुत्पाट्य रेणुशः ॥ ३२७ ॥

तिलं तिलं तं कृत्वा च चिक्षिपुर्दिक्षु सर्वतः ।
नगरान्निर्गतैः सैन्यैर्हन्यमानाः पदे पदे ॥ ३२८ ॥

श्यामला रक्तसंसिक्तास्तेऽपतन्निहता भुवि ।
अञ्जनाद्रिदृषत्खण्डा धातुस्यन्दोज्ज्वला इव ॥ ३२९ ॥

तदीयरुधिरासारैः समभूदुज्ज्वलीकृता ।
स्वामिभक्तिरसामान्या धन्या चेयं वसुंधरा ॥ ३३० ॥

वज्राद्वज्रकृतं भयं विरमति श्रीः पद्मरागाद्भवे-
न्नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मनः ।
एकैकं क्रियते प्रभावनियमात्कर्मेति रत्नैः परं
पुंरत्नैः पुनरप्रमेयमहिमोन्नद्धैर्न किं साध्यते ॥ ३३१ ॥

---

326. b) D (before suggestion) and all other Mss. read प्रविवेक्षून् (for suggested प्रविविक्षून्).

331. c) $I_{1,2,4,7}$ S′ V C SA_1 (before corr.) कर्मांति°; T कर्मोंति° (for °कर्मेति). —d) $I_{1,2,4,7}$ S′ V C SA_1 (before corr.) परम° (for पुनर°).

क्व दीर्घकाललङ्घ्योऽध्वा शान्ते भक्तिः क्व च प्रभौ ।
विधातुरप्यसाध्यं तद् यद् गौडैर्विहितं तदा ॥ ३३२ ॥

लोकोत्तरस्वामिभक्तिप्रभावानि पदे पदे ।
तादृशानि तदाऽभूवन् भृत्यरत्नानि भूभृताम् ॥ ३३३ ॥

राज्ञः प्रियो रक्षितोऽभूद् गौडराक्षसविप्लवे ।
रामस्वाम्युपहारेण श्रीपरीहासकेशवः ॥ ३३४ ॥

अद्यापि दृश्यते शून्यं रामस्वामिसुरास्पदम् ।
ब्रह्माण्डं गौडवीराणां सनाथं यशसा पुनः ॥ ३३५ ॥

एवं नानाविधोदन्तैर्वासराः क्ष्मापतेर्ययुः ।
विरलाः स्वपुरे तस्य भूयांसस्तु दिगन्तरे ॥ ३३६ ॥

अनन्याक्रान्तपृथिवीसमालोकनकौतुकी ।
अपारं प्रविवेशाथ पुनरेवोत्तरापथम् ॥ ३३७ ॥

कर्तुं प्रभावजिज्ञासां प्रहितैर्धनदादिभिः ।
नैर्ऋतैः सह वृत्तान्तास्तस्य ते ते तदाऽभवन् ॥ ३३८ ॥

नाद्यापि या भुवो दृष्टा जाने भानुकरैरपि ।
राज्ञस्तस्य बभूवाज्ञा तत्र स्वैरविहारिणी ॥ ३३९ ॥

चिरमज्ञातवृत्तान्तैर्मन्त्रिभिः प्रहितस्ततः ।
प्रत्यावृत्तस्तस्य पार्श्वाद् दूतस्तानेवमुक्तवान् ॥ ३४० ॥

'इत्यादिशति वः स्वामी कोऽयं मोहो भवादृशाम् ।
क्ष्मामिमां मे प्रविष्टस्य प्रतीक्षध्वे यदागमम् ॥ ३४१ ॥

---

332. c) $P_{1,3}$ विधातुम° (for विधातुर°).
335. b) All Mss. except SL and D (after suggestion) read °पुरास्पदम् (for °सुरास्पदम्).
337. a) $I_{1,2,4,7}$ SA_1 (before corr.) अनन्यक्रा° (for अनन्याक्रा°).
339. d) I_3 SA_3 तासु (for तत्र).
341. $I_{2,4,7}$ V SA_1 om. *vv.* 341*b*—342*d*.

नवं नवं प्रतिदिनं संत्यज्य विजयार्जनम् ।
स्वराष्ट्रं संप्रविष्टस्य किं कार्यं मम पश्यथ ॥ ३४२ ॥

विनिर्गतानां स्वभुवः सरितां सलिलाकरः ।
न निर्व्याजजिगीषूणां दृश्यते ह्यवधिः क्वचित् ॥ ३४३ ॥

तस्मादाचारसारं वो वक्ष्ये स्वविषयोचितम् ।
राज्यं तदनुसारेण निर्विघ्नं कुरुतानघाः ॥ ३४४ ॥

अत्रस्थैः सर्वदा रक्ष्यः स्वभेदः प्रभविष्णुभिः ।
चार्वाकाणामिवैषां हि भयं न परलोकतः ॥ ३४५ ॥

अपराधं विनाऽप्यत्र दण्ड्या गह्वरवासिनः ।
ते हि संभृतवित्ताः स्युर्दुर्भेद्या दुर्गसंश्रयाः ॥ ३४६ ॥

वर्षोपभोग्यान्यन्नानि क्षेत्रभूसंमिता वृषाः ।
ग्राम्याणां नातिरिच्यन्ते यथा कार्यं तथाऽसकृत् ॥ ३४७ ॥

अधिकीभूतवित्ता हि वत्सरेणैव ते भृशम् ।
भवेयुर्डामराः क्रूरा नृपाज्ञातिक्रमक्षमाः ॥ ३४८ ॥

वस्त्रं स्त्रियः कुथा भोज्यमलंकारा हया गृहाः ।
आसाद्यन्ते यदा जातु ग्रामीणैर्नगरोचिताः ॥ ३४९ ॥

मदाद्दुर्गाण्युपेक्ष्यन्ते संरक्ष्याणि यदा नृपैः ।
यदा चानन्तरज्ञत्वं तेषां भृत्येषु दृश्यते ॥ ३५० ॥

प्रदेशादेकतो रूढा यदा वृत्तिश्च शस्त्रिणाम् ।
अन्योन्योद्वाहसंबन्धैः कायस्थाः संहता यदि ॥ ३५१ ॥

कर्मस्थानानि वीक्षन्ते क्ष्मापाः कायस्थवद्यदा ।
तदा निस्संशयं ज्ञेयः प्रजाभाग्यविपर्ययः ॥ ३५२ ॥

---

343. c) $I_{1,2,4,7}$ V S′ SA_1 (before corr.) निर्व्याजं (for निर्व्याज°).

346. d) SA_1 (after corr.) I_3 SR SG P_{1-3} °र्दुर्भेदा (for °र्दुर्भेद्या).

350. a) $I_{1,2,4,7}$ P_2 उपेक्षन्ते (for उपेक्ष्यन्ते).

352. After this *v.* चक्कलकम्.

चेष्टानुसारेणोन्नीय गूढमाशयसंविदम् ।
मयोक्तं हृदये कार्यमन्तरं राजबीजिनाम् ॥ ३५३ ॥

प्रत्यासत्तिं मदकरटिनो दानगन्धेन वायु-
र्गर्जोद्भूतिं प्रकटितरुचिश्चञ्चलैवाम्बुदस्य ।
चेष्टा स्पष्टं वदति मतिमन्नैपुणोन्नेयतत्त्वा
जन्तोर्जन्मान्तरपरिचितां निश्चलां चित्तवृत्तिम् ॥ ३५४ ॥

पुत्रः कुवलयादित्यो वज्रादित्यश्च मे समौ ।
भिन्नशीला तयोर्भ्रात्रोर्धीर्द्वैमातुरयोः पुनः ॥ ३५५ ॥

ज्यायान् राज्येऽभिषेक्तव्यः स च स्याद्बलवान् यदा ।
तस्याऽऽज्ञातिक्रमः कार्यो भवद्भिर्नियमात्तदा ॥' ३५६ ॥

उत्सृजञ्जीवितं वाऽपि राज्यं वाऽपि स पार्थिवः ।
शोचनीयो न केनापि स्मरतेदं वचो मम ॥ ३५७ ॥

कार्यः कनीयान्न नृपः प्रमादात्क्रियते यदि ।
नोल्लङ्घनीया तस्याज्ञा रक्ष्यश्च विषमोऽपि सः ॥ ३५८ ॥

पौत्रेषु मे कनीयान् यो जयापीडोऽस्ति दारकः ।
पितामहसमो भूया इति वाच्यः स सर्वदा ॥ ३५९ ॥

भर्तुर्गृहीतनैराश्याः साभिप्रायां प्रणम्य ताम् ।
आनर्चुः पश्चिमामाज्ञां ते बाष्पार्धकणत्यजः ॥ ३६० ॥

उवाच चङ्कुणो जातु संनिपत्याखिलाः प्रजाः ।
बाष्पैः पतिवियोगाग्नितप्तां सिञ्चन्वसुंधराम् ॥ ३६१ ॥

राज्ये कुवलयापीडो राजपुत्रोऽभिषिच्यताम् ।
सुगृहीताभिधो राजा गतः स सुकृती दिवम् ॥ ३६२ ॥

---

353. b) C T S' रूढ° (for गूढ°). $I_{1,2,4,7}$ C T V S' °मादाय°; I_3 °मादय° (for °माशय°).

354. b) D C T I_3 S' °श्चंचले° (for °श्चंचलै°).

356. a) $I_{1-4,7}$ V SA °षिक्तव्यः (for °षेक्तव्यः).

358. b) P_2 I_3 प्रसादात् (for प्रमादात्).

360. b) C T S' $I_{2,7}$ साभिप्रायाः (for साभिप्रायां).

सस्रुजे यस्य कृतिनो दैवतैः कोशवृद्धये ।
रससिद्धिरकस्मान्मे यस्मात्साऽस्तमुपागता ॥ ३६३ ॥

दूरस्थोऽपि हि भूभृत्स भाग्यशक्त्या कयाचन ।
कार्याणि घटयन्नासीद्दुर्घटान्यपि हेलया ॥ ३६४ ॥

अम्भोजानि घनाघनव्यवहितोऽप्युल्लाघयत्यंशुमान्
दूरस्थोऽपि पयोधरोऽतिशिशिरस्पर्शं करोत्यातपम् ।
शक्तिः काऽप्यपरिक्षताऽस्ति महतां स्वैरं दविष्ठान्यहो
यन्माहात्म्यवशेन यान्ति घटनां कार्याणि निर्यन्त्रणाम् ॥३६५॥

सैकादशदिनान् सप्त मासान् षट्त्रिंशतं समाः ।
एवमाह्लाद्य स महीं प्रजाचन्द्रोऽस्तमाययौ ॥ ३६६ ॥

तुषारवर्षैर्बहलैस्तमकाण्डनिपातिभिः ।
आर्याणकाभिधे देशे विपन्नं केचिदूचिरे ॥ ३६७ ॥

राजप्रष्ठः प्रतिष्ठां स रक्षितुं चिरसंचिताम् ।
संकटे क्वापि दहनं प्राविक्षदिति केचन ॥ ३६८ ॥

केषांचित्तु मते भूभृद्दवीयस्युत्तरापथे ।
सोऽमर्त्यसुलभां भूमिं प्रविष्टः कटकान्वितः ॥ ३६९ ॥

अत्यद्भुतानि कृत्यानि श्रुतान्यस्य यथा किल ।
विपत्तिरपि भूभर्तुस्तथैवात्यद्भुता श्रुता ॥ ३७० ॥

यातोऽस्तं द्युमणिः पयोधिसलिलं कैश्चित्प्रविष्टोऽपरैः
संप्राप्तो दहनं गतः किल परैर्लोकान्तरं कीर्त्यते ।
जायन्ते महतामहो निरुपमप्रस्थानहेवाकिनां
निस्सामान्यमहत्त्वयोगपिशुना वार्ता विपत्तावपि ॥ ३७१ ॥

---

365. c) C T S′ V I_1 °रीक्षितास्ति; I_2 °रीक्षतास्ति; $I_{4,7}$ °रिक्षितास्ति (for °रिक्षताऽस्ति). —d) SA_1 (before corr.) $I_{1-3,7}$ V S′ °र्यन्त्रणम् ; P_2 °र्यन्त्राणाम् (for °र्यन्त्रणाम्).

368. a) St SA_1 $I_{1,2,4,7}$ P_2 V °प्रष्ठां (for °प्रष्ठः).

371. b) $I_{1,2,4,7}$ V $P_{1,2}$ SA_1 (before corr.) परो° (for परै°). D $P_{2,3}$ °न्तरे (for °न्तरं).

ततः कुवलयापीडो भेजे कुवलयेशताम् ।
जातः कमलदेव्या यः श्रीमाञ्शक्र इवादितेः ॥ ३७२ ॥

त्यागेन चक्रे विशदां योऽनुरक्तां नृपश्रियम् ।
महोरगस्त्वचमिव स्वभावमलिनामपि ॥ ३७३ ॥

भ्रात्रा तुल्यप्रभावेन कंचित्कालं हृतप्रभः ।
स हुताशोष्मणाऽऽक्रान्तः प्रदीप इव नारुचत् ॥ ३७४ ॥

भृङ्गैरिवानुगैर्दानलोभात् पर्यायवृत्तिभिः ।
श्रीर्दुःस्थाऽभूत् तयोरन्तर्मत्तेभकटयोरिव ॥ ३७५ ॥

अथोभयधनादायिभृत्यचक्रिकया समम् ।
राजा कुवलयापीडो बभञ्जानुजमञ्जसा ॥ ३७६ ॥

राज्यं निष्कण्टकं कृत्वा ततः प्राप्तबलो नृपः ।
दिग्जयायोर्जितक्रान्तिः सोऽभूत्संभृतसाधनः ॥ ३७७ ॥

एकस्तस्मिन् क्षणे मन्त्री तस्याज्ञामुदलङ्घयत् ।
स्मरन् वा तत्पितुर्वाचं भजन् वा दर्पविक्रियाम् ॥ ३७८ ॥

प्राप्तायामथ यामिन्यां तल्पे कोपाकुलो नृपः ।
तमाज्ञातिक्रमं ध्यायन्न निद्रां क्षणमप्यगात् ॥ ३७९ ॥

एवं कृतागसं हन्तुं सस्पृहस्य तदाश्रयात् ।
बहवः प्रत्यभासन्त वध्यास्तस्योद्यतक्रुधः ॥ ३८० ॥

विचारशैलमथितात्तस्य चित्तमहोदधेः ।
प्रकोपकालकूटस्य पश्चाच्छमसुधोदगात् ॥ ३८१ ॥

दध्यौ सोऽथ गतक्रोधः प्रवृद्धः प्राणिसंक्षयः ।
एतावान् कस्य नु कृते कर्तव्यः प्रत्यभान्मम ॥ ३८२ ॥

---

372. b) SA_1 (before corr.) भूवल° (for कुवल°).
376. b) I_3 SA °चक्रि° (for °चक्रि°).
379. a) $I_{1,2,4,7}$ C T S′ V °मपि (for °मथ).
380. $I_{1,2,4,7}$ V SA_1 om. *vv.* 380—381.
381. a) C T S विराग° (for विचार°). St P_{1-3} °मथिता (for °मथितात्).

अकार्याण्यपि पर्याप्य कृत्वाऽपि वृजिनार्जनम् ।
विधीयते हितं यस्य स देहः कस्य सुस्थिरः ॥ ३८३ ॥

कृतघ्नस्यास्य कायस्य हेतोरगलितस्मृतेः ।
हन्तव्याः कस्य पन्थानः प्रतिभान्त्यनपायिनः ॥ ३८४ ॥

विदन्ति जन्तवो हन्त पच्यमानस्य नात्मनः ।
अवस्थां कालसूदेन कृतां तां तां क्षणे क्षणे ॥ ३८५ ॥

ह्यः पश्यद्भिरकारणस्मितसितं पाथोजकोशाकृति
श्मश्रूद्भेदकठोरमद्य रभसादुत्तप्ततताम्रप्रभम् ।
प्रातर्जीर्णवलक्षकेशविकृतं वृद्धाजशीर्षोपमं
वक्त्रं नः परिहस्यते ध्रुवमिदं भूतैश्चिरस्थास्नुभिः ॥ ३८६ ॥

इत्याद्यनित्यताचिन्तादत्तशान्तिसुखादरः ।
राज्यं संत्यज्य स वनं प्लक्षप्रस्रवणं ययौ ॥ ३८७ ॥

गच्छ भद्र वनायैव तपस्याधीयतां मनः ।
सापायाः क्षणभङ्गिन्य एवंप्राया विभूतयः ॥ ३८८ ॥

तेन संत्यजता राज्यं लिखितेन निजासने ।
वैराग्यवासनोत्सेकः श्लोकेनाऽनेन सूचितः ॥ ३८९ ॥

अभग्नशमसंवेगलब्धसिद्धिर्नराधिपः ।
श्रीपर्वतादावद्यापि भव्यानामेति दृक्पथम् ॥ ३९० ॥

तथा याते प्रभोः पुत्रे मित्रशर्मा शुचाऽन्वितः ।
वितस्तासिन्धुसंभेदे सभार्यो जीवितं जहौ ॥ ३९१ ॥

---

383. d) SA_3 substitutes देहं तत्कस्य सुस्थिरम्.

385. b) $I_{1,2,7}$ V S′ C T P_{1-3} पश्य° (for पच्य°).

386. b) D C T $P_{1,2}$ $I_{1,2,4}$ V S′ SA_1 श्मश्रूद्बोध° (for श्मश्रूद्भेद°). —d) $I_{1-4,7}$ $P_{1,2}$ V St °स्थायुभिः; C T S′ °स्थायिभिः (for °स्थास्नुभिः).

387. b) $I_{1,2,4,7}$ V P_2 °मुखादरः (for °सुखादरः). —d) SA_3 gloss नैमिषारण्यम् (for प्लक्षप्रस्रवणं).

राज्यं समां समासार्धां कृत्वा स वसुधाधिपः ।
निःश्रेयसातिनिश्श्रेणीं सुधीः सिद्धिं समासदत् ॥ ३९२ ॥

वज्रादित्यो वप्पियको ललितादित्य इत्यपि ।
ख्यातोऽथ भूभृदभवद्यन्माता चक्रमर्दिका ॥ ३९३ ॥

स क्रूरचरितो भ्रातुः प्रजाह्लादविधायिनः ।
सुधांशोरिव दुर्वासा नूनं विसदृशोऽभवत् ॥ ३९४ ॥

परिहासपुरत् पित्र्यां नानोपकरणावलीम् ।
स जहार दुराचारो भूभृल्लोभवशंवदः ॥ ३९५ ॥

रागिणो भूमिपालस्य भूयस्योऽन्तःपुरस्त्रियः ।
बीजाश्वस्येव वडवास्तास्ताः समभवन्प्रियाः ॥ ३९६ ॥

विक्रयेण प्रयच्छन्स म्लेच्छेभ्यः पुरुषान्बहून् ।
म्लेच्छोचितां व्यवहृतिं प्रावर्तयत मण्डले ॥ ३९७ ॥

सप्ताब्दान्वसुधां भुक्त्वा सोऽतिसंभोगजन्मना ।
जगाम संक्षयं क्ष्माभृत्क्षयरोगेण किल्विषी ॥ ३९८ ॥

तस्मान्मञ्जरिकादेव्यां जातो राजा प्रजान्तकः ।
ततः पृथिव्यापीडोऽभूत् समासाश्चतुरः समाः ॥ ३९९ ॥

जातो मम्माभिधानायां वप्पियात् सप्त वासरान् ।
संग्रामापीडनामाऽथ तमुत्पाट्याभवन्नृपः ॥ ४०० ॥

भ्रातरौ तौ समासाद्य राज्यं नैव व्यराजत ।
हेमन्तशिशिरावाप्य चण्डांशोरिव मण्डलम् ॥ ४०१ ॥

---

393. b) D P_3 SA_3 S′ ललितापीड (for ललितादित्य).
394. d) SA_3 I_3 दूरं (for नूनं).
399. a) All Mss. except St read °देव्या (for °देव्यां).
400. a) T C मस्साभि°; P_1 $I_{3,4}$ S′ मसाभि° (for मम्माभि°). —b) P_1 I_3 भप्पियात्; P_3 बाष्पयात् (for वाप्पयात्); I_1 SA_3 D (after suggestion) वत्सरान् (for वासरान्). —d) P_2 I_1 तमुत्पाद्या° (for तमुत्पाट्या°).

शान्तेऽथ संग्रामापीडे कनीयान् वप्पियात्मजः ।
राजा श्रीमाञ्जयापीडः प्राप राज्यं ततः क्रमात् ॥ ४०२ ॥

पितामहसमो भूयादित्यमात्यवचः स्मरन् ।
जिगीषुः संभृतबलो दिग्जयाय स निर्ययौ ॥ ४०३ ॥

स्वदेशादेव नयविद्भिशं नीतैः समं नृपैः ।
वृद्धान्पप्रच्छ निर्गच्छन् कश्मीरद्वारगोचरान् ॥ ४०४ ॥

पितामहस्य नः सैन्यं कियन्निर्गच्छतोऽभवत् ।
इति ब्रूताद्य यात्रासु यूयं संख्यातसैनिकाः ॥ ४०५ ॥

कृतस्मितास्तमूचुस्ते किं प्रश्नेनामुना प्रभो ।
वस्तु कश्चिदतिक्रान्तं नानुकर्तुं क्षमोऽधुना ॥ ४०६ ॥

कर्णीरथानां तस्यासीत् सपादं लक्षमीशितुः ।
अशीतिस्तु सहस्राणि देवस्याद्य जयोद्यमे ॥ ४०७ ॥

तदाकर्ण्य जयापीडो बहु मेने न निर्जयम् ।
क्षिप्रं क्षितेः संकुचन्त्याः कालस्य बलवत्तया ॥ ४०८ ॥

जिगीषोः क्ष्माभुजस्तस्य भावमालोक्य तादृशम् ।
दध्युर्भावज्ञतां वृद्धा ललितादित्यभूपतेः ॥ ४०९ ॥

तस्य दूरप्रयातस्य स्यालो जज्जाभिधो बलात् ।
द्रोहेणाऽऽक्रम्य कश्मीरान् स्वयं भेजे नृपासनम् ॥ ४१० ॥

दिने दिने राजसैन्यात् स्वदेशस्मारिणस्ततः ।
सैनिकाः संन्यवर्तन्त स्वामिभक्तिपराङ्मुखाः ॥ ४११ ॥

---

402. d) $I_{1,4,7}$ प्राप्तराज्यः (for प्राप राज्यं).

403. ab) D भूया इत्य° (for भूयादित्य°).

410. b) T श्यालो (for स्यालो). P_{1-3} I_3 जज्ञा° (for जज्जा°).

411. c) D C T P_{1-3} $I_{1,2,4,7}$ S′ V SA_1 स्वा न्य° (for संन्य°).

प्रख्यापयिष्यन्स्वामेव शक्तिं परिकरं विना ।
निश्चिकाय जयापीडो युक्तां कांचित्तु संविदम् ॥ ४१२ ॥

अभङ्गुरास्तेऽभिमानास्तस्यैवासन् मनस्विनः ।
अत्यवर्तत यैरेष वैधात्रीरपि वामताः ॥ ४१३ ॥

स विसृज्य भुवं स्वां स्वां भूपतीननुयात्रिकान् ।
प्रयागमगमत्सैन्यैः परिमेयैर्निजैः समम् ॥ ४१४ ॥

तत्रावशिष्टानुच्चित्य वाजिनः स मनोजवान् ।
द्विजेभ्यो लक्षमेकोनं प्रददौ भूरिदक्षिणम् ॥ ४१५ ॥

संपूर्णमन्यो लक्षं यः प्रदद्यादत्र वाजिनाम् ।
तन्मुद्रयेयं मन्मुद्रा विनिवार्येत्युदीर्य च ॥ ४१६ ॥

श्रीजयापीडदेवस्येत्यक्षरैरुपलक्षिताम् ।
दिग्देशगामिनो मुद्रां गाङ्गस्य पयसो ददौ ॥ ४१७ ॥

तन्मुद्राङ्कं पयः पीत्वा गाङ्गमद्यापि निर्मलम् ।
चित्ते प्रवर्धते तापो भूपानामभिमानिनाम् ॥ ४१८ ॥

स्वदेशगमनानुज्ञां सैन्यस्यात्तमुखेन सः ।
दत्त्वा निशायामेकाकी निर्ययौ कटकान्तरात् ॥ ४१९ ॥

बभ्राम स्थानमन्विष्यन् प्रतापाख्यापनोचितम् ।
मण्डलेषु नरेन्द्राणां पयोदानामिवार्यमा ॥ ४२० ॥

गौडराजाश्रयं गुप्तं जयन्ताख्येन भूभुजा ।
प्रविवेश क्रमेणाथ नगरं पौण्ड्रवर्धनम् ॥ ४२१ ॥

---

413. c) $I_{1,4,7}$ C V S′ अभ्य° (for अत्य°). $I_{1,2,4}$ °वर्तन्त (for °वर्तत).
415. a) D °न्नुच्चित्य; T C S′ °न्निश्चित्य (for °नुच्चित्य).
419. b) SA_1 (before corr.) °प्तसुखोथ (for °प्तमुखेन). —c) SA_1 (before corr.) कृत्वा (for दत्त्वा).
420. ab) All Mss. except SL om. *ab*. St Tr. suggests बभ्राम for बद्धाम found in SL.

तस्मिन् सौराज्यरम्याभिः प्रीतः पौरविभूतिभिः ।
लास्यं स द्रष्टुमविशत् कार्त्तिकेयनिकेतनम् ॥ ४२२ ॥

भरतानुगमालक्ष्य नृत्तगीतादि शास्त्रवित् ।
ततो देवगृहद्वारशिलामध्यास्त स क्षणम् ॥ ४२३ ॥

तेजोविशेषचकितैर्जनैः परिहृतान्तिकम् ।
नर्तकी कमला नाम कान्तिमन्तं ददर्श तम् ॥ ४२४ ॥

असामान्याकृतेः पुंसः सा ददर्श सविस्मया ।
अंसपृष्ठेन धावन्तं करं तस्यान्तरान्तरा ॥ ४२५ ॥

अचिन्तयत्ततो गूढं चरन्नेष भवेद् ध्रुवम् ।
राजा वा राजपुत्रो वा लोकोत्तरकुलोद्भवः ॥ ४२६ ॥

एवं ग्रहीतुमभ्यासः पृष्ठस्थाः पर्णवीटिकाः ।
अंसपृष्ठेन येनायं लसत्पाणिः प्रतिक्षणम् ॥ ४२७ ॥

लोलश्रोत्रपुटो मदोत्कमधुपापातात्ययेऽपि द्विपः
सिंहोऽसत्यपि पृष्ठतः करिकुले व्यावृत्य विप्रेक्षिता ।
मेघौन्मुख्यशमेऽप्यशान्तवदनोद्गीर्णस्वरो बर्हिण-
श्चेष्टानां विरमेन्न हेतुविगमेऽप्यभ्यासदीर्घा स्थितिः ॥४२८॥

इत्यन्तश्चिन्तयन्ती सा कृत्वा संक्रान्तसंविदम् ।
सखीमभिन्नहृदयां विससर्ज तदन्तिकम् ॥ ४२९ ॥

प्राग्वत्पृष्ठं गते पाणौ पूगखण्डांस्तयाऽर्पितान् ।
वक्त्रे क्षिपञ् जयापीडः परिवृत्त्य ददर्श ताम् ॥ ४३० ॥

भ्रूसंज्ञयाऽसि कस्य त्वं पृष्टाया इति सुभ्रुवः ।
ददत्या वीटिकास्तस्या वृत्तान्तमुपलब्धवान् ॥ ४३१ ॥

---

422. a) St $P_{2,3}$ I_3 SA_3 यस्मि° (for तस्मि°). —b) $I_{1-4,7}$ V $P_{1,2}$ SA_1 (before corr.) प्रीतिं (for प्रीतः).

425. c) D SA_3 °पृष्ठेथ (for °पृष्ठेन).

427. a) SA_3 नूनं (for एवं). P_2 S′ SA गृहीतु° (for ग्रहीतु°). —d) SA_3 P_3 धावत्पाणः (for लसत्पाणिः).

431. c) SA_1 $I_{1,2,4,7}$ S′ V C T $P_{1,2}$ ददन्त्या (for ददत्या).

तया जनितदाक्षिण्यस्तैस्तैर्मधुरभाषितैः ।
सख्याः समाप्तनृत्ताया निन्ये स वसतिं शनैः ॥ ४३२ ॥

अग्राम्यपेशलालापा तथा तं सा विलासिनी ।
उपाचरत्परार्ध्यश्रीः सोऽप्यभूद्विस्मितो यथा ॥ ४३३ ॥

ततः शशाङ्कधवले संजाते रजनीमुखे ।
पाणिनाऽऽलम्ब्य भूपालं शय्यावेश्म विवेश सा ॥ ४३४ ॥

ततः काञ्चनपर्यङ्कशायी मैरेयमत्तया ।
तयाऽर्थितोऽपि शिथिलं विदधे नाधरांशुकम् ॥ ४३५ ॥

प्रवेशयन्निव बृहद्वक्षस्तां सत्रपां ततः ।
दीर्घबाहुः समाश्लिष्य स शनैरिदमब्रवीत् ॥ ४३६ ॥

न त्वं पद्मपलाशाक्षि न मे हृदयहारिणी ।
किं तु कालानुरोधोऽयं सापराधं करोति माम् ॥ ४३७ ॥

दासस्तवायं कल्याणि गुणैः क्रीतोऽस्म्यकृत्रिमैः ।
अचिराज्ज्ञातवृत्तान्ता ध्रुवं दाक्षिण्यमेष्यसि ॥ ४३८ ॥

कार्यशेषमनिष्पाद्य सज्जं मानिनि कंचन ।
अभोगे कृतसंकल्पं सुखानां त्वमवेहि माम् ॥ ४३९ ॥

तामेवमुक्त्वा पर्यङ्कं साङ्गुलीयेन पाणिना ।
वादयन्निव निःश्वस्य श्लोकमेतं पपाठ सः ॥ ४४० ॥

'असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः ॥' ४४१ ॥

श्लोकेनात्मगतं तेन पठितेन महीभुजा ।
सा कलाकुशलाऽज्ञासीन्महान्तं कंचिदेव तम् ॥ ४४२ ॥

---

432. d) $I_{1,2,7}$ V सु°; I_4 SA_1 (before corr.) स्व° (for स).
438. a) P_2 °वाये (for °वायं). —c) C S′ °ज्जात° (for °ज्ज्ञात°).
440. c) SA_3 कथयन्निव (for वादयन्निव). P_3 om. *v.* 440*d*—441*a*.
441. c) $I_{1,2,4,7}$ V S′ C T °त्सर्वं; SA_1 °चित्रं (for °कृत्स्नं).

गन्तुकामं च तं प्रातर्नृपं प्रणयिनी बलात् ।
अर्थयित्वा चिरं कालमप्रस्थानमयाचत ॥ ४४३ ॥

एकदा वन्दितुं संध्यां प्रयातः सरितस्तटम् ।
चिरायातो गृहं तस्या ददर्श भृशविह्वलम् ॥ ४४४ ॥

किमेतदिति पृष्टाऽथ तमूचे सा शुचिस्मिता ।
सिंहोऽत्र सुमहान् रात्रौ निपत्याहन्ति देहिनः ॥ ४४५ ॥

नरनागाश्वसंहारः कृतस्तेन दिने दिने ।
त्वय्यभूवं चिरायाते तद्भयेन समाकुला ॥ ४४६ ॥

राजानो राजपुत्रा वा तद्भयेन विसूत्रिताः ।
गृहेभ्यो नात्र निर्यान्ति प्रवृत्ते क्षणदाक्षणे ॥ ४४७ ॥

तामिति ब्रुवतीं मुग्धां निषिध्य च विहस्य च ।
सव्रीड इव तां रात्रिं जयापीडोऽत्यवाहयत् ॥ ४४८ ॥

अपरेद्युर्दिनापाये निर्गतो नगरान्तरात् ।
सिंहागमप्रतीक्षोऽभून्महावटतरोरधः ॥ ४४९ ॥

अदृश्यत ततो दूरादुत्फुल्लबकुलच्छविः ।
अट्टहासः कृतान्तस्य संचारीव मृगाधिपः ॥ ४५० ॥

अध्वनाऽन्येन यान्तं तमथ मन्थरगामिनम् ।
राजसिंहो नदन् सिंहं समाह्वयत हेलया ॥ ४५१ ॥

स्तब्धश्रोत्रो व्यात्तवक्त्रः कम्प्रकूर्चः प्रदीप्तदृक् ।
उदस्तपूर्वकायस्तं सगर्जः समुपाद्रवत् ॥ ४५२ ॥

---

443. c) SA_3 मितं (for चिरं).

444. b) SA_3 स सरित्तटम् (for सरितस्तटम्). —d) SA_1 (after corr.) °विह्वलाम् (for °विह्वलम्).

446. c) C T S' त्वया दूरं (for त्वय्यभूवं).

448. a) SA_1 (before corr.) ब्रुवतां (for ब्रुवतीं).

451. c) SA_1 (before corr.) राजसिंहं (for राजसिंहो).

452. b) SA_1 (before corr.) कम्प° (for कम्प्र°).

तस्य न्यस्याननविले कफोणिं पततः क्रुधा ।
क्षिप्रकारी जयापीडो वक्षः क्षुरिकयाऽभिनत् ॥ ४५३ ॥

शोणितं जग्धगन्धेभसिन्दूराभं विमुञ्चता ।
एकप्रहारभिन्नेन तेनात्यज्यत जीवितम् ॥ ४५४ ॥

आमुक्तव्रणपट्टः स कफोणिमथ गोपयन् ।
प्रविश्य नर्तकीवेश्म निशि सुष्वाप पूर्ववत् ॥ ४५५ ॥

प्रभातायां विभावर्यां श्रुत्वा सिंहं हतं नृपः ।
प्रहृष्टः कौतुकाद् द्रष्टुं जयन्तो निर्ययौ स्वयम् ॥ ४५६ ॥

स दृष्ट्वा तं महाकायमेकप्रहृतिसंहृतम् ।
साश्चर्यो निश्चयान्मेने प्रहर्तारममानुषम् ॥ ४५७ ॥

तस्य दन्तान्तरालुब्धं केयूरं पार्श्वगार्पितम् ।
श्रीजयापीडनामाङ्कं ददर्शाऽथ सविस्मयः ॥ ४५८ ॥

स्यात्कुतोऽत्र स भूपाल इति ब्रुवति पार्थिवे ।
जयापीडागमाशङ्कि पुरमासीद्भयाकुलम् ॥ ४५९ ॥

ततः पौरान् विमृश्यैवं जयन्तः क्षितिपोऽब्रवीत् ।
प्रहर्षावसरे मूढाः कस्माद्वो भयसंभवः ॥ ४६० ॥

श्रूयते हि जयापीडो राजा भुजबलोर्जितः ।
केनापि हेतुना भ्राम्यन्नेकाक्येव दिगन्तरे ॥ ४६१ ॥

राजपुत्रः कल्लट इत्युक्त्वा, कल्याणदेव्यसौ ।
तस्मै नियमिता दातुं निष्पुत्रेण सुता मया ॥ ४६२ ॥

सोऽन्वेष्यश्चेत्स्वयं प्राप्तस्तद्रत्नाहरणेच्छया ।
रत्नद्वीपं प्रतिष्ठासोर्निधानासादनं गृहात् ॥ ४६३ ॥

अस्मिन्नेव पुरे तेन भाव्यं भुवनशासिना ।
ब्रूयादेनं ममाऽन्विष्य योऽस्मै दद्यामभीप्सितम् ॥ ४६४ ॥

---

460. d) P_3 भयमागतम् (for भयसंभवः).
462. b) SA S′ $I_{3,7}$ St इत्युक्ता (for इत्युक्त्वा). —d) D (before suggestion) and all other Mss. read सता (for suggested सुता).
464. c) $I_{1-3,7}$ S′ V St C T समा°; SL सम° (for ममा°). D (before suggestion) $I_{1-4,7}$ P_{1-3} C T S′ V St SA °न्वेष्य (for °न्विष्य).

वाचि सप्रत्ययाः पौरा भूपतेः सत्यवादिनः ।
अन्विष्य कमलावासवर्तिनं तं न्यवेदयन् ॥ ४६५ ॥

सामात्यान्तःपुरोऽभ्येत्य प्रयत्नेन प्रसाद्य तम् ।
ततः स्ववेश्म नृपतिर्निनाय विहितोत्सवः ॥ ४६६ ॥

कल्याणदेव्यास्तेनाथ कल्याणाभिनिवेशिना ।
राजलक्ष्म्या व्यपास्ताया इव सोऽजिग्रहत्करम् ॥ ४६७ ॥

व्यधाद्विनाऽपि सामग्रीं तत्र शक्तिं प्रकाशयन् ।
पश्च गौडाधिपाञ्जित्वा श्वशुरं तदधीश्वरम् ॥ ४६८ ॥

गतशेषं प्रभुत्यक्तं सैन्यं संवाहयन्स्थितः ।
मित्रशर्मात्मजो देवशर्माऽमात्यस्तमाययौ ॥ ४६९ ॥

निजदेशं प्रति ततः स प्रतस्थे तदर्थितः ।
अग्रे जयश्रियं कुर्वन् पश्चात्ते च सुलोचने ॥ ४७० ॥

सिंहासनं जितादाजौ कन्यकुब्जमहीभुजः ।
स राज्यककुदं राजा जहारोदारपौरुषः ॥ ४७१ ॥

तस्मिन् प्रविष्टे स्वभुवं स्फूर्जदूर्जितविक्रमे ।
सैन्यैः समं समित्सज्जैर् जज्जो योद्धुं विनिर्ययौ ॥ ४७२ ॥

शुष्कलेत्राभिधे ग्रामे तेन सार्धं सुदारुणः ।
जयापीडस्य संग्रामः सुबहूनि दिनान्यभूत् ॥ ४७३ ॥

अनुरक्तप्रजो राजा जज्जराज्यासहिष्णुभिः ।
युधि सोऽन्वीयमानोऽभूद् ग्राम्याटविकमण्डलैः ॥ ४७४ ॥

साहायकाय राज्ञोऽहं यामीत्युक्त्वार्थिताशनः ।
मातुर्हसन्त्या जज्जस्य प्रतिज्ञायाऽऽययौ वधम् ॥ ४७५ ॥

---

467. P_2 om. *ab*.

470. d) All Mss. read तेऽथ (for suggested ते च).

471. a) SA_1 °दादौ (for °दाजौ).

474. c) D (before suggestion) $I_{1-4,7}$ P_{1-3} C T S′ V SA_1 सोन्विष्यमानो° (for सोऽन्वीयमानो°).

475. This *v.* is found as *v.* 478 in St D C T SA_1 P_{1-3} I_7 S′ by transposition. b) $I_{1,2,4,7}$ $P_{1,2}$ C S′ V SA_1 °हिताशनः (for °र्थिताशनः).

श्रीदेवो ग्रामचण्डालः प्राप्तो ग्राम्यैः समं युधि ।
कोऽत्र जज्ज इति भ्राम्यन् योधान्पप्रच्छ सर्वतः ॥ ४७६ ॥

तृष्णार्तं स्वर्णभृङ्गारात् पिबन्तं वारि तस्य ते ।
रणमध्ये हयारूढं तं दूरात्समदर्शयन् ॥ ४७७ ॥

भ्रमयन्क्षेपणीयं स क्षिप्त्वाऽश्मानं तदानने ।
सोऽयं हतो मया जज्ज इत्यमोघक्रियोऽनदत् ॥ ४७८ ॥

अश्मसंरुग्णभीमास्यं मुमूर्षुं पतितं हयात् ।
विवेष्टमानं मेदिन्यां जज्जं त्यक्त्वा ययुर्निजाः ॥ ४७९ ॥

स समर्थाहितापातचिन्तासततदुःस्थितः ।
द्रोहार्जितेन राज्येन त्रिभिर्वर्षैर्व्ययुज्यत ॥ ४८० ॥

न्यासापहाराद्वणिजां वेश्यानां कामिवञ्चनात् ।
द्रोहाच्चोपनता राज्ञाम् अस्थिरा एव संपदः ॥ ४८१ ॥

हते जज्जे जयापीडः प्रत्यावृत्य निजां श्रियम् ।
जग्राह दोष्णा भूभारं कृत्येन च सतां मनः ॥ ४८२ ॥

प्रपेदे यत्र कल्याणं स विरोधिवधान्नृपः ।
देशे कल्याणपुरकृत्तत्र कल्याणदेव्यभूत् ॥ ४८३ ॥

राजा मल्हाणपुरकृच्चक्रे विपुलकेशवम् ।
कमला सा स्वनाम्नाऽपि कमलाख्यं पुरं व्यधात् ॥ ४८४ ॥

---

479. a) SA_3 °संरोध°; I_1 °संहर° (for °संरुग्ण°). —c) T विचेष्ट° (for विवेष्ट°).

480. c) D (before suggestion) $I_{1,2,4,7}$ C T S′ V P_{1-3} SA_1 °ज्जितेन (for °जितेन).

481. c) SA_1 (before corr.) °च्चोपहता (for °च्चोपनता).

483. $P_{1,2}$ om. *v.* 483*d*—484*a*.

484. a) SA_1 gloss मलरो इति भाषया (for मल्हाणपुर°). —b) $P_{1,2}$ SA_1 विरलके°; SA_3 मरलके° (for विपुलके°). —c) SA_1 (before corr.) स्वा (for सा). —d) SA_2 gloss कलमपुरं (for कमलाख्यं पुरं).

महाप्रतीहारपीडाधिकारं प्रतिपद्य सः ।
कल्याणदेवीं दाक्षिण्यादकरोदधिकोन्नताम् ॥ ४८५ ॥

उत्पत्तिभूमौ देशेऽस्मिन् दूरदूरतिरोहिता ।
कश्यपेन वितस्तेव तेन विद्याऽवतारिता ॥ ४८६ ॥

वचोमूर्खोऽयमित्येव कस्मैचिद् वदते स्फुटम् ।
सर्वज्ञानं ददच्चक्रे सर्वान् विद्याभियोगिनः ॥ ४८७ ॥

देशान्तरादागमय्य व्याचक्षाणान् क्षमापतिः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥ ४८८ ॥

क्षीराभिधाच्छब्दविद्योपाध्यायात् संभृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥ ४८९ ॥

भूपतेरात्मना स्पर्धां चक्षमे न स कस्यचित् ।
आत्मनस्तु बुधैः स्पर्धां शुद्धधीर्बह्वमन्यत ॥ ४९० ॥

तावत्पण्डितशब्देऽभूद्राजशब्दादपि प्रथा ।
तैस्तैर्दोषैर्न तु म्लानिं कालान्तरवदाययौ ॥ ४९१ ॥

नृपतौ विद्वदायत्ते राजसांमुख्यकाङ्क्षिभिः ।
गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः ॥ ४९२ ॥

---

485. ab) P_1 SA_1 (before corr.) °पडाधि°; $I_{1-4,7}$ CT S′ VSt °पीठाधि° (for °पीडाधि°). cf. *v* IV. 142. —b) प्रतिपाद्य is suggested (for प्रतिपद्य). —c) D C T S′ V St SA_1 SL $I_{1-4,7}$ P_{1-3} देवी° (for देवीं). —d) D C T S′ V St SA_1 SL $I_{1-4,7}$ P_{1-3} °कोन्नतिम् (for °कोन्नताम्).

486. b) SA P_1 °हितौ (for °हिता).

487. c) St P_{1-3} I_3 SA_3 सर्वज्ञानान्ददश्चक्रे; SA_1 om. र्वज्ञाना with a space; $I_{1,2,7}$ V नासहद्बहुधश्चक्रे; SL नामहद्बहदच्चक्रे (for सर्वज्ञानं ददच्चक्रे). —d) P_2 °वियोगिनः (for °भियोगिनः).

488. b) D $I_{1-4,7}$ C P_{1-3} S′ V SA_1 व्यांचक्षाणः (for व्याचक्षाणान्).

490. a) $I_{1,2,4,7}$ V S′ भूपतिरात्मनः (for भूपतेरात्मना). —c) P_3 सार्धं (for स्पर्धां).

492. b) SA_1 (before corr.) $I_{1,2,4,7}$ C T S′ P_2 राज्य° (for राज°).

श्रीदेवो ग्रामचण्डालः प्राप्तो ग्राम्यैः समं युधि ।
कोऽत्र जज्ज इति भ्राम्यन् योधान्पप्रच्छ सर्वतः ॥ ४७६ ॥

तृष्णार्तं स्वर्णभृङ्गारात् पिबन्तं वारि तस्य ते ।
रणमध्ये हयारूढं तं दूरात्समदर्शयन् ॥ ४७७ ॥

भ्रमयन्क्षेपणीयं स क्षिप्त्वाऽश्मानं तदानने ।
सोऽयं हतो मया जज्ज इत्यमोघक्रियोऽनदत् ॥ ४७८ ॥

अश्मसंरुग्णभीमास्यं मुमूर्षुं पतितं हयात् ।
विवेष्टमानं मेदिन्यां जज्जं त्यक्त्वा ययुर्निजाः ॥ ४७९ ॥

स समर्थाहितापातचिन्तासततदुःस्थितः ।
द्रोहार्जितेन राज्येन त्रिभिर्वर्षैर्व्ययुज्यत ॥ ४८० ॥

न्यासापहाराद्वणिजां वेश्यानां कामिवञ्चनात् ।
द्रोहाच्चोपनता राज्ञाम् अस्थिरा एव संपदः ॥ ४८१ ॥

हते जज्जे जयापीडः प्रत्यावृत्य निजां श्रियम् ।
जग्राह दोष्णा भूभारं कृत्येन च सतां मनः ॥ ४८२ ॥

प्रपेदे यत्र कल्याणं स विरोधिवधान्नृपः ।
देशे कल्याणपुरकृत्तत्र कल्याणदेव्यभूत् ॥ ४८३ ॥

राजा मल्हाणपुरकृच्चक्रे विपुलकेशवम् ।
कमला सा स्वनाम्नाऽपि कमलाख्यं पुरं व्यधात् ॥ ४८४ ॥

---

479. a) SA_3 °संरोध°; I_1 °संहर° (for °संरुग्ण°). —c) T विचेष्ट° (for विवेष्ट°).

480. c) D (before suggestion) $I_{1,2,4,7}$ C T S′ V P_{1-3} SA_1 °ज्जितेन (for °जितेन).

481. c) SA_1 (before corr.) °च्चोपहता (for °च्चोपनता).

483. $P_{1,2}$ om. *v.* 483*d*—484*a*.

484. a) SA_1 gloss मलरो इति भाषया (for मल्हाणपुर°). —b) $P_{1,2}$ SA_1 विरलके°; SA_3 मरलके° (for विपुलके°). —c) SA_1 (before corr.) स्वा (for सा). —d) SA_2 gloss कलमपुरं (for कमलाख्यं पुरं).

महाप्रतीहारपीडाधिकारं प्रतिपद्य सः ।
कल्याणदेवीं दाक्षिण्यादकरोदधिकोन्नताम् ॥ ४८५ ॥

उत्पत्तिभूमौ देशेऽस्मिन् दूरदूरतिरोहिता ।
कश्यपेन वितस्तेव तेन विद्याऽवतारिता ॥ ४८६ ॥

वचोमूर्खोऽयमित्येव कस्मैचिद् वदते स्फुटम् ।
सर्वज्ञानं ददच्चक्रे सर्वान् विद्याभियोगिनः ॥ ४८७ ॥

देशान्तरादागमय्य व्याचक्षाणान् क्षमापतिः ।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥ ४८८ ॥

क्षीराभिधाच्छब्दविद्योपाध्यायात् संभृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥ ४८९ ॥

भूपतेरात्मना स्पर्धां चक्षमे न स कस्यचित् ।
आत्मनस्तु बुधैः स्पर्धां शुद्धधीर्बह्वमन्यत ॥ ४९० ॥

तावत्पण्डितशब्देऽभूद्राजशब्दादपि प्रथा ।
तैस्तैर्दोषैर्न तु म्लानिं कालान्तरवदाययौ ॥ ४९१ ॥

नृपतौ विद्वदायत्ते राजसांमुख्यकाङ्क्षिभिः ।
गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः ॥ ४९२ ॥

---

485. ab) P_1 SA_1 (before corr.) °पडाधि°; $I_{1-4,7}$ CT S′ VSt °पीठाधि° (for °पीडाधि°). cf. *v* IV. 142. —b) प्रतिपाद्य is suggested (for प्रतिपद्य). —c) D C T S′ V St SA_1 SL $I_{1-4,7}$ P_{1-3} देवी° (for देवीं). —d) D C T S′ V St SA_1 SL $I_{1-4,7}$ P_{1-3} °कोन्नतिम् (for °कोन्नताम्).

486. b) SA P_1 °हितौ (for °हिता).

487. c) St P_{1-3} I_3 SA_3 सर्वज्ञानान्ददश्चक्रे; SA_1 om. र्वज्ञाना with a space; $I_{1,2,7}$ V नासहद्वहुधश्चक्रे; SL नामहद्वहदच्चक्रे (for सर्वज्ञानं ददच्चक्रे). —d) P_2 °वियोगिनः (for °भियोगिनः).

488. b) D $I_{1-4,7}$ C P_{1-3} S′ V SA_1 व्यांचक्षाणः (for व्याचक्षाणान्).

490. a) $I_{1,2,4,7}$ V S′ भूपतिरात्मनः (for भूपतेरात्मना). —c) P_3 सार्धं (for स्पर्धां).

492. b) SA_1 (before corr.) $I_{1,2,4,7}$ C T S′ P_2 राज्य° (for राज°).

समग्रहीत्तथा राजा सोऽन्विष्य निखिलान् बुधान् ।
विद्वद्दुर्भिक्षमभवद् यथाऽन्यनृपमण्डले ॥ ४९३ ॥

अध्यक्षो भक्तशालायां शुकदन्तस्य मन्त्रिणः ।
विद्वत्तया थक्कियाख्यस्तेन स्वीकृत्य वर्धितः ॥ ४९४ ॥

विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः ।
भट्टोऽभूद् उद्भटस्तस्य भूमिभर्तुः सभापतिः ॥ ४९५ ॥

स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम् ।
कविं कविं बलिरिव धुर्यं धीसचिवं व्यधात् ॥ ४९६ ॥

मनोरथः शङ्खदन्तश्चटकः संधिमांस्तथा ।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः ॥ ४९७ ॥

स स्वप्ने पश्चिमाशायां लक्षयन्नुदयं रवेः ।
देशे धर्मोत्तराचार्यं प्रविष्टं साध्वमन्यत ॥ ४९८ ॥

सचेताः संस्तवव्यक्तविवेकृत्वो बभूव सः ।
भावानां भुज्यमानानामास्वादान्तरविन्नृपः ॥ ४९९ ॥

अपश्यद्भिर्महास्वादान् भावान् स्वाद्वविवेकिभिः ।
किं ज्ञेयमशनादन्यत् क्षमापैरन्धैरिवोक्षभिः ॥ ५०० ॥

---

493. b) D C T S′ V I_3 $P_{1,3}$ °ष्यन्नि° (for °ष्य नि°).
494. c) $I_{1,2,4,7}$ T S′ थक्कि°; SA_1 (before corr.) थाक्क° (for थक्कि°).
495. c) SA_2 gloss भट्टोद्भट आलङ्कारिक (for उद्भटः).
496. b) SA_3 °कारणम् (for °कारिणम्).
498. a) SA_1 $I_{1,2,4,7}$ T S′ V P_3 सुस्वप्नं; C सुस्वप्ने; $P_{1,2}$ I_3 स स्वप्नं (for स स्वप्ने). I_4 om. *v.* 498*c*—499*a*. —c) D T P_{1-3} I_3 देशं (for देशे). $I_{1,2,7}$ C T S′ °चार्य°; D P_{1-3} I_3 V SA_1 °चार्ये (for °चार्यं). SA_3 marg. देशे धर्मोत्तराचार्यमित्यन्यादर्शे. —d) D प्रविष्टे (for प्रविष्टं).
499. a) $I_{1,2,7}$ V सचेतः (for सचेताः). —b) $I_{1-3,7}$ S′ C T St $P_{1,3}$ SA °विवक्तृत्वो (for °विवेक्तृत्वो).
500. b) D (before suggestion) $I_{1-4,7}$ C T P_{1-3} S′ V SA St स्वादुवि° (for स्वाद्वि°). —d) SA_1 (before corr.) °रन्यै° (for °रन्धै°).

आरूढस्य चितां कृतानुमरणोद्योगप्रियालिङ्गनं
पुण्ड्रेक्षुद्रवपानमुल्वणमहामोहप्रलुप्तस्मृतेः ।
वीतासोरवतंसमाल्यवलयामोदश्च यादृग्भवे-
द्भावानां सुभगः स्वभावमहिमा निश्चेतसस्तादृशः ॥ ५०१ ॥

मन्त्रविक्रमयोस्तस्य द्वयोर्दर्पणयोरिव ।
एकैव बिम्बिता मूर्तिः सहस्रगुणतां ययौ ॥ ५०२ ॥

आंकुर्वन् विगुणामाज्ञां लङ्केन्द्रात्पश्च राक्षसान् ।
तेनाऽऽनयेति जगदे दूतो जातु पुरः स्थितः ॥ ५०३ ॥

सांधिविग्रहिकः सोऽथ गच्छन्पोताच्च्युतोऽम्बुधौ ।
प्राप पारं तिमिग्रासं तिमिमुत्पाट्य निर्गतः ॥ ५०४ ॥

प्रियमर्त्यो रामभक्त्या नृपाज्ञालेखदायिनम् ।
स्वदेशमनयद्वित्तै रत्नोभिस्तं विभीषणः ॥ ५०५ ॥

दूतं वित्तैः पूरयित्वा सरोऽगाधं च राक्षसैः ।
चक्रे जयपुरं कोट्टं त्रिविष्टपसमं नृपः ॥ ५०६ ॥

बुद्धत्रयं महाकारं विहारं च विधाय सः ।
नगरान्तर्जयादेवीं पुण्यकर्मा स निर्ममे ॥ ५०७ ॥

तत्पुरे चतुरात्मा च शेषशायी च केशवः ।
विष्णुलोकस्थितिं त्यक्त्वा ध्रुवं बध्नाति संनिधिम् ॥ ५०८ ॥

---

501. a) SA_2 marg. आरूढस्येत्यादिस्थाने षण्ढस्योन्मदबालपङ्कजमुखीपीनस्तनालिङ्गनमित्यपि पाठो रम्यः.

502. c) C T विदिता (for बिम्बिता).

503. a) D C T S′ V $I_{1,2,7}$ SA_1 (before corr.) अकुर्वन् (for आंकुर्वन्). SA_2 gloss विगुणामपि आज्ञामांकुर्वन् । आम् अङ्गीकारे; SA_3 inserts into अकुर्वन् विगुणामित्यन्यादर्शे with a gloss marg. दूतः किं कुर्वन् आज्ञां राजसंबन्धिनीं विगुणां निष्फलामकुर्वन् न विरचयन् मानयन्नाज्ञामित्यर्थः. —b) P_2 SA_1 (before corr.) लङ्केन्द्रान्प° (for लङ्केन्द्रात्प°).

504. a) SA_1 (before corr.) °ग्रहकः (for °ग्रहिकः).

507. a) $I_{1,4,7}$ S′ C पुर° (for बुद्ध°).

अन्यत्कर्मान्तरं किंचित्कारयित्वा स राक्षसान् ।
प्यधात्कारुभिरेवाम्भ इति शंसन्ति केचन ॥ ५०९ ॥

स हि स्वप्ने जलान्तर्मे कुरु द्वारवतीमिति ।
उक्तः कंसारिणा चक्रे विनिर्माणं तथाविधम् ॥ ५१० ॥

श्रीद्वारवत्यधिष्ठानं बाह्यं कोट्टं तथा ह्यसौ ।
अभ्यन्तरं जयपुरं ब्रूतेऽद्याप्यखिलो जनः ॥ ५११ ॥

मन्त्री पञ्चमहाशब्दभाजनं जगतीभुजः ।
तस्मिञ् जयपुरे कोट्टे जयदत्तो व्यधान्मठम् ॥ ५१२ ॥

राजक्षत्तुः प्रमोदस्य जामाता मथुरापतेः ।
आचाभिधो व्यरचयच्छुचिराऽऽचेश्वरं हरम् ॥ ५१३ ॥

पुनः संभृतसामग्र्यो दिग्जयाय विनिर्ययौ ।
बलैर्जलधिवेलाद्रीन् द्राघयन्नलघुद्विपैः ॥ ५१४ ॥

संप्रविष्टाऽपि पूर्वाब्धिमविच्छिन्ना हिमाचले ।
भगीरथस्य गङ्गेव रेजे तस्यानुगा चमूः ॥ ५१५ ॥

सार्धं प्रचण्डैश्चण्डालैरटन्तः कटकाद्बहिः ।
तस्यासन् यामिका रात्रौ मुम्मुनिप्रमुखा नृपाः ॥ ५१६ ॥

नामान्यद् विनयादित्य इति प्रख्यापयन्नृपः ।
पूर्वाशां विनयादित्यपुरेणालंकृतां व्यधात् ॥ ५१७ ॥

अत्युत्सेकेन सहसा साहसाध्यवसायिनाम् ।
श्रीरारोहति संदेहं महतामपि भूभृताम् ॥ ५१८ ॥

---

511. b) C S′ राज्यं (for बाह्यं). —c) SA gloss अन्दर्कोट् इति भाषया (for अभ्यन्तरं).
513. b) SA_1 (before corr.) I_3 मधुरा° (for मथुरा°).
515. a) $I_{1,2,4,7}$ S′ V SA_1 (before corr.) पूर्वाद्रि° (for पूर्वाब्धि°).
516. d) D C T V $I_{1,2,7}$ P_{1-3} सुम्मु°; I_3 रंमु°; I_4 सुस्म°; S′ सम्मु° (for मुम्मु°).
518. a) $I_{1,2,4,7}$ S′ V C T अभ्युत्से° (for अत्युत्से°). I_3 St SA_3 $P_{1,2}$ महसा (for सहसा). —b) $I_{1,2,7}$ S′ V C T सहसाध्यवसायिनाम् ; SA_1 (before corr.) सहसाव्यवसायिनाम् ; SA_3 gloss साहसेन हिताहितानपेक्षेण कर्मणा अध्यवसायो येषाम् (for साहसाध्यवसायिनाम्).

भीमसेनाभिधानस्य स दुर्गं पूर्वदिक्पतेः ।
निःशब्दो व्रतिभिः सार्धं व्रतिलिङ्गी विवेश यत् ॥ ५१९ ॥

तं रन्ध्रान्वेषिणं तत्र परिज्ञाय चिरस्थितः ।
भ्राता जज्जस्य सिद्धाख्यो गत्वा राज्ञे न्यवेदयत् ॥ ५२० ॥

भूपतिं भीमसेनोऽथ राजाऽकस्माद्बबन्ध तम् ।
नहुषाजगरो भीममिव भीमपराक्रमम् ॥ ५२१ ॥

तस्मिन् वीरे तथा बद्धे धुर्ये पुरुषकारिणाम् ।
पौरुषद्वेषिणा जाने दैवेनोन्नमितं शिरः ॥ ५२२ ॥

जयापीडस्त्वसंमूढो व्यसनेऽप्यतिदारुणे ।
तांस्तान् संचिन्तयन्नासीदुपायानुदयोन्मुखः ॥ ५२३ ॥

अत्रान्तरे नरपतेः पौराणामतिदुस्तरा ।
लूतामयकृता व्यापदुदपद्यत मण्डले ॥ ५२४ ॥

आमयः स्पर्शसंचारी तत्र व्यापादकश्च सः ।
देशदोषादतो जन्तुर्लूताव्याप्तो विवर्ज्यते ॥ ५२५ ॥

तदाकर्ण्य जयापीडो जातोपायप्रयुक्तधीः ।
स्वभृत्येनोपयुक्तानि द्रव्याण्यानीतवान् रहः ॥ ५२६ ॥

तैः पित्तोद्रेचकैर्भुक्तैर्ज्वलत्पित्तोऽवहज्ज्वरम् ।
वज्रवृक्षपयश्चाङ्गे क्षिप्त्वा सपिटकोऽभवत् ॥ ५२७ ॥

तं लूताव्याप्तमाकर्ण्य विपक्षो रक्षिणां मुखात् ।
विपत्स्यते ध्रुवमिति ध्यात्वा देशाद्बहिर्व्यधात् ॥ ५२८ ॥

एवं स्वमतिमाहात्म्यात्संतीर्णो विपदर्णवात् ।
व्याप्तव्योमाऽग्रहीद्दुर्गं यशश्च परिपन्थिनः ॥ ५२९ ॥

---

519. b) $I_{1,2,4,7}$ C T S′ V SA_1 °भूपतेः (for °दिक्पतेः).

521. a) $I_{1,2,4,7}$ C T S′ V SA_1 (before corr.) °तिभीं° (for °तिं भी°).

524. c) SA_2 gloss उच्छूनो रक्तवर्णः पिटकाकृतिविस्तृतः सञ्चारी च त्वचि रोगविशेष लूताख्यः लोत् इति प्रसिद्धः (for लूता°).

525. a) $I_{1,2,7}$ V सर्गसं°; SA_1 (before corr.) सर्वसं°; I_3 स्पर्धसं° (for स्पर्शसं°).

यः सर्वकालमबुधैः परिहस्यमानो
मूलाङ्कुराद्यपि न जातु पुरस्करोति ।
व्यापत्सु शास्त्रविटपी स फलं प्रसूय
पुंसः किलैकपद एव लुनात्यलक्ष्मीम् ॥ ५३० ॥

तमैच्छदभिसंधातुं विद्याविक्रमसंयुतः ।
मायाव्यरमुडिर्नाम राजा नेपालपालकः ॥ ५३१ ॥

अकृतप्रणतिस्तस्य प्रविष्टस्य स्वमण्डलम् ।
अग्रात्सुदूरमध्वानं ससैन्योऽपससार सः ॥ ५३२ ॥

जिगीषोस्तस्य तु तथा तत्तत्पार्थिवनिर्जयः ।
पृथक्प्रयत्ननिर्वर्त्यो नाभूत्तदनुसारिणः ॥ ५३३ ॥

मग्नं क्वापि क्वचिद् दृश्यं प्रतिदेशं स वैरिणम् ।
श्येनः कपोतं कक्ष्यान्तरिवाऽन्विष्यञ्जगाम सः ॥ ५३४ ॥

ततो निःशेषितापाये तस्मिन् कुर्वन्स दिग्जयम् ।
आसन्नाब्धेस्तटे सिन्धोः समुपावेशयद्बलम् ॥ ५३५ ॥

प्रतस्थे दिवसैर्द्वित्रैरथ पूर्वार्णवोन्मुखः ।
कर्षन्वेलानिलस्पर्शोत्सृष्टध्वजपटाश्रमूः ॥ ५३६ ॥

ततस्तस्मिन् सरित्पारे दक्षिणस्मिन् क्षमापतेः ।
तस्थावरमुडिः सैन्यं स्वच्छत्राङ्कं प्रकाशयन् ॥ ५३७ ॥

भूरिभेरीरवोद्गारि प्रबलं वीक्ष्य तद्बलम् ।
प्रजज्वाल जयापीडः पीतसर्पिरिवानलः ॥ ५३८ ॥

स जानुदघ्नं निर्विघ्नं पश्यन्नग्रे सरिज्जलम् ।
अपूर्वत्वादभूमिज्ञः क्रुद्धस्तर्तुं व्यगाहत ॥ ५३९ ॥

---

531. c) P_3 °व्यारमुडि° (for °व्यरमुडि°).

532. c) $P_{1,3}$ T SA_3 SG SR अगात् (for अग्रात्).

534. d) $I_{1,3,7}$ $P_{2,3}$ SA SG SR °न्वेष्यन् (for °न्विष्यन्).

537. c) SA_1 (before corr.) तस्थावुरमुडेः; C तस्थावरपुडिः; P_1 तस्थावुरमुडिः; I_2 तस्थावरमडिः (for तस्थावरमुडिः).

539. d) SA_1 (before corr.) $I_{2,7}$ T S' V °स्तंतं (for °स्तर्तुं).

मध्यं प्राप्ते नृपे पूर्णा वेलया वर्धमानया ।
अकालेऽभूदगाधाम्भाः साऽर्णवाभ्यर्णगा सरित् ॥ ५४० ॥

नरनागाश्वबहुलं तया सैन्यं महीपतेः ।
प्रवृद्धया प्लाव्यमानं क्षणात्संक्षयमाययौ ॥ ५४१ ॥

नृपतिर्वीचिसंमर्दभ्रंशिताभरणांशुकः ।
बाहुभ्यां लहरीश्छिन्दञ्जलैर्दूरमनीयत ॥ ५४२ ॥

एकस्य करुणाक्रन्दैः सैन्यस्यान्यस्य गर्जितैः ।
सरित्तरङ्गघोषैश्च बभूवुस्तुमुला दिशः ॥ ५४३ ॥

क्षिप्रकारी सदृतिभिः संनद्धैः सरितोऽन्तरात् ।
स चाकृष्य जयापीडं बबन्ध विहितोत्सवः ॥ ५४४ ॥

दैवस्याम्बुमुचश्च नास्ति नियमः कोऽप्यानुकूल्यं प्रति
व्यञ्जन् यः प्रियमुत्कटं घटयते जन्तोः क्षणादप्रियम् ।
क्षिप्रं दीर्घनिदाघवासरविपत्संतापनिर्वापणं
प्रादुष्कृत्य वनस्पतेः प्रकुरुते विद्युद्विसर्गं च यः ॥५४५॥

स कालगण्डिकातीराश्रयात्युच्चाश्मवेश्मनि ।
निचिक्षेप जयापीडमाप्तानां रक्षिणां करे ॥ ५४६ ॥

तथा काश्मीरिको राजा निमग्नो व्यसने पुनः ।
स किंकर्तव्यतामूढः शुचा गूढमदह्यत ॥ ५४७ ॥

कलावत्सु शशाङ्कोऽपि तेजस्विष्वर्यमाऽपि तम् ।
न ददर्श यथा धीमान् स ररक्ष तथा नृपः ॥ ५४८ ॥

अपश्यन्निर्गतः किंचिदालोकन्यस्तलोचनः ।
आसन्नां तटिनीमासीदुपायांश्च स चिन्तयन् ॥ ५४९ ॥

---

540. c) $I_{1,2,4,7}$ P_3 °गाधाम्भः (for °गाधाम्भाः).
541. b) $I_{1-4,7}$ T S′ V St P_{1-3} तथा (for तया).
542. a) SA_1 (before corr.) $I_{1,2,4,7}$ C V S′ °मर्म°; P_2 °मर्तृ° (for °मर्द°).
544. a) SA_2 gloss जलोत्तरणार्थं श्राहा इति प्रसिद्धा (for °दृति°).
546. cd) SA_1 (before corr.) °पीडं सप्तानां (for °पीडमाप्तानां).
549. a) T अपश्यन् निर्गं° (for अपश्यन्निर्गं°). $I_{2,4,7}$ S′ C SA_1 (before corr.) °गंतं (for °गंतः). —b) SA_3 gloss आलाक्यतेऽनेनेत्यालोकः वातायनं तस्मिन् न्यस्ते लोचने येन सः (for आलोक°). —d) P_1 om. *v.* 549*d*—550*a*.

अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा ।
आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेऽद्यापि सूरिभिः ॥ ५५० ॥

तथा तस्मिन् स्थिते मानी देवशर्मैव मन्त्रिषु ।
चिन्तयन्स्वामिसंमानमनिशं पर्यतप्यत ॥ ५५१ ॥

भर्तुः स्वदेहत्यागेन स हितं कर्तुमुद्यतः ।
दूतैररमुडेश्चक्रे प्रियवाग्भिः प्रलोभनम् ॥ ५५२ ॥

जयापीडश्रिया साकं राज्यं कश्मीरमण्डले ।
दास्यामि तुभ्यमित्यस्य दूतैः स श्रावितोऽभवत् ॥ ५५३ ॥

प्राप्तेषु प्रतिदूतेषु पूर्णायामथ संविदि ।
गृहीतकटको मन्त्री नेपालविषयं ययौ ॥ ५५४ ॥

स कालगण्डिकासिन्धोरर्वाचि कटकं तटे ।
स्थापयित्वा परं पारं ययौ मितपरिच्छदः ॥ ५५५ ॥

सामन्तैरग्रमायातैस्तं सभां संप्रवेशितम् ।
सत्कृत्याऽरमुडिः प्रह्वं न्यवेशयत विष्टरे ॥ ५५६ ॥

अध्वश्रान्त इति क्षिप्रं प्रतिमुक्तः क्षमाभुजा ।
तद्विसृष्टोपचारस्तन्निनायावसथे दिनम् ॥ ५५७ ॥

स चाऽरमुडिभूभृच्च पीतकोशौ परस्परम् ।
आसातां निर्जनेऽन्येद्युः कर्तव्यकृतनिश्चयौ ॥ ५५८ ॥

नृपमूचेऽथ सचिवो जयापीडार्जितं धनम् ।
अस्ति सैन्ये तदाप्तानां तस्य वा विदितं च तत् ॥ ५५९ ॥

---

551. a) SA_1 (before corr.) स्थितो (for स्थिते).

552. c) SA_1 (before corr.) °रारमुडेश्चक्रे; SA_1 (after corr.) P_{1-3} I_3: °रारमुडेश्चक्रे (for °ररमुडेश्चक्रे). —d) SA_1 (before corr.) °ग्भिर्विलो° (°ग्भिः प्रलो°).

553. b) P_2 I_3 काश्मी° (for कश्मी°). P_3 °मण्डलम् (for °मण्डले).

556. b) $I_{1-4,7}$ C T S′ St P_{1-3} °स्तां (for °स्तं). —c) SA_1 (before corr.) $I_{1,2,4,7}$ S′ V C °मुडे: (for °मुडिः).

557. b) D P_{1-3} SA_3 I_3 °क्षिप्तः (for °मुक्तः).

558. b) SA_2 gloss पीतकोशौ कृतद्रौहिकावित्यर्थः । द्रौहिका शपथः (for पीतकोशौ). —c) $I_{1-4,7}$ T S′ V St C $P_{2,3}$ आसतां (for आसातां).

दानेन भविता मोक्षस्तवेत्युक्त्वा विमोहयन् ।
तस्मात्तं प्रष्टुमिच्छामि क्व वसु न्यस्तमित्यहम् ॥ ५६० ॥

अत एव मया सैन्यं संहतं न प्रवेशितम् ।
यदेतन्मध्यगाः शक्या न बन्द्धुं न्यासधारिणः ॥ ५६१ ॥

तस्मादेकैकमाहूय तेषु बद्धेषु सैनिकाः ।
कोपमज्ञातहृदया न यास्यन्ति विवक्षवः ॥ ५६२ ॥

एवं विमोहितात्तस्मात् प्राज्ञोऽनुज्ञां स लब्धवान् ।
बद्धस्य प्रययौ पार्श्वं जयापीडमहीभुजः ॥ ५६३ ॥

तदालोकनजं शोकं गोपयन् धैर्यसागरः ।
गृहं तन्निर्जनं कृत्वा क्षिप्रं पप्रच्छ तं नृपम् ॥ ५६४ ॥

अपि त्वया निजं तेजो भित्तिभूतं न हारितम् ।
तस्मिन् हि सति सिध्यन्ति साहसालेख्यकल्पनाः ॥ ५६५ ॥

स तं बभाषे निश्शस्त्रो मन्त्रिन्नेवं व्यवस्थितः ।
अद्भुतं कर्म किं कुर्यां ध्रियमाणेन तेजसा ॥ ५६६ ॥

मन्त्री तमूचे तेजश्चेद्राजन्न निसृतं तव ।
जानीहि तत्क्षणेनैव लङ्घितं विपदर्णवम् ॥ ५६७ ॥

अपि वातायनादस्मात् पतित्वा निम्नगाम्भसि ।
पारं गन्तुं समर्थोऽसि सैन्यं ह्यत्र निजं तव ॥ ५६८ ॥

राजा जगाद तं नास्मात् पतित्वोत्थीयतेऽम्भसः ।
विना दृतिं दृतिश्चात्र दूरपाताद्विदीर्यते ॥ ५६९ ॥

तस्मान्नायमुपायोऽत्र न च नाम विमानितः ।
बहु मन्ये तनुत्यागमनिर्मथ्यापकारिणम् ॥ ५७० ॥

ततो निश्चित्य सोऽमात्यस्तमवादीन्महीपते ।
बहिः केनाप्युपायेन वहेस्त्वं नालिकाद्वयम् ॥ ५७१ ॥

---

561. c) $I_{1,2,4,7}$ S′ V C SA_1 (before corr.) यदि तन्म°; SA_3 gloss एतन्मध्यगाः संहतसैन्यमध्यगा इत्यर्थः (for यदेतन्मध्यगाः).
563. b) SA_1 S′ V I_{1-4} °ऽप्याज्ञां (for °ऽनुज्ञां).
564. b) $I_{1,4,7}$ S′ V SA_1 (before corr.) दर्शयन् (for गोपयन्).
571. a) SA_1 (before corr.) $I_{1,2,7}$ C T S′ V इति (for ततो). — d) $I_{1,2,4,7}$ T S′ V वह त्वं; SA_1 (before corr.) वहस्त्वं (for वहेस्त्वं). SA_3 gloss घटिकाद्वयमित्यर्थः (for नालिकाद्वयम्).

अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा ।
आर्द्रान्तःकरणैः श्लोकाः स्मर्यन्तेऽद्यापि सूरिभिः ॥ ५५० ॥

तथा तस्मिन् स्थिते मानी देवशर्मैव मन्त्रिषु ।
चिन्तयन्स्वामिसंमानमनिशं पर्यतप्यत ॥ ५५१ ॥

भर्तुः स्वदेहत्यागेन स हितं कर्तुमुद्यतः ।
दूतैररमुडेश्चक्रे प्रियवाग्भिः प्रलोभनम् ॥ ५५२ ॥

जयापीडश्रिया साकं राज्यं कश्मीरमण्डले ।
दास्यामि तुभ्यमित्यस्य दूतैः स श्रावितोऽभवत् ॥ ५५३ ॥

प्राप्तेषु प्रतिदूतेषु पूर्णायामथ संविदि ।
गृहीतकटको मन्त्री नेपालविषयं ययौ ॥ ५५४ ॥

स कालगण्डिकासिन्धोरर्वाचि कटकं तटे ।
स्थापयित्वा परं पारं ययौ मितपरिच्छदः ॥ ५५५ ॥

सामन्तैरग्रमायातैस्तं सभां संप्रवेशितम् ।
सत्कृत्याऽरमुडिः प्रह्वं न्यवेशयत विष्टरे ॥ ५५६ ॥

अध्वश्रान्त इति क्षिप्रं प्रतिमुक्तः क्षमाभुजा ।
तद्विसृष्टोपचारस्तन्निनायावसथे दिनम् ॥ ५५७ ॥

स चाऽरमुडिभूभृच्च पीतकोशौ परस्परम् ।
आसातां निर्जनेऽन्येद्युः कर्तव्यकृतनिश्चयौ ॥ ५५८ ॥

नृपमूचेऽथ सचिवो जयापीडार्जितं धनम् ।
अस्ति सैन्ये तदाप्तानां तस्य वा विदितं च तत् ॥ ५५९ ॥

---

551. a) SA_1 (before corr.) स्थितो (for स्थिते).
552. c) SA_1 (before corr.) °रारमुडैश्चक्रे; SA_1 (after corr.) P_{1-3} I_3: °रारमुडेश्चक्रे (for °ररमुडेश्चक्रे). —d) SA_1 (before corr.) °ग्भिर्विलो° (°ग्भिः प्रलो°).
553. b) P_2 I_3 काश्मी° (for कश्मी°). P_3 °मण्डलम् (for °मण्डले).
556. b) $I_{1-4,7}$ C T S′ St P_{1-3} °स्तां (for °स्तं). —c) SA_1 (before corr.) $I_{1,2,4,7}$ S′ V C °मुडेः (for °मुडिः).
557. b) D P_{1-3} SA_3 I_3 °क्षिप्तः (for °मुक्तः).
558. b) SA_2 gloss पीतकोशौ कृतद्रौहिकावित्यर्थः । द्रौहिका शपथः (for पीतकोशौ). —c) $I_{1-4,7}$ T S′ V St C $P_{2,3}$ आसतां (for आसातां).

दानेन भविता मोक्षस्तवेत्युक्त्वा विमोहयन् ।
तस्मात्तं प्रष्टुमिच्छामि क्व वसु न्यस्तमित्यहम् ॥ ५६० ॥

अत एव मया सैन्यं संहतं न प्रवेशितम् ।
यदेतन्मध्यगाः शक्या न बन्द्धुं न्यासधारिणः ॥ ५६१ ॥

तस्मादेकैकमाहूय तेषु बद्धेषु सैनिकाः ।
कोपमज्ञातहृदया न यास्यन्ति विवक्षवः ॥ ५६२ ॥

एवं विमोहितात्तस्मात् प्राज्ञोऽनुज्ञां स लब्धवान् ।
बद्धस्य प्रययौ पार्श्वं जयापीडमहीभुजः ॥ ५६३ ॥

तदालोकनजं शोकं गोपयन् धैर्यसागरः ।
गृहं तन्निर्जनं कृत्वा क्षिप्रं पप्रच्छ तं नृपम् ॥ ५६४ ॥

अपि त्वया निजं तेजो भित्तिभूतं न हारितम् ।
तस्मिन् हि सति सिध्यन्ति साहसालेख्यकल्पनाः ॥ ५६५ ॥

स तं बभाषे निश्शस्त्रो मन्त्रिन्नेवं व्यवस्थितः ।
अद्भुतं कर्म किं कुर्यां ध्रियमाणेन तेजसा ॥ ५६६ ॥

मन्त्री तमूचे तेजश्चेद्राजन्न निसृतं तव ।
जानीहि तत्क्षणेनैव लङ्घितं विपदर्णवम् ॥ ५६७ ॥

अपि वातायनादस्मात् पतित्वा निम्नगाम्भसि ।
पारं गन्तुं समर्थोऽसि सैन्यं ह्यत्र निजं तव ॥ ५६८ ॥

राजा जगाद तं नास्मात् पतित्वोत्थीयतेऽम्भसः ।
विना दृतिं दृतिश्चात्र दूरपाताद्विदीर्यते ॥ ५६९ ॥

तस्मान्नायमुपायोऽत्र न च नाम विमानितः ।
बहु मन्ये तनुत्यागमनिर्मथ्यापकारिणम् ॥ ५७० ॥

ततो निश्चित्य सोऽमात्यस्तमवादीन्महीपते ।
बहिः केनाप्युपायेन वहेस्त्वं नालिकाद्वयम् ॥ ५७१ ॥

---

561. c) $I_{1,2,4,7}$ S′ V C SA_1 (before corr.) यदि तन्म°; SA_3 gloss एतन्मध्यगाः संहतसैन्यमध्यगा इत्यर्थः (for यदेतन्मध्यगाः).
563. b) SA_1 S′ V I_{1-4} °ऽप्याज्ञां (for °ऽनुज्ञां).
564. b) $I_{1,4,7}$ S′ V SA_1 (before corr.) दर्शयन् (for गोपयन्).
571. a) SA_1 (before corr.) $I_{1,2,7}$ C T S′ V इति (for ततो). —d) $I_{1,2,4,7}$ T S′ V वह त्वं; SA_1 (before corr.) वहस्त्वं (for वहेस्त्वं). SA_3 gloss घटिकाद्वयमित्यर्थः (for नालिकाद्वयम्).

प्रविश्यैकाकिनैवाऽथ द्रष्टव्यः संभृतो मया ।
सरिदुत्तरणोपायः सोऽनुष्ठेयोऽप्यशङ्कितम् ॥ ५७२ ॥

श्रुत्वेति निर्गतो गत्वा पायुक्षालनवेश्म सः ।
सविलम्बं बहिर्वेलां तदुक्तामत्यवाहयत् ॥ ५७३ ॥

एकाकी संप्रविष्टोऽथ तं ददर्श च्युतं क्षितौ ।
विपन्नं गलमुद्बध्य दृढया चेलचीरया ॥ ५७४ ॥

सद्यो व्यापादिततनुः श्वासापूरितविग्रहः ।
अभेद्योऽहं तव दृतिर्मामारुह्य तरापगाम् ॥ ५७५ ॥

आरोढुरूरुबन्धाय स्वोर्वोरुष्णीषपट्टिका ।
बद्धा मया तां प्रविश्य क्षिप्रमेव पताम्भसि ॥ ५७६ ॥

नखनिर्भिन्नगात्रास्रलिखितामिति संविदम् ।
दृष्ट्वा चावाचयत्कण्ठनिबद्धांशुकपल्लवे ॥ ५७७ ॥

विस्मयस्नेहयोः पश्चात्पूर्वं स सरितस्ततः ।
प्रवाहे पतितो राजा परं पारं समासदत् ॥ ५७८ ॥

प्राप्तसैन्यः प्रविश्याथ क्षणेनैव निनाय सः ।
तमशेषं सभूपालं नेपालविषयं क्षयम् ॥ ५७९ ॥

रक्षिणोऽपि न यावत्तमजानन् बन्धनाच्च्युतम् ।
तावदेव कथाशेषं विषयं तं चकार सः ॥ ५८० ॥

नृत्यत्कबन्धः स्वर्गस्त्रीमुक्तस्रक्तूर्यघोषवान् ।
भूपतेर्बन्धनान्मोक्षे बभूव समरोत्सवः ॥ ५८१ ॥

दावानलोल्बणभुवो गिरयो निदाघे
यत्रैव दूरमितरे परिवर्जनीयाः ।
तत्रैव संभवति सान्द्रहिमद्रवार्द्र-
श्चित्रं तुषारशिखरी नितरां निषेव्यः ॥ ५८२ ॥

---

573. b) I_3 SA_1 (before corr.) पाद° (for पायु°).

575. c) SA_1 (before corr.) दृतेः; SA_2 gloss दृतेः सकाशादप्यभेद्योऽहम् इत्यर्थः (for दृतिः).

576. a) SA_1 (before corr.) आरोढुरूढ°; I_2 आरूढरूढ° (for आरोढुरूरु°).

577. After this v. तिलकम् .

जज्जादीनां क्षणे यत्र जन्म स्वामिद्रुहामभूत् ।
तत्रैव मन्त्रिणश्चित्रं कृतिनो देवशर्मणः ॥ ५८३ ॥

नाभूद्विसदृशः सूनुः स पितुर्मित्रशर्मणः ।
तमोमयो भास्वरस्य भानोरिव शनैश्चरः ॥ ५८४ ॥

रक्षारत्नोपमे तस्मिन् सचिवेऽस्तमुपागते ।
प्राप्तामपि श्रियं मेने नृपतिर्हारितामिव ॥ ५८५ ॥

तस्य दिग्विजयस्यान्ते मानम्लानिर्विनिर्ययौ ।
मानसात् पृथिवीभर्तुर्नामात्योपक्रिया पुनः ॥ ५८६ ॥

चित्रं जितवतस्तस्य स्त्रीराज्ये मण्डलं महत् ।
इन्द्रियग्रामविजयं बह्वमन्यन्त भूभुजः ॥ ५८७ ॥

कर्णश्रीपटमावध्य स्त्रीराज्यान्निर्जिताद्भुतम् ।
धर्माधिकरणाख्यं च कर्मस्थानं विनिर्ममे ॥ ५८८ ॥

द्वितीयं चलगञ्जाख्यं कर्मस्थानमपि व्यधात् ।
उपयुक्तं प्रयाणेषु गञ्जे दूरस्थिते निजे ॥ ५८९ ॥

किमन्यत्तद्भुजावासनिवासिन्या जयश्रियः ।
चत्वारोऽम्बुधयोऽभूवन् विलासमणिदर्पणाः ॥ ५९० ॥

पुनः प्रविश्य कश्मीरान् स भूपैः परिवारितः ।
चिराय बुभुजे राजा विजयोपार्जितां श्रियम् ॥ ५९१ ॥

तं कदाचिन्नृपं स्वप्ने सर्वाशाविजयोर्जितम् ।
पुमान् दिव्याकृतिः कोऽपि व्याजहार कृताञ्जलिः ॥ ५९२ ॥

सुखं त्वद्विषये राजन् वसन्नस्मि सबान्धवः ।
नागेन्द्रोऽहं महापद्मनामा त्वां शरणं श्रितः ॥ ५९३ ॥

---

583. a) SA_1 (before corr.) $I_{1,2,4,7}$ C S′ V क्षणं (for क्षणे).

584. a) $I_{1,4,7}$ P_2 V T St SA SR SG °द्धि सदृशः (for °द्विसदृशः).
—c) $I_{1,2,7}$ C T St SA_1 V S′ भासुरस्य (for भास्वरस्य).

586. b) $I_{1,2,4,7}$ C V S′ सा न (for मान°).

587. d) C T S′ भूभुजा (for भूभुजः).

द्राविडो मान्त्रिकः कश्चिन्मामितो नेतुमुद्यतः ।
जलाकाङ्क्षिणि वित्तेन विक्रेतुं मरुमण्डले ॥ ५९४ ॥

तस्माच्चेत्पासि मां तत्ते स्वर्णधातुसुवं गिरिम् ।
स्वदेशे दर्शयिष्यामि स्फीतोपकृतिकारिणः ॥ ५९५ ॥

राजा स्वप्ने निशम्येति दिक्षु संप्रेषितैश्चरैः ।
कुतोऽपि प्राप्तमानीय तं पप्रच्छ चिकीर्षितम् ॥ ५९६ ॥

दत्ताभयः स नागोक्तं यथावत्सर्वमुक्तवान् ।
सविस्मयेन भूभर्त्रा स्वयं भूयोऽप्यपृच्छ्यत ॥ ५९७ ॥

भूरियोजनविस्तीर्णात् सरसोऽभ्यन्तरात्त्वया ।
नागः प्रभावोत्कृष्टः स निष्कृष्टुं शक्यते कथम् ॥ ५९८ ॥

स तं व्यजिज्ञपद्राजन्नचिन्त्या मन्त्रशक्तयः ।
ताश्चेद्दिदृक्षसे क्षिप्रमेत्याश्चर्यं विलोक्यताम् ॥ ५९९ ॥

अथानुगम्यमानः स राज्ञा प्राप्तः सरोऽन्तिकम् ।
अभिमन्त्र्योज्झितैर्बाणैर्बद्धाशोऽशोषयज्जलम् ॥ ६०० ॥

राजाऽपश्यत्ततः पङ्के लुठन्तं मानुषाननम् ।
वितस्तिदेश्यमुरगं भूरिह्रस्वोरगान्वितम् ॥ ६०१ ॥

मन्त्रसंकोचितं राजन् गृह्णाम्यमुमिति ब्रुवन् ।
मा ग्रहीरिति भूपेन सोऽभिधाय न्यषिध्यत ॥ ६०२ ॥

तूर्णं राजाज्ञया तेन मन्त्रवीर्येऽथ संहृते ।
सरोऽभूत्प्रागवस्थं तत्पुनर्व्याप्तदिगन्तरम् ॥ ६०३ ॥

द्राविडं द्रविणं दत्त्वा विसृज्याचिन्तयन्नृपः ।
दद्यान्नाद्याप्यसौ नागः कथं स्वर्णाकरं गिरिम् ॥ ६०४ ॥

ध्यायन्तमेव तं स्वप्ने ततः प्रोवाच पन्नगः ।
केनोपकारेण गिरिः स्वर्णसूस्तव दर्श्यते ॥ ६०५ ॥

---

594. P_3 om. *v.* 594 *d*—595 *a*.
596. b) SA_1 St C T $I_{1,2,4,7}$ S′ संप्रेरितै° (for संप्रेषितै°).
602. d) SA $I_{1,3,4,7}$ V $P_{2,3}$ °भ्यधाय (for °भिधाय).
603. a) SA_1 (before corr.) $I_{1,2,7}$ S′ याते (for तेन).
605. d) $I_{1,2,7}$ C T S′ V दृश्यते तव (for °स्तव दर्श्यते).

स्वदेशोऽयं विदेशोऽयमिति बुद्धेः प्रवर्तकः ।
अन्वयव्यतिरेकाभ्यां स्थित्यभ्यासः शरीरिणाम् ॥ ६०६ ॥

शरणं त्वामहमगामवमानभयात् पुनः ।
शरण्येन सता तत्तु भवतैव प्रदर्शितम् ॥ ६०७ ॥

उदन्वानिव योऽक्षोभ्यो ज्ञायते संश्रितैः प्रभुः ।
का ह्रीस्ततोऽन्या सोऽन्यैर्यत्तेषामग्रेऽभिभूयते ॥ ६०८ ॥

याभिरन्याभिभूताभिरीक्षितस्त्रातुमक्षमः ।
तासां केनाभिमानेन स्त्रीणां द्रक्ष्याम्यहं मुखम् ॥ ६०९ ॥

ये कारणसधर्माणो व्यामूढस्य भवाम ते ।
विडम्ब्यमानाः क्रीडायै ते वयं प्राकृता इव ॥ ६१० ॥

अथवा श्रीमदान्धानामप्रेक्षापूर्वकारिणाम् ।
यत्किंचनविधायित्वं पार्थिवानां किमद्भुतम् ॥ ६११ ॥

मन्यन्ते क्ष्माभुजः क्रीडामुन्नतानां विमाननाम् ।
यावज्जीवं तु सश्वासं मरणं तां विदन्ति ते ॥ ६१२ ॥

उपेक्ष्यपक्षे भूपानां मानः स्वार्थस्य सिद्धये ।
स तु प्राणानुपेक्ष्यापि ग्राह्यपक्षे मनस्विनाम् ॥ ६१३ ॥

महतो येऽवमन्यन्ते घटन्ते च विमानितैः ।
मानस्वरूपाभिज्ञत्वं तेषां केनानुमीयते ॥ ६१४ ॥

भवन्त इव तत्रापि न वयं व्यर्थदर्शनाः ।
ताम्रधातुरसस्यन्दी दर्श्यते तद्गिरिस्तव ॥ ६१५ ॥

इत्युक्त्वा संविदं तस्मै स्वप्न एव स तां ददौ ।
यया प्रबुद्धः प्रत्यूषे प्राप ताम्राकरं गिरिम् ॥ ६१६ ॥

---

608. d) SA_1 (before corr.) °भूतये (for °भूयते).
610. a) I_1 SA_1 येऽकारण° (for ये कारण°).
612. b) SA_1 (before corr.) $I_{1,2,4,7}$ C S′ P_2 विमानिनाम् (for विमाननाम्).
—d) P_{1-3} विशन्ति (for विदन्ति).
613. a) SA_2 gloss त्याज्य° (for उपेक्ष्य°).
614. c) $I_{1-3,7}$ St $P_{1,3}$ मनः° (for मान°).
616. c) $I_{1-3,7}$ P_{1-3} C T S′ V St यथा (for यया).

स तस्मात् क्रमराज्यस्थात् ताम्रमाकृष्य निर्ममे ।
शतं दीन्नारकोटीनामेकोनं स्वाभिधाङ्कितम् ॥ ६१७ ॥

पूर्णं कोटिशतं कुर्याद् यः स मां निर्जयेदिति ।
दर्पभङ्गाय भूपानां समयं स्थापयन्नृपः ॥ ६१८ ॥

समस्या इव स क्ष्माभृत् सावशेषैर्विचेष्टितैः ।
चिक्षेप तुल्यनिर्माणकुण्ठत्वायेति भूभृताम् ॥ ६१९ ॥

अथाकस्मान्महीपालः प्रजाभाग्यविपर्ययैः ।
त्यक्त्वा पैतामहं मार्गं ययौ पित्र्येण सोऽध्वना ॥ ६२० ॥

किं दिग्जयादिभिः क्लेशैः स्वदेशादर्ज्यतां धनम् ।
इत्यर्थ्यमानः कायस्थैः स्वमण्डलमदण्डयत् ॥ ६२१ ॥

शिवदासादिभिर्लुब्धैर्धनस्थानाधिकारिभिः ।
प्रविवर्धितवित्तेच्छः सोऽभूल्लोभवशंवदः ॥ ६२२ ॥

काश्मीरिकाणामुत्पन्नं निजाज्ञाव्यवधायकम् ।
कायस्थवक्त्रप्रेक्षित्वं ततः प्रभृति भूभृताम् ॥ ६२३ ॥

मन्त्रस्तस्य महीभर्तुर्योऽभूत्तत्तन्नृपग्रहे ।
वास्तव्यबन्धचिन्तायां स एव स्थैर्यमाययौ ॥ ६२४ ॥

यत्सतां प्रशमाधायि पापस्योपदिदेश तत् ।
जयापीडस्य पाण्डित्यं प्रजापीडनशौण्डताम् ॥ ६२५ ॥

स सौदास इवानेकलोकप्राणापहारकृत् ।
अस्तुत्यकृत्यसौहित्यं स्वप्नेऽपि न समाययौ ॥ ६२६ ॥

कुर्मः किल्बिषमेतदेव हृदये कृत्वेति कौतूहलात्
स्वैरिण्यः क्षितिपाश्च धिक्चपलतां क्रौर्यं च कुर्युः सकृत् ।
पापाक्रान्तधियो भवन्त्यथ तथा नान्त्यान्स्पृशन्त्योऽपि ता
दूयन्ते न च ते यथा स्वपितरौ घ्नन्तोऽपि शान्तत्रपाः ॥ ६२७ ॥

---

617. c) St SA_1 P_{1-3} I_3 दीनार° (for दीन्नार°).
622. b) SA_1 (before corr.) °कारादिभिः (for °धिकारिभिः).
623. a) $I_{1,2,4,7}$ T S′ V SA_1 (before corr.) काश्मीरका° (for काश्मीरिका°).
—d) D $I_{2,3,7}$ P_1 भूभृतात् (for भूभृताम्).
625. a) $I_{1,2,4,7}$ C T S′ V °शमादायि (for °शमाधायि).
627. c) $I_{1,2,4}$ C T S′ SA_1 यथा (for तथा).

लोभाभ्यासात्तथा क्रौर्यं स ययौ वत्सरत्रयम् ।
सह कार्षकभागेन यथाऽहार्षीच्छरत्फलम् ॥ ६२८ ॥

लुब्धत्वध्वस्तधीर्भूभृत् स्वल्पवित्तलवप्रदान् ।
सर्वस्वहारिणो मेने कायस्थान् हितकारिणः ॥ ६२९ ॥

सामुद्रास्तिमयो नृपाश्च सदृशा एके हृतादम्भसः
स्वस्मादेव कणान् घनस्य जहतो जानन्ति ये दातृताम् ।
सर्वस्मात्स्फुटलुण्ठिताद्धितरतो लेशान्किलान्येऽपि ये
दुष्कायस्थकुलस्य हन्त कलयन्त्यन्तर्हिताधायिताम् ॥६३०॥

सर्वकालं ब्राह्मणानामहो धैर्यमकुण्ठितम् ।
निस्त्रिंशस्य बभूवुर्ये तस्यापि परिपन्थिनः ॥ ६३१ ॥

देशान्तरं प्रयातेभ्यो ये शेषास्ते व्यरंसिषुः ।
विक्रोशन्तो न मरणाद्धरणान्नापि पार्थिवः ॥ ६३२ ॥

विप्राणां शतमेकोनमेकाहेन विपद्यते ।
निर्वेद्यमेतदित्यूचे क्रौर्याक्रान्तोऽथ पार्थिवः ॥ ६३३ ॥

विपर्यस्तचरित्रस्य तस्य क्रूरस्य भूपतेः ।
एवं स्तुतिविपर्यासः काव्येष्वपि बुधैः कृतः ॥ ६३४ ॥

नितान्तं कृतकृत्यस्य गुणवृद्धिविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥ ६३५ ॥

भाष्यव्याख्याक्षणे श्लोकैर्वैचक्षण्यहृतैः कृतः ।
सोऽयं तस्य विपर्यासो बुधैरेवं प्रवर्तितः ॥ ६३६ ॥

---

628. c) D P_3 कर्षिक° (for कार्षक°).

630. a) $I_{2,7}$ V सदृशादेके (for सदृशा एके). C T S′ I_3 SA_2 हृतान° (for हृताद°). —c) SA_3 °तान्वि° (for °ताद्वि°).

632. c) $I_{1,2,4,7}$ C T S′ V °शन्तोऽनुमर° (for °शन्तो न मर°).

633. b) I_3 SA_3 °काहे चेद्वि° (for °काहेन वि°).

636. ab) D श्लोको वै° (for श्लोकैर्वै°). —b) C T S′ वैलक्षण्यहृतैः (for वैचक्षण्यहृतैः). —c) SA_1 (before corr.) $I_{1,2,4,7}$ विपर्यासे (for विपर्यासो). —d) $I_{2,7}$ C S′ T °रिव; D $P_{1,2}$ $I_{1,4}$ °रेव (for °रेवं). SA_1 (before corr.) $I_{1,2,4,7}$ C T S′ P_1 विवर्तितः (for प्रवर्तितः).

कृतविप्रोपसर्गस्य भूतनिष्ठाविधायिनः ।
श्रीजयापीडदेवस्य पाणिनेश्च किमन्तरम् ॥ ६३७ ॥

तूलमूल्यापहर्ता च चन्द्रभागातटे स्थितः ।
विप्राणां शतमेकोनमश्रृणोत्तज्जले मृतम् ॥ ६३८ ॥

ततोऽग्रहारहरणादेव प्रविरतोऽभवत् ।
वास्तव्यानां हृतां भूमिं न तु निश्शेषतो जहौ ॥ ६३९ ॥

अथ विज्ञप्तिसमये तूलमूल्यौकसो द्विजाः ।
चुक्रुशुर्जातु तस्याग्रे प्रतीहारकराहताः ॥ ६४० ॥

मनुमान्धातृरामाद्या बभूवुः प्रवरा नृपाः ।
अन्वभावि तदग्रेऽपि ब्राह्मणैर्न विमानना ॥ ६४१ ॥

सेन्द्रं स्वर्गं सशैलां क्ष्मां सनागेन्द्रं रसातलम् ।
निर्दग्धुं हि क्षणेनैव विप्राः शक्ताः प्रकोपिताः ॥ ६४२ ॥

तदाकर्ण्यास्त सामन्तत्यक्तपृष्ठः क्षमापतिः ।
उल्लासितैकभ्रूलेखो दर्पाद्वचनमब्रवीत् ॥ ६४३ ॥

'भिक्षाकणभुजां कोऽयं शठानां वो मदज्वरः ।
येनर्षय इव ब्रूथ प्रभावाख्यापकं वचः ॥' ६४४ ॥

भीमभ्रूभङ्गभीतेषु तेषु तूष्णीं स्थितेष्वथ ।
इट्टिलाख्यस्तमाह स्म ब्रह्मतेजोनिधिर्द्विजः ॥ ६४५ ॥

राजन् युगानुरूप्येण भावाभावानुवर्तिनः ।
शासितुस्तेऽनुसारेण न कस्मादृषयो वयम् ॥ ६४६ ॥

---

637. b) SA_3 gloss निष्ठा शब्द इह नाशवाची (for °निष्ठा°).
638. a) SA_1 (before corr.) $I_{2,3,7}$ C T S′ $P_{2,3}$ तूलमूला° (for तूलमूल्या°).
640. b) SA_1 C T S′ $I_{1,2,4}$ °लौकसो (for °ल्यौकसो).
644. d) SA_1 (before corr.) $I_{1,4,7}$ C S′ प्रभावव्यापकं; SA_1 (after corr.) T V St SA_3 प्रभावख्यापकं (for प्रभावाख्यापकं).
645. b) SA_1 (before corr.) P_1 तूर्णी (for तूष्णीं). —c) I_1 SA_1 (before corr.) इट्ठि° (for इट्टि°).
646. a) S′ °नुरूपेण (for °नुरूप्येण). —b) SA_3 gloss विप्रा भूपानुवर्तिनः इत्यन्यादर्शे (for भावाभावानुवर्तिनः).

आह स्म विश्वामित्रो वा वसिष्ठो वा तपोनिधिः ।
त्वमगस्त्योऽथवा किं स्या इति दर्पेण तं नृपः ॥ ६४७ ॥

ज्वलन्निव ततः स्फूर्जत्तेजोदुष्प्रेक्ष्यविग्रहः ।
स फणीवोत्फणस्ताम्यन् कोपान्नृपतिमब्रवीत् ॥ ६४८ ॥

भवान् यत्र हरिश्चन्द्रस्त्रिशङ्कुर्नहुषोऽपि वा ।
विश्वामित्रमुखेभ्योऽहं तत्रैको भवितुं क्षमः ॥ ६४९ ॥

विहस्योवाच तं राजा विश्वामित्रादिकोपतः ।
हरिश्चन्द्रादयो नष्टास्त्वयि क्रुद्धे तु किं भवेत् ॥ ६५० ॥

पाणिना ताडयन्नुर्वीं ततः क्रुद्धोऽभ्यधाद् द्विजः ।
मयि क्रुद्धे क्षणादेव ब्रह्मदण्डः पतेन्न किम् ॥ ६५१ ॥

तच्छ्रुत्वा विहसन् राजा कोपाद्ब्राह्मणमब्रवीत् ।
पततु ब्रह्मदण्डोऽसौ किमद्यापि विलम्बते ॥ ६५२ ॥

नन्वयं पतितो जाल्मेत्यथ विप्रेण भाषिते ।
राज्ञः कनकदण्डोऽङ्गे वितानस्खलितोऽपतत् ॥ ६५३ ॥

कृतव्रणः स तेनाङ्गे विसर्पक्लिन्नविग्रहः ।
कीर्यमाणक्रिमिकुलः क्रकचैश्चारितैरभूत् ॥ ६५४ ॥

अनुभाव्य व्यथां भाविनिरयक्लेशवार्णिकाम् ।
गणरात्रेण तं प्राणाः काङ्क्षितापगमा जहुः ॥ ६५५ ॥

ब्रह्मदण्डकृतं दण्डं भुक्त्वा दण्डधराधिपः ।
अकाण्डदण्डस्रष्टाऽथ ययौ दण्डधरान्तिकम् ॥ ६५६ ॥

तस्यानियतचित्तस्य त्रिंशतं परिवत्सरान् ।
एवं प्रतापिनः सैकान् भूभोगो भूपतेरभूत् ॥ ६५७ ॥

---

648. b) SA_3 °दुष्प्रेक्ष° (for °दुष्प्रेक्ष्य°).

654. b) St SA_3 विमर्द°; $I_{1,2,4,7}$ C V S′ विसर्पि° (for विसर्प°).

तथा भूभृन्मत्स्या द्रविणकलुषाम्भःकृततृषः
स्थितिं स्वामुज्झन्तो विदधति कुमार्गानुसरणम् ।
क्रियन्ते कार्तान्तानुगविकृतकैवर्तनिवहै-
र्यथा ह्येतेऽकस्मात् स्थिरनिरयजालप्रणयिनः ॥६५८॥

कृतपापं तमुद्दिश्य विपन्नममृतप्रभा ।
मृतोद्धाराय तन्माता व्यधत्तामृतकेशवम्॥ ६५९ ॥

ललितापीडनामाऽभूत्ततो वसुमतीपतिः ।
देव्यां दुर्गाभिधायां यो जयापीडादजायत ॥ ६६० ॥

बभूव रागिणो राज्ये राज्यकार्याण्यपश्यतः ।
यस्य वाराङ्गनाभोज्यं राज्यं दुर्नयदूषितम् ॥ ६६१ ॥

दुष्कृतेनार्जितं वित्तं पित्रा निरयभागिना ।
यश्चारणादिषु न्यस्यन्ननुरूपं व्ययं व्यधात् ॥ ६६२ ॥

बन्धकीबन्धुभावेन प्राप्तराजगृहाश्रयाः ।
तं पौंश्चलीयविद्यानामन्तरङ्गं व्यधुर्विटाः ॥ ६६३ ॥

केशान् स्त्रीदशनच्छिन्नान् वक्षस्तन्नखलाञ्छितम् ।
वपुषो मण्डनां मेने किरीटकटकोज्झितः ॥ ६६४ ॥

यो यो वेश्याकथाऽभिज्ञो यो यो नर्मविचक्षणः ।
स स तत्प्रियतां लेभे न शूरो न च पण्डितः ॥ ६६५ ॥

अतृप्तः स्त्रीभिरल्पाभिरुग्ररागः स पार्थिवः ।
जडं मेने जयापीडं स्त्रीराज्यान्निर्गतं जितात् ॥ ६६६ ॥

---

658. b) C $I_{1,2,4,7}$ S′ V SA_1 (before corr.) क्षितिं (for स्थितिं). —c) $I_{1-4,7}$ C P_{1-3} V S′ कान्तान्तानुग°; T कान्तत्वानुग° (for कार्तान्तानुग°).

662. b) D °भागिणा (for °भागिना). —c) $I_{1,2,7}$ C V SA_1 (before corr.) यच्चा° (for यश्चा°). —d) D °न्ननुरूपव्ययं (for °न्ननुरूपं व्ययं).

663. c) $I_{1,2,4,7}$ V P_1 D पाञ्चा° (for पौंश्च°).

664. c) C T S′ मण्डनं (for मण्डनां).

665. a) SA_1 (before corr.) °कथादिज्ञो (for °कथाभिज्ञो).

दिङ्निर्जयव्यसनिनः पूर्वभूपाञ्जहास सः।
गणिकाभोगसुखितः स्वसामयिकमध्यगः ॥ ६६७ ॥

संकोचकारिणो वृद्धान् नर्मोक्त्योद्वेज्य वारयन्।
तस्माद्विटजनो लेभे संप्रीतात्पारितोषिकम् ॥ ६६८ ॥

अट्टचेट इव स्पष्टपरिहासविचक्षणः।
सोऽलज्जयन्मन्त्रिवृद्धानास्थाने गणिकासखः ॥ ६६९ ॥

बन्धकीपादमुद्राङ्कं चारु प्रावरणादि सः।
गौरवार्हान् दुराचारः सचिवान् पर्यधापयत् ॥ ६७० ॥

मानी मनोरथो मन्त्री परं परिजहार तम्।
अशक्नुवन् यमयितुं मध्यपातपराङ्मुखः ॥ ६७१ ॥

कुकृत्यं योगवाहित्वं वैधुर्यं द्रोहवृत्तिता।
दुर्वृत्तस्य प्रभोरन्यत्परिहारान्न भेषजम् ॥ ६७२ ॥

सुवर्णपार्श्वं विप्रेभ्यो दधत् फलपुरं तथा।
भूभृत् स लोचनोत्सं च द्वादशाब्दानभूद्विभुः ॥ ६७३ ॥

कल्याणदेव्यां संजातो जयापीडमहीभुजः।
संग्रामापीडनामाऽथ बभूव भुवनेश्वरः ॥ ६७४ ॥

पृथिव्यापीड इत्यन्यन्नाम बिभ्रत्स भूपतिः।
समाप्तिं सप्तभिर्वर्षैः साम्राज्यस्य समासदत् ॥ ६७५ ॥

श्रीचिप्पटजयापीडो बृहस्पत्यपराभिधः।
ललितापीडजो राजा शिशुदेश्यस्ततोऽभवत् ॥ ६७६ ॥

---

668. d) I_1 °तोषिकाम्; D St C P_{1-3} $I_{2,3}$ °तोषकम् (for °तोषिकम्).
671. b) SA_1 (before corr.) $I_{1,2,4,7}$ S′ V C तत् (for तम्).
672. a) St SA_3 योगराहित्यं; $I_{1,2,4,7}$ C V S′ योगवाहिंत्वं (for योगवाहित्वं). After *v.* 672 *b* St supposes a *lacuna* as the two halves are disconnected. cf. St Tr.
673. a) SA_2 gloss सुनपाह् (for सुवर्णपार्श्वं). —b) D ददत् (for दधत्). SA_2 gloss परिहासपुरसमीपे (for फलपुरम्).
675. b) $I_{1,2,4,7}$ C T S′ V पार्थिवः (for भूपतिः).

रागग्रहगृहीतस्य ललितापीडभूपतेः ।
वेश्यायां कल्यपाल्यां यो जयादेव्यामजायत ॥ ६७७ ॥

उप्पाख्यस्याऽऽखुवग्रामकल्यपालस्य तां सुताम् ।
रूपलुब्धोऽवरुद्धात्वमनैषीत् स हि भूपतिः ॥ ६७८ ॥

पद्मोत्पलककल्याणमम्मधर्म्मैः स मातुलैः ।
बालकः पाल्यमानोऽभूत् पृथिवीभोगभागिभिः ॥ ६७९ ॥

तस्य पञ्च महाशब्दान् ज्यायान् उत्पलकोऽग्रहीत् ।
अन्ये जगृहिरेऽन्यानि कर्मस्थानानि मातुलाः ॥ ६८० ॥

आयत्तीकृतसाम्राज्यैर्भ्रातृभिर्वन्दिताज्ञया ।
भूभृज्जनन्या विदधे जयादेव्या जयेश्वरः ॥ ६८१ ॥

राज्ञां कृपणवित्तैर्यत् प्रविष्टैर्दूष्यते धनम् ।
अचिरान्नीयते शान्तिमपूर्वैः कैश्चिदेव तत् ॥ ६८२ ॥

जयापीडस्य यत्किंचित्सूनुना हि व्ययीकृतम् ।
सूनुस्यालैरशेषं तत्तैः क्रमेण हृतं वसु ॥ ६८३ ॥

भगिनीभगसौभाग्यसंभवैर्विभवैः कृताः ।
ते भङ्गुराणां भोगानां भोक्तारो भाग्यभागिनः ॥ ६८४ ॥

निरङ्कुशं चेष्टमानाः शनकैस्त्यक्तशैशवात् ।
ते स्वस्त्रीयान्नृपान्नाशमकुलीनाः शशङ्किरे ॥ ६८५ ॥

---

677. c) D $I_{1-4,7}$ T V P_2 कल्पपाल्यां यो; C $P_{1,3}$ S′ कल्पपाल्यायां (for कल्यपाल्यां यो).

678. b) D $I_{1-4,7}$ C T S′ V P_{1-2} °कल्पपा°; SA_3 gloss कल्यं सुरां पालयतीति कल्यपालः कलवाल् इति भाषायां (for °कल्यपाल°) —c) S′ °विरुद्ध°; C T °वरुद्ध°; SA_3 gloss अवरुद्धा उरद्धा इति भाषायां (for °वरुद्धा°).

679. b) D P_{1-3} I_3 SA_3 °धम्मैः (for °धर्म्मैः). —c) All Mss. except D and St Tr. (before suggestion) read बालकैः (for suggested बालकः).

680. d) SA_2 gloss कार्खान इति प्रसिद्धानि (for कर्मस्थानानि).

681. a) P_3 D स्वायत्ती° (for आयत्ती°).

682. b) T °ष्टैः पुष्यते; C °ष्टो दूष्यते (for °ष्टर्दूष्यते).

अथाभिचारक्रियया मिथः संमन्त्र्य पापिभिः ।
राज्येच्छया तैः स्वस्त्रीयः स्वामी च स नृपो हतः ॥ ६८६ ॥

भुक्तक्षितौ द्वादशाब्दांस्तस्मिन् व्यापादिते तथा ।
नैच्छन्नेकस्य ते राज्यं परस्परमहंकृताः ॥ ६८७ ॥

तेषामाक्रान्तदेशानां नाममात्रमहीपतीन् ।
तांस्तान् कर्तुमसाम्मत्याद् विरोधोऽन्योन्यमुद्ययौ ॥ ६८८ ॥

अथ मेघावलीदेव्यां जातो बप्पियभूपतेः ।
ज्येष्ठोऽप्यचाक्रिकतया योऽभूद्राज्यविवर्जितः ॥ ६८९ ॥

सोऽयं त्रिभुवनापीडो जयादेव्यामजीजनत् ।
राजानमजितापीडं तं बलादुत्पलो व्यधात् ॥ ६९० ॥

शेडादिगणनास्थाननिष्यन्दोत्थान्नृपाय ते ।
पञ्चमाद् गणनास्थानादशनाच्छादने ददुः ॥ ६९१ ॥

एकसंभाषणात् खेदं यात्स्वन्येषु दिने दिने ।
पञ्च तुल्यमुखान्यैच्छद् दुःस्थो राजा तदाश्रितः ॥ ६९२ ॥

ते राजन्यजितापीडे राज्योत्पत्त्यपहारिणः ।
पुरदेवगृहादीनां प्रतिष्ठाकर्म चक्रिरे ॥ ६९३ ॥

सापत्यास्ते बुभुजिरे राज्यं स्वामिविवर्जितम् ।
निर्जने महिषं शान्तं मिथः सेर्ष्या वृका इव ॥ ६९४ ॥

---

687. a) $I_{1,2,4,7}$ V मुक्ति° (for भुक्त°).
688. a) SA_1 (before corr.) I_3 P_2 °देहानां (for °देशानां). —c) $P_{1,3}$ C T St SA_3 S' I_3 °मसामान्यान्; SA_1 (before corr.) °मसामान्याद्; SA_2 (before corr.) °मसम्मत्या (for °मसाम्मत्याद्). —d) SA_1 (before corr.) °माययौ (for °मुद्ययौ).
689. c) $I_{1,4,7}$ V°चाक्रिय° (for °चाक्रिक°). —d) P_3 °संस्थुलः (for °वर्जितः).
690. After this *v.* युग्मम.
691. P_1 om. *v.* 691*b* and 692*a*. —a) SA_1 (before corr.) D $P_{1,3}$ SG देडा°; P_2 शेता° (for शेडा°). —c) SA_2 gloss marg. शलस्थूलं नामेल्याणकं मिथान 'नवग्रामादि एषां चतुर्णां सम्बन्धी एकोत्पत्तिप्रवेशः स पञ्चमगणनास्थानमिति लोकाम्नायः (for पञ्चमाद्).
692. c) D T °सुखान्नै°; All Mss. except D and T read °मुखान्नै° (for suggested °मुखान्यै°).

उत्पलेनोत्पलस्वामी तथोत्पलपुरं कृतम् ।
पद्मस्य पद्मस्वाम्याऽऽस्ते कृतिः पद्मपुरं तथा ॥ ६९५ ॥

वधूर्व्यधत्त पद्मस्य गुणादेवी गुणोज्ज्वला ।
मठमेकमधिष्ठाने द्वितीयं विजयेश्वरे ॥ ६९६ ॥

धर्मो धर्मोद्यमी हेतुर् धर्मस्वामिविनिर्मितेः ।
कल्याणवर्मा सत्कर्मा कल्याणस्वामिकेशवे ॥ ६९७ ॥

दीनाराणां सहस्राणि पञ्चोपकरणं कृती ।
एकैकस्याः सुधीर्धेनोः कृत्वा मम्मो महाधनः ॥ ६९८ ॥

पञ्चाशीतिसहस्राणि गवां दत्त्वा प्रकल्पयन् ।
कुम्भप्रतिष्ठासंभारं यो मम्मस्वामिनं व्यधात् ॥ ६९९ ॥

तस्यैकस्यैव सामग्र्यां कः संख्यां कर्तुमर्हति ।
भ्रातॄणां किं पुनस्तेषां सर्वेषां भूरिसंपदाम् ॥ ७०० ॥

द्रोहार्जिताऽस्तु वा लक्ष्मीः सुकृतोपार्जिताऽथवा ।
सर्वेषां स्पृहणीयैव तेषां दातृतया तया ॥ ७०१ ॥

कृता देवगृहास्तैर्ये तत्पार्श्वेऽन्यसुरास्पदैः ।
दिङ्मातङ्गसमीपस्थकलभौपम्यमाश्रितम् ॥ ७०२ ॥

एकोननवते वर्षे स्वस्त्रीये शान्तिमागते ।
निर्विघ्नभोगास्तेऽभूवन् षड्विंशाब्दात्ययावधि ॥ ७०३ ॥

अथ मम्मोत्पलकयोरुदभूद्दारुणो रणः ।
रुद्धप्रवाहा यत्रासीद् वितस्ता सुभटैर्हतैः ॥ ७०४ ॥

कविर्बुधमनस्सिन्धुशशाङ्कः शङ्कुकाभिधः ।
यमुद्दिश्याकरोत्काव्यं भुवनाभ्युदयाभिधम् ॥ ७०५ ॥

मम्मसूनुर्यशोवर्मा संग्रामाग्रे व्यपाहरत् ।
स यत्र तेजः शूराणां नक्षत्राणामिवार्यमा ॥ ७०६ ॥

---

697. a) D P_3 धम्मो° (for धर्मो°). $I_{1,2,4,7}$ V S′ °द्यमे; T °द्यमो (for °धर्मी). —b) D P_3 °धम्म° (for °धर्म°).
703. d) $I_{4,7}$ V S′ C T षट्विंशा° (for षड्विंशा°).
705. b) SA_2 gloss श्रीशङ्कुकाभिधः प्रसिद्ध आलङ्कारिकः यस्य मतं रसनिरूपणे काव्यप्रकाशे चतुर्थोल्लासे श्रीमम्मटाचार्येण निरूपितम् (for शङ्कुक).

अथोत्पाट्याऽजितापीडं संग्रामापीडसंभवः ।
अनङ्गापीडनामाऽभूत् कृतो मम्मादिभिर्नृपः ॥ ७०७ ॥

मम्मोत्साहाऽसहिष्णुत्वात् संभृतामर्षवैकृतः ।
तस्य राज्यं द्विषन्नासीत् सुखवर्मोत्पलात्मजः ॥ ७०८ ॥

वर्षत्रयेणोत्पलके ततः प्रमयमागते ।
स चकारोत्पलापीडमजितापीडजं नृपम् ॥ ७०९ ॥

तेषामाश्वयुजीराजसदृशानां महीभुजाम् ।
भूत्वाऽपि भृत्याः कृतिनः विभूतिं केऽपि लेभिरे ॥ ७१० ॥

सांधिविग्रहिकस्तस्य रत्नो नाम विभूतिभाक् ।
तस्मिन् कालेऽपि यश्चक्रे रत्नस्वामिसुरास्पदम् ॥ ७११ ॥

भेजुर्दार्वाभिसारादीन् देशानुत्तम्भ्य भूपताम् ।
विमलाश्वा ग्रामभुजो नराद्या व्यवहारिणः ॥ ७१२ ॥

राज्ञां कार्कोटवंश्यानां क्षीणप्रायमभूत्कुलम् ।
वंशस्तूत्पलकुल्यानां भुवि वैपुल्यमाययौ ॥ ७१३ ॥

सामर्थ्योपनतप्रायपार्थिवत्वो व्यपद्यत ।
विद्वेषात् सुखवर्माऽथ शुष्काख्येन स्वबन्धुना ॥ ७१४ ॥

ततः शूराभिधो मन्त्री सुखवर्मात्मजेऽकरोत् ।
राज्ययोग्योऽयमित्यास्थां सगुणेऽवन्तिवर्मणि ॥ ७१५ ॥

एकत्रिंशे स वर्षेऽथ प्रजाविप्लवशान्तये ।
विनिवार्योत्पलापीडं तमेव नृपतिं व्यधात् ॥ ७१६ ॥

---

710. a) SA_1 (before corr.)° युजे मासस°; P_2 I_3 S′ C T °युजे राजस°; SA_2 gloss आश्वयुजे मासि चश्वर्यर्थं ये निर्गच्छन्ति ते हेयारया इति प्रसिद्धास्तत्सदृशानां (for °युजीराजस°). —c) $I_{1,2,7}$ V भूत्वा पितृभ्यः (for भूत्वाऽपि भृत्याः). SA_1 (before corr.) D P_{1-3} $I_{1-4,7}$ S′ V SA_1 कठिनाः (for कृतिनः).

712. b) D $P_{1,3}$ °नुत्तुंब्य; St (before suggestion in Tr.) T C P_2 I_{1-3} V °नुत्तम्ब्य (for °नुत्तम्भ्य).

713. a) $I_{2,7}$ S′ T C कर्कोट° (for कार्कोट°).

यत्कृते विफलक्लेशा आसन् पितृपितामहाः ।
पौत्रेण हेलया प्राप्ता सा सिद्धिः पुण्यकर्मणा ॥ ७१७ ॥

कुम्भाः पयोनिधिपयोहरणप्रवृत्ता
नित्यं वहन्ति किल ये विफलश्रमत्वम् ।
चित्रं क्षणादिह तदेकसमुद्भवेन
संदर्शिता निखिलवारिधिपानलीला ॥ ७१८ ॥

अभूत तदनु मूर्ध्नि राजलक्ष्मी-
घटितकटाक्षकृतादिपट्टबन्धे ।
कनकघटमुखान्नवाभिषेकं
झटिति पतन्तमवन्तिवर्मदेवः ॥ ७१९ ॥

संप्राप्तावुपदेष्टुमिन्दुतपनावुक्तं स्ववंशोद्भवै-
र्भूपालैर्नवराज्यतन्त्रमिव स श्रोत्रद्वये धारयन् ।
राजा मण्डनकुण्डलद्वयमिषात्स्वच्छातपत्रच्छला-
ल्लक्ष्मीविष्टरपुण्डरीकघटितच्छायोदयो दिद्युते ॥ ७२० ॥

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
चतुर्थस्तरङ्गः ॥

---

719. [a]) SA_1 (before corr.) $I_{1,2,4,7}$ V S′ तदुरु° (for तदनु).

720. [a]) C T S′ I_3 SA_3 °तपनौ युक्तं (for °तपनावुक्तं).
After *v.* 720 SA_3 $I_{1,4,7}$ V S′ P_{1-3} insert राजा १७ ग्रन्थः ७१६, आदितः राजानः ७० ग्रन्थ १७८५.

Colophon : $I_{1,2,4}$ V S′ °चंपक° (for °चण्पक°).
After colophon a *v.* is inserted in all Mss. :—

समाशतद्वये षष्ट्युते मासेषु षट्सु च ।
निर्दशाहेषु कार्कोटवंशे सप्तदशाभवन् ॥

[[a]) $I_{1,2,7}$ V °शते (for °शत°).—[b]) $I_{1,2,7}$ V कार्कोटि° (for कार्कोट°).]

अथ

पञ्चमस्तरङ्गः

काऽप्येतेषु रुचिः कचेषु फणिनां पुंस्कोकिलस्येव ते
गोभिः कण्ठतटस्य हृष्यति पुरो दृक् पश्य चक्षुश्श्रुतेः ।
संधानेऽभिनवे मिथो भगवतोर्जिह्वाऽपृथक्स्पन्दिनी
भिन्नार्था सदृशाक्षरामपि वदन्त्येवं गिरं पातु वः ॥ १ ॥

अवन्तिवर्मा साम्राज्यं प्राप्य पाटितकण्टकः ।
चकार चरितैश्चित्रं सतां कण्टकितं वपुः ॥ २ ॥

आसातां क्षितिपामात्यौ तौ द्वावपि परस्परम् ।
आज्ञादाने परिवृढौ भृत्यावाज्ञापरिग्रहे ॥ ३ ॥

P_3 begins with ओम् नमः शिवाभ्यां प्रकाशविसर्चस्वभूपाभ्याम् । ओम्; I_4 श्रीगणेशाय नमः; $I_{1,7}$ V ओम्.

1. SA_3 gloss काप्येतेषु इति । एतेषु प्रत्यक्षविषयेषु फणिनां सर्पाणां कचेषु बन्धनेषु ते कापि रुचिः काश्चिदप्यभिलाषोऽस्ति । जटाजूटकक्ष्यादिबन्धनार्थमत्यन्तं सर्पानभिलषसीति देवीवचनम् । बन्धनस्थानानां कण्ठप्रकोष्ठकक्ष्यादीनां बहुत्वाद्बन्धानामपि बहुवचनम् । एतेषु कचेषु केशेषु फणिनां संबन्धिनी अर्थान्मोहकारिणी कापि रुचिरनिर्वचनीया कान्तिस्तवास्ति । तव केशानामजगराणामिव दर्शनेनातीव मोहो जायते इति महादेववचनम् । पुंस्कोकिलस्येव तव कण्ठतटस्य गोभिर्वचनैः चक्षुःश्रुतेः सर्पस्य दृक् नेत्रं हृष्यति मोदते । कोकिलरुतमिव तव कण्ठध्वनिं श्रुत्वा सर्पस्य दृग्घर्षः सर्पाणां चक्षुरेव श्रवणस्थानीयमित्यतो दृक् हृष्यतीत्युक्तम् । गीतप्रियो हि सर्पः । यदुक्तम्—

'शिशुर्वेत्ति पशुर्वेत्ति वेत्ति गीतरसं फणी ।
साहित्यामृतसारस्य शङ्करो वेत्ति वा न वा ॥'

इति महादेववचनम् । देवीवचनं तु तव कण्ठतटस्य कोकिलस्येव करैः पुरोऽग्रे नेत्रं हृष्यति । गोभिः किरणैः कोकिलतुल्यवर्णकण्ठतटनैल्यदर्शनेन सर्पस्य दृग्घर्षः दृग्विलासः कोकिलरुतं श्रुत्वा सर्पाणां नेत्रविकासो जायते । शीतसमये तु संकोच इति लौकिकाः.

—[c]) SA_1 °स्पर्धिनी; I_3 °स्यन्दिनी (for °स्पन्दिनी). —[d]) °दत्ये° (for °दन्त्ये°).

3. [a]) D (before suggestion) and all other Mss. read आसतां (for आसातां). —[c]) SA_1 (before corr.) C $I_{1,2,4,7}$ V °धाने (for °दाने).

कृतज्ञः क्षान्तिमान् क्ष्माभृत् मन्त्री भक्तः स्मयोज्झितः ।
अभङ्गुरोऽयं संयोगः सुकृतैर्जातु दृश्यते ॥ ४ ॥

विवेक्ता प्राप्तराज्यः स क्ष्माभृद्वीक्ष्य नृपश्रियम् ।
अविलुप्तस्मृतिर्धीमानन्तरेवमचिन्तयत् ॥ ५ ॥

गोभुजां वल्लभा लक्ष्मीर्मातङ्गोत्सङ्गलालिता ।
सेयं स्पृहां समुत्पाद्य दूषयत्युन्नतात्मनः ॥ ६ ॥

स नास्ति कश्चित्प्रथमं यः प्रदर्श्यानुकूलताम् ।
सन्ताप्यते न चरमं नीचप्रीत्येव नाऽनया ॥ ७ ॥

चपलाभिः प्रवृद्धेयं स्वर्वेश्याभिः सहाम्बुधौ ।
तदेकचारिणीवृत्तमनया शिक्षितं कुतः ॥ ८ ॥

निस्स्नेहा नान्वगात्कांश्चित् सुचिरं संस्तुताऽप्यसौ ।
परलोकाध्वगान् भूपानपाथेयानबान्धवान् ॥ ९ ॥

हेमभोजनभाण्डादि भाण्डागारे यदर्जितम् ।
कस्मादस्य न नाथास्ते लोकान्तरगता नृपाः ॥ १० ॥

अन्योच्छिष्टेषु पात्रेषु भुक्त्वैतेषु महीभुजः ।
कस्मान्न लज्जामवहञ्शौचचिन्तां न वा दधुः ॥ ११ ॥

स्थूलेषु राजतस्थालकपालेष्ववलोकितैः ।
प्रेतभूपालनामाङ्कैः शङ्का कस्य न जायते ॥ १२ ॥

कृष्टाः प्रविष्टे ये कालपाशे कण्ठान्मुमूर्षताम् ।
अशस्ता अपवित्राश्च ते हाराः कस्य हारिणः ॥ १३ ॥

---

6. a) I_2 gloss marg. म्लेच्छानां; C I_6 गोमुजा (for गोमुजां).
7. b) SA_1 (before corr.) $I_{1,2,7}$ C V °कूल्यताम् (for °कूलताम्). —c) T संताप्येत् (for संताप्यते). $I_{2,7}$ V S′ चरसं (for चरमं). —d) $I_{1,2,4,7}$ V S′ नीचप्रे° (for नीचप्री°).
8. b) $I_{2,4,7}$ C V महाम्बु° (for सहाम्बु°).
9. a) T निस्स्नेहानन्व° (for निस्स्नेहा नान्व°).
11. d) P_1 I_3 °चिन्ता (for °चिन्तां).
12. a) S′ स्थलेषु (for स्थूलेषु).

सन्दूष्य बाष्पैर्दुःखोष्णैस्त्यक्तान् पूर्वैर्मुमूर्षुभिः ।
स्पृशन्नेतानलङ्कारान् न कस्सङ्कोचमाप्नुयात् ॥ १४ ॥

या वारिराशिसलिलान्तरसन्निधान-
संसेवयाऽपि सततं मलिनैव लक्ष्मीः ।
पात्रेषु रोरशिखिभागिषु सा विमुक्ता
वैमल्यमेति हरिणीव हुताशशौचा ॥ १५ ॥

इति निर्ध्याय नृपतिर्नीत्वा स्वर्णादि चूर्णताम् ।
निजैरञ्जलिभिः प्रादाद् द्विजन्मभ्यः करम्भकम् ॥ १६ ॥

साधु भूपेति वक्तव्ये हर्षान्निर्गौरवं द्विजः ।
साध्ववन्तिन्निति वदन्नेकः प्रापाञ्जलीन् बहून् ॥ १७ ॥

लक्ष्मीं कृत्वाऽर्थिसात्कृत्स्नां कृतिनाऽवन्तिवर्मणा ।
विभूतिश्चामरच्छत्रमात्रशेषा व्यधीयत ॥ १८ ॥

अनन्तसंपत्संपन्नभूरिगोत्रजविप्लवे ।
राजश्रीर्दुर्जरा तस्य नवत्वे भूभुजोऽभवत् ॥ १९ ॥

विप्लुतान्समरे भ्रातॄन् भ्रातृव्यांश्च विजित्य सः ।
चकार भूरिभिर्वीरै राज्यं विगतकण्टकम् ॥ २० ॥

---

14. b) P_3 °स्त्यक्त्वा पू° (for °स्त्यक्तान्पू°). —d) C T S′ subst. न सङ्कोचः कमाप्नुयात्.

15. c) T रोह°; SA_3 gloss रोरः दारिद्र्यम् (for रोर°). The word रोर is used by Maṅkhaka in his S′rīkanṭhacarita (cf. vi. 13) and Joṇarāja comments on it as अभाव. —d) C T $I_{1,4}$ S′ SA_1 (before corr.) °शौचे; SA_3 gloss अग्निशाचानां मृगाणामग्निना लोमशुद्धिः अग्निशौचवसनवत्। हुताशेनाऽग्निना शौचं शुद्धिर्यस्याः सा हुताशशौचा हरिणी मृगी इव। यथा अग्नौ प्रक्षिप्तदेहा सती शुद्धलोमा भवति तद्वत् (for °शौचा).

16. b) C स्वर्गादि; SA_2 gloss आदिशब्देन मौक्तिकादेः परिग्रहः (for स्वर्णादि). C S′ तूर्णतां (for चूर्णताम्). —d) SA_2 gloss हम्बलं and करम्बं व्यामिश्रं खिचडू इति भाषया (for करम्भकम्).

18. c) V I_7 °तिचाम° (for °तिश्चाम°).

20. a) $I_{2,4,7}$ C T V S′ विप्लुतः स° (for विप्लुतान्स°).

राज्यं निष्पाद्य निर्विघ्नमथ वात्सल्यपेशलः ।
विभज्य बन्धुभृत्येषु बुभुजे पार्थिवः श्रियम् ॥ २१ ॥

भ्राता द्वैमातुरस्तेन शूरवर्माभिधः सुधीः ।
ज्ञातिप्रियेण वितते यौवराज्येऽभ्यषिच्यत ॥ २२ ॥

खाधूयाहस्तिकर्णाख्यावग्रहारौ प्रदाय यः ।
शूरवर्मस्वामिनं च गोकुलं च विनिर्ममे ॥ २३ ॥

संपूर्णः पूर्णमहिमा मर्त्यमाहात्म्यमन्दिरम् ।
पञ्चहस्ताप्रदश्चक्रे मठं सुकृतकर्मठः ॥ २४ ॥

भ्राता व्यधत्त नृपतेरपरः समराभिधः ।
केशवं चतुरात्मानं समरस्वामिनं तथा ॥ २५ ॥

द्वौ शूरावरजौ धीरविन्नपाख्यौ निजाख्यया ।
व्यधत्तां विबुधावासौ द्वावन्यौ गणनापती ॥ २६ ॥

भूत्वा वातूलताच्छन्नप्रभावानुभवौ भुवि ।
गतौ सविग्रहावेव हरावासाद्यसभ्यताम् ॥ २७ ॥

---

22. b) I_4 P_1 स्वधीः; P_3 कुधीः (for सुधीः). —d) P_3 S′ °ज्येऽभिषि° (for ज्येऽभ्यषि°).

23. a) I_7 ख्यधू°; P_1 खचूया°; P_3 खाखूया°; I_3 खखूयाहस्वि°; S′ °स्वाधू°; SA_2 gloss धुधखोहा (for खाधूयाहस्ति°). SA_2 gloss व्याघ्राश्रमे वागहामे (for हस्तिकर्ण). —b) V °चक्रहा°; $I_{2,4,7}$ °वत्रहा° (for °वग्रहा°). SA_3 $P_{1,3}$ I_3 विधाय (for प्रदाय). —c) $I_{1,2,7}$ V S′ T C °वर्मा° (for °वर्म°).

24. a) C S′ T SA_3 °म्पूर्णपुण्यम° (for °म्पूर्णः पूर्णम°). —b) SA_3 I_3 मन्त्रमा° (for मर्त्यमा°). —c) C T $I_{1,2,7}$ V S′ पञ्चहस्त°; P_3 पञ्चहस्ताः; SA_2 gloss पाञ्चश् (for पञ्चहस्ता°).

25. d) SA_2 gloss शाल्यानग्रामे समरभोग् (for समरस्वामिनं).

26. b) T C S′ °वित्रपाख्यौ; I_4 °विन्निपाख्यौ (for विन्नपाख्यौ).

27. a) T C S′ वाहुलता°; SA_3 gloss इमौ वातूलावुन्मत्ताविति स्वस्य तद्भावमिव विधाय लोकविषये गोपितनिजप्रभावावित्यर्थः; I_2 marg. उन्मत्तौ (for वातूलता°). —c) SA_1 (before corr.) गुरौ (for गतौ). —d) C T $I_{1,2,4}$ V S′ सत्यताम् (for सभ्यताम्). After this ५. युग्मम् .

राजदौवारिकः श्रीमान् शूरस्यासीन्महोदयः ।
महोदयस्वामिनो यः प्रतिष्ठां समपादयत् ॥ २८ ॥

रामजाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यातृपदकं चक्रे स तस्मिन् सुरमन्दिरे ॥ २९ ॥

अमात्येन महीभर्तुः श्रीप्रभाकरवर्मणा ।
कृतं प्रभाकरस्वामिनाम्नो विष्णोर्निकेतनम् ॥ ३० ॥

आयातेन शुकैः सार्धं दत्ता गृहशुकेन यः ।
मुक्ताः प्राप्य प्रतिष्ठायां चक्रे ख्यातां शुकावलीम् ॥ ३१ ॥

विच्छिन्नप्रसरा विद्या भूयः शूरेण मन्त्रिणा ।
सत्कृत्य विदुषः सभ्यान् देशेऽस्मिन्नवतारिता ॥ ३२ ॥

युग्यैः क्षितिभुजां योग्यैरुह्यमाना महर्द्धयः ।
बुधाः प्रवृद्धसत्कारा विविशुर्भूपतेः सभाम् ॥ ३३ ॥

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ।
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः ॥ ३४ ॥

आस्थाने कृतमन्दारो वन्दी शूरस्य मन्त्रिणः ।
संकल्पस्मृतिमाधातुमिमामार्यां सदाऽपठत् ॥ ३५ ॥

'अयमवसर उपकृतये प्रकृतिचला यावदस्ति सम्पदियम् ।
विपदि सदाऽभ्युदयिन्यां पुनरुपकर्तुं कुतोऽवसरः' ॥ ३६ ॥

---

28. a) P_1 °वारिकाः (for °वारिकः): —c) SA_2 gloss मडवाश्रमे (for महोदयस्वामिनो).
29. a) St रामटा° (for रामजा°). $I_{1,2,7}$ V °पाध्याय° (for °पाध्यायं) —c) D suggests °पदगं (for °पदकं).
31. a) SA_1 om. सार्धं with a space. —b) C S′ दत्वा (for दत्ता). —d) SA_1 (before corr.) ख्यानशुका° (for ख्यातां शुका°).
32. c) I_7 om. सत्कृत्य विदुषः.
33. d) $I_{1,2,4,7}$ V S′ C T भूपतेर्विविशुः (for विविशुर्भूपतेः).
34. b) SA_2 gloss आनन्दवर्द्धनः काव्यालङ्कारध्वनिग्रन्थकारः (for कविरानन्दवर्द्धनः). —c) SA_2 gloss रत्नाकरः हरविजयकारः (for रत्नाकर).
35. d) P_{1-3} $I_{3,4}$ D (before suggestion) सदा पठेत् (for सदाऽपठत्).
36. c) SA_1 (before corr.) C $I_{1,2,4,7}$ V S′ समाभ्यु° (for सदाऽभ्यु°).

कृतः सुरेश्वरीक्षेत्रे बहुगेहविधायिना ।
शिवयोर्मिश्रयोस्तेन प्रासादः सोऽव्ययस्थितिः ॥ ३७ ॥

शूरेश्वरं प्रतिष्ठाप्य स्ववेश्मेव समुन्नतम् ।
चक्रे शूरमठं धीमान् स भोगाय तपस्विनाम् ॥ ३८ ॥

स्वकृते पत्तनवरे तेन शूरपुराभिधे ।
क्रमवर्तप्रदेशस्थो ढक्कोऽभूद्विनिवेशितः ॥ ३९ ॥

सुरेश्वरीप्राङ्गनतश्चक्रे भूतेश्वरं हरम् ।
मठं शूरमठान्तश्च शूरजो रत्नवर्धनः ॥ ४० ॥

काव्यदेव्यभिधा शूरवधूः शुद्धान्वया व्यधात् ।
सदाशिवं सुरेश्वर्या काव्यदेवीश्वराभिधम् ॥ ४१ ॥

निर्मत्सरोऽवन्तिवर्मा सोदरेभ्योऽनपायिनीम् ।
शूराय च सपुत्राय नृपतिप्रक्रियां ददौ ॥ ४२ ॥

छन्दानुवर्ती भूपालो दैवतस्येव मन्त्रिणः ।
आबाल्याद् वैष्णवोऽप्यासीच्छैवतामुपदर्शयन् ॥ ४३ ॥

क्षेत्रे विश्वैकसाराख्ये मृतानामपवर्गदे ।
भूरिभोगास्पदं राज्ञा तेनाऽवन्तिपुरं कृतम् ॥ ४४ ॥

अवन्तिस्वामिनं तत्र प्राग्राज्याधिगमात्कृती ।
विधाय प्राप्तसाम्राज्यश्चक्रेऽवन्तीश्वरं तदा ॥ ४५ ॥

---

37. d) $I_{2,7}$ V प्रसादः (for प्रासादः). St Tr. suggests सव्ययास्थितिः and explains व्ययस्थिति as endowment cf. vii. 952, viii. 249,2401,3316 (for सोऽव्ययस्थितिः).

38. a) SA_2 gloss शूरपुरे (for शूरेश्वरम्).

39. c) C T I_3 S′ क्रमवत्तु°; SA_2 gloss कामेलनकोट्टस्थः (for क्रमवर्त°). —d) SA_2 gloss द्रङ्गः (for ढक्कः).

40. a) D (after suggestion) प्राङ्गनान्तः (for प्राङ्गनतः).

42. c) $I_{1,4,7}$ V S′ शूराय दशपु° (for शूराय च सपु°). —d) C T $I_{1,2,4,7}$ V S′ नृपतिः प्र° (for नृपतिप्र°). $I_{1,2,4,7}$ V दधौ (for ददौ).

44. a) SA_2 gloss भारसो इति ग्रामे (for विश्वैकसाराख्ये). —c) SA_1 (before corr.) राजा (for राज्ञा).

त्रिपुरेश्वरभूतेशविजयेशेषु भूभृता ।
स्नानद्रोण्या रौप्यमय्या तेन पीठत्रयं कृतम् ॥ ४६ ॥

शूरस्यापि नरेन्द्रं तं ध्यायतः स्वाधिदैवतम् ।
तत्प्रियार्थमुपेक्ष्योऽभूद्धर्मः प्राणाः सुतोऽपि वा ॥ ४७ ॥

तथा चाऽर्चयितुं जातु यातो भूतेश्वरं नृपः ।
विभवानुगुणे स्वस्मिन् पूजोपकरणेऽर्पिते ॥ ४८ ॥

ददर्श पीठे देवस्य पूजकैरुपपादितम् ।
वन्यमुत्पलशाकाख्यं तिक्तशाकमवस्थितम् ॥ ४९ ॥

तत्रस्थाः क्ष्माभुजा पृष्टास्तन्निवेदनकारणम् ।
व्यजिज्ञपन् क्षितिन्यस्तजानु प्राञ्जलयस्ततः ॥ ५० ॥

डामरो धन्वनामाऽस्ति लहरे विषये बली ।
शूरस्य मन्त्रिणो देव सेवको यः सुतोपमः ॥ ५१ ॥

हृतेषु तेन ग्रामेषु निरवग्रहशक्तिना ।
निवेद्यमेतदेवाऽस्मै भूतेशाय निवेद्यते ॥ ५२ ॥

अकाण्डशूलजनितां पार्थिवः कथयन् व्यथाम् ।
श्रुतमश्रुतवत्कृत्वा त्यक्तपूजोऽथ निर्ययौ ॥ ५३ ॥

पूजां संत्यज्य गमनं शूलं चाऽऽकस्मिकं प्रभोः ।
सहेतुकं विदन् शूरो वृत्तान्तान्वेषकोऽभवत् ॥ ५४ ॥

ज्ञाततत्त्वस्ततस्तूर्णं भूतेशाभ्यर्णवर्तिनः ।
क्रुद्धः स मातृचक्रस्य भैरवस्याऽविशद् गृहम् ॥ ५५ ॥

---

46. c) St P_1 $I_{3,4}$ रुप्यमय्या; P_3 रूप्यमध्या; P_2 रौप्यमध्या; I_1 रौपशय्या (for रौप्यमय्या).

48. b) SA_1 (before corr.) जातो (for जातु). C S′ भूतेश्वरो (for भूतेश्वरं).

51. b) SA_3 gloss लार् इति प्रसिद्धे राष्ट्रे (for लहरे).

53. d) I_1 °पूज्यो° (for °पूजो°).

54. c) $I_{1,4}$ V विशन् (for विदन्).

55. a) I_4 जाततत्त्व° (for ज्ञाततत्त्व°). —c) SA_2 gloss शूरः (for स).

निषिद्धजनबाहुल्यो भूत्वा विरलपार्श्वगः ।
प्राहिणोद् धन्वमानेतुं ततो दूतान् पुनः पुनः ॥ ५६ ॥

स क्षितिं पत्तिपृतनासंमर्देन प्रकम्पयन् ।
अप्रकम्पतनुः प्राप क्रूरः शूरान्तिकं पुरः ॥ ५७ ॥

तस्य प्रविष्टमात्रस्य शस्त्रिणः शूरचोदिताः ।
मुण्डं सजीवितस्यैव चिच्छिदुर्भैरवाग्रतः ॥ ५८ ॥

आसन्ने सरसि क्षिप्त्वा रुधिरोद्गारि तद्वपुः ।
क्ष्मापतेः क्षालितामर्षो धीरः शूरो विनिर्ययौ ॥ ५९ ॥

तस्य श्रुत्वा शिरश्छिन्नं स्वपुत्रस्येव मन्त्रिणा ।
क्षीणमन्युः क्षितिपतिः सवैलक्ष्य इवाऽभवत् ॥ ६० ॥

शूरोऽथ पृष्टकुशलो निर्व्यथोऽस्मीति भाषिणम् ।
उत्थाप्य तल्पात्तं देवं पूजाशेषमकारयत् ॥ ६१ ॥

इत्थं समस्तकृत्येषु भावज्ञः स महीपतेः ।
अनुक्त्वैव हितं तत्तत्प्राणांस्त्यक्त्वाऽप्यसाधयत् ॥ ६२ ॥

परस्परमनुत्पन्नमन्युकालुष्यदूषणौ ।
न दृष्टौ न श्रुतौ वाऽन्यौ तादृशौ राजमन्त्रिणौ ॥ ६३ ॥

श्रीमेघवाहनस्येव साम्राज्येऽवन्तिवर्मणः ।
अशेषप्राणिनामासीदमारो दश वत्सरान् ॥ ६४ ॥

---

56. a) St SA_1 D V $P_{1,2}$ $I_{1,2,4,7}$ °बाहुल्याद्भू° (for °बाहुल्यो भू°).
57. d) S′ om. शूरान्तिकं पुरः. P_2 T C $I_{1,2,4,7}$ पुनः; St SA_3 शनैः (for पुरः).
58. ab) S′ om. upto शस्त्रिणः.
60. c) SA_1 (before corr.) क्षण° (for क्षीण°).
62. c) P_1 अनुक्त्वेव; V S′ I_7 अनुक्तैव (for अनुक्त्वैव). C T V S′ $I_{1,2,7}$ तत्तु (for तत्तत्).
63. c) V S′ C T $I_{1,2}$ श्रुतावन्यौ (for श्रुतौ वाऽन्यौ). —d) P_3 नृपम° (for राजम°).
64. cd) C S′ °सीत्कुमारो; $P_{2,3}$ I_3 °सीदसारो; V °सीदपारो (for °सीदमारो).

जलं जहद्भिः शिशिरं तटानेत्याऽकुतोभयैः ।
तत्कालं सेवितः पृष्ठे पाठीनैः शरदातपः ॥ ६५ ॥

अनुग्रहाय लोकानां भट्टश्रीकल्लटादयः ।
अवन्तिवर्मणः काले सिद्धा भुवमवातरन् ॥ ६६ ॥

चरित्रे बहुवक्तव्ये येषामेकस्य पावनः ।
अयं प्रासङ्गिकः कश्चिद् वृत्तान्तो वर्णयिष्यते ॥ ६७ ॥

देशः प्रबलतोयोऽयं महापद्मसरोजलैः ।
कूलिनीभिश्च शबलः स्वल्पोत्पत्तिः सदाऽभवत् ॥ ६८ ॥

ललितादित्यभूभर्तुरुद्योगेन बलीयसा ।
किञ्चिदाकृष्टसलिलः प्रापोत्पत्तिं मनाक्ततः ॥ ६९ ॥

जयापीडे क्रमाद्याते स्वल्पवीर्येषु राजसु ।
सलिलोपप्लवैरासीत् पुनरेवावृता क्षितिः ॥ ७० ॥

दीनाराणां दशशती पञ्चाशत्यधिकाऽभवत् ।
धान्यखारीक्रये हेतुर्देशे दुर्भिक्षविक्षते ॥ ७१ ॥

अवन्तिवर्मणः पुण्यैर्जन्तूञ्जीवयितुं ततः ।
स्वयमन्नपतिः श्रीमान् सुय्यः क्षितिमवातरत् ॥ ७२ ॥

यस्याविज्ञातसंभूतेस्तुर्ये कालेऽपि निश्चितम् ।
अयोनिजत्वं कृतिनश्चरितैर्भुवनाद्भुतैः ॥ ७३ ॥

---

66. a) $I_{2,7}$ V अन्नग्रहाय (for अनुग्रहाय). —b) C T $I_{1,2,4,7}$ V S′ भट्टाः श्री° (for भट्टश्री°).

68. c) $I_{2,7}$ सकूलिनीभिः श° (for कूलिनीभिश्च श°).

69. d) $I_{1,4,7}$ $P_{1,2}$ V °नाकुतः (for °नाक्ततः).

71. b) D I_3 P_{1-3} SA_3 पञ्चाशदधि° (for पञ्चाशत्यधि°). —c) SA_1 (before corr.) $I_{1,2,4,7}$ V °खारेः क्र° (for °खारीक्र°). —d) I_7 V °विक्षिते (for °विक्षते).

73. b) SA_2 gloss चतुर्थे युगे; C T तूर्ये (for तुर्ये). —c) C S′ °निजत्वकृति° (for °निजत्वं कृति°).

पुरा रथ्यारजःपुञ्जं संमार्जन्ती पिधानवत् ।
सुय्याभिधाना चण्डाली मृद्भाण्डं प्राप नूतनम् ॥ ७४ ॥

तस्मिन् पिधानमुद्धृत्य साऽपश्यन्मध्यशायिनम् ।
बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥ ७५ ॥

मात्रा कयाऽपि त्यक्तोऽसौ सुन्दरो मन्दभाग्यया ।
अथेति चिन्तयन्त्यासीत् सा स्नेहात्प्रस्नुतस्तनी ॥ ७६ ॥

अदूषयन्त्या स्पर्शेन धात्र्याः शूद्रस्त्रियो गृहे ।
तया विहितवृत्तिः स शिशुर्वृद्धिमनीयत ॥ ७७ ॥

स सुय्यनामा मतिमान् प्रवृद्धः शिक्षिताक्षरः ।
कस्याऽप्यासीद् गृहपतेरर्भकाध्यापको गृहे ॥ ७८ ॥

व्रतस्नानादिनियमैस्तं सतां हृदयंगमम् ।
गोष्ठीषु विशदप्रज्ञं विदग्धाः पर्यवारयन् ॥ ७९ ॥

तेषां कथाव्यवस्थासु निन्दतां जलविप्लवम् ।
धीरस्ति मे निरर्थस्तु किं कुर्यामिति सोऽब्रवीत् ॥ ८० ॥

उन्मत्तस्येव वदतस्तस्य तन्नियमाद्वचः ।
निशम्य भूभृच्चारेभ्यश्चिरमासीत् सविस्मयः ॥ ८१ ॥

ततस्तमानीय नृपः किं ब्रूष इति पृष्टवान् ।
धीरस्तीत्यादि राजाग्रेऽप्यवोचत्सोऽप्यसंभ्रमः ॥ ८२ ॥

वातूलोऽसाविति निजैरुक्तोऽप्यथ महीपतिः ।
धियं दिदृक्षुर्विदधे तस्यायत्तं निजं धनम् ॥ ८३ ॥

---

74. c) D (before suggestion) P_{1-3} I_3 SA_3 पूयाभिधा° (for सुय्याभिधा°).

75. a) S′ om. तस्मिन्. —c) I_4 °पत्राख्यं (for °पत्राक्षं).

77. a) SA_1 (before corr.) C T S′ °पयन्त्याः (for °पयन्त्या). —b) I_2 V धात्र्यां (for धात्र्याः).

82. a) P_3 भूपः (for नृपः). —d) SA_1 (before corr.) °सम्भवः (for °सम्भ्रमः).

83. a) P_3 जनै° (for निजै°). —d) V निजधनम् (for निजं धनम्).

कोशाद्दीन्नारभाण्डानि बहून्यादाय हेलया ।
ययौ मडवराज्यं स नावमारुह्य रंहसा ॥ ८४ ॥

ग्रामे तत्र प्रवृद्धाम्बुनिमग्ने नन्दकाभिधे ।
एकं निक्षिप्य दीन्नारभाण्डं व्यावर्तत द्रुतम् ॥ ८५ ॥

सत्यं वातूल एवाऽसौ सभ्येष्वपि वदत्स्वपि ।
वार्तां निशम्य तां राजा तन्निष्ठान्वेषकोऽभवत् ॥ ८६ ॥

क्रमराज्यं स सम्प्राप्य देशे यक्षदराभिधे ।
अञ्जलिभ्यां निचिक्षेप दीन्नारान् सलिलान्तरे ॥ ८७ ॥

यत्र तीरद्वयालम्बिशैलनिर्लुठिताः शिलाः ।
चक्रुर्वितस्तां निष्पीड्य पयः प्रतिपथोन्मुखम् ॥ ८८ ॥

दुर्भिक्षोपहता ग्राम्या दीन्नारान्वेषिणस्तदा ।
शिलाः प्रवाहादुद्धृत्य वितस्तां समशोधयन् ॥ ८९ ॥

एवं दिनानि द्वित्राणि पयो युक्त्या विकृष्य तत् ।
वितस्तामेकतः स्थानात् कर्मकृद्भिरबन्धयत् ॥ ९० ॥

पाषाणसेतुबन्धेन सुय्येनाऽद्भुतकर्मणा ।
सप्ताहमभवद्बद्धा निखिला नीलजा सरित् ॥ ९१ ॥

अधः प्रवाहं संशोध्य लुठदश्मप्रतिक्रियाम् ।
कृत्वा बद्धैः शिलाबन्धैः सेतुबन्धमपाटयत् ॥ ९२ ॥

चिरकालनिरोधेन सोत्कण्ठेवाऽम्बुधिं प्रति ।
ततः प्रावर्तत जवाद् गन्तुं सागरगामिनी ॥ ९३ ॥

---

84. b) P_2 लीलया (for हेलया).

86. b) $I_{1,4}$ P_2 सत्येष्वपि व°; it may be emended as सभ्येष्वपवदत्स्वाति (for सभ्येष्वपि वदत्स्वपि).

87. a) $I_{2,4,7}$ V P_2 C T S′ समं प्राप्य (for स संप्राप्य). —b) I_7 यक्षसराभि°; I_{1-4} V P_2 यक्षशराभि°; SA_2 gloss द्वारगलाख्ये (for यक्षदराभि°).

88. a) $I_{1,2,4,7}$ C T V S′ °यालम्भि° (for °यालम्बि°). —d) $I_{1,2,4,7}$ V °पयोन्मुखम् (for °पथोन्मुखम्).

91. b) I_7 V मुय्येना (for सुय्येना).

जम्बालाङ्का स्फुरन्मीना भूर्बभौ सलिलोज्झिता ।
व्यक्तकार्ष्ण्या सनक्षत्रा निर्मेघेव नभस्स्थली ॥ ९४ ॥

यत्र यत्र विवेदौघवेधं सलिलविप्लवे ।
तत्र तत्र वितस्तायाः प्रवाहान्नूतनान् व्यधात् ॥ ९५ ॥

मूलस्रोतोऽग्रनिष्ठ्यूतभूरिस्रोता बभौ सरित् ।
एकभोगाश्रयानेकफणेवासितपन्नगी ॥ ९६ ॥

वामेन सिन्धुस्त्रिग्राम्या वितस्ता दक्षिणेन तु ।
यान्त्यौ ये समगंसातां प्राग् वैन्यस्वामिनोऽन्तिके ॥ ९७ ॥

वर्ततेऽद्य महानद्योः कल्पापायेऽप्यनत्ययः ।
संगमो नगरोपान्ते स सुय्योपक्रमस्तयोः ॥ ९८ ॥

अद्याप्यास्तां फलपुरपरिहासपुरस्थितौ ।
विष्णुस्वामी संगमस्य वैन्यस्वामी च तीरयोः ॥ ९९ ॥

सुन्दरीभवनाभ्यर्णप्राप्तस्याऽद्यतनस्य तु ।
योगशायी हृषीकेशः सुय्यस्याऽभ्यर्चितस्तटे ॥ १०० ॥

दृश्यन्तेऽद्याऽपि सरितां पूर्वस्रोतस्तटोद्भवाः ।
निषादाकृष्टनौरज्जुरेखाङ्का जीर्णपादपाः ॥ १०१ ॥

स्फुरत्तरङ्गजिह्वाः स नदीमार्गमजिग्रहत् ।
तास्ताः स्वेच्छानुसारेण मान्त्रिकः पन्नगीरिव ॥ १०२ ॥

---

94. d) C T V S′ नभस्थली (for नभस्स्थली).

96. a) (before suggestion) St P_{1-3} I_{1-4} V D °स्रोतोग्र्यनि° (for °स्रोतोऽग्रनि°).

97. c) SA_1 om. समगं with a space.

98. d) St Tr. gloss श्रीनगर (for नगर).

99. a) SA_1 (before corr.) अध्यप्या° and (after corr.) अधप्या°; it may be emended as °पि स्तां or पि स्तः (for अद्याप्या°).

101. b) P_1 I_3 SA °स्तटोद्भवः (for °स्तटोद्भवाः).

102. a) $I_{3,4}$ °स्फुरत्तरङ्ग° (for °स्फुरत्तरङ्ग°). —d) $I_{1,2,4,7}$ V मन्त्रिकाः (for मान्त्रिकः).

बद्ध्वा शैलमयान्सेतून् वितस्तां सप्तयोजनीम् ।
महापद्मसरोवारि स चकार नियन्त्रितम् ॥ १०३ ॥

महापद्मसरःकुण्डाद् वितस्ता येन योजिता ।
जवान्निर्याति कोदण्डयन्त्रादिषुरिवाऽधुना ॥ १०४ ॥

उद्धृत्य सलिलादुर्वीमेवमादिवराहवत् ।
अनेकजनसंकीर्णान् ग्रामान्नानाविधान् व्यधात् ॥ १०५ ॥

पालीभिरम्भः संरोध्य यान्कुण्डसदृशान् व्यधात् ।
कुण्डलानीति सर्वान्नसमृद्धान्ब्रुवते जनाः ॥ १०६ ॥

उत्खातकीलनिवहान्नद्योऽद्यापि शरत्कृशाः ।
व्यञ्जन्ति जलगन्धेभबन्धनस्तम्भसन्निभान् ॥ १०७ ॥

दीन्नारभाण्डमौज्झीत्स यदगाधजलान्तरे ।
नन्दके निर्गतजले स्थलान्तात्तदलभ्यत ॥ १०८ ॥

अदेवमातृकान्ग्रामान् परीक्ष्य विविधाः क्षितीः ।
संविभेजे विभक्तेन नादेयेन स वारिणा ॥ १०९ ॥

असिञ्चच्च जलैर्ग्रामान् ग्रामान्मृदमुपाहृताम् ।
या यावता क्षणेनाऽगाच्छोषं तां तावता हृदि ॥ ११० ॥

कालेन मत्वा सेकार्हां प्रतिग्रामं जलस्रुतेः ।
परिमाणं विभागं च परिकल्प्य निरत्ययम् ॥ १११ ॥

---

103. a) $I_{4,7}$ C बद्धा (for बद्ध्वा). —c) I_7 महीपद्म° (for महापद्म°).

104. c) SA P_3 I_3 °र्यान्ति (for °र्याति). —d) St $P_{1,2}$ I_3 °वाध्वना (for °वाऽधुना).

106. P_1 om. *ab*. —d) I_7 V समृद्धीन् (for समृद्धान्).

107. b) C I_7 V S′ °नद्यो° (for °न्नद्यो°).

108. a) I_3 SA °भाण्डान्नौ°; D (before suggestion) $I_{1,2,4,7}$ P_{1-3} V S′ T St °भाण्डानौ° (for °भाण्डमौ° emended cf. St Tr.).

109. b) $P_{2,3}$ I_4 क्षितिः (for क्षितीः).

110. d) P_3 °छेषं (for °च्छोष).

चकार चाऽनूलाद्याभिः सिन्धुभिः सर्वतो दिशः ।
सत्फलोदारकेदारसंपत्संपन्नविभ्रमाः ॥ ११२ ॥

न कश्यपेनोपकृतं न यत्सङ्कर्षणेन वा ।
हेलया मण्डलेऽमुष्मिंस्तत् सुय्येन सुकर्मणा ॥ ११३ ॥

भूमेर्जलादुद्धरणं द्विजक्षेत्रे तथाऽर्पणम् ।
सेतुबन्धोऽश्मभिस्तोये यमनं कालियस्य च ॥ ११४ ॥

चतुर्षु सिद्धमिति यद्विष्णोः सत्कर्म जन्मसु ।
सुय्यस्य तत्पुण्यराशेरेकस्मिन्नेव जन्मनि ॥ ११५ ॥

यस्मिन्महासुभिक्षेषु दीन्नाराणां शतद्वयी ।
धान्यखारेः प्राप्तिहेतुरा सर्गादभवत्पुरा ॥ ११६ ॥

ततः प्रभृति तत्रैव चित्रं कश्मीरमण्डले ।
षट्त्रिंशता धान्यखारेर्दीन्नारैरुदितः क्रयः ॥ ११७ ॥

निर्गताया महापद्मसलिलात्स्वर्गसंन्निभम् ।
वितस्तायास्तटे चक्रे स्वनामाङ्कं स पत्तनम् ॥ ११८ ॥

स्वकृता स्थापिता तेन सरसि व्याप्तदिक्तटे ।
आसंसारं स्थिराऽमारमर्यादा झषपक्षिणाम् ॥ ११९ ॥

---

112. After this *v.* तिलकम् .
113. a) I_1 काश्यपेनो° (for कश्यपेनो°).
114. b) P_3 तया (for तथा).
115. a) SA_1 (before corr.) यत्सिद्धमिति वि° (for सिद्धमिति यद्वि°). —c) P_3 सुय्यस्य (for सुय्यस्य). After this *v.* युग्मम् .
116. c) SA_1 (before corr.) C T P_{1-3} I_1 S′ D धान्यखारी° (for धान्यखारेः).
117. a) P_3 तदा (for ततः). P_2 तत्रैवं (for तत्रैव). —c) SA_2 gloss द्वादश दीनाराणां वाहगन्ये इति कश्मीरदेशभाषया परिगणने षट्त्रिंशद्दीन्नारा त्रिवाहगन्य इति ज्ञेयाः (for षट्त्रिंशता).
118. a) SA_1 (before corr.) V $I_{1,7}$ निर्गता वा (for निर्गताया). —d) SA_2 gloss सुय्यपुराख्यं (for स्वनामाङ्कं).
119. a) C T S′ सुकृता (for स्वकृता). —c) D St P_{1-3} I_3 SA_2 स्थितामार°; SA_1 (before corr.) स्थिरासार° (for स्थिराऽमार°).

सुय्याकुण्डलनामानं ग्रामं कृत्वा द्विजातिसात् ।
सुय्यामुद्दिश्य तन्नाम्ना सुय्यासेतुं स निर्ममे ॥ १२० ॥

तेनोद्धृतासु सलिलाद्भूषु ग्रामाः सहस्रशः ।
अवन्तिवर्मप्रमुखैर्जयस्थलमुखाः कृताः ॥ १२१ ॥

ईदृशैर्धर्म्यवृत्तान्तैः प्रवर्तितकृतोदयः ।
अवन्तिदेवः पाति स्म मान्धातेव वसुन्धराम् ॥ १२२ ॥

प्राणप्रयाणसोद्योगरोगग्रस्तस्ततो ययौ ।
क्षेत्रं स त्रिपुरेशाऽद्रिनिष्ठज्येष्ठेश्वराश्रितम् ॥ १२३ ॥

आत्मनस्तत्र निश्चित्य विपत्तिं चिरगोपितम् ।
प्राणान्ते प्राञ्जलिः शूरं वैष्णवत्वमदर्शयत् ॥ १२४ ॥

तेनाऽन्ते भगवद्गीताः शृण्वता भावितात्मना ।
ध्यायता वैष्णवं धाम निरमुच्यत जीवितम् ॥ १२५ ॥

आषाढशुक्लपक्षस्य तृतीयस्यां क्षमापतिः ।
वर्षे एकोनषष्टे स क्षमावृषाऽस्तमुपाययौ ॥ १२६ ॥

तस्मिन् प्रशान्ते प्रत्येकं विभवोत्सिक्तचेतसाम् ।
तुल्यमुत्पलवंश्यानां राज्येच्छा भूयसामभूत् ॥ १२७ ॥

ततश्चक्रे प्रतीहारः प्रयत्नाद् रत्नवर्धनः ।
नृपं शङ्करवर्माणमवन्तिनृपतेः सुतम् ॥ १२८ ॥

---

120. a) SA_1 (before corr.) I_3 सुय्यकु° (for सुय्याकु°). —c) P_1 I_5 SA सय्यामु•; I_4 स्वय्यामु° (for सुय्यामु°). —d) SA_1 (before corr.) सय्यासेतुं (for सुय्यासेतुं). $I_{1,2,4,7}$ P_3 विनिर्ममे (for स निर्ममे).

121. d) P_2 °जये स्थ°; SA_2 gloss जिथन् (for °जयस्थल°).

124. b) St SA SL $P_{2,3}$ $I_{1-4,7}$ S′ V T C °गोपिताम् (for °गोपितम्). —c) D (before suggestion) St C T P_{1-3} I_3 V S′ SA शूरो (for शूरं).

126. b) SA_1 (before corr.) $I_{1-4,7}$ V क्षमापतेः (for क्षमापतिः). —c) St C T I_1 S′ °षष्ठे [sic] (for °षष्टे).

कणपो विन्नपाऽमात्यस्तनूजं शूरवर्मणः ।
तद्द्वेषात् सुखवर्माख्यं यौवराज्येऽप्ययोजयत् ॥ १२९ ॥

अतस्तयोरभूद् वैरं क्षितीशयुवराजयोः ।
यस्मिन् क्षणे क्षणे राज्यमासीद्दोलामिवाश्रयत् ॥ १३० ॥

शिवशक्त्यादयो वीराः स्वामिकार्योज्झितासवः ।
यत्राऽभूवन् स्वसत्त्वस्य परीक्षाक्षणलाभिनः ॥ १३१ ॥

कुर्वतां स्वामिशत्रूणां दानमानप्रतिश्रवम् ।
सत्त्वैकाश्र्यान्न ते यस्मादानुकूल्यमशिश्रियन् ॥ १३२ ॥

पिण्डस्पृहां परित्यज्याऽहंकृताः शिक्षिताः क्वचित् ।
तावन्न वीततमसः श्ववृत्तिमनुजीविनः ॥ १३३ ॥

कथञ्चिदथ निर्जित्य युवराजं महौजसम् ।
प्राज्यः स्वविजयोंकारश्चक्रे शंकरवर्मणा ॥ १३४ ॥

सम्राट् समरवर्माद्यैर्वितीर्णसमरोऽसकृत् ।
कीर्तिं श्रिया प्रणयिनीं लब्धयाऽधिविवेद सः ॥ १३५ ॥

अथ निर्जित्य दायादांल्लब्ध्वा लक्ष्मीं क्षितीश्वरः ।
जिष्णुर्दिग्विजयं कर्तुं श्रीमानासीन्महोद्यमः ॥ १३६ ॥

तस्य कालबलाद्देशे प्रक्षीणजनसम्पदि ।
लक्षाणि नव पत्तीनां द्वारान्निष्क्रामतोऽभवन् ॥ १३७ ॥

---

129. a) $I_{1,2}$ V SA_1 विन्नपापत्य° (for विन्नपामात्य°). —b) SA_4 gloss अवन्तिवर्मभ्रातुः (for शूरवर्मणः).
130. d) P_3 °मिवाश्रितम् (for °मिवाश्रयत्).
131. a) SL शिवभक्त्यादयो (for शिवशक्त्यादयो). —c) I_1 °त्राभवन् (for °त्राऽभूवन्).
132. d) $I_{1,2,4,7}$ T C S′ V P_3 St °माशिश्रयन् (for °मशिश्रियन्).
134. b) SA_4 gloss सुखवर्माणम् (for युवराजम्).
135. c) I_1 V कीर्तिश्रिया (for कीर्तिं श्रिया).
137. c) I_2 तव (for नव). I_4 पत्नीनां (for पत्तीनां).

स्वपुरस्योपकण्ठेऽपि योऽभूत्कुण्ठितशासनः ।
स एव रत्नोत्तंसेषु राज्ञामाज्ञां न्यवेशयत् ॥ १३८ ॥

गच्छन्नाम्नायविच्छेदं सम्प्रदायः ककुब्जये ।
स्वप्रज्ञया समुन्नीतो राज्ञा शङ्करवर्मणा ॥ १३९ ॥

तत्सेना नरनाथानां पृतनाभिः पदे पदे ।
कुलापगेव कुल्याभिर्विशन्तीभिरवर्ध्यत ॥ १४० ॥

दार्वाभिसारराजेन त्रस्यता समुपाश्रिताः ।
अद्रिद्रोण्यो न वाहिन्यस्तत्सेनानादमादधुः ॥ १४१ ॥

जनोल्बणैर्हरिगणैर्गृह्णन् हरिगणं क्षणात् ।
अनासादितदुर्गं स चक्रे दुर्गान्तरातिथिम् ॥ १४२ ॥

लक्षाणि नव पत्तीनां वारणानां शतत्रयी ।
लक्षं च वाजिनामासीद् यस्य सेनापुरःसरम् ॥ १४३ ॥

स गूर्जरजयव्यग्रः स्वपराभवशङ्किनम् ।
त्रैगर्तं पृथिवीचन्द्रं निन्ये तमसि हास्यताम् ॥ १४४ ॥

पुत्रं भुवनचन्द्राख्यं नीविं प्रागेव दत्तवान् ।
स ह्यभूत्प्रणतिं कर्तुं तस्याऽभ्यर्णमुपागतः ॥ १४५ ॥

---

139. [a]) SA_1 (before corr.) C T St S′ °विच्छेद° (for °विच्छेदं).

140. [d]) D T C S′ °रवर्धत (for °रवर्ध्यत).

141. [a]) SA_2 gloss दार्वाभिसारः दानगलो इति भाषया (for दार्वाभिसार°). $P_{1,3}$ °राज्येन; SA_4 gloss नरवाहननम्ना (for °राजेन). —[b]) SA_3 $P_{1,3}$ I_3 भ्राम्यता (for त्रस्यता). —[c]) SA_4 gloss दार्वाभिसारनृपस्य सेनाः (for वाहिन्यः).

142. [a]) D (after suggestion) T जवो° (for जनो°). —[c]) D (before suggestion) P_{1-3} I_4 °साहित° (for °सादित°). —[d]) P_2 °न्तरान्तिकं (for °न्तरातिथिम्).

144. [a]) SA_2 gloss गूर्जरेति । अत्र गूर्जरः लघुगोज्यराद इति प्रसिद्धो देशः (for गूर्जर°). —[c]) P_3 त्रैगर्तपृथि°; SA_2 gloss त्रिगर्तो नगरकोट्टः तदधीशः (for त्रैगर्तं पृथि°). —[d]) D suggests तमपि (for तमसि).

145. [a]) V पुरं (for पुत्रं). —[b]) SA_1 gloss marg. नीविः नेय इति देशभाषया प्र- and continued by SA_2 as सिद्धः यः स्वप्रतिनिधिः न्यूनबलेन माण्डलिकेनाऽधिकबलस्य राज्ञः प्रतीत्यर्थं समर्प्यते (for नीविं).

अथ तत्कटकं भ्राम्यद्भूरिमण्डलनायकम् ।
वीक्ष्य संमुखमायान्तं महार्णवमिवोल्वणम् ॥ १४६ ॥

समागमक्षणे यस्माच्छङ्कमानः स्ववन्धनम् ।
पलाय्य प्रययौ दूरं निर्वाणौजोविजृम्भितः ॥ १४७ ॥

यमप्रतिमसौन्दर्यमद्याप्याहुः पुराविदः ।
तमेवाऽद्राक्षुरुत्त्रस्ता नृपाः कालमिवोल्वणम् ॥१४८॥

उच्चखानाऽलखानस्य संख्ये गूर्जरभूभुजः ।
वद्धमूलां क्षणाल्लक्ष्मीं शुचं दीर्घामरोपयत् ॥ १४९ ॥

तस्मै दत्त्वा टक्कदेशं विनयादङ्गुलीमिव ।
स्वशरीरमिवापासीन्मण्डलं गूर्जराधिपः ॥ १५० ॥

हृतं भोजाधिराजेन स साम्राज्यमदापयत् ।
प्रतीहारतया भृत्यीभूते थक्कियकान्वये ॥ १५१ ॥

दरत्तुरुष्काधिपयोर्यः केसरिवराहयोः ।
हिमवद्विन्ध्ययोरासीदार्यावर्त इवान्तरे ॥ १५२ ॥

उदभाण्डपुरे तस्थुर्यदीये निर्भया नृपाः ।
पक्षच्छेदव्यथात्रस्ता महार्णव इवाऽद्रयः ॥ १५३ ॥

नक्षत्रेष्विव भूपेषु नभसीवोत्तरापथे ।
यस्यैव विपुला ख्यातिर्मार्तण्डस्येव मण्डलम् ॥ १५४ ॥

---

146. a) S′ °त्कण्टकं भ्रा°; $P_{1,3}$ °कटकभ्रा° (for °टकं भ्रा°). —d) $I_{2,7}$ S′ V T C °मिवोज्ज्वलम् (for °मिवोल्वणम्).
147. After this *v.* तिलकम्.
150. a) SA_4 gloss तक्कदेशः अट्किनदीतटे शकरदो नाम सुट्टदेशाद् दूरं वर्तमानो योजनविंशतिकेन (for टक्कदेशं).
151. b) D P_{1-3} $I_{1-4,7}$ V S′ सम्राज्य° (for साम्राज्य°).
153. $I_{1-4,7}$ C T V S′ om. *v.* 153 and SA_3 adds this *v.* in marg.
154. c) SA_1 (before corr.) SA_3 (after restoration) SG I_7 °पुलख्याति (for °पुला ख्यातिः°). —d) D St $I_{1-4,7}$ P_{1-3} V °मार्ताण्ड° (for मार्तण्ड°).

स श्रीमाँल्लियः शाहिरलखानाश्रयः क्रुधा ।
निराकरिष्णोः साम्राज्यात्तस्य सेवां न लब्धवान् ॥ १५५ ॥

एवं दिग्विजयं कृत्वा प्राप्तः स निजमण्डलम् ।
प्रदेशे पञ्चसत्राख्ये स्वनाम्ना विदधे पुरम् ॥ १५६ ॥

तस्य श्रीस्वामिराजस्य तनयोदक्पथप्रभोः ।
पूर्णिमेव क्षपाबन्धोः सुगन्धाख्याऽभवत्प्रिया ॥ १५७ ॥

तया समं पुरवरे सुरराजोपमो नृपः ।
तस्मिन् शंकरगौरीशसुगन्धेशौ विनिर्ममे ॥ १५८ ॥

द्विजस्तयोर्नायकाख्यो गौरीशसुरसद्मनोः ।
चातुर्विद्यः कृतस्तेन वाग्देवीकुलमन्दिरम् ॥ १५९ ॥

परकाव्येन कवयः परद्रव्येण चेश्वराः ।
निर्लोठितेन स्वकृतिं पुष्णन्त्यद्यतने क्षणे ॥ १६० ॥

स्वल्पसत्त्वो नरपतिः स्वपुराख्यापनाय सः ।
सारापहारमकरोत् परिहासपुरस्य यत् ॥ १६१ ॥

ख्यातिहेतुः पट्टवानं पशूनां क्रयविक्रयौ ।
इत्यादि यत्पत्तनेऽस्ति तत्तस्मिन् हि पुरेऽभवत् ॥ १६२ ॥

राज्यप्रदेन नृपते रत्नवर्धनमन्त्रिणा ।
श्रीरत्नवर्धनेशाख्यो व्यधीयत सदाशिवः ॥ १६३ ॥

---

155. a) $I_{1,2,4,7}$ V $P_{2,3}$ SA_1 SA_3 (before corr.) °मांल्लियः (for °माँल्लाल्लयः). —c) SA_1 (before corr.) T C $I_{1,2,4,7}$ V S′ P_2 °रिष्णुः (for °रिष्णोः). —d) S′ om. न.

156. a) $I_{2,7}$ add स before दिग्विजयं. —b) SA_3 gloss शङ्करवर्मा (for सः). —d) SA_2 gloss शङ्करपोर (for स्वनाम्ना).

158. c) SA P_2 I_3 °गोरेश°; I_4 °शौरीश° (for °गौरीश°).

160. c) D (before suggestion) and all other Mss. read निर्लोठितेन; but it may be emended as निर्लुण्ठितेन. I_3 सुकृतिं (for स्वकृतिं).

161. b) $I_{1,3,4,7}$ P_1 S′ C T St स्वपुरख्या° (for स्वपुराख्या°).

163. b) S′ °मन्त्रिणः (for मन्त्रिणा).

चित्रं नृपद्विपाः पूतमूर्तयः कीर्तिनिर्झरैः ।
भवन्ति व्यसनासक्तिपांसुस्नानमलीमसाः ॥ १६४ ॥

अथ क्रमेण नृपतिर्लोभाभ्यासेन भूयसा ।
आधीयमानचित्तोऽभूत् प्रजापीडनपण्डितः ॥ १६५ ॥

आरब्धैर्व्यसनैर्भूम्ना क्षीणकोशः क्षणे क्षणे ।
देवादीनां स सर्वस्वं जहाराऽऽयासयुक्तिभिः ॥ १६६ ॥

कर्मस्थाने पुरगृहग्रामादिधनहारिणा ।
तेनाऽट्टपतिभागाख्यगृहकृत्याभिधे कृते ॥ १६७ ॥

धूपचन्दनतैलादिविक्रयोत्थं समाददे ।
द्रविणं देववेश्मभ्यः क्रयमूल्यकलाच्छलात् ॥ १६८ ॥

प्रत्यवेक्षां मुखे दत्त्वा विभक्तैरधिकारिभिः ।
चतुःषष्टिं सुरगृहान् मुमोषेतरदञ्जसा ॥ १६९ ॥

ग्रामान् देवगृहग्राह्यान् राजा प्रतिकरेण सः ।
स्वयं स्वीकृत्य सोत्पत्तिं क्ष्मां कार्षक इव व्यधात् ॥ १७० ॥

---

164. ab) C S′ पूतभूतं यः (for पूतमूर्तयः). V कीर्तिनिर्भरैः (for कीर्तिनिर्झरैः). —c) C व्यसनाशक्ति° (for व्यसनासक्ति°).

165. c) SA_1 (before corr.) अधेयमान°; C $I_{3,4}$ S′ अधीयमान° (for आधीयमान°).

166. b) C $I_{1,4,7}$ V S′ क्षीणकोशाः (for क्षीणकोशः). —d) T P_2 °मयुक्तिभिः (for °सयुक्तिभिः).

167. a) SL St Tr. सुरगृह° (for °पुरगृह).

168. a) SA_3 °चन्दनचेला° (for °चन्दनतैला°). —b) $I_{1,2,7}$ $P_{1,3}$ T V S′ समादधे (for समाददे). —d) SA_1 (before corr.) °मूल्ये (for °मूल्य°). SA_2 gloss कलालाभः (for कलाच्छलात्).

169. d) SA_1 $I_{1,2,4,7}$ P_2 C S′ V °मुमोचे° (for मुमोषे°).

170. c) $I_{1-4,7}$ P_{1-3} C T St D V S′ SA चोत्पत्तिम्; SL सेत्पत्तिम् (for सोत्पत्तिम् emended. cf. St Tr.).

तुलां कृत्वा त्रिभागोनां वर्षदेयं स पर्षदे ।
भुक्तिकम्बलमूल्यादिदम्भादभ्यधिकं ददौ ॥ १७१ ॥

दिगन्तरस्थो ग्रामीणानूढभाराननागतान् ।
तद्देशार्धैर्भारमूल्यं वर्षमेकमदण्डयत् ॥ १७२ ॥

वर्षेऽपरस्मिन्निखिलान् भारमूल्यं निरागसः ।
तथैव संख्यया ग्राम्यान् प्रतिग्राममदण्डयत् ॥ १७३ ॥

इत्येषा रूढभारोढिः प्रथमं तेन पातिता ।
दारिद्र्यदूती ग्रामाणां या त्रयोदशधा स्थिता ॥ १७४ ॥

स्कन्धकग्रामकायस्थमासवृत्त्यादिसङ्ग्रहैः ।
अन्यैश्च विविधायासैर्व्यधाद् ग्रामान् स निर्धनान् ॥ १७५ ॥

तुलापहारोपचयग्रामदण्डादिसङ्ग्रहैः ।
इत्येष तेन संवाहो गृहकृत्ये प्रवर्तितः ॥ १७६ ॥

व्यधत्त पञ्च दिविरान् स तस्मिन् भिन्नकर्मणि ।
षष्ठं तथा गञ्जवरं शकचं लवटाभिधम् ॥ १७७ ॥

आत्मनो निरयं मूढः सोऽङ्गीकृत्येत्युपक्रियाम् ।
भाविनामकरोद्राज्ञां पापी यद्वा नियोगिनाम् ॥ १७८ ॥

---

171. b) $I_{1-4,7}$ P_{1-3} C T St D V S′ SA SR SG वर्षदेयां (for वर्षदेयम्). —c) SA_3 I_3 मुक्त° (for भुक्ति°). —d) SA_1 om. दम्भा with a space. $I_{1,2,4,7}$ S′ C T °दप्याधिकं (for °दभ्यधिकं).

172. c) C S′ °द्देशार्हैं°; T °द्देशार्ध्यैं° (for °द्देशार्धैं°).

173. d) C T S′ °तिग्राम्य° (for °तिग्राम°).

174. a) P_{1-3} D गूढभारोढिः (for रूढभारोढिः cf. *v.* vii. 1088).

175. a) $I_{1-4,7}$ St $P_{1,3}$ D C T स्कन्दक° (for स्कन्धक° suggested).

177. a) C T P_{1-3} S′ SG SR शिबिरान् (for दिविरान् cf. *vv.* vi. 130, vii. 111, 119). —cd) D suggests °वरे शकं च (for °वरं शकचं).

178. d) SG SR T C S′ पापीयस्त्वानि°; P_1 पापीयत्वान्नि°; $I_{2,7}$ पापीयत्वानि°; SA_1 (before corr.) P_2 पापी यद्वा वियो°; I_1 पापी यद्वा नियोगिताम् (for पापी यद्वा नियोगिनाम्).

निमित्तं मण्डलेऽमुष्मिन् सविद्यानामनादरः ।
राज्ञां प्रतापहानौ च नान्यः शङ्करवर्मणः ॥ १७९ ॥

मुख्येन गुणिनां राज्ञा धनहान्या प्रथाऽपहाः ।
मूर्खेण येन कायस्था दास्याः पुत्राः प्रवर्तिताः ॥ १८० ॥

तथा कायस्थभोज्या भूर्जाता तत्प्रत्यवेक्षया ।
यथा संजायतेऽवर्णं हरणादिव भूभुजाम् ॥ १८१ ॥

तस्मिन् घोरे प्रजादुःखे कृपार्द्रः पृथिवीपतिम् ।
पुत्रो गोपालवर्माख्यः कदाचिदिदमब्रवीत् ॥ १८२ ॥

'प्रदातुस्तात भवतः पूर्वं न्यासीकृतः स्थितः ।
वरो यः सत्यसन्धस्य सोऽधुना प्रार्थ्यते मया ॥ १८३ ॥

कायस्थप्रेरणादेतैर्दैवेनाऽद्य प्रवर्तितैः ।
आयासैः श्वासशेषैव प्राणवृत्तिः शरीरिणाम् ॥ १८४ ॥

न च नामाऽस्ति तातस्य काचिल्लोकद्वयोचिता ।
मनागपि हितप्राप्तिरेतया जनपीडया ॥ १८५ ॥

अदृष्टविषयां वार्तां गहनां विवृणोति कः ।
दृष्टेऽप्यनिष्टादन्यन्न कर्मणाऽनेन दृश्यते ॥ १८६ ॥

एकतो व्याधिदुर्भिक्षप्रमुखा विपदोऽखिलाः ।
प्रजानामेकतस्त्वेका लुब्धता वसुधापतेः ॥ १८७ ॥

भूभुजोऽभ्यस्तलोभस्य श्रीः कैश्चिन्नाऽभिनन्द्यते ।
अकालकुसुमस्येव फलसंभावनोज्झिता ॥ १८८ ॥

---

180. a) $I_{1,4,7}$ P_3 C V S′ गुणिना (for गुणिनां). C T S′ राज्ञां (for राज्ञा). C $P_{1,3}$ कायस्थ° (for कायस्थाः).

181. c) $I_{1,2,4,7}$ C T S′ V अवर्ण°; SA_2 gloss अपयशः (for अवर्णं).

183. b) $I_{2,7}$ V पूर्वं (for पूर्वं).

186. c) P_3 °प्यदृष्टा° (for °प्यनिष्टा°). $I_{1-4,7}$ V S′ C P_2 °दन्यत्र (for °दन्यन्न). —d) T तेन (for अनेन).

दानं च सूनृता सूक्तिर्विश्वसंवननं प्रभोः ।
लोभः पूर्वं तयोरेव विनाशाय महोद्यमः ॥ १८९ ॥

प्रतापमायतिं शोभां हेमन्ताऽहस्य वारिदः ।
स्मृतिशेषां करोत्येव लोभश्च पृथिवीभुजाम् ॥ १९० ॥

दायादा व्ययभीरुतापरिहृताऽऽरब्धेर्भवन्त्युन्नता
भृत्याः प्रत्युपकारकातरमतेः कुर्युर्न केऽपि प्रियम् ।
राशीभूतधनस्य जीवितहृतौ शश्वद्यतेरन्निजा
भूभर्तुः क्रियते द्विषेव रभसाल्लोभेन किं नाऽप्रियम् ॥ १९१ ॥

राजसंवाहनामाऽयं नवाऽऽयासो जनासुहृत् ।
तदेष लोभप्रभवः प्रजानाथ निवार्यताम्' ॥ १९२ ॥

श्रुत्वेति राजपुत्रस्य सौजन्येनोज्ज्वलं वचः ।
स्मितधौताधरो राजा शनैर्वचनमब्रवीत् ॥ १९३ ॥

'तवाकृत्यविसंवादि वचः सौजन्यपेशलम् ।
स्मारयत्यद्य मामेतच्चित्तवृत्तिं पुरातनीम् ॥ १९४ ॥

कुमारभावे पूर्वं मे तवेवाऽऽर्द्रान्तरात्मनः ।
प्रजावत्सलता वत्स पर्याप्ता पर्यवर्धत ॥ १९५ ॥

सोऽहं घर्मे वहन् वर्म शीते दत्त्वाऽच्छमंशुकम् ।
पदातिरपपादत्रः पित्रा संचारितोऽभवम् ॥ १९६ ॥

मृगव्यादौ हयैः सार्धमटन्तं कण्टकक्षतम् ।
अन्तर्बाष्पं मां विलोक्य तमासूयिषुरग्रगाः ॥ १९७ ॥

---

189. b) I_7 °संवनतं; S′ °संभवनं (for °संवननं).
191. a) $I_{1,2,4,7}$ C S′ दायादव्य° (for दायादा व्य°).
192. I_2 om. *vv.* 192*d*—206*b*.
194. b) S′ °पेशलाम् (for °पेशलम्).
196. a) D महद्धर्मं; P_{1-3} I_3 St महद्वर्म (for वहन् वर्म). —b) D $P_{1,2}$ दत्त्वोच्छमं°; $I_{1,4}$ SA_1 दत्वोश्चमं°; D suggests दत्त्वोन्नमं°; V I_7 दत्त्वोच्चमं°; C T [अ]दत्त्वोष्णमं° (for दत्त्वाऽच्छमं°).
197. a) $I_{1,7}$ V °व्याधौ; C T S′ °व्याधा (for °व्यादौ). —b) SA_1 (before corr.) P_3 $I_{1,4,7}$ V °मटन्तः (for °मटन्तं). —d) P_1 तमास्रिय°; $I_{1,3,4,7}$ P_{1-3} V S′ C T SA D St तमसूयि (for तमासूयि° cf. SL St Tr.).

स तानुवाच सामान्यो भूत्वाऽहं राज्यमाप्तवान् ।
काले काले सेवकानां जाने सेवापरिश्रमम् ॥ १९८ ॥

ईदृग्दुःखमयं भुक्त्वा ज्ञास्यत्यन्यव्यथां ध्रुवम् ।
प्राप्तैश्वर्यो भवेन्मूढो गर्भेश्वरतयाऽन्यथा ॥ १९९ ॥

उपायैरीदृशैर्योऽहं कृतः पित्रा सुशिक्षितः ।
तेनाऽपि प्राप्तराज्येन मयैवं पीडिताः प्रजाः ॥ २०० ॥

गर्भवासव्यथां जातः शरीरी विस्मरेद्यथा ।
प्राप्तराज्यस्तथा राजा नियतं पूर्वचिन्तनम् ॥ २०१ ॥

त्वयैव तस्मादेकोऽद्य वरो मह्यं प्रदीयताम् ।
प्राप्तराज्यः प्रजापीडां मा कार्षीस्त्वमतोऽधिकाम्' ॥ २०२ ॥

सासूयमिति तेनोक्तः कृतान्योन्यस्मितैर्विटैः ।
राजाऽऽप्तैर्वीक्षितश्चासीत् कुमारो ह्रीनताननः ॥ २०३ ॥

त्यागभीरुतया तस्मिन् गुणिसङ्गपराङ्मुखे ।
आसेवन्ताऽवरा वृत्तीः कवयो भल्लटादयः ॥ २०४ ॥

निर्वेतनाः सुकवयो भारिको लवटस्त्वभूत् ।
प्रसादात्तस्य दीनारसहस्रद्वयवेतनः ॥ २०५ ॥

कल्यपालकुले जन्म तत्तेनैव प्रमाणितम् ।
क्षीबोचितापभ्रंशोक्तेर्दैवी वाग्यस्य नाऽभवत् ॥ २०६ ॥

वेष्टितश्मश्रुरुष्णीषो घ्राणस्याऽग्रे प्रदेशिनी ।
ध्यानैकाग्रा दृगित्यासीत् सुखराजस्य मन्त्रिणः ॥ २०७ ॥

---

200. b) SA_1 (before corr.) °शिक्षिताः; I_4 स्वशिक्षितः (for सुशिक्षितः).
201. b) $P_{1,3}$ $I_{4,7}$ V शरीरे (for शरीरी). —d) D P_2 SA_3 चिन्तितम् (for चिन्तनम्).
203. b) I_3 °न्यहितैर्वि° (for °न्यस्मितैर्वि°).
205. d) P_2 °वेतनाः (for °वेतनः).
206. a) D C $P_{1,2}$ $I_{1,3,4,7}$ V कल्पपाल°; S' कल्यापाल° (for कल्यपाल°). —c) S' °शोक्तै° (for °शोक्ते°).
207. d) SA_1 (before corr.) $I_{1,4,7}$ V सुखरागस्य (for सुखराजस्य).

योऽयमार्योचितो वेषो दुर्नयासेविनः प्रभोः ।
छन्दानुवृत्त्या स प्राप नटस्येव विडम्बनाम् ॥ २०८ ॥

सोऽनुगैः सह निर्द्रोहं जघान द्रोहशङ्कया ।
शूरं दार्वाभिसारेशं शर्वर्यां नरवाहनम् ॥ २०९ ॥

प्रजाभिशापे पतिते नृपस्योन्मार्गवर्तिनः ।
त्रिंशद्त्रिंशाः सुतास्तस्य व्यपद्यन्ताऽऽमयं विना ॥ २१० ॥

वंशः श्रीर्जीवितं दारा नामाऽपि पृथिवीभुजाम् ।
क्षणादेव क्षयं यान्ति प्रजाविप्रियकारिणाम् ॥ २११ ॥

इत्युक्तं वक्ष्यते चाऽग्रे व्यक्तमेतत्तु चिन्त्यताम् ।
प्रनष्टं तस्य नामाऽपि यथा क्रूरेण कर्मणा ॥ २१२ ॥

नाम्ना पत्तनमित्येव प्रख्यातं स्वपुरं कृतम् ।
कस्याऽन्यस्याऽभिधाध्वंसि यथा शङ्करवर्मणः ॥ २१३ ॥

स्वस्त्रीयः सुखराजस्य तेन द्वाराधिपः कृतः ।
वीरानकाभिधे स्थाने प्रमादादासदद्वधम् ॥ २१४ ॥

तत्कोपात् स स्वयं राजा दत्तयात्रो मदोर्जितः ।
वीरानकं समुन्मूल्य प्रविवेशोत्तरापथम् ॥ २१५ ॥

सिन्धुकूलाश्रयान् देशाञ्जित्वा भूरीन्भयातुरैः ।
कृतानतिर्महीपालैः प्रत्यावृत्तोऽभवत्ततः ॥ २१६ ॥

---

208. After this *v.* युग्मम्.

209. [a]) P_2 निद्रोंहो (for निद्रोंहं).

210. [a]) SA_1 *Inter lin.* '50' (for त्रिंशद्त्रिंशाः cf. *v.* viii. 126).

211. [c]) D St C T P_{1-3} I_{2-4} V S' याति (for यान्ति).

212. I_4 om. this *v.* —[c]) I_1 D $P_{1,3}$ प्रणष्टं (for प्रनष्टं).

213. [a]) SA_2 gloss पट्टन्; P_1 I_3 पत्तुन° (for पत्तन°).

214. [c]) SA_2 gloss द्वारविद्यायां वीराणकम् (for विरानका°). —[d]) SA_4 gloss सुखराजस्वस्त्रीयः (for °दासदद्वधम्).

215. [b]) $I_{2,4,7}$ V मदोज्झितः (for मदार्जितः).

उरशां विशतस्तस्य वास्तव्यैरौरशैः समम् ।
निकेतहेतोः सैन्यानामकस्मादुदभूत्कलिः ॥ २१७ ॥

गिरिशृङ्गाधिरूढेन श्वपाकेन निपातितः ।
वेगवाही शरस्तस्य प्रमादादविशङ्कलम् ॥ २१८ ॥

मुमूर्षुराप्तान् कटकं संरक्ष्य नयतेति सः ।
उक्त्वा कर्णीरथारूढः स्थानात्तस्माद्विनिर्ययौ ॥ २१९ ॥

हीनदर्शनसामर्थ्यः परिज्ञाय शनैर्गिरा ।
क्रन्दन्त्या वपुरालिङ्ग्य स्थितायाः क्षामभाषितः ॥ २२० ॥

पुत्रं गोपालवर्माख्यं न्यासीकृत्य च रक्षितुम् ।
शिशुदेश्यं महादेव्याः सुगन्धाया अबान्धवम् ॥ २२१ ॥

फाल्गुने कृष्णसप्तम्यां वत्सरे सप्तसप्ततौ ।
उत्खायमानविशिखो मार्ग एव व्यपद्यत ॥ २२२ ॥

सुखराजादयः सैन्यं रक्षन्तः परभूमिषु ।
वृत्तान्तैर्गोपयन्तस्तं यान्त एवाऽभवन्पथि ॥ २२३ ॥

तं यन्त्रसूत्रैस्ते मूर्ध्नो नम्रतोन्नम्रतावहैः ।
प्रतिप्रणामं प्राप्तानां सामन्तानामकारयन् ॥ २२४ ॥

षड्भिर्दिनैर्निजे स्थाने प्राप्ते बोल्यासकाभिधे ।
चक्रिरे गतसंत्रासास्ततस्तस्याऽन्तसत्क्रियाम् ॥ २२५ ॥

---

217. a) SA_2 gloss उड्ड (for उरशां).
218. c) $I_{1,7}$ V शिरस्तस्य (for शरस्तस्य). —d) C P_1 S′ प्रसादाद° (for प्रमादाद°).
219. c) SA_1 I_{1-4} °रथारूढान् (for °रथारूढः).
220. c) SA_1 (before corr.) °लिङ्गया° (for °लिङ्गय).
222. b) I_7 om. one सप्त. —d) $I_{2,7}$ V विपद्यत (for व्यपद्यत). After this v. तिलकम्.
223. a) SA_3 gloss मन्त्रिणः (for सुखराजादयः). —c) P_2 I_3 SA_3 वृत्तान्तं (for वृत्तान्तै°).
224. d) I_4 °मकारयत् (for °मकारयन्).
225. b) C S′ बोल्लास°; SA_2 gloss वराहमूलसमीपे द्वारवत्यां (for बोल्यासकाभिधे).

तिस्रः सुरेन्द्रवत्याद्या राज्ञ्यो राजानमन्वयुः ।
वेलावित्तः कृतज्ञश्च जयसिंहाह्वयः कृती ॥ २२६ ॥

द्वौ लाडो वज्रसारश्च तं भृत्यावनुजग्मतुः ।
इति षड्भिश्चितारूढैः सहसाऽक्रियताऽग्निसात् ॥ २२७ ॥

ततो जुगोप गोपालवर्मा धार्मिकतोज्ज्वलः ।
सुगन्धया पाल्यमानः सत्यसंधो वसुन्धराम् ॥ २२८ ॥

मध्ये ललिताकादीनां दुर्वृत्तानां वसन्नपि ।
अनतिक्रान्तबाल्योऽपि दुस्संस्कारान्न सोऽग्रहीत् ॥ २२९ ॥

भूपालजननी भोगैर्वैधव्येऽधिकमुन्मदा ।
सा प्रभाकरदेवाख्यमचीकमत मन्त्रिणम् ॥ २३० ॥

तया निर्भरसंभोगप्रीतया स व्यधीयत ।
सौभाग्यपदशृङ्गारमौलिचन्द्रत्रयाऽङ्कितः ॥ २३१ ॥

कोशाध्यक्षेण रागिण्यास्तस्या लुण्ठितसंपदा ।
उदभाण्डपुरे तेन शाहिराज्यं व्यजीयत ॥ २३२ ॥

आज्ञातिक्रमिणः शाहेः कृत्वा कमलुकाऽभिधाम् ।
तोरमाणाय स प्रादाद्राज्यं लल्लियसूनवे ॥ २३३ ॥

---

226. c) D $P_{1,3}$ SG वालाविभुः ; $I_{1-4,7}$ P_2 V SA SR वालावित्तः; C T S′ वालावितुः (for वेलावित्तः cf. *vv.* vi. 73,106, 324).

227. d) D suggests सह सोक्रियत (for सहसाऽक्रियत).

229. a) SA_3 gloss लालितकाः पदातयः (for लालितकादिनां). —b) I_7 om. दुर्वृत्तानाम् .

231. d) All Mss. except SL read °चक्रत्रया° (for °चन्द्रत्रया° cf. *v.* vii. 195).

232. c) SA_1 (before corr.) उदाभाण्ड°; $I_{1,2,4,7}$ T C S′ तदा भाण्डा° P_1 V तदभाण्ड°; SA_2 gloss हैभङ्ग् (for उदभाण्डपुरे cf. *v.* v. 153). —d) D $I_{1-4,7}$ P_{1-3} V S′ SA_3 SR SG व्यधीयत (for व्यजीयत)

233. b) $I_{1,2,4,7}$ S′ V C T कमलकाभिधम् ; SA_1 (before corr.) P_2 कमलुकाभिधम् (for कमलुकाऽभिधाम्). —c) SA_1 $I_{1-4,7}$ P_{1-3} D C T V S′ तोमराणाय (for तोरमाणाय).

प्रत्यावृत्तोऽथ नगरं विवेश विजयोर्जितः ।
शौर्यश्रृङ्गारवसतौ साभिमानः स्वविग्रहे ॥ २३४ ॥

स राजजननीजारः साहङ्कारो जयार्जनात् ।
मानक्षतिमधिक्षेपैर्वीराणां व्यधितान्वहम् ॥ २३५ ॥

क्षुद्रेण कामिना वेश्यावेश्मनीव नृपास्पदे ।
तेनाऽऽवृते सम्प्रवेशो नाऽभूदन्यस्य कस्यचित् ॥ २३६ ॥

शनैर्विज्ञातवार्तस्य धनमानाऽपहारकृत् ।
सोऽभूदक्षिगतोऽत्यर्थं राज्ञो गोपालवर्मणः ॥ २३७ ॥

विद्यते यन्न गञ्जेऽस्मिंस्तत्सर्वं शाहिविग्रहे ।
गतमित्यब्रवीद्भूपं स कोशगणनोद्यतम् ॥ २३८ ॥

अथ गञ्जाधिपो राजभीतः खार्खोदवेदिनम् ।
रामदेवाऽऽह्वयं बन्धुमभिचारमकारयत् ॥ २३९ ॥

तयाऽभिचारक्रियया भुक्तभूर्वत्सरद्वयम् ।
गोपालवर्मनृपतिर्जातदाहो व्यपद्यत ॥ २४० ॥

व्यक्तीभूतकुकर्मा स राजदण्डभयाऽऽकुलः ।
रामदेवोऽवधीत् पापः स्वयमेव स्वविग्रहम् ॥ २४१ ॥

रथ्यागृहीतो गोपालवर्मभ्राताऽथ सङ्कटः ।
बभूव प्राप्तराज्यः स दशभिर्दिवसैर्व्यसुः ॥ २४२ ॥

अथ वंशक्षये वृत्ते राज्ञः शङ्करवर्मणः ।
प्रजाप्रार्थनया राज्यं सुगन्धा विदधे स्वयम् ॥ २४३ ॥

---

235. ab) SA_1 °सङ्गात्साभिमानो (for °जारः साहङ्कारो). —c) SA_1 (before corr.) मनः° (for मान°). $I_{2,7}$ V °क्षिति° (for °क्षति°).
237. b) SA_1 (before corr.) °मालाप° (for °मानाऽप°).
238. a) $I_{1,2,7}$ V यत्र (for यन्न). —d) I_7 V शोक° (for कोश°).
239. a) SA_4 gloss प्रभाकरः (for गञ्जाधिपः). —b) C V S′ खर्खो°; I_7 खुर्खो° (for खार्खो°).
243. d) SA_2 gloss गोपालवर्मसङ्कटयोर्माता सुगन्धा; I_2 gloss गोपालवर्ममाता (for सुगन्धा). SA_1 (before corr.) पुरम् (for स्वयम्).

गोपालपुरगोपालमठगोपालकेशवान् ।
सा पुरं च स्वनामाङ्कं विदधे धर्मवृद्धये ॥ २४४ ॥

गोपालवर्मणो जाया नन्दाऽनिन्द्यान्वयोद्भवा ।
शिशुरप्यभवन्नन्दामठकेशवकारिणी ॥ २४५ ॥

अन्तर्वत्न्यां क्षणे तस्मिन् पत्न्यां गोपालवर्मणः ।
जयलक्ष्म्यां बबन्धाऽऽस्थां श्वश्रूः सन्तानकाङ्क्षिणी ॥ २४६ ॥

तस्यां विपन्नाऽपत्यायां प्रसवान्तेऽतिदुःखिता ।
साऽभूदन्वयिने राज्यं कस्मैचिद्दातुमुद्यता ॥ २४७ ॥

तस्मिन्काले महीपालनिग्रहानुग्रहक्षमम् ।
तत्र तन्त्रिपदातीनां कृतसंहत्यभूत्कुलम् ॥ २४८ ॥

ततः समाश्रितैकाङ्गा स्वयं संवत्सरद्वयम् ।
सुगन्धा विदधे राज्यं सा मित्रत्वेन तन्त्रिणाम् ॥ २४९ ॥

योग्याय दातुं साम्राज्यं कस्मैचित्सा किलैकदा ।
मन्त्राय मन्त्रिसामन्तांस्तन्त्र्यैकाङ्गानढौकयत् ॥ २५० ॥

अवन्तिवर्मवंशान्ते नप्तारं शूरवर्मणः ।
गग्गायाः स्वकुटुम्बिन्याः संजातं सुखवर्मणा ॥ २५१ ॥

---

244. [a]) SA_2 gloss गुरीपुरम् (for गोपालपुर°).
245. [cd]) SA_2 gloss नन्दीमठम् (for नन्दामठ°). All Mss. except D (after suggestion) and SL read °धारिणी (for °कारिणी).
246. [a]) St D T C $I_{1-4,7}$ P_{1-3} S′ V अन्तर्वत्न्याः (for अन्तर्वत्न्यां). —[b]) D T C St P_{1-3} $I_{1-4,7}$ S′ V पत्न्याः (for पत्न्यां). —[c]) D P_3 I_2 जयलक्ष्म्या (for जयलक्ष्म्यां).
248. [b]) SA_1 (before corr.) $I_{1,4,7}$ C P_2 V S′ विग्रहा° (for निग्रहा°). —[c]) $I_{1,2,4,7}$ C V S′ SA_1 तत्र पदा°; P_1 तत्प्रपदा° (for तन्त्रिपदा°). —[d]) $I_{2,7}$ C T S′ कृत्य° (for कृत्य°). I_4 °त्कुलात् (for त्कुलम्).
249. I_7 om. from *vv.* 249–250 *b*. —[d]) SA SG SR $P_{1,2}$ I_2 समित्र°; C T $I_{1,2,4}$ V S′ समन्त्रित्वेन (for सा मित्रत्वेन). SA_3 *varia lectio* (before being struck out) मन्त्रिणां (for तन्त्रिणां).
250. [d]) SA_1 $I_{1,2,4,7}$ C $P_{1,2}$ S′ V °न्तात्तन्त्र्यै°; D P_3 I_3 °न्तांस्तन्त्र्ये° (for °न्तांस्तन्त्र्यै°).
251. [c]) P_2 $I_{3,4}$ गंगायाः; C T I_7 S′ गर्गायाः (for गग्गायाः).

अनुव्रतो मे संबन्धिस्नेहादेवं भवेदिति ।
राज्ये निर्जितवर्माख्यं कर्तुं तस्या मनोऽभवत् ॥ २५२ ॥

तया तदुक्तं विषयव्यसनित्वेन जागरात् ।
रात्रौ दिवाशयतया योऽप्यनुत्थानदूषितः ॥ २५३ ॥

नाम पङ्गुरिति प्राप राज्ये का तस्य योग्यता ।
इत्युदीर्याऽभवन् घ्नन्तो यावत्केचन मन्त्रिणः ॥ २५४ ॥

संहतैर्भेदनिर्यातैस्तावन्निर्जितवर्मजः ।
दशवर्षः कृतो राजा पार्थस्तन्त्रिपदातिभिः ॥ २५५ ॥

ते गञ्जाधिपवाक्यानां सुगन्धोत्पाटनात्कृतम् ।
प्रायश्चित्तममन्यन्त मानक्षतिविधायिनाम् ॥ २५६ ॥

सा राजधान्याः साम्राज्यपरिभ्रष्टा विनिर्ययौ ।
हृताधिकारा हारस्य पतितैर्बाष्पबिन्दुभिः ॥ २५७ ॥

शरणं प्रत्यभाद् भृत्यो यो यस्तस्याः क्रमागतः ।
तं तमैक्षिष्ट निर्यान्ती विपक्षैः सह संगतम् ॥ २५८ ॥

वर्षे एकोननवते संभूयैकाङ्गसैनिकाः ।
गत्वा सुगन्धामानिन्युः पुनर्हुष्कपुरस्थिताम् ॥ २५९ ॥

तामापतन्तीमाकर्ण्य पार्थानुग्राहका मदात् ।
चैत्रान्ते तन्त्रिणः सर्वे निर्ययुः समरोन्मुखाः ॥ २६० ॥

---

252. After this *v.* युग्मम्.
253. b) I_1 °व्यसनत्वेन (for व्यसनित्वेन).
254. a) SA_2 gloss निर्जितवर्मा (for पङ्गु°).
255. After this *v.* तिलकम्.
256. a) SA_2 gloss कोट्टरक्षाः (for ते). I_2 gloss कोट्टरक्षकानां (for गञ्जाधिप°).
257. I_7 om. *v.* 257*c*—258*a*. —c) St P_{1-3} SA_3 कृताधिकारा (for हृताधिकारा).
258. c) I_2 समैक्षिष्ट (for तमैक्षिष्ट).
259. a) St SA_1 P_3 $I_{1,2,4,7}$ V एकान्न° (for एकोन°). —d) $I_{1,2,4,7}$ S V °हुष्कपुरे; SA_2 gloss वराहमूले (for °हुष्कपुर°).
260. a) $I_{2,4,7}$ V तमाप° (for तामाप°).

ते जित्वा नवते वर्षे वैशाखे भिन्नसंहतीन् ।
एकाङ्गान् व्यूढसंघाता बबन्धुस्तां पलायिताम् ॥ २६१ ॥

निष्पालकविहारान्तस्तैर्बद्धा सा व्यपद्यत ।
अनित्यपतनोच्छ्राया विचित्रा भाग्यवृत्तयः ॥ २६२ ॥

अस्मिन् धनजनक्षैण्यनिमित्तं मण्डलोत्तमे ।
सर्वतोदिक्कमुत्तस्थावथाऽनर्थपरम्परा ॥ २६३ ॥

जनकः पालको भूत्वा पङ्गुर्बालस्य भूपतेः ।
साऽमात्योऽपीडयल्लोकमुत्कोचग्रहतत्परः ॥ २६४ ॥

भूभुजो ग्रामकायस्था इवाऽन्योन्यविपाटनम् ।
दत्ताऽधिकाऽधिकोत्कोचा विदधुस्तन्त्रिसेवया ॥ २६५ ॥

यद्राजैः कन्यकुब्जाद्या विलब्धास्तत्र मण्डले ।
तन्त्रिणां हुण्डिकादानाद्भूभुजां जीविकाऽभवत् ॥ २६६ ॥

विष्णुः पुराणाधिष्ठाने मेरुवर्धनमन्त्रिणा ।
श्रीमेरुवर्धनस्वामिनामा येन व्यधीयत ॥ २६७ ॥

तदात्मजाः क्षणे तस्मिन् गहनद्रोहचाक्रिकाः ।
चक्रुर्निगूढराज्येच्छाः प्रजाऽऽयासैर्धनार्जनम् ॥ २६८ ॥

सार्धं सुगन्धादित्येन गूढं शङ्करवर्धनः ।
तेषां ज्येष्ठो बद्धसख्यो मुमोष नृपमन्दिरम् ॥ २६९ ॥

---

261. c) $I_{1-4,7}$ S′ V P एकाङ्गा (for एकाङ्गान्). $I_{1-4,7}$ D St C T P_{1-3} V S′ °सङ्घातान् (for °सङ्घाता cf. SL St Tr.). —d) V S′ C I_2 I_7 °स्तान् पलायितान् (for °स्तां पलायिताम्).

264. b) SA_2 gloss निर्जितवर्मा (for पङ्गुः).

266. a) SA_1 (after corr.) D (before suggestion) P_{1-3} $I_{1,2,4}$ यद्राज्यैः (for यद्राजैः).

267. a) S′ विष्णु° (for विष्णुः). SA_2 gloss पांयृढ्ठन् इति प्रसिद्धे ग्रामे (for पुराणाधिष्ठाने). —b) SA_4 gloss पङ्गुश्वशुरेण (for मेरुवर्धन°).

268. a) SA_2 gloss निर्जितवर्मजाः तदात्मजाः चक्रवर्मा शूरवर्मा। शम्भुवर्धनः शङ्करवर्धनः मेरुवर्धनपुत्राः (for तदात्मजाः). After this *v.* युग्मम्.

269. a) SA_2 gloss मन्त्रिणा (for सुगन्धादित्येन). —c) SA_4 gloss सुगन्धादित्येन सह (for बद्धसख्यो).

क्षीणप्रजे क्षणे तस्मिन् क्षारपात इव क्षते ।
उदीपः प्लाविताऽशेषशरच्छालिरजृम्भत ॥ २७० ॥

खार्यां सहस्रक्रेयायां दुर्लभे भोजनेऽभवत् ।
वर्षे त्रिनवते घोरे दुर्भिक्षेण जनक्षयः ॥ २७१ ॥

शवैश्चिरप्रविष्टाम्बुसंसेकोच्छूनविग्रहैः ।
वितस्ता सर्वतश्छन्ना दुर्लक्ष्यसलिलाऽभवत् ॥ २७२ ॥

विश्वतोऽस्थिमये जाते नैविड्यात् क्षितिमण्डले ।
सर्वभूतभयादायि श्मशानैक्यमजायत ॥ २७३ ॥

महार्घधान्यसंभारविक्रयप्राप्तसंपदः ।
मन्त्रिणः क्ष्मापतेः प्रापुस्तन्त्रिणश्च धनाढ्यताम् ॥ २७४ ॥

आदेयः क्ष्माभुजः सोऽभून्मन्त्री यस्तादृशीः प्रजाः ।
विक्रीय वाहयन्नासीत्तन्त्रिणां हुण्डिकाधनम् ॥ २७५ ॥

अटव्यां वृष्टिसंपाते वातवर्षैरुपद्रुतम् ।
बहिः सर्वं जनं पश्यन् कश्चित्प्रातोष्णमन्दिरः ॥ २७६ ॥

यथा तथा जनं दुःस्थं वीक्ष्य कापुरुषश्चिरम् ।
राजधानीस्थितः पङ्गुः स्वसुखं बह्वमन्यत ॥ २७७ ॥

तुञ्जीनचन्द्रापीडादिप्रजापालप्रियाः प्रजाः ।
एवं तस्मिन् क्षणे नीताः संक्षयं राजराक्षसैः ॥ २७८ ॥

प्रापुश्चिरमवस्थानं पार्थिवा न तदा क्वचित् ।
धारासम्पातसंभूता बुद्बुदा इव दुर्दिने ॥ २७९ ॥

---

270. b) P_3 इवाक्षते (for इव क्षते). —c) SA_1 (before corr.) उद्द्वीपः; SA_4 gloss व्योपो Kāṣ. (for उदीपः).
271. c) SA_4 gives the full date सप्तर्षि 3993 (for त्रिनवते).
272. d) SA_1 (after corr.) I_3 P_2 दुर्लक्ष°; P_3 दुर्लक्षं (for दुर्लक्ष्य°).
273. a) SA_1 om. जाते with a space.
274. a) St C T $I_{1,2,4,7}$ V S′ महार्ह° (for महार्घ°).
275. a) SA_1 C St $I_{1-4,7}$ S′ V P_2 आधेयः (for आदेयः).
276. a) SA_1 (before corr.) $I_{1,2,7}$ C V S′ दृष्टि° (for वृष्टि°).
277. d) $I_{1,4,7}$ V स्वमुखं (for स्वसुखम्): After this v. युग्मम्.

पार्थः पितरमुत्पाट्य कदाचित् प्राभवत्स्वयम् ।
कदाचित् स तमुत्पाट्य तन्त्रिचक्रिकया पिता ॥ २८० ॥

अप्रीणयत् पङ्गुवधूबडवामण्डलं युवा ।
सुगन्धादित्यबीजाश्वो व्यवायविधिसेवया ॥ २८१ ॥

राज्ञ्या बप्पटदेव्याः स निर्दयैः सुरतोत्सवैः ।
खण्डयामास कण्डूतिं साऽप्यस्यार्थैषणां धनैः ॥ २८२ ॥

भगिनीभगसौभाग्यबद्धराज्याः स्वयं ददुः ।
यां पङ्गवे मनोज्ञाङ्गीं मेरुवर्धनसूनवः ॥ २८३ ॥

सुगन्धादित्यमौत्सुक्यात् साऽपि देवी मृगावती ।
स्वयं सम्बुभुजेऽभ्यर्थ्य कान्ता कामितकामिनी ॥ २८४ ॥

पर्यायेणाऽभवद् भृत्यः स तयोर्भोगवृद्धये ।
दरिद्रयोषितोरेकं भुक्तिपात्रमिवान्वहम् ॥ २८५ ॥

पुत्रयो राज्यलाभाय स्पर्धयाऽऽभ्यां स्वमन्त्रिणे ।
दत्ता निधुवनश्रद्धा धनदानैः सदक्षिणा ॥ २८६ ॥

अथ पार्थं समुत्पाट्य तत्पिता पङ्गुराश्रितः ।
तन्त्रिभिः सप्तनवते वर्षे पौषेऽभिषेचितः ॥ २८७ ॥

माघेऽष्टानवते वर्षे सोऽभिषिच्य शिशुं सुतम् ।
चक्रवर्माऽभिधं राज्ये क्षीणपुण्यो व्यपद्यत ॥ २८८ ॥

---

280. d) All Mss. except SL read °प्यभूत् (for पिता).

281. c) SA_3 gloss मन्त्री (for सुगन्धादित्य). —d) SA_3 gloss व्यवायः मैथुनम् (for व्यवाय°).

282. a) SA_4 gloss चक्रवर्ममातुः (for राज्ञ्याः). —d) D (before suggestion) and all other Mss. except SL read °स्यार्थैषणां (for °स्यार्थैषणां).

283. b) $I_{1,2,4,7}$ C S′ V दधुः (for ददुः).

285. b) SA_4 gloss तयोर्बप्पटदेवीमृगावत्योः पङ्गुपत्न्योः (for तयोः).

286. d) SA_2 धनधान्यैः (for धनदानैः).

पैतृकं वाञ्छतो राज्यं पार्थस्याऽनुचरा व्यधुः ।
एकाङ्गैः सह सङ्ग्रामं तत्र तन्त्रिपदातयः ॥ २८९ ॥

मातुर्वप्पटदेव्याः स कंचित्कालं शिशुर्नृपः ।
मातामह्याः क्षिल्लिकायाः पाल्यस्त्वासीत् समा दश ॥ २९० ॥

बाल्यादव्यक्तदौःशील्ये तस्मिंस्तत्पालनं तयोः ।
निर्दोषमासीदण्डस्थफणिलालनसन्निभम् ॥ २९१ ॥

जातः पङ्गोर्मृगावत्यां नवमेऽब्देऽथ तन्त्रिभिः ।
चक्रवर्माणमुत्पाट्य शूरवर्मा नृपः कृतः ॥ २९२ ॥

निस्स्नेहा मातुलामात्याः प्रययुः स्वार्थतत्पराः ।
अदत्त्वा तन्त्रिणां देयं तस्योत्पाटनहेतुताम् ॥ २९३ ॥

अदुर्वृत्तोऽपि स क्ष्माभृद्विना भूरिधनार्पणम् ।
गुणवानिव वेश्यानां तन्त्रिणां नाऽभवत् प्रियः ॥ २९४ ॥

वर्षे गते तमुत्पाट्य दृष्टोत्पत्तितया नृपम् ।
बह्वर्थदं पुनः पार्थं व्यधुस्तन्त्रिपदातयः ॥ २९५ ॥

अभूत् साम्ववती वेश्या साम्बेश्वरविधायिनी ।
पार्थप्रिया तन्त्रिचक्रसंग्रहे ज्ञातचक्रिका ॥ २९६ ॥

कालापेक्षी चक्रवर्मा ततो यच्छन् धनं बहु ।
एकादशाब्दस्याऽऽषाढे कृतो भूयोऽपि तन्त्रिभिः ॥ २९७ ॥

---

289. b) SL °स्यानुचरैः (for °स्यानुचराः). —d) $I_{2,4,7}$ V मन्त्रि° (for तन्त्रि°).

290. c) SA_1 (before corr.) क्षल्लि° (for क्षिल्लि°).

292. a) SA_4 gloss मेरुवर्धनपुत्र्यां (for मृगावत्यां). —b) SA_1 $I_{2-4,7}$ C T S′ मन्त्रिभिः (for तन्त्रिभिः).

293. b) $I_{1,4,7}$ V °तत्परः (for °तत्पराः).

295. c) V पार्थे (for पार्थं).

296. b) SA_2 gloss साम्बोरणग्रामे (for साम्बेश्वर°).

297. b) All Mss. except SL read ततोप्यैच्छद्धनं (for ततो यच्छन् धनं).

पार्थादीन् यैः समुत्पाट्य भुक्तं चक्रिकया पुरा।
तस्तैः स्थानैश्च ये तेभ्यो जीवनाद्युपलेभिरे ॥ २९८ ॥

पिता भ्राता च यैरस्य राज्यादुत्पाटितोऽभवत्।
सम्बन्धिभ्योऽपि यैर्दुग्धं कन्यां दत्त्वेतरेतरम् ॥ २९९ ॥

अकरोद् दृष्टदोषाणां तेषामेव स नष्टधीः।
मेरुवर्धनपुत्राणामधिकारसमर्पणम् ॥ ३०० ॥

कृतोऽक्षपटलाधीशस्तेन शङ्करवर्धनः।
गृहकृत्येऽप्यसत्कृत्यो दाम्भिकः शम्भुवर्धनः ॥ ३०१ ॥

पौषे तस्यैव वर्षस्य धनाभावात् स तन्त्रिणाम्।
अदत्तहुण्डिकादेयः पलायिष्ट भयाकुलः ॥ ३०२ ॥

स्थिते मडवराज्यान्तस्तस्मिञ् शङ्करवर्धनः।
राज्यार्थी तन्त्रिणां दूतं प्राहिणोच्छंभुवर्धनम् ॥ ३०३ ॥

आवर्जितैः स निखिलैरधिकोत्कोचचर्चया।
वञ्चयित्वाऽग्रजं राज्ये तैः स्वमेवाऽभ्यषेचयत् ॥ ३०४ ॥

तीर्थस्थितः स्वकुलजांस्तिमिरत्ति भुङ्क्ते
मौनी बकस्तिमिमुपेत्य वनान्तवासी।
व्याधो निहन्ति तु बकं प्रभवन्ति ते ते
पात्राण्युपर्युपरि वञ्चनचुञ्चुतायाः ॥ ३०५ ॥

---

298. a) SA_4 gloss अत्र सर्वत्र यच्छब्देन मेरुवर्धनपुत्रपरामर्शः (for यैः). —c) $I_{2,7}$ V यै (for ये). SA_4 gloss पार्थादिभ्यः (for तेभ्यः).

299. S′ om. *v.* 299*c*—300*b*. —a) $I_{1,2,7}$ V पित्रा; SA_4 gloss पङ्गुः (for पिता). SA_4 gloss पार्थः शूरवर्मा वा (for भ्राता). SA_4 gloss चक्रवर्मणः (for अस्य). —d) SA_4 gloss मृगावतीम् (for कन्यां). SA_4 gloss पङ्गवे दत्त्वा (for दत्त्वा).

300. After this *v.* तिलकम्.

302. b) I_1 मन्त्रिणां (for तन्त्रिणाम्).

305. d) St SL $I_{1,3,4,7}$ T V S′ $P_{2,3}$ चञ्चु° (for °चुञ्चु°).

भ्रष्टश्रीश्चक्रवर्माऽथ निशि श्रीढक्कवासिनः ।
एकदा डामराग्र्यस्य संग्रामस्याऽविशद् गृहम् ॥ ३०६ ॥

ज्ञात्वा कान्तिविशेषेण राजानं स कृताञ्जलिः ।
प्रणम्य ग्राहयामास संभ्रमान्निजमासनम् ॥ ३०७ ॥

राज्यभ्रंशादिवृत्तान्तमुक्त्वा साहायकार्थिनम् ।
तं विपत्पेशलं प्रह्वो विचिन्त्योवाच डामरः ॥ ३०८ ॥

तन्त्रिणां वा तृणानां वा राजन् का गणना रणे ।
त्वत्सेवनार्थं सामर्थ्यं कस्मिन्न मम कर्मणि ॥ ३०९ ॥

प्राप्तोत्साहः पुनर्नूनमस्मानेव हनिष्यसि ।
विस्मरन्त्युपकारं हि कृतकार्या महीभुजः ॥ ३१० ॥

ऊर्ध्वारोहे य आलम्बहेतुर्भूभृच्छिनत्ति तम् ।
कुठारिकस्तरुस्कन्धमिवाऽधोगमनोन्मुखः ॥ ३११ ॥

धीधैर्यादिप्रकर्षेण येनोपक्रियते नृपः ।
प्राप्तोदयः स तेनैव शङ्क्यं वेत्त्युपकारिणम् ॥ ३१२ ॥

अस्मिन् स्थिते विपदभूदिति संचिन्त्य वर्ज्यते ।
मूढैः परिवृढैरापत्सेवको मङ्गलेच्छुभिः ॥ ३१३ ॥

सम्पद्यापत्सहायस्य विस्मृतोपक्रिया नृपाः ।
मध्ये प्रमादस्खलितमुत्पन्नं हृदि कुर्वते ॥ ३१४ ॥

आमयार्तिरिपुत्रासक्षुदादौ दृष्टवैकृतान् ।
लब्धोदया ह्रीभयेन क्ष्मापा घ्नन्त्यनुयायिनः ॥ ३१५ ॥

---

306. b) St (before corr.) C T I_4 S′ V श्रीढक्क° (for श्रीढक्क°).
307. d) P_2 °मानसम् (for °मासनम्).
310. a) $I_{1,2,4,7}$ V पुनर्न्यून° (for पुनर्नून°). —b) SA_1 (before corr.) °मस्मान्नेव (for °मस्मानेव).
312. d) P_2 शक्यं (for शङ्क्यं).
314. b) P_2 विस्मितो° (for विस्मृतो°). —c) $I_{1-3,7}$ $P_{1,2}$ V प्रसाद° (for माद°).

राज्ञः सतोऽपि नाऽऽश्वासो यस्येभस्येव कर्णयोः ।
अविशुद्धप्रकृतयो ध्वनन्ति मधुपा इव ॥ ३१६ ॥

दिवसे सन्निधानेन पिशुनप्रेरणा प्रभोः ।
ईर्ष्यालुना स्वैरिणीव रक्षितुं यदि पार्यते ॥ ३१७ ॥

राजन् रजन्युपाध्यायो देवी यच्छिक्षयेद्रहः ।
तत्र प्रजागरः कर्तुमसर्वज्ञैर्न शक्यते ॥ ३१८ ॥

कथञ्चिदह्नि हृदये कुशलैर्विनिवेशिता ।
शिक्षा गौरखरेणेव राज्ञा विस्मार्यते निशि ॥ ३१९ ॥

न के लोभं समुत्पाद्य जिह्वया स्निग्धदीर्घया ।
पिपीलका इव ग्रस्ताः क्ष्मापालैः शल्यकैरिव ॥ ३२० ॥

जानाति हन्तुं हन्तव्यमासन्नं न तु दूरगम् ।
एको बकः परः सत्यं द्रोहवृत्तिर्महीपतिः ॥ ३२१ ॥

न नाम कण्टकाकीर्णः कौटिल्यं लक्ष्यतां नयेत् ।
कालापेक्षी क्षितिपतिः शरीरमिव जाहकः ॥ ३२२ ॥

नमन्नपि हरिर्हन्यादाश्लिष्यन्नपि पन्नगः ।
विहसन्नपि वेतालः स्तुवन्नपि महीपतिः ॥ ३२३ ॥

अद्रोहवृत्त्या तस्मात्त्वं द्रक्ष्यस्यस्मान् सदा यदि ।
ससैन्यस्ते तदेषोऽहं प्रातरेव पुरस्सरः ॥ ३२४ ॥

---

316. SA_3 gloss न विशुद्धा प्रकृतिर्येषां ते अविशुद्धप्रकृतयः सूचकाः यस्य राज्ञः कर्णयोर्विषये ध्वनन्ति तस्य सतोऽपि साधोरपि स्वयं नाऽऽश्वासः। इभस्येव यथा हस्तिनः कर्णयोर्मलिनाः मधुपा ध्वनन्ति. —[c]) SA_2 gloss कुटिलाः (for अविशुद्धप्रकृतयः).
318. [a]) C $I_{4,7}$ V S′ राजन्यु° (for रजन्यु°).
319. [c]) SA_3 P_1 गोपखरे° (for गौरखरे°).
320. SA_3 P_1 भोगं (for लोभं).
321. [a]) C $I_{1,2,4}$ V S′ P_2 जानन्ति (for जानाति). —[c]) SA_1 (before corr.) $I_{1,2,7}$ V S′ C परं (for परः).
322. [a]) $I_{1,4,7}$ V कण्टकाकीर्ण° (for कण्टकाकीर्णः); —[d]) SG C T $P_{1,3}$ S′ जार्यकः; SA_3 gloss जार्यको घूकमार्जारखटाकैरण्डकासु चेति विश्वः (for जाहकः).

तदाकर्ण्याऽब्रवीद्राजा लज्जास्मितसिताधरः ।
स्वात्मेव यूयं संरक्ष्या मम पूर्वोपकारिणः ॥ ३२५ ॥

ततो निक्षिप्य चरणं रक्ताक्ते मेषचर्मणि ।
कोशं चक्रतुरन्योन्यं सखड्गौ नृपडामरौ ॥ ३२६ ॥

अथ संघटिताऽसंख्यचण्डडामरमण्डलः ।
चक्रवर्माऽकरोद्यात्रां प्रत्यूषे नगरोन्मुखः ॥ ३२७ ॥

तस्मिन् क्षणे पुरस्कृत्य योद्धुं शङ्करवर्धनम् ।
विनिर्ययुः सिताष्टम्यां चैत्रे तन्त्रिपदातयः ॥ ३२८ ॥

कालानुवृत्तिप्रच्छन्नं तेषां संभावनोज्झितम् ।
स तत्वरे पुरस्कर्तुं चक्रवर्मा स्वविक्रमम् ॥ ३२९ ॥

अथ प्रवृत्ते सङ्ग्रामे घोरे पद्मपुराद् बहिः ।
जघान प्रेरितहयः पूर्वं शङ्करवर्धनम् ॥ ३३० ॥

हते सेनाधिपे तत्र शतधा तन्त्रिवाहिनी ।
प्रययौ पवनाघातप्रेरिता नौरिवाऽर्णवे ॥ ३३१ ॥

पृष्ठानुसरणोद्युक्तो नृपस्तेषामपाहरत् ।
गतिं तुरगवेगेन शिरःश्रेणिं तथाऽसिना ॥ ३३२ ॥

भ्रमतः समरे बभ्रुर्वीरपट्टाञ्चलच्छटाः ।
चक्रवर्मसृगेन्द्रस्य सटापटलविभ्रमम् ॥ ३३३ ॥

---

325. a) $I_{1,2,4,7}$ V °ऽभवद्राजा (for ऽब्रवीद्राजा).
326. b) I_3 रक्तार्थे (for रक्ताक्ते). —c) SA_3 gloss दिव्यमित्यर्थः । उभौ मैत्रीसम्बन्धार्थं रक्ताक्ते मेषचर्मणि परस्परं पादप्रक्षेपं कुरुत इति शपथसम्प्रदायः । 'दिव्ये च कोशः पुष्पादिकुङ्कुमासिपिधानयोरिति मङ्खः' (for कोशं).
330. I_4 om. this *v*.
331. d) SA_3 °विशीर्णा (for °प्रेरिता).
332. a) SA_1 (before corr.) I_3 $P_{1,2}$ S′ °नुसारणो°; T °नुसारेणो° (for °नुसरणो°).
333. a) SA_2 gloss अधारयन् (for बभ्रुः). —b) SA_2 gloss शिरस्त्रबन्धनार्थं दत्तो यो वीरपट्टः डोपट्ट इति प्रसिद्धः तस्य अञ्चलच्छटाः फिते इति प्रसिद्धाः (for वीरपट्टाञ्चलच्छटाः). —d) $I_{2,7}$ V S′ सटापाटल° (for सटापटल°).

किमन्यत्पञ्चषाण्यासन् सहस्राणि रणाङ्गने ।
पतितानि क्षणादेव हतानां तत्र तन्त्रिणाम् ॥ ३३४ ॥

तन्त्रिणो रणसंरम्भपरिश्रान्ताः क्षमातले ।
गृध्रपक्षकृतच्छाये शायिताश्चक्रवर्मणा ॥ ३३५ ॥

विशुद्धवंश्यैर्गुणिभिर्निहतैः संश्रितैः समम् ।
अभूषयद्वीरशय्यां शूरः शङ्करवर्धनः ॥ ३३६ ॥

उदयं संहता एव संहता एव च क्षयम् ।
प्रयान्तः स्पृहणीयत्वं तन्त्रिणः कस्य नाऽगमन् ॥ ३३७ ॥

माननीयानधृष्यांश्च महावंश्यान् महीपतीन् ।
अहीनिव खिलीकृत्य भिक्षयन्तः क्षणे क्षणे ॥ ३३८ ॥

अनयन् क्रीडया व्रीडां माद्यन्तो जीविकाकृते ।
प्रागाहितुण्डिकाः क्रूरा इव ये गर्ह्यवृत्तयः ॥ ३३९ ॥

ते तन्त्रिणः क्षणाद्दग्धा गूढवैरविषाग्निना ।
विमाननाविविग्नेन चक्रवर्ममहाहिना ॥ ३४० ॥

अथ द्वितीये दिवसे भग्नानामपि तन्त्रिणाम् ।
वीरः संघटनां यावदकरोच्छंभुवर्धनः ॥ ३४१ ॥

तावन्मिलितसामन्तसचिवैकाङ्गलालितः ।
सैन्यैर्नानापथायातैर्नदद्भिर्व्याप्तदिक्पथः ॥ ३४२ ॥

वल्गन्मध्येऽश्ववाराणां नृत्यतेवाग्र्यवाजिना ।
वल्गाङ्केनोद्वहँल्लम्बं शिरस्त्रं वामपाणिना ॥ ३४३ ॥

---

336. b) SA_1 (after corr.) D $P_{1,3}$ I_3 °निंहतः (for °निंहतैः).

337. b) V S′ °क्षमं (for क्षयम्).

339. c) $I_{2,7}$ V °तुण्डिकः (for °तुण्डिकाः).

340. c) T °मानेना विविग्ने° (for °माननाविविग्ने°). After this v. तिलकम्.

341. c) $I_{2,7}$ V S′ C संघट्टनं (for संघटनां).

343. a) $I_{1,2,7}$ V S′ St वलान्म° (for वल्गन्म°).

सस्वेदेतरहस्ताग्रवेष्टनोल्लासनस्पृशः ।
खड्गस्य विम्बितार्कस्य भाभिर्द्योतितकुण्डलः ॥ ३४४ ॥

कवचोत्सेधसंरब्धकण्ठायासेन ताम्यता ।
बद्धभ्रुकुटिबन्धेन वदनेन भयावहः ॥ ३४५ ॥

तर्जयन् कृतहुंकाराँल्लुण्ठकाँल्लुण्ठितापणान् ।
शिरोक्षिसंज्ञया त्रस्तवास्तव्यकृतसान्त्वनः ॥ ३४६ ॥

भेरीरवैः श्रुतिं भिन्दन् पौराशीर्घोषरोधिभिः ।
संग्रामजयशोभाङ्कश्चक्रवर्माऽविशत् पुरम् ॥ ३४७ ॥

तस्मिन् सिंहासनं प्राज्यमाक्रामति जयोर्जिते ।
बद्ध्वा कुतश्चिदानिन्ये भूभटः शम्भुवर्धनम् ॥ ३४८ ॥

राज्ञः पुरस्तात्तं शस्त्रपातभीमीलितेक्षणम् ।
भक्तिं प्रदर्शयन् पापश्चण्डाल इव सोऽवधीत् ॥ ३४९ ॥

उज्झतां धर्ममर्यादां भृत्यानां जनकोपमान् ।
हन्तुं नरेन्द्रान् द्रोहेण प्रारम्भः शम्भुवर्धनात् ॥ ३५० ॥

प्राप्य निष्कण्टकं राज्यं चक्रवर्मनृपः क्रमात् ।
अजायत धृतोत्सेको नृशंसविषमक्रियः ॥ ३५१ ॥

स्वविक्रमकथास्तोत्ररोमन्थप्रियताहृतः ।
सोऽभवद्भिटबन्द्यादिचाटुकारविधेयधीः ॥ ३५२ ॥

---

344. a) SA_3 I_3 P_3 स वामेतर° (for सस्वेदेतर°).
345. a) SA_3 °संरुद्ध° (for °संरब्ध°). — c) SA_3 वक्रभ्रुकु°; C T S′ बहुभ्रुकु° (for बद्धभ्रुकु°).
346. b) SA_1 (before corr.) $I_{1,2,7}$ V S′ C T लुब्ध° (for लुण्ठ°).
347. After this ν. कुलकम्.
348. a) P_2 S′ प्राप्य° (for प्राज्य°). — b) P_1 SA_1 °क्राम्यति ज°; I_2 S′ °क्रम्यातिज° (for °क्रामति ज°). — c) $I_{4,7}$ बद्धा (for बद्ध्वा). — d) $I_{4,7}$ V भूभटाः (for भूभटः).
349. b) T °तभीमीं° (for °तभीमी°).
350. d) C T P_3 $I_{1,2,4}$ V S′ प्रारब्धः (for प्रारम्भः). $I_{1,2,4,7}$ $P_{1,2}$ St T C V S′ °वर्धनः (for °वर्धनात्).

आत्मानं दैवतमिव स्तुतिमोहितचेतसः ।
जानतः प्राभवंस्तस्य विवेकविगुणाः क्रियाः ॥ ३५३ ॥

तस्मिन् प्रसङ्गे रङ्गाख्यः प्रख्यातो डोम्बगायनः ।
वैदेशिकोऽभवद्राज्ञा वितीर्णावसरो बहिः ॥ ३५४ ॥

प्राप्तान् सचिवसामन्तान् विन्यस्यन्तो यथाक्रमम् ।
प्रतीहारा नृपस्याऽग्रमनयन्त विविक्तताम् ॥ ३५५ ॥

विबभौ धवलोष्णीषा सभा दीपप्रभोज्ज्वला ।
शेषशय्येव मणिभिः कृतालोका फणोद्भवैः ॥ ३५६ ॥

कृतावरोधधम्मिल्लमालान्दोलनकेलिभिः ।
प्रदोषपवनैश्चक्रे शिशिरैर्घ्राणतर्पणम् ॥ ३५७ ॥

जातगीतदिदृक्षाणां गवाक्षावलयो बभुः ।
आसवामोदिभिर्वक्त्रैरवरोधमृगीदृशाम् ॥ ३५८ ॥

हारकङ्कणकेयूरपारिहार्यादिशोभिना ।
स्ववृन्देनाऽनुयातोऽथ प्राविशद्डोम्बगायनः ॥ ३५९ ॥

हंसी नागलता चाऽस्य सुते ललितलोचने ।
चक्रतुः कौतुकोद्ग्रीवां सभां चित्रार्पितामिव ॥ ३६० ॥

तयोर्विलासवलितैश्चलितापाङ्गविभ्रमैः ।
द्वितीयपुष्पप्रकरो व्यकीर्यत सभान्तरे ॥ ३६१ ॥

गायनैर्जय जीवेति कृतकोलाहलैरभूत् ।
सदः सशब्दं कुर्वद्भिस्तत्तन्नृपगुणग्रहम् ॥ ३६२ ॥

भुक्तोत्तरोचितोदञ्चत्पञ्चमस्थानचारिणः ।
वंशै रागविशेषस्य दत्ते स्थाने ततः शनैः ॥ ३६३ ॥

---

353. c) $I_{1,7}$ V प्रभवंस्त°; P_1 प्राग्भवंस्त° (for प्राभवंस्त°). — d) P_1 विवेके (for विवेक°).

357. c) P_2 °पवनश्चक्रे (for °पवनैश्चक्रे).

358. a) $I_{1,2,4,7}$ V °दृक्षूणां (for °दृक्षाणां).

362. d) SA $P_{1,3}$ °स्तास्तन्नृ° (for °स्तत्तन्नृ°).

363. d) SA_3 ताने (for स्थाने).

अविक्रियशिरःकम्पभ्रूनेत्रभ्रमशोभितः ।
अभिन्न इव गायन्त्योर्गीतध्वनिरजृम्भत ॥ ३६४ ॥

अथ ताम्बूलरोमन्थत्यागनिश्चलमूर्त्तिना ।
जातं राजकुरङ्गेण प्रमोदास्पन्ददृष्टिना ॥ ३६५ ॥

गायन्त्यौ भावमालक्ष्य तस्य स्निग्धमगायताम् ।
अधिकोद्रेचिताभिख्यं विलासस्मितविभ्रमैः ॥ ३६६ ॥

राज्ञस्तयोश्च संसक्तचित्तयोरितरेतरम् ।
दृग्व्यापारैः स्वसंवेद्यैः संलाप इव पप्रथे ॥ ३६७ ॥

नृपं हारितचित्तं तं विज्ञायैकः प्रियो विटः ।
ततः प्रसङ्गे प्रोवाच प्रीतिवृद्धिकरं वचः ॥ ३६८ ॥

देव गीतमिदं यातं संप्राप्यैते मनोरमे ।
कर्पूरपारीपतितं मैरेयमिव हारिताम् ॥ ३६९ ॥

गायन्त्योर्मार्जितामेतां रागाद्दन्तचतुष्किकाम् ।
अनयोः प्रीतिमान् व्याजाच्चुम्बतीव निशाकरः ॥ ३७० ॥

करन्यस्तकपोलान्तमुद्गायन्त्याविमे ध्रुवम् ।
कटाक्षैः कुरुतो व्योम्नि वैमानिकविमोहनम् ॥ ३७१ ॥

---

364. c) C $I_{2,7}$ V S′ गायन्त्यौ; SA_1 (after corr.) St P_1 गायन्योः (for गायन्त्योः). After this *v.* युग्मम्.

366. a) SA_1 (after corr.) St P_1 गायन्यौ; P_2 I_3 गायन्त्यो (for गायन्त्यौ).

368. c) SA_2 तत्र (for ततः).

369. d) $I_{1,2,4,7}$ C हारितं ; S′ हारितः; SA_3 gloss हरति मन इति हारी तस्य भावः तत्ता तां यातम् इति सम्बन्धः (for हारिताम्).

370. a) SA_1 (after corr.) St P_1 गायन्योर्मा° (for गायन्त्योर्मा°). —b) $I_{1,2,4,7}$ V SA_1 क्रमाद्द° (for रागाद्द°). $I_{1,2,7}$ V C P_3 °द्दत्तचतुष्किकाम् ; SA_2 gloss दन्तपङ्क्तिचतुष्टयं (for °द्दन्तचतुष्किकाम्). —c) All Mss. except SL read प्रतिमा° (for प्रीतिमान्).

371. c) $I_{1,2,7}$ C S′ V कुरुते (for कुरुतो).

जानत्या स्वाश्रयां चर्चामनयोरेकयाऽऽवयोः ।
असूयास्मितगर्भोऽयं कटाक्षः पश्य पातितः ॥ ३७२ ॥

गायन्त्येका नतमुखी कर्णव्यालोलकुण्डला ।
विपरीतरतोद्रेककृतारम्भेव शोभते ॥ ३७३ ॥

सफलं तस्य तारुण्यमीदृश्यो निर्जने स्त्रियः ।
औत्सुक्याद्विरहे यस्य गायन्त्येवंविधैः स्वरैः ॥ ३७४ ॥

उपपत्तिपरित्यक्तशास्त्रानुष्ठानमोहितैः ।
एकसार्थप्रयातेभ्यः कथमेको विवर्ज्यते ॥ ३७५ ॥

नेत्रस्य रूपं श्रोत्रस्य ध्वनिं संस्पृशतो न चेत् ।
तदङ्गस्याऽन्यकान्ताङ्गं स्पृशतो दुष्कृतं कुतः ॥ ३७६ ॥

अभिलाषाङ्कुरः सिक्त इव तैर्विटभाषितैः ।
राज्ञः स्वभावलोलस्य शतशाखत्वमाययौ ॥ ३७७ ॥

ये विस्तारितवर्णसंकररुचः संदर्श्य गोत्रान्तकृ-
द्बद्धावस्थितिचापलङ्घनमलं पार्श्वे ध्वनन्त्युद्धताः ।
नीयन्ते विपथावपातपरतां लब्धोदयैस्तैः क्षणात्
सिंहा वारिधरैरमी च रभसाद् भूपालसिंहा विटैः ॥ ३७८ ॥

---

372. a) $I_{1,2,4,7}$ V स्वाश्रयं (for स्वाश्रयां).

374. c) SL St Tr. °रहं (for °रहे).

376. b) SA_3 gloss दुष्कृतं (for चेत्). —c) SA_3 gloss त्वगिन्द्रियस्य (for अङ्गस्य).

378. a) SA_3 gloss वारिधराः विटाश्च (for ये). SA_2 gloss वर्णाः नीलपीताद्याः ब्राह्मणाद्याश्च (for वर्ण). SA_3 gloss गोत्रान्तकृति इन्द्रे बद्धा अवस्थितिर्येन स चासौ चापः धनुः इन्द्रचापः तस्य लङ्घनम् । गोत्रान्तकृद्भिः कुलक्षयकारिभिः पापिभिः बद्धा स्थितिर्यस्य । तत् चापलं प्रदर्श्य ध्वनन्ति इति च घनं निबिडम् इति चापलविशेषणम् (for गोत्रान्तकृद्). —b) $P_{1,3}$ D धनन्त्यु° (for ध्वनन्त्यु°). —c) St Mss. (before corr.) I_3 गीयन्ते; $I_{1,2,4,7}$ V दीयन्ते (for नीयन्ते). SA_3 कुपथाव° (for विपथाव°). —d) SA_3 तरसा भू° (for रभसाद्भू°).

वस्तु क्षणादनुपपत्त्युपपत्तियुक्तं
कृत्वा जडान्यदि विमोहयितुं समर्थाः।
न स्युर्विटा अथ कुतर्कपथस्थिताश्च
नित्योद्वसेषु निरयेषु मृगाश्चरेयुः ॥ ३७९ ॥

संतोष्य हारकेयूरकुण्डलैर्डोम्बमण्डलम् ।
अमार्गत्यागराधेयः शुद्धान्तमगमन्नृपः ॥ ३८० ॥

कान्तोऽस्याः क्षितिवल्लभोऽयमभिधेत्युर्वीपतेरेकतो
ब्रूतेऽसावतिचण्डताण्डवयुतं डोम्बस्य नामान्यतः ।
मध्ये यत् किमपीति गीतरचनाकाव्यं यदेतद्विदो
यल्लक्ष्मीं क्षपयन्ति तान्धिगबुधान् कीर्त्यर्थिनः पार्थिवान् ॥ ३८१ ॥

वेश्यानुरागस्य महेन्द्रचाप-
धाम्नो हरिद्रारसरञ्जनस्य ।
उपाङ्गगीतस्य च हारिणोऽपि
सौन्दर्यमस्थैर्यहतप्रकर्षम् ॥ ३८२ ॥

दर्शनाभ्याससंवृद्धचक्षूरागः क्षमापतिः ।
विना श्वपाककन्ये ते न पुनः प्राप निर्वृतिम् ॥ ३८३ ॥

---

379. d) SA_3 gloss नित्यशून्येषु (for नित्योद्वसेषु).

380. c) SA_3 gloss अपात्रत्यागे कर्णः (for अमार्गत्यागः).

381. a) SA_3 gloss अयं क्षितिवल्लभः राजा अस्याः कस्याश्चित्कान्तः अस्यां विषये अयं राजा लग्नः इत्यभिधाकथितमेकतः (for क्षितिवल्लभोऽयं). SA_3 gloss डोम्बेनोच्चारिता उर्वीपतेः अभिधा नामधेयम् एकतः इत्यस्ति इति कथमिति कान्तोऽस्या इति (for एकतः). —b) $I_{1,2,4,7}$ V ब्रूतेऽसाविति (for ब्रूतेऽसावति°). SA_3 gloss उर्वीपतिः (for असौ). $I_{1,2,4,7}$ C T St V S डोम्बः स्वनामान्यतः (for डोम्बस्य नामान्यतः). —c) SA_3 मध्ये-ऽन्यत्कि° (for मध्ये यत् कि°). $I_{1,2,4,7}$ V S′ C T गीतिर° (for गीतर°). SA_3 gloss यत्किमपीति यत्किञ्चिदालजालप्रायं लौकिकं गीतं तस्य रचना एव काव्यं (for काव्यं). SA_3 gloss एतत् गीतिरचनाकाव्यं विदन्ति (for एतद्विदः). —d) SA_3 gloss येषां पार्थिवानां लक्ष्मीः यल्लक्ष्मीः ताम् (for यल्लक्ष्मीं). SA_3 gloss अपहरन्ति (for क्षपयन्ति).

गायन्त्यौ शयनोपान्ते शनैर्विहितचुम्बनम् ।
नृपं रतिसुखाभिज्ञं तं हठात्ते प्रचक्रतुः ॥ ३८४ ॥

समागमेन नव्येन तयोर्वैयात्यशोभिना ।
चक्रे क्षपितसामर्थ्यः स लज्जोद्वहनाक्षमः ॥ ३८५ ॥

रत्यन्तसुलभोद्भेदैर्निस्सृतैः स्वेदबिन्दुभिः ।
भाग्योष्मसंक्षयजडं वपुस्तस्य व्यधीयत ॥ ३८६ ॥

रागान्धेन कृता हंसी महादेवी महीभुजा ।
भेजे राजवधूमध्ये वालव्यजनवीजनम् ॥ ३८७ ॥

तस्या यैर्भुक्तमुच्छिष्टं ते यथा चक्रवर्मणः ।
नृपान्तराणामन्येषामप्यभूवन् सभासदः ॥ ३८८ ॥

मन्त्रिणामक्षपटलप्रख्यमुख्याधिकारदा ।
प्रवृद्धिहेतुतां प्राप डोम्बसेवनचक्रिका ॥ ३८९ ॥

मौर्ख्यात् सचिवतां केचिच्छ्वपाका न व्यधुः स्वयम् ।
केचित्त्वकुर्वन् नीतिज्ञा राजकार्याणि मन्त्रिवत् ॥ ३९० ॥

मन्त्रिणस्तस्करा राज्ञी श्वपाकी श्वपचाः प्रियाः ।
किं न लोकोत्तरमभूद् भूपतेश्चक्रवर्मणः ॥ ३९१ ॥

ऋतुस्नातार्तवाङ्कानि श्वपाकी स्वांशुकान्यदात् ।
तदाच्छादनदृप्तेच्छा मन्त्रिणः प्राविशन् सभाम् ॥ ३९२ ॥

कैश्चित् क्षितिभुजा वैरमङ्गीकृत्याऽपि तत्क्षणम् ।
यैर्नाऽऽशि श्वपचोच्छिष्टं तेऽभूवन् सोमपैः समाः ॥ ३९३ ॥

मण्डलेऽस्मिन् प्रभावोग्रा न देवा न्यवसन् ध्रुवम् ।
तद्वेश्मानि तदा नो चेच्छ्वपाकी प्रविशेत् कथम् ॥ ३९४ ॥

---

386. d) $I_{1,2,7}$ S′ V C भाव्यो° (for भाग्यो°).

389. a) SA_2 gloss गणनार्थं गणनाधिपतिस्थानस्य अक्षपटलस्य अट्टले इति भाषया नाम शिष्टदेश इति केचित् (for अक्षपटल°).

394. c) $I_{1,2,4,7}$ C T P_3 S′ V °द्वेश्मनि (for °द्वेश्मान). —d) St प्राविशेत्क°; D $I_{1,2,4,7}$ $P_{1,3}$ V प्राविशत्क° (for प्रविशेत्क°).

तां रणस्वामिनं द्रष्टुं तिलद्वादश्यहे गताम् ।
सामन्तेभ्यः साभिमाना नान्वयुर्डामराः परम् ॥ ३९५ ॥

राजकौटुम्ब्यदृप्तानां डोम्बानां निर्गता मुखात् ।
राज्ञामिवाऽऽज्ञा दुर्लङ्घ्या न केनाऽप्युदलङ्घ्यत ॥ ३९६ ॥

राज्ञा प्रदत्ते रङ्गाय हेलुग्रामेऽग्रहारवत् ।
लिलेख पट्टोपाध्यायो न यदा दानपट्टकम् ॥ ३९७ ॥

तदाऽक्षपटलं गत्वा रङ्गः कोपात्तमब्रवीत् ।
रङ्गः स हेलु दिण्णेति दासीसुत न लिख्यते ॥ ३९८ ॥

लिलेख सोऽथ सन्त्रासाद् रङ्गभ्रूभङ्गतर्जितः ।
को न राजनि दुर्वृत्ते भवेन्नीतिव्यतिक्रमः ॥ ३९९ ॥

अन्त्यागमनपापस्य पापः पृच्छन् स निष्कृतिम् ।
विटैर्हास्यावहान्येव प्रायश्चित्तानि कारितः ॥ ४०० ॥

हिमेनैव हिमं शाम्येद् दुष्कृतेनैव दुष्कृतम् ।
सोऽनुशिष्टो विटैरेवं दधत् पामरसारताम् ॥ ४०१ ॥

पवित्रास्पर्शतोऽस्पृश्यास्पर्शपापं जिहीर्षुणा ।
तेनाऽदूष्यत विप्रस्य योषिन्मासोपवासिनः ॥ ४०२ ॥

ततोऽपि पापिनोऽभूवन् केऽपि तस्मिन् क्षणे द्विजाः ।
तस्मादप्यग्रहारान् ये जगृहुर्गृहभोजिनः ॥ ४०३ ॥

चक्रे चक्रमठं सोऽपि पापः पाशुपताश्रयम् ।
तस्मिन् हतेऽर्धनिष्पन्नं तद्धूर्यमयोजयत् ॥ ४०४ ॥

---

395. a) $I_{2,7}$ V राजस्वा° (for रणस्वा°). —b) $I_{1,2,4,7}$ C T V S' °श्यहो (for °श्यहे). —d) SA_2 gloss केवलम् (for परम्).
397 b) SA_1 (before corr.) $I_{1,2,4,7}$ V हलु° (for हेलु°). I_2 om. *vv.* 397*c*—398*d*.
398. c) SA_3 gloss रङ्गस्य हेलुः दत्ता (for रङ्गः स हेलु दिण्णेति).
399. c) SA_1 (before corr.) $I_{1,2,4,7}$ V के (for को). —d) SA_1 (before corr.) $I_{2,4,7}$ V भवन्नी° (for भवेन्नी°).
401. d) SA_3 *varia lectio* दधर्पापरमातरम् for *d*.
404. d) SA_1 (before corr.) $I_{1,2,4,7}$ V C T यद्; SA_3 gloss मठं (for यम्).

पूर्वोपकारान् विस्मृत्य डामरान् स निरागसः ।
नृपतिः श्वपचाकामी विश्वस्तांश्छन्नाऽवधीत् ॥ ४०५ ॥

हन्तुं व्याजेन विश्वस्ताः केचिद्डामरतस्कराः ।
तस्थुस्तस्याऽन्तिके द्रोहच्छिद्रानेहःप्रतीक्षिणः ॥ ४०६ ॥

श्वपाकीशयनाऽऽवासाऽऽसन्नावस्करमन्दिरे ।
शौचस्थितं तं निश्शस्त्रं ते रात्रौ प्रापुरेकदा ॥ ४०७ ॥

अथ तैः प्राप्तसमयैरकस्मात्तस्य सर्वतः ।
क्षिप्रं न्यपात्यताऽशेषशातशस्त्रपरम्परा ॥ ४०८ ॥

सुप्तस्तटाद्ध्रदे भ्रष्ट इव निद्रालसेक्षणः ।
प्रबुद्धः शस्त्रपातैः स व्यमुचद्भैरवान् रवान् ॥ ४०९ ॥

निश्शस्त्रः शस्त्रमन्विष्यन् क्षरत्क्षतजनिर्झरः ।
अनुद्रुतोऽरिभिर्धावञ्छय्यावेश्म विवेश तत् ॥ ४१० ॥

अप्राप्तहेतिं क्रन्दन्त्या श्वपाक्याऽऽलिङ्गिताङ्गकम् ।
तत्कुचोत्सङ्गलग्नाङ्गं जघ्नुस्तेऽनुप्रविश्य तम् ॥ ४११ ॥

स्वैरेव प्रेरिता दारैस्ते तस्य नृपतेः किल ।
मुमूर्षोर्जानुनी स्वैरं शिलया समचूर्णयन् ॥ ४१२ ॥

त्रयोदशाब्दे ज्येष्ठस्य शुक्लाष्टम्यां क्षपाक्षणे ।
श्वपाकभोग्यः स श्वेवावस्करे तस्करैर्हतः ॥ ४१३ ॥

उन्मत्तावन्तिनामाऽथ पार्थसूनुर्दुराशयः ।
अभ्यषिच्यत वैधेयैः सचिवैः शर्वटादिभिः ॥ ४१४ ॥

श्वपाकीकामुके पापे निहते निशि तस्करैः ।
प्रजानां पाप्मना सोऽभूत् पापात् पापतरो नृपः ॥ ४१५ ॥

स्थगिता तत्कथापापस्पर्शभीत्या सरस्वती ।
कथंचित् त्रस्नुरश्वेव सेयं प्रस्थाप्यते मया ॥ ४१६ ॥

---

407. a) I_4 श्वपाक° (for श्वपाकी°).
411. c) $I_{1,2,4,7}$ V °लग्नानां (for °लग्नाङ्गं).
412. d) $I_{1,2,4,7}$ V S′ C T SG SR शिलायां (for शिलया).
413. a) St SG C S′ ज्यैष्ठस्य (for ज्येष्ठस्य).

आसीत् पितृकुलं तस्य भक्ष्यं दुर्नृपरक्षसः ।
और्वाभिधस्य हव्याशविशेषस्येव जीवनम् ॥ ४१७ ॥

तस्याऽऽसंघ्रक्कराघातसटांकारकरोटिकाः ।
घ्राणस्कन्धादिवाद्यज्ञाः सभायां मुख्यमन्त्रिणः ॥ ४१८ ॥

तेऽमात्याश्चारणत्वेन निर्लज्जास्तमरञ्जयन् ।
कालान्तरेण यैरेव भूमिपालैर्भविष्यते ॥ ४१९ ॥

पर्वगुप्तोऽभवत्तस्य सर्वेभ्योऽप्यधिकं प्रियः ।
आस्थाने नर्तनं कुर्वन्नपाकृतकटीपटः ॥ ४२० ॥

आ तन्त्रिविप्लवाद् दृष्ट्वा कीटप्रायान् महीपतीन् ।
पर्वगुप्तः सर्वदाऽभूद् राज्यावाप्तिकृतोद्यमः ॥ ४२१ ॥

तदा निगूढराज्येच्छः सख्यं मुख्यैः स मन्त्रिभिः ।
पीतकोशैः प्रविदधे पञ्चभिर्भूभटादिभिः ॥ ४२२ ॥

भूभटः शर्वटश्छोजः कुमुदः सोऽमृताकरः ।
पर्वगुप्तेन संबन्धं चक्रिरे कोशपीथिनः ॥ ४२३ ॥

गवाक्षासरसि प्राप्तश्रीजलोऽवागलद् द्विजः ।
संग्रामडामरगृहे यो रक्कः ख्यातपौरुषः ॥ ४२४ ॥

पदातिमात्रो भूपेन दृष्टशौर्यः स संयुगे ।
महोदरो महाकायः प्रापितो मुख्यमन्त्रिताम् ॥ ४२५ ॥

यादृशी तेन ददृशे देवी श्रीः सरसोऽन्तरे ।
तादृग् रक्कजयादेवीत्यभिधानेन निर्ममे ॥ ४२६ ॥

---

418. c) D (before suggestion) and all other Mss. read °स्कन्दा° (for °स्कन्धा° cf. St Tr.) P_1 om. दिवा. I_3 °यज्ञः (for °यज्ञाः).
422. a) $I_{2,3,7}$ V °राज्येच्छाः (for °राज्येच्छः).
423. b) S′ मुकुटः (for कुमुदः).
424. b) All Mss. read °जलोवागलद् (वागल may be a sub-caste among Brāhmins); St Tr. suggests °जलोऽवालगद् and means to reside or to live ava-√lag, cf. vii. 1232.
425. After this v. D adds युग्मम् .
426. c) SA_1 (before corr.) $I_{1,2,4,7}$ V तावद्रक्क°; D तादृद्रक्क° (for तादृग् रक्क°).

राज्यं निष्कण्टकं कृत्वा धूर्तेनाऽपजिहीर्षुणा ।
प्रेरितः पर्वगुप्तेन भूभृच्चक्रे कुलक्षयम् ॥ ४२७ ॥

तेन लुण्ठितसर्वस्वः पार्थस्तस्थौ कलत्रवान् ।
श्रीजयेन्द्रविहारान्तः श्रमणैर्दत्तभोजनः ॥ ४२८ ॥

शिशूञ् शङ्करवर्मादीन् भ्रातॄन् द्वारान्निरोध्य सः ।
तत्र स्थिताननशनैरुत्क्रान्तासूनकारयत् ॥ ४२९ ॥

उद्यतः पितरं हन्तुं मन्त्रिणोऽनुमतिप्रदान् ।
बद्धपट्टान् व्यधाद्बद्धनिगडानितरान् पुनः ॥ ४३० ॥

एकदा मन्त्रिसामन्ततन्त्रिकायस्थसैनिकाः ।
पार्थं तदाज्ञामासाद्य निशायां पर्यवेष्टयन् ॥ ४३१ ॥

म्लानक्षीणाम्बरां पत्नीं रुद्धद्वारां निपात्य ते ।
आलिङ्ग्यमानां क्रन्दद्भिस्तर्णकैरिव दारकैः ॥ ४३२ ॥

केशानालम्ब्य कर्षन्तः शर्करोत्पाटिताङ्गकम् ।
विपन्नं गोकुलाद्दान्तमिव निर्हृत्य तं गृहात् ॥ ४३३ ॥

क्षुत्क्षामरूक्षं क्रन्दन्तं निजघ्नुर्नग्नविग्रहम् ।
चण्डाला इव निश्शस्त्रं कुमुदाद्या नृपप्रियाः ॥ ४३४ ॥

पितरं निहतं श्रुत्वा राजा संजातकौतुकः ।
प्रातः स्वसचिवैः सार्धं गत्वा हृष्टोऽथ दृष्टवान् ॥ ४३५ ॥

अत्राऽङ्गेऽस्य प्रहारोऽयं मद्दत्त इति वादिनः ।
तस्याऽग्रे राजपुरुषाः शशंसुर्निजविक्रमम् ॥ ४३६ ॥

न्यकृत्य स्वीकृतो राज्ञा तदा तद्रञ्जनोद्यतः ।
अचूचुदत् पर्वगुप्तो देवगुप्ताऽभिधं सुतम् ॥ ४३७

---

430. b) $I_{1-4,7}$ T St C P_{1-3} V S′ °मतप्र° (for °मतिप्र°).
432. b) SA_1 (before corr.) $I_{1,2,4,7}$ V निपत्य (for निपात्य).
433. d) C T S′ निर्हत्य (for निर्हृत्य).
436. cd) I_2 om.

पार्थस्य निहतस्याऽङ्गे सोऽक्षिपत् क्षुरिकां ततः ।
रञ्जितो येन भूपालो जातहासोऽभवच्चिरम् ॥ ४३८ ॥

डामरैर्लुण्ठितो देशः प्रणाशे चक्रवर्मणः ।
उत्थाप्य पापान् कायस्थांस्तेन भूयोऽपि दण्डितः ॥ ४३९ ॥

संप्रेरितः कुसचिवैः शस्त्राभ्यासं चकार सः ।
पाटयन् क्षुरिकाघातैः कोटवीस्तनकोटरम् ॥ ४४० ॥

गर्भिणीनां च जठरं गर्भान् द्रष्टुमपाटयत् ।
काठिन्यस्य परीक्षार्थमङ्गं कर्मकृतामपि ॥ ४४१ ॥

प्रतिग्रहाऽऽग्रहाद्घोराद् यद्वा वधभयाद् द्विजाः ।
प्रत्यगृह्णन्नग्रहारांस्तस्मादपि नृपाधमात् ॥ ४४२ ॥

क्रूरपापानुरूपेण क्षयरोगेण पार्थिवः ।
ततोऽनुबाध्यमानोऽभूदपर्यन्तव्यथातुरः ॥ ४४३ ॥

व्यथया तस्य तादृश्या प्रजा एव न केवलम् ।
तुतुषुर्निजशुद्धान्तमहिष्योऽपि चतुर्दश ॥ ४४४ ॥

अथान्तःपुरदासीभिर्यः कुतश्चिदुपाहृतः ।
क्षितिपालात् प्रजातोऽयमिति प्रख्यापितो मृषा ॥ ४४५ ॥

तं शिशुं शूरवर्माख्यं विनिवेश्य नृपासने ।
हस्ते निक्षिप्य सामन्तसचिवैकाङ्गतन्त्रिणाम् ॥ ४४६ ॥

कम्पनाधिपतेर्बद्धद्वेषः कमलवर्धनात् ।
बिभ्यन् मडवराज्यस्थाद्डामरोत्पाटनक्षमात् ॥ ४४७ ॥

आसन्ननिरयप्राप्तिः पितृहा पार्थिवाधमः ।
शुचौ पञ्चदशाब्दस्य प्रजापुण्यैः क्षयं ययौ ॥ ४४८ ॥

---

440. d) SA_1 (before corr.) कौटवी° (for कोटवी°).
442. b) SA_1 (before corr.) द्विज: (for द्विजा:).
443. c) $I_{1,2,4,7}$ C T V S′ तेनानु° (for ततोऽनु°).
446. d) C S′ °तन्त्रिणं; V °तन्त्रिणा (for °तन्त्रिणाम्).
447. c) P_1 I_1 °राज्यस्था: (for °राज्यस्थात्).
448. a) SA_1 (before corr.) $I_{1,2,7}$ V °यप्राप्ते: (for °यप्राप्ति:). After this v. चक्कलकम्.

पितृघातिसुतो राजा जयस्वामिविरोचनम् ।
आषाढशुक्लसप्तम्यां शिशुर्द्रष्टुं विनिर्ययौ ॥ ४४९ ॥

नवा विरेजे राजश्रीर्बालस्य पृथिवीपतेः ।
कृपाणवेणिललिता छत्रचामरहासिनी ॥ ४५० ॥

अत्राऽन्तरे जवायातैश्चारैरावेदितः श्रुतः ।
सामन्तैर्नगरोपान्तं प्राप्तः कमलवर्धनः ॥ ४५१ ॥

एकाङ्गतन्त्रिसामन्तस्यालहारकसादिभिः ।
नगरं प्रविशञ्श्रान्तः समं सैन्यैररुध्यत ॥ ४५२ ॥

विरुद्धडामरानीकान् युद्ध्वा मार्गेषु निर्गतः ।
श्रान्तोऽप्यसौ वैरिसेनामजयद् विक्रमोर्जितः ॥ ४५३ ॥

सहस्रमश्ववाराणां विद्राव्य तुरगैर्मितैः ।
राजधानीमसंरुद्धः प्रविवेश ततः क्षणात् ॥ ४५४ ॥

तं लब्धजयमाकर्ण्य सैन्यैस्त्यक्तं पलायितैः ।
एकाकिनं काऽप्यनयज्जननी शिशुभूपतिम् ॥ ४५५ ॥

प्राक्कर्मभिर्मोहितो वा प्रेरितो वा कुमन्त्रिभिः ।
नाऽभूत् सिंहासनारूढो मूढः कमलवर्धनः ॥ ४५६ ॥

तदानीं स्वगृहान् यातो राज्यकामोऽन्यवासरे ।
संघट्टयन् द्विजान् सर्वानचूचुददनीतिवित् ॥ ४५७ ॥

प्रौढं शक्तं च कुरुत क्षमापं कञ्चित् स्वदेशजम् ।
मामेव कुर्युः सामर्थ्यादिति मूढः स चिन्तयन् ॥ ४५८ ॥

---

449. c) SA_1 (before corr.) आषाढे शुक्ल° (for आषाढशुक्ल°).

451. b) All St Mss. except SA_3 om. °श्चारै. St $I_{1,2,4,7}$ C T S V °दितश्रुतः (for दितः श्रतः).

452. ab) I_7 om. मन्तस्याल. —b) $I_{1,2,4,7}$ V °सादितः (for °सादिभिः).

453. ab) I_3 om.

454. c) $I_{1,2,4,7}$ V °धानीं समं रु° (for °धानीमसंरु°).

457. c) D (before suggestion) T $P_{1,3}$ $I_{1-3,4}$ संघट्टयद्; $I_{2,7}$ संघटयद; SA_3 संघटय्य (for संघट्टयन्).

एकाकिनीं रहः क्षीवां लब्ध्वा दुर्लभयोषितम् ।
अप्रौढोऽनुपभुज्याऽन्यदिने दूत्याऽर्थयेत यः ॥ ४५९ ॥

विभूतिं रभसावाप्तां यश्च संत्यज्य तत्क्षणम् ।
नीत्या कामयतेऽन्येद्युः शोच्यस्ताभ्यां परोऽस्ति कः ॥ ४६० ॥

अथोत्पलकुले च्छिन्ने स्थूलकम्बलवाहिनः ।
अश्रृङ्गोक्षनिभा विप्राः समगंसत गोकुले ॥ ४६१ ॥

धूमनिर्दग्धकूर्चानां राज्ञस्तांस्तांश्चिकीर्षताम् ।
राज्यव्यवस्थोपन्यासस्तेषां चिरमवर्धत ॥ ४६२ ॥

वैमत्येन मिथस्तेषां नान्यः कोऽप्यभ्यषिच्यत ।
रूक्षभाषणनिष्ठ्यूतैः स्वकूर्चः ष्ठीवनैः परम् ॥ ४६३ ॥

राज्यार्हाऽन्वेषिभिर्विप्रैः प्राप्तः स्वस्मृतिक्लृप्तये ।
अवार्यतेष्टकाघातैर्मुग्धः कमलवर्धनः ॥ ४६४ ॥

पञ्चषाणि दिनान्येव यावत्तस्थुर्द्विजातयः ।
काहलाकांस्यतालादिवाद्यकोलाहलाकुलम् ॥ ४६५ ॥

उत्पताकध्वजच्छत्रशोभियुग्यार्पितासनम् ।
अशेषं पारिषद्यानां तावत्तत्राऽमिलद् बलम् ॥ ४६६ ॥

---

459. cd) SG *sec. manu* substitutes अप्रौढो नोपभुङ्क्तेऽन्यदिने दूत्याऽर्थयेन्नु यः for *cd*.

460. After this *v.* युग्मम् .

461. a) SA_3 P_1 °थौत्पल°; SA_3 gloss उत्पलो नाम कल्यपालः । तेन चिप्पटजयापीडं स्वस्त्रीयं निहत्याभिचारक्रियया स्वकीयभ्रातुः पुत्रः अजितापीडः राज्ये स्थापितः । ततः प्रभृति कल्यपालकुलराज्यमुन्मत्तावन्तिपर्यन्तं प्राप्य कल्यपालकुलस्य च्छेदः । अत एवोक्तम्—उत्पलकुले च्छिन्ने इति । (for °थोत्पलकुले च्छिन्ने).

463. c) All Mss. except SA_3 and I_3 read कूर्चा° ; D suggests उच्च° (for रूक्ष°). —d) St (before corr. in Tr.) $I_{1,4,7}$ P_{1-3} C T V स्वकूर्चष्ठीव° ; St Tr. स्वकूर्चा ष्ठीव° (for स्वकूर्चः ष्ठीव°). V. om. परम् .

464. V. om. this *v.* —b) SA_3 P_2 प्राप्तैः (for प्राप्तः).

466. b) SA_1 om. तासनम् with a space. After this *v.* युग्मम् .

स्वपत्नीं बन्धकीभूतामिवाऽन्यवशवर्तिनीम् ।
वीक्ष्य राजश्रियं शोचन्नासीत् कमलवर्धनः ॥ ४६७ ॥

पितृघातिवधूश्छन्नपुत्रराज्यार्थिनी ततः ।
प्राहिणोद् राजपुरुषान् पार्श्वं प्रायोपवेशिनाम् ॥ ४६८ ॥

पिशाचकपुरग्रामे वीरदेवाभिधस्य यः ।
कुटुम्बिनः कामदेवनामा सूनुरजायत ॥ ४६९ ॥

स शिक्षिताक्षरो लब्ध्वा मेरुवर्धनमन्दिरे ।
बालाध्यापकतां स्नानशीलादिगुणभूषितः ॥ ४७० ॥

क्रमाद् गञ्जाधिकार्यासीदथ तस्याऽऽत्मजः शनैः ।
लेभे गञ्जाधिकारित्वं राज्ञः शङ्करवर्मणः ॥ ४७१ ॥

यः प्रभाकरदेवोऽपि सुगन्धाच्छन्नकामुकः ।
लक्ष्म्या सरस्वतीद्वेषाद् देशविप्लवतोऽथवा ॥ ४७२ ॥

विद्वान् यशस्करो नाम तत्पुत्रोऽत्यन्तदुर्गतः ।
सख्या फल्गुणकाख्येन समं देशान्तरं गतः ॥ ४७३ ॥

सुस्वप्नदर्शनैः पीठदेव्याशीर्भिश्च हर्षुलः ।
तस्मिन् प्रसङ्गे सोत्साहः प्रत्यावृत्तो निजां भुवम् ॥ ४७४ ॥

पितृघातिवधूदूतैर्यातैर्बोधयितुं द्विजान् ।
मध्ये गृहीतो वाग्मित्वात् प्रविवेश तदन्तिकम् ॥ ४७५ ॥

दृष्ट्वैव तं दैववशादैकमत्यस्पृशो द्विजाः ।
ध्वनिं राजाऽयमेवाऽस्त्वित्युच्चकैरुदचारयन् ॥ ४७६ ॥

---

470. V om. *vv.* 470–471*b*.

471. c) V om. लेभे. $I_{1,2,4}$ V. °धिकारत्वं (for °धिकारित्वं).

472. d) SA_1 $I_{1,2,4,7}$ C V S′ °तो गतः (for °तोऽथवा).

473. c) D P_{1-3} फल्गुनका° (for फल्गुणका°).

475. After this *v.* कुलकम्.

476. a) $I_{2,4,7}$ V दृष्टैवं (for दृष्ट्वैव).

अथाऽभ्यषिच्यत क्षिप्रं विप्रैरेत्य यशस्करः
क्ष्माधृतिप्रौढसामर्थ्यः सानुमानिव तोयदैः ॥ ४७७ ॥

दग्धं वेणुवनं परस्परमहासंघर्षजेनाऽग्निना
तन्मूलोद्धृतिरम्भसा क्षणधृतोद्रेकेण सम्पादिता ।
वात्यावेगविपाटितं विटपिनं प्राप्तं कुतश्चिद् दृढां
रूढिं नेतुमहो महाद्रिकुहरे धात्रा न किं सूत्रितम् ॥ ४७८ ॥

भृत्यप्रेरणया वंशं पार्थजः स्वं न चेद् दहेत् ।
तत्पुत्रोत्पाटनं कुर्यान्न चेत् कमलवर्धनः ॥ ४७९ ॥

अनुच्चकुलजातस्य दरिद्रस्याऽटतः क्षितिम् ।
तद्यशस्करदेवस्य राज्यप्राप्तिः कथं भवेत् ॥ ४८० ॥

पद्भ्यां व्रजन्निरनुगो ददृशे जनेन
यस्तत्क्षणं निखिललोकसमानमूर्तिः ।
साम्राज्यरम्यममुमीक्षितुमास्त नारी-
दृङ्नीरजस्तवकितो नरनाथमार्गः ॥ ४८१ ॥

नृपतिवसतिं प्रत्यागच्छन् यशस्करभूपतिः
पुरमृगदृशामाशीर्मध्ये वचोऽपि विवक्षितम् ।
स्तिमितवलितापाङ्गं शृण्वन्निमीलदहङ्कृतिः
कृतपरिकरस्तज्ज्ञैर्जज्ञे प्रजापरिपालने ॥ ४८२ ॥

---

477. c) SA_3 gloss क्ष्मायाः भूमेः धृतिः धारणं तस्मिन् प्रौढं सामर्थ्यं यस्य सः (for क्ष्माधृतिप्रौढसामर्थ्यः).

478. d) SA_3 *varia lectio* दैवेन किं सूत्रितम् (for धात्रा न किं सूत्रितम् .

480. SA_3 gloss नीचकुलोत्पन्नस्य (for अनुच्चकुलजातस्य).

481. b) T $I_{1,2,7}$ P_2 V S′ SA_1 °कीर्तिः (for °मूर्तिः)

प्रतिमितरविदीपोद्भासिशुभ्राऽऽतपत्र-
प्रचयरजतपात्रासूत्रितारात्रिकश्रीः ।
अथ मुखरितमाशीर्मङ्गलैरङ्गनाना-
मवनिहरिणधामा राजधाम प्रपेदे ॥४८३॥

—*—

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
पञ्चमस्तरङ्गः ॥

—*—

483. b) St $I_{1-4,7}$ P_{1-3} V S′ °तारात्रिकाश्रीः (for °तारात्रिकश्रीः). —d) SA_3 glosses अवनौ भूमौ हरिणधामा चन्द्रः and राजासनं (for अवनिहरिण-धामा and राजधाम).

After *v.* 483 S′ C insert राजानः आदितः १२,८०; T राजानः आदितः ११,८०; P_3 राजानः ११, ग्रन्थ ४५० आदितः रा° ८१, २२०३.

Colophon: $I_{1,3,4,7}$ C T P_2 S′ °काश्मीरिक° (for °काश्मीरक°). $I_{1,3,4,7}$ T C S′ °चम्पक° (for °चण्पक°).

After colophon a *v.* is inserted in all Mss.:—

व्यधिकायां समाशीतौ मासेषु च चतुर्ष्वगात् ।
कल्यपालाष्टकं रथ्याऽऽहृतस्त्रीसचिवा आपे ॥

[a) C T S′ अधिका° (for व्यधिका°). —c) D T C I_4 कल्प° (for कल्य°).]

अथ

षष्ठस्तरङ्गः

नेदं पर्णसमीरणाशनतपोमाहात्म्यमुच्चोरगौ
पश्यैतावत एव सम्प्रति कृतौ तन्मात्रवृत्ती बहिः ।
प्रेम्णैवाऽर्धमिदं चराचरगुरोः प्रापेयमात्मस्तुती-
रेवं देववधूमुखाच्छ्रुतिसुखाः शृण्वत्यपर्णाऽवतात् ॥ १ ॥

इच्छन्नलङ्घनीयत्वमथ कक्ष्यां विलङ्घयन् ।
प्रतीहारान् द्विजा दूरं वार्यन्तामिति सोऽन्वशात् ॥ २ ॥

वेत्रिवित्रास्यमानांस्तु तान् कृताञ्जलिरब्रवीत् ।
राज्यप्रदाश्च पूज्याश्च यूयं नो दैवतैः समाः ॥ ३ ॥

राज्यदानाभिमानेन वर्तिष्यध्वे मदोद्धताः ।
यत्कार्यकालादन्यत्र नाऽऽगन्तव्यं मदन्तिकम् ॥ ४ ॥

तदाकर्ण्याऽखिलो लोकस्तमधृष्यममन्यत ।
व्यस्मरत् सहसंवाससंभूतमपि लाघवम् ॥ ५ ॥

खिलीभूताः पूर्वराजव्यवस्थाः प्रतिभाबलात् ।
उन्नीतवान् स सुकविः प्राक्कविप्रक्रिया इव ॥ ६ ॥

I_4 begins with ओम् श्रीगणेशाय नमः; P_1 श्रीगणेशाय नमः; $I_{1,7}$ P_8: आम्.

1. [b]) SA_1 gloss पर्णवातजीवनौ (for तन्मात्रवृत्ती). SA_3 gloss एतौ चराचरगुरुणा बहिः कृतौ इत्यन्वयः (for बहिः). —[d]) $I_{3,4}$ °तिमुखाः; SA_3 $P_{1,2}$ °तिसुखात् (for °तिसुखाः). $I_{1-4,7}$ V S′ St T C P_8: शृण्वन्त्यप° (for शृण्वत्यप°).
3. [b]) I_4 om. तान् कृ.
4. [b]) All Mss. read वर्तिष्यत (for वर्तिष्यध्वे suggested).
5. [b]) V S′ C T °मदृश्यम° (for °मधृष्यम°).
6. [a]) I_1 पूर्वराज्य° (for पूर्वराज°). —[b]) $I_{3,7}$ V T C °व्यवस्थाप्रति° (for °व्यवस्थाः प्रति°). —[c]) I_4 स्वकविः (for सुकविः).

अचौराऽभूत्तथा भूमिर्यथा रात्रौ वणिक्पथाः ।
अतिष्ठन्विवृतद्वारा मार्गाश्चाविघ्निताध्वगाः ॥ ७ ॥

प्रत्यवेक्षापरे तस्मिन्नासीत् सर्वापहारिणाम् ।
कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नाऽन्यन्नियोगिनाम् ॥ ८ ॥

ग्राम्याः कृषिपराधीना नाऽपश्यन् राजमन्दिरम् ।
विप्राः स्वाध्यायसंसक्ता नाऽकुर्वञ्शस्त्रधारणम् ॥ ९ ॥

न विप्रगुरवः साम गायन्तो मदिरां पपुः ।
न तापसाः पुत्रदारपशुधान्यान्यढौकयन् ॥ १० ॥

न मूर्खगुरवो मत्स्यापूपयागविधायिनः ।
चक्रिरे स्वकृतैर्ग्रन्थैस्तर्कागमपरीक्षणम् ॥ ११ ॥

नाऽदृश्यन्त च गेहिन्यो गुरुदीक्षोत्थदेवताः ।
कुर्वाणा भर्तृशीलश्रीनिषेधं मूर्धधूननैः ॥ १२ ॥

कार्तान्तिको भिषक्सभ्यो गुरुर्मन्त्री पुरोहितः ।
दूतः स्थेयो लेखको वा न तदाऽभूदपण्डितः ॥ १३ ॥

प्रायोपवेशाधिकृतैर्बोधितेन महीभृता ।
प्रायोपविष्टो निकटं प्रापितः कश्चिदब्रवीत् ॥ १४ ॥

अहमाढ्योऽभवं पूर्वं वास्तव्योऽत्र महीपते ।
निष्किंचनत्वं शनकैरगच्छं दैवयोगतः ॥ १५ ॥

उत्तमर्णैः पीडितस्य प्रवृद्धर्णस्य तस्य मे ।
निश्चयोऽभूद् ऋणं छित्त्वा परिभ्रान्तुं दिगन्तरे ॥ १६ ॥

अथ विक्रीय सर्वस्वमृणं शोधयता मया ।
महाधनाय वणिजे विक्रीतं निजमन्दिरम् ॥ १७ ॥

---

9. d) I_4 °ञ्शास्त्रधार° (for °ञ्शस्त्रधार°).
11. a) SA_1 (before corr.) $I_{1-4,7}$ S′ V C T मूर्खा गु° (for मूर्खगु°).
12. I_4 om. *vv.* 12*b*—13*a*. —c) $I_{1,2,7}$ V भक्तिशील° (for भर्तृशील°).
13. c) SA_3 gloss विवादपरिनिर्णेता स्थेयः (for स्थेयो).
14. a) SA_3 gloss मृतावनशने प्रायो बाहुल्ये सदृशे त्रिषु इति कोशः (for प्रायो). —b) P_3 महीभुजा (for महीभृता).
17. d) I_7 °मन्दिरे (for °मन्दिरम्).

भार्यामुद्दिश्य भर्तव्यामेक एव तु वर्जितः ।
सोपानकूपो विक्रीतान्महतो वेश्मनस्ततः ॥ १८ ॥

निदाघे पुष्पताम्बूलीपर्णाद्यत्राऽतिशीतले ।
न्यस्यद्भिर्मालिकैर्दत्तात् सा जीवेद्भाटकादिति ॥ १९ ॥

ततो दिगन्तराद्भ्रान्त्वा विंशत्या वत्सरैरहम् ।
लब्धाल्पवित्तः संप्राप्तो जन्मभूमिमिमां पुनः ॥ २० ॥

अन्विष्यता मया साध्वी स्ववधूर्ददृशेऽथ सा ।
विवर्णदेहा जीवन्ती प्रेष्यात्वेनाऽन्यवेश्मसु ॥ २१ ॥

किं दत्तजीविकाऽपि त्वमीदृशीं वृत्तिमाश्रिता ।
मयेति सा सदुःखेन पृष्टा स्वोदन्तमब्रवीत् ॥ २२ ॥

सोपानकूपं सम्प्राप्ता त्वयि याते दिगन्तरम् ।
लगुडैस्ताडयित्वाऽहं वणिजा तेन वारिता ॥ २३ ॥

तदन्या काऽस्ति मे वृत्तिरित्युक्त्वा विरराम सा ।
तदाकर्ण्य निमग्नोऽहमन्तरे शोककोपयोः ॥ २४ ॥

कृतप्रायोपवेशोऽथ स्थेयैस्तैस्तैः पदे पदे ।
प्रत्यर्थिनो दत्तजयैः किमप्यस्मि पराजितः ॥ २५ ॥

जडत्वाद् वेद्मि न न्यायं न विक्रीतो मया पुनः ।
सोपानकूप इत्यस्मिन्नर्थे प्राणा इमे पणः ॥ २६ ॥

सोऽहं विपद्ये क्षीणाऽर्थो द्वारि शास्तुस्तव ध्रुवम् ।
वृजिनादस्ति चेद्भीतिर्वस्तु निर्णीयतां स्वयम् ॥ २७ ॥

राजेति तेन विज्ञप्तो गत्वा धर्मासनं स्वयम् ।
संघट्ट्याऽखिलान् स्थेयानासीत् तत्त्वं विचारयन् ॥ २८ ॥

---

19. c) SA_3 gloss पौष्पिकैः (for मालिकैः). —d) $P_{2,3}$ °झाटिकादिति; SA_3 gloss भाटी इति भाषया । प्रत्यहं वेतनं भाटी (for °झाटका°).
24. a) $I_{2-4,7}$ St $P_{1,2}$ V कास्त (for काऽस्ति).
26. b) S′ om. न.
28. b) SG (before corr.) $I_{1-3,7}$ C St P_2 SA दत्त्वा (for गत्वा). $I_{1,2,4,7}$ V धर्मासनः (for धर्मासनं). —c) D (before suggestion) T C P_{1-3} I_2 S′ संघट्टय° (for संघट्ट्य°).

स्थेयास्तमूचुर्बहुशो विचार्याऽयं पराजितः ।
शाठ्यादगणयन् न्यायं दण्ड्यो लिखितदूषकः ॥ २९ ॥

सोपानकूपसहितं विक्रीतं गृहमित्यथ ।
राजा विक्रयपत्रस्थान् स्वयं वर्णानवाचयत् ॥ ३० ॥

ततोऽधिगतमित्येव सभ्येषु निगदत्स्वपि ।
अन्तरात्मा जगादेव नृपतेरर्थिनो जयम् ॥ ३१ ॥

मुहूर्त्तमिव संचिन्त्य राजाऽन्याभिरभूचिरम् ।
कथाभिरतिचित्राभिर्मोहयन् सभ्यमण्डलम् ॥ ३२ ॥

कथान्तराले सर्वेभ्यो गृह्णन् रत्नानि वीक्षितुम् ।
हसन् प्रत्यर्थिनो हस्तादुपादत्ताऽङ्गुलीयकम् ॥ ३३ ॥

क्षणादेवाऽखिलैः स्थेयमित्थमेवेति सस्मितम् ।
वचो ब्रुवाणः प्रययौ पादक्षालनकैतवात् ॥ ३४ ॥

अभिज्ञानाय तत्रस्थः स वितीर्याऽङ्गुलीयकम् ।
भृत्यमेकं वणिग्वेश्म प्राहिणोद् दत्तवाचिकम् ॥ ३५ ॥

स वणिग्गणनाध्यक्षं ययाचे साङ्गुलीयकः ।
यत्राऽब्दे पत्रमुत्पन्नं गणनापत्रिकां ततः ॥ ३६ ॥

निर्णयेऽद्य तया कृत्यमस्ति भाण्डपतेरिति ।
श्रुत्वाऽदाद् गणनाध्यक्षस्तां गृहीताङ्गुलीयकः ॥ ३७ ॥

दीन्नाराणां दशशतीं तस्यां भूभृदवाचयत् ।
व्ययमध्येऽधिकरणलेखकाय समर्पिताम् ॥ ३८ ॥

---

29. I_4 om. this *v*.
32. d) I_4 सत्यम° (for सभ्यम°).
34. a) SA $I_{1,2,4,7}$ C T P_{1-3} V S′ क्षणादिवा° (for क्षणादेवा°). $I_{1,4,7}$ V °वाखिल° (for °वाखिलैः).
36. d) SA_2 gloss गणत् वतूर् इति भाषया बही इति मध्यदेशीयाः (for गणनापत्रिकां).
38. a) SA_2 gloss दीन्नाराः द्यार् इति काश्मीरभाषया (for दीन्नाराणां). $I_{1,2,4,7}$ S′ दशशती (for दशशतीं). —cd) SA_2 gloss यत्सन्निधौ अर्थिप्रत्यर्थिनावुभौ भूमेः क्रयविक्रयं कुरुतः। येन चावस्तरमानं क्रियते सोऽधिकरणलेखकः। अवस्तरपरिमाणलेखपत्रकारी सराफ् इति भाषया (for अधिकरणलेखकाय).

तस्मै मितधनार्हाय बहुमूल्यार्पणान्नृपः ।
रेफे सकारं वणिजा कारितं निश्चिकाय सः ॥ ३९ ॥

सभायां तत् प्रदर्श्याऽथ पृष्ट्वा दत्त्वाऽभयं च तम् ।
आनीय लेखकं सभ्यान् संजातप्रत्ययान् व्यधात् ॥ ४० ॥

सभ्यैरभ्यर्च्यमानेन राज्ञा सार्थं वणिग्गृहम् ।
वितीर्णमर्थिने देशात् प्रत्यर्थी च प्रवासितः ॥ ४१ ॥

कृताह्निकं भोक्तुकामं तं दिनान्ते च भूपतिम् ।
अकालावेदनाद् बिभ्यत् क्षत्ता जातु व्यजिज्ञपत् ॥ ४२ ॥

देवः समाप्तकृत्योऽद्य विज्ञप्तौ श्वस्तव क्षणः ।
इत्युक्तो दर्शने प्राणत्यागी विप्रो बहिः स्थितः ॥ ४३ ॥

दत्तप्रवेशादेशोऽथ रुद्धसूदेन भूभुजा ।
द्विजः प्रविष्टः पृष्टश्च तीव्रार्तिरिदमब्रवीत् ॥ ४४ ॥

सुवर्णरूपकशतं भ्रान्त्वा देशान्तरेऽर्जितम् ।
गृहीत्वा श्रुतसौराज्यः स्वदेशमहमागतः ॥ ४५ ॥

त्वयि राजनि निश्चौरैरध्वभिर्विशतः सुखम् ।
ह्योऽभवल्लवणोत्सं मे दिनान्ते श्राम्यतः स्थितिः ॥ ४६ ॥

---

39. a) $I_{1,2,4,7}$ V P_3 सितधना° (for मितधना°). —b) SA_2 gloss अधिकरणलेखकाय दीन्नारदशशतीदानात् (for बहुमूल्यार्पणात्). —c) SA_2 gloss गृहविक्रयिणा वादिना विक्रयपत्रे लिखितं सोपानकूपरहितं विक्रीतं गृहमिति । ततः तेन लुब्धेन वणिजा प्रत्यर्थिना रेफविषये सकारः कारितः अधिकरणलेखकहस्तेन । उत्कोचं दीन्नारदशशत्याख्यं दत्त्वा कूपसहितं गृहं विक्रीतमिति लेखितं । ततोऽनन्तरं राज्ञानुमितं लेखपत्रचित्रणार्थं किमर्थं दीन्नारदशशती बहुमूल्यत्वादिति । रेफस्य सकार एव कृतोऽनेन इति (for रेफे सकारं).
41. c) $I_{1,2,4,7}$ S′ V T °मर्थिनो; SA_3 gloss विज्ञप्तिकराय (for °मर्थिने).
42. c) S′ अकालवे° (for अकालावे°). —d) SA_3 gloss द्वारस्थः (for क्षत्ता).
44. c) SA_1 (before corr.) C T $I_{1,2,4,7}$ V S′ पृष्टोऽथ (for पृष्टश्च).
45. d) I_2 V स्वं दे° (for स्वदे°).

दीर्घाध्वलङ्घनक्लान्तस्तत्राऽहमकुतोभयः ।
मार्गारामतरोर्मूले त्रियामामत्यवाहयम् ॥ ४७ ॥

वेतनं ग्रन्थिबद्धं तदुत्थास्नोरपतन्मम ।
अरघट्टे समीपस्थे कक्षयोगादलक्षिते ॥ ४८ ॥

तस्मिन् दुरवरोहेऽतिनिर्वसुत्वाज्जहद् वपुः ।
सोऽहं हारितसर्वस्वः शोचन् रुद्धश्चिरं जनैः ॥ ४९ ॥

एकोऽध्यवसितः कोऽपि साहसे पुरुषोऽब्रवीत् ।
मह्यं दापितवित्ताय किं ददासीति मां ततः ॥ ५० ॥

तमस्म्यवोचं विवशस्तस्याऽर्थस्याऽस्मि कः प्रभुः ।
तुभ्यं यद्रोचते मह्यं तत्ततो दीयतां त्वया ॥ ५१ ॥

अवरुह्याऽधिरूढोऽथ रूपकेभ्यो द्वयं मम ।
स प्रादात् स्पष्टमेवाऽष्टानवतिं स्वीचकार तु ॥ ५२ ॥

व्यवहारा वचोनिष्ठा एव राज्ञि यशस्करे ।
निन्दन् व्यवस्थां तां लोकैर्न्यक्कृतोऽस्मीति वादिभिः ॥५३॥

उपचारोक्तिसारल्यच्छलहारितवेतनः ।
सोऽहं जहाम्यसून् द्वारे दुर्व्यवस्थापकस्य ते ॥ ५४ ॥

---

47. a) $I_{1,2,4,7}$ V °क्रान्त° (for °क्लान्त°).

48. a) C S′ वितानं; $I_{1-3,7}$ T वेतानं (for वेतनं). —b) SA_1 (before corr.) $I_{1,2,4,7}$ V °तद्मुवि (for °तन्मम). —d) $I_{2,7}$ V कक्षियोगा° (for कक्षयोगा°).

49. d) P_{1-3} $I_{1,3,4}$ क्रुद्ध° (for रुद्ध°).

50. b) C T $P_{1,3}$ I_3 S′ SA_3 साहसी (for साहसे). —c) SA_3 °लब्धाय (for °वित्ताय). —d) P_3 ददामीति (for ददासीति).

53. a) SA_3 gloss वचसि वाक्य एव निष्ठा येषां न तु न्यायविचारणे इति व्यवस्थां निन्दन् (for वचोनिष्ठा). —b) C T $I_{1,2,4,7}$ S′ V एका; P_3 एवं (for एव).

54. a) SA_1 (before corr.) $I_{1,2,4,7}$ V °सारल्ये° (for °सारल्य°). —c) $I_{2-4,7}$ C $P_{2,3}$ जहास्य° (for जहाम्य°).

पुंसस्तस्य स राज्ञाऽथ पृष्टः प्रकृतिनामनी ।
वदनप्रत्यभिज्ञैव ममाऽस्तीत्यभ्यभाषत ॥ ५५ ॥

प्रातस्तवेप्सितावार्तिं करिष्यामीति भूभुजा ।
प्रतिज्ञाय कथंचित् स स्वपार्श्वे कारितोऽशनम् ॥ ५६ ॥

लवणोत्सौकसां दूताऽऽहूतानां स विशां ततः ।
स्थितमन्तर्द्विजोऽन्येद्युस्तं राज्ञेऽदर्शयन्नरम् ॥ ५७ ॥

पृष्टः स राज्ञा विप्रेण यथैवोक्तं तथैव तत् ।
सर्वमूचे वाक्प्रतिष्ठं व्यवहारमुदीरयन् ॥ ५८ ॥

सत्यवाक्पारतन्त्र्यस्य वस्तुवृत्तस्य चाऽन्तरम् ।
अलक्षयन्तः प्रैक्षन्त दोलाऽऽकुलधियो धराम् ॥ ५९ ॥

धर्मासनस्थो राजाऽथ रूपकाणामभाषत ।
तमष्टानवतेः पात्रं विप्रमन्यं द्वयस्य तु ॥ ६० ॥

अनुयोक्तृञ्जगादाऽपि दुस्संचिन्त्या महात्मनः ।
धर्मस्याऽधर्ममुद्वृत्तं निहन्तुं धावतो गतिः ॥ ६१ ॥

सायं हुताशं प्रविशन्नम्मयं चेन्दुमण्डलम् ।
स्वतेजसा संविभजन् प्रदीपैर्ज्योत्स्नयाऽप्यसौ ॥ ६२ ॥

तदुत्थाय यथा भानुर्निहन्ति ध्वान्तमुद्धतम् ।
अनन्यकर्मा धर्मोऽयं तथाऽधर्मं व्यपोहति ॥ ६३ ॥

दुस्संलक्ष्यस्तु धर्मोऽसावधर्मं बाधतेऽञ्जसा ।
तिष्ठन् नित्यमधिष्ठाय दाह्यं काष्ठमिवाऽनलः ॥ ६४ ॥

ददाति यद् भवान् दत्तां तदित्याद्युक्तमुज्झतः ।
तुभ्यं रोचत इत्यादि वचोऽस्य निसृतं तदा ॥ ६५ ॥

---

55. c) SA_4 gloss वदनमेव केवलं तदीयं विदितं मम न तु नामप्रकृती इत्यर्थः (for °प्रत्यभिज्ञैव). —d) $I_{1,2,4,7}$ V °त्यभिभाष° (for °त्यभ्यभाष°).
57. c) $I_{1,2,4,7}$ V °द्विजे° (for °द्विजो°).
60. d) T °मन्यद्व° (for °मन्यं द्व°).
62. b) SA_3 gloss आप्यं (for अम्मयं).
63. b) $I_{2,7}$ C V °मुद्धृतं (for °मुद्धतम्). After this ν. युग्मम्.
64. c) SA_1 (before corr.) $I_{1,2,4,7}$ V °निष्टम° (for °नित्यम°).
65. d) $I_{1,7}$ S' V C T निःसृतं (for निसृतं).

रुचिताऽस्य बभूवाऽष्टानवतिर्लोभिनोऽस्य ताम् ।
नाऽदादस्मायरुचितं रूपकाणां द्वयं ददत् ॥ ६६ ॥

इत्यादिसूक्ष्मेक्षिकया धर्माऽधर्मान्तरं विदन् ।
प्रत्यवेक्षापरः क्ष्माभृद् व्यधात् कृतयुगोदयम् ॥ ६७ ॥

इत्थं जनं स विनयन् हास्योऽभून्निजदुर्नयैः ।
परस्योपदिशन् पथ्यमपथ्याशीव रोगहृत् ॥ ६८ ॥

श्रोत्रियेणेव तेनाऽपि मृदम्भःशौचशालिना ।
डोम्बोच्छिष्टभुजो भृत्याः पार्श्वान्न परिजह्रिरे ॥ ६९ ॥

यथोत्तरं संश्रितार्थैरन्योऽन्यं पृष्ठपातिभिः ।
नगराधिकृतैश्चक्रे चतुर्भिः सोऽर्थसंग्रहम् ॥ ७० ॥

लेभिरे निधनं तस्मात् सत्यंकारात् पदातयः ।
श्रीरणेश्वरपीठाग्रन्यस्तखड्गादपि प्रभोः ॥ ७१ ॥

स ज्येष्ठे भ्रातरि मृते तथाऽभून्मुदितश्चिरम् ।
तदुपज्ञं यथा प्राज्ञैस्तत्रोत्प्रैक्षि रसार्पणम् ॥ ७२ ॥

नीतस्य मण्डलेशत्वं वेलावित्तस्य भूभुजा ।
देवीः कामयमानस्य चक्रे गजनिमीलिका ॥ ७३ ॥

---

69. [a]) D (before suggestion) P_{1-3} I_3 SA_3 °येणैव (for °येणेव). —[c]) SA_1 (before corr.) V भृत्यान् (for भृत्याः).

70. [c]) SA_2 gloss हट्टरक्षिभिः (for नगराधिकृतैः). —[d]) SA_1 (before corr.) $I_{1,2,4,7}$ V सोथसं° (for सोऽर्थसं°).

71. [d]) D suggests खड्गा अपि (for खड्गादपि).

72. [b]) $I_{1,2,7}$ V S′ C SA_1 °भूदुदित° (for °भून्मुदित°). —[c]) SA_1 (before corr.) C T P_1 $I_{1,2,4}$ V S′ तदुपज्ञैर्य (for तदुपज्ञं य°). —[d]) D (before suggestion) $I_{1-4,7}$ P_{1-3} V S′ T C SA SR SG °त्रोत्प्रेक्षि (for °त्रोत्प्रैक्षि). SA_3 gloss सुवः and St Tr. poison (for रसा°).

73. [b]) SA_3 gloss एतन्नामकसचिवस्य and एतन्नामक struck out afterwards (for वेलावित्तस्य). —[d])SA_3 gloss उपेक्षा कृता इत्यर्थः (for गजनिमीलिका).

रागाच्छुद्धान्तकान्तानां मूर्धानमधिरोपिता ।
लब्धा नामाऽभवत्तस्य वेश्या वैवश्यकारिणी ॥ ७४ ॥

अवकाशः सुवृत्तानां हृदयान्तर्न योषिताम् ।
इतीव विहितौ धात्रा सुवृत्तौ तद्बहिः कुचौ ॥ ७५ ॥

उत्तमाधमसंसक्तौ जानन् सदृशवृत्तिताम् ।
नारीणां शुचिवाह्यानामङ्गनाख्यां व्यधाद् विधिः ॥ ७६ ॥

सा लालिताऽपि राज्ञा यत् लब्धा ललितलोचना ।
चण्डालयामिकेनाऽगाद् यामिनीषु समागमम् ॥ ७७ ॥

सुभगंकरणं किंचिच्चण्डालतरुणेऽभवत् ।
तं यत्प्रभावविवशा भेजे राजवधूरपि ॥ ७८ ॥

सा वा चण्डालकुलजा स वा कार्मणकर्मवित् ।
अन्यथा संगमः किं स्यादसंभाव्यस्तथाविधः ॥ ७९ ॥

सोऽभूत् केन प्रकारेण तया सह समागतः ।
इत्येष लेभे वृत्तान्तः प्रतिभेदं न कुत्रचित् ॥ ८० ॥

केवलं प्रत्यभात् तादृक्पापिनोः प्रेम तत्तयोः ।
दृग्व्यापारेक्षणात् क्षिप्रं हाडिनाम्नोधिकारिणः ॥ ८१ ॥

तमर्थमथ तथ्येन वीक्ष्य प्रणिधिभिर्नृपः ।
प्रायश्चित्तानुचरणक्षामः कृष्णाजिनं दधौ ॥ ८२ ॥

---

76. b) P_1 °वर्तिताम् (for °वृत्तिताम्). —d) SA_3 (before corr.) D St T P_{1-3} $I_{3,4}$ °मङ्गनात्वं; C S' °मङ्गनात्वे (for °मङ्गनाख्याम्).

77. c) SA_2 gloss प्रहरजागरूकेण (for यामिकेन). —d) I_3 समानसम् (for समागमम्). After this *v.* युग्मम्.

78. b) $I_{1,2,4,7}$ V भवेत् (for अभवत्).

79. b) SA_3 gloss वशीकरण– (for कार्मण°). —c) SA_1 (before corr.) $I_{1,2,4,7}$ V सम्भवः (for संगमः).

80. d) P_2 प्रतिभेदे (for प्रतिभेदं).

81. a) $I_{1,2,4,7}$ V °भाक्तादृ°; SA_1 (before corr.) °भार्थादृ° (for °भात्तादृ°).

82. d) D (after suggestion) $I_{2,7}$ V ददौ (for दधौ).

कुपितोऽपि स यन्नैनां न्यवधीद् रागमोहितः ।
तेनैवाऽगात् पुरोभागिवितर्कातङ्कपात्रताम् ॥ ८३ ॥

डोम्बोच्छिष्टानुगासङ्गादशुचित्वं यशस्करे ।
संक्रान्तं कुष्ठिसंस्पर्शात् कुष्ठं दुःखमिवाऽभवत् ॥ ८४ ॥

सामान्येन सता कैश्चित्सदृशैः शुभकर्मभिः ।
जन्मान्तरीयैः साम्राज्यं मया प्रापीति चिन्तयन् ॥ ८५ ॥

साम्राज्यकामो नृपतिर्भाविष्वपि स जन्मसु ।
युक्त्या प्रादान्निरातङ्कां राज्यलक्ष्मीं द्विजन्मने ॥ ८६ ॥

भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतः ।
छात्राणामार्यदेश्यानां तेन विद्यार्थिनां मठः ॥ ८७ ॥

मठाधिपतये तत्र च्छत्रचामरहासिनीम् ।
स नरेन्द्रश्रियं प्रादाट्टङ्कान्तःपुरवर्जिताम् ॥ ८८ ॥

वितस्तापुलिने राजा नानोपकरणान्वितान् ।
ब्राह्मणेभ्यः सोऽग्रहारान् पञ्चपञ्चाशतं ददौ ॥ ८९ ॥

अथ जातोदरव्याधिर्मज्जातो नाऽयमित्यसौ ।
जानन् संग्रामदेवाख्यं परिवर्ज्य निजात्मजम् ॥ ९० ॥

समर्प्य सचिवैकाङ्गसामन्तानभ्यषेचयत् ।
रामदेवात्मजं राज्ये वर्णटं प्रपितृव्यजम् ॥ ९१ ॥

---

83. a) $I_{1,2,7}$ C यत्रैनां; D suggests यन्नैनं; (for यन्नैनां). —b) SA_3 I_3 न्यग्रहीद् (for न्यवधीद्).

86. a) $I_{1,2,4,7}$ V S′ SA_1 °कामोऽपि नृपो (for °कामो नृपति°). —d) $I_{2,7}$ V S′ राजलक्ष्मीं (for राज्यलक्ष्मीं).

87. b) $I_{1,2,4,7}$ V SA_1 स्थितः (for कृतः). —c) SA_1 (before corr.) °देशानां (for °देश्यानां).

88. c) D (before suggestion) P_{1-3} $I_{1,2,4,7}$ V S′ SA_1 नरेन्द्राश्रितां (for नरेन्द्रश्रियं).

89. c) SA_3 gloss काष्ठेलतीर्थविषये यशस्करस्याऽग्रहारा अभवन्नित्याहुः लोकाः (for अग्रहारान्).

90. b) $I_{1-4,7}$ V °र्मज्ञातो; C P_1 S′ °र्न ज्ञातो (for °र्मज्जातो). —d) SA_1 (before corr.) नृपात्म° (for निजात्म°).

शक्ये राज्यादपाकर्तुं शिशावनभिषेचिते ।
निराशाः समपद्यन्त तदा राज्यजिहीर्षवः ॥ ९२ ॥

स पर्वगुप्तकौटिल्यप्रयुक्तेरुदयोन्मुखः ।
विपाककालस्तत्राह्नि भङ्गोन्मुख इवाऽभवत् ॥ ९३ ॥

राजधानीस्थितस्याऽपि वर्णटो राज्यदायिनः ।
आरोग्यवार्तयाऽप्यासीन्मुमूर्षोरनिरीक्षकः ॥ ९४ ॥

ततः सानुशयो राजा ताम्यन्प्रैर्यत मन्त्रिभिः ।
राज्यं संग्रामदेवाय दातुमाश्वासकारिभिः ॥ ९५ ॥

राजाज्ञया निशामेकां बद्धोऽष्टस्तम्भमण्डपात् ।
बहिर्दत्ताऽर्गलात् प्रातर्वर्णटो निरवास्यत ॥ ९६ ॥

भयात् प्रजागराद् वाऽपि तद्भृत्यानां विरेकिणाम् ।
आस्थानमण्डपं प्राप पायुक्षालनभूमिताम् ॥ ९७ ॥

एकाहराजपुरुषस्तदाऽसिं विजयेश्वरे ।
व्रीडाद् देवप्रसादाख्यो राजबीजी समार्पयत् ॥ ९८ ॥

अथाऽभिषिच्य संग्रामदेवं तीव्रीभवद्व्यथः ।
स राजधान्या निर्गत्य मर्तुं निजमठं ययौ ॥ ९९ ॥

धीः केशश्मश्रुवपने शिरश्शाटकवर्जनम् ।
काषायग्रहणोद्वेगः शस्त्रत्यागग्रहश्च यः ॥ १०० ॥

---

93. c) SA_1 (before corr.) $I_{1,2,4,7}$ V °पाकस्त° (for °कालस्त°).
95. c) SA_1 (before corr.) $I_{1,2,4,7}$ V °देवस्य (for °दवाय).
96. d) D (before suggestion) I_7 P_{1-3} निरवर्त्स्यत; St $I_{1,2}$ C V S′ T SA_1 निरवर्त्स्यत (for निरवास्यत).
97. b) D (before suggestion) and all other Mss. read विवोकिनाम् (for विरेकिणाम् suggested).
98. a) SA_4 gloss एकाहं राजभूतस्य वर्णटस्य पुरुषो भृत्यः (for एकाहराजपुरुषः). —d) All Mss. except St (after corr.) and D read समर्पयत् (for समार्पयत्).

राजभृत्यैः प्रतिज्ञातः स तस्मिन्निश्चितक्षये।
जीवत्येव कृतज्ञत्वव्यञ्जकैः परिवर्जितः ॥ १०१ ॥

द्वे सहस्रे सुवर्णस्य सार्धे बद्ध्वा पटाञ्चले।
यो निर्जगाम राजाऽसौ मुमूर्षुर्निजमन्दिरात् ॥ १०२ ॥

पञ्चभिः पर्वगुप्ताद्यैर्यौतकं तस्य मन्त्रिभिः।
हृतं सजीवितस्यैव विभज्याऽन्योन्यमग्रतः ॥ १०३ ॥

विवेष्टमानः शय्यायां व्याधिदग्धान्तरो नृपः।
तिष्ठन्मठाङ्गनकुटीगर्भे ध्वान्तान्धकारिते ॥ १०४ ॥

अजातसंविद्भ्रंशोऽग्रे पश्यन् द्रोहपरान् निजान्।
प्राणैरहानि द्वित्राणि न यदा निरमुच्यत ॥ १०५ ॥

तदा सुहृद्बन्धुभृत्यवेलावित्तैः कृतत्वरैः।
जिहीर्षुभिश्च साम्राज्यं विषं दत्त्वा विपादितः ॥ १०६ ॥

अवरोधवधूमध्यात् सती तं पतिमन्वगात्।
एका त्र्यैलोक्यदेव्येव स्वप्रभेव विरोचनम् ॥ १०७ ॥

वर्णाश्रमप्रत्यवेक्षाबद्धकक्ष्यः क्षितीश्वरः।
चक्रभान्वभिधं चक्रमेलके द्विजतापसम् ॥ १०८ ॥

कृतात्याचारमालोक्य राजा धर्मवशंवदः।
निजग्राह श्वपादेन ललाटतटमङ्कयन् ॥ १०९ ॥

तन्मातुलेन तद्रोषाद् वीरनाथेन योगिना।
सांधिविग्रहिकेणाऽथ स स्वेनैव न्यगृह्यत ॥ ११० ॥

---

101. After this *v* युग्मम्.

102. [b]) SA_1 (before corr.) S′ बद्धा पटा°; $I_{1,2,4,7}$ V बद्धपटा° (for बद्ध्वा पटा°).

103. [d]) D (before suggestion) St $P_{1,3}$ V विभक्त्वा°; P_2 $I_{1-3,7}$ S′ C विभक्ता° (for विभज्या°). After this *v*. युग्मम्.

106. After this *v*. D adds तिलकम्.

109. [a]) SA_3 gloss अतिक्रान्ताचारम् (for कृतात्याचारं). After this *v*. D adds युग्मम्.

110. [a]) SA_4 gloss चक्रभानुद्विजमातुलेन (for तन्मातुलेन). SA_3 golss सन्धिविग्रहशुद्धान्तमुख्यकर्माधिकारी सान्धिविग्रहिकः कटकपालः (for सान्धिविग्रहिकेणा).

पूर्वाचार्यप्रभावेण स्वमाहात्म्याऽधिरोपणम् ।
प्रख्यापयद्भिर्गुरुभिः श्रद्धयेति यदुच्यते ॥ १११ ॥

तत्ख्यापितैव सप्ताहात् स विपन्न इति श्रुतिः ।
दीर्घव्याधिहते तस्मिन्नुपपत्तिः कथं भवेत् ॥ ११२ ॥

अथाऽऽमयान्तरेवाऽभूत् सा वार्तेत्युच्यते यदि ।
वर्णटाद्यभिशापोऽपि तदाऽऽयात्वत्र हेतुताम् ॥ ११३ ॥

भुक्तैश्वर्यो नव समाश्चतुर्विंशे स हायने ।
मासि भाद्रपदे कृष्णतृतीयस्यां व्यपद्यत ॥ ११४ ॥

पितामहीं शिशोर्गोप्त्रीं विनिवेश्य नृपासने ।
भूभटाद्यैः समं प्राभूत् पर्वगुप्तोऽथ पञ्चभिः ॥ ११५ ॥

क्रमात् समं पितामह्या तान् व्यापाद्येतरान् बली ।
एकः स एवमाक्रान्तिः प्रबभूव नृपास्पदे ॥ ११६ ॥

स पार्थिवत्वमन्त्रित्वमिश्रया चेष्टया स्फुरन् ।
राजा राजानकश्चेति मिश्रामेवं धियं व्यधात् ॥ ११७ ॥

सेवमानः स्वयं बालभूपं भोज्यार्पणादिभिः ।
ऋजूनां प्रत्यभात् पर्वगुप्तो द्रोहबहिष्कृतः ॥ ११८ ॥

---

111. a) $I_{1-4,7}$ V S′ $P_{1,2}$ °प्रभावेन (for °प्रभावेण). —b) $I_{1,2,4,7}$ V °नुरोपणीम् (for °धिरोपणम्).
112. a) I_2 V सप्ताहान् (for सप्ताहात्). After this *v.* D adds युग्मम्.
114. a) SA_1 om. नव with a space. —c) S′ om. पदे.
115. a) SA_4 gloss संग्रामदेवस्य (for शिशोः). $I_{2,4}$ C V °गोप्त्री (for °गोप्त्रीं). —c) SA_2 gloss प्रसुरभूत् (for प्राभूत्).
116. c) St T C S′ SG °माक्रान्तः; SA_1 (before corr.) एव साङ्क्रान्तिः (for एवमाक्रान्तिः).
117. b) $I_{1,2,4,7}$ V S′ T C P_1 SA_1 स्फुटम् (for स्फुरन्).
—c) SA_2 gloss राजा पार्थिवः राजानकः मन्त्री । राज्ञः अनः प्राणनं जीवनं धरित्रीरक्षणलक्षणं यस्मात् सः राजानः अनश्चसप्राणने । राजान एव राजानकः । स्वार्थे कः । यद्वा अत्र लिङ्गात् कः सादृश्ये । देवदत्त इव देवदत्तकः इतिवत् । यथा प्राणनं विना देहस्थितिर्नास्ति तथा धीसचिवं मन्त्रिणं विना पार्थिवानां स्वयं कार्याऽकार्यविवेककौशलातिशयो न संभवेदिति राजानकमपेक्षते राजा । यद्वा राज्ञः अनः प्राण इव राजानक इत्यर्थः (for राजानकः).

यान् द्रोहभीरून् संभाव्य संविभेजे यशस्करः ।
तस्य तत्तनयोच्छेदे त एवाऽऽसन् प्रयोजकाः ॥ ११९ ॥

करभाङ्गरुहापिङ्गे श्मश्रुणि क्षितिपालवत् ।
स ददौ कुङ्कुमालेपं वर्चः शाद्वलविस्तृते ॥ १२० ॥

विभ्यदेकाङ्गसङ्घातात् प्रकटोत्पाटनाऽक्षमः ।
प्रमापणाय प्रायुङ्क्त शिशोः कर्माऽऽभिचारिकम् ॥ १२१ ॥

न्याय्यं ते सान्वयस्याऽस्ति राज्यं चैत्रादिवासरे ।
अन्यथा चरतो नाशः क्षिप्रं वंशायुषोर्भवेत् ॥ १२२ ॥

इतीमामपि यामिन्यां श्रुतवान् भूतभारतीम् ।
अभिचारस्य वन्ध्यत्वं निर्ध्यायाऽधिकशङ्कितः ॥ १२३ ॥

एकाङ्गेभ्यो विभिन्नेभ्यो बिभ्यदुद्भिन्नसंभ्रमः ।
उदताम्यत्तथा चिन्तालुप्तसंविद् दिवानिशम् ॥ १२४ ॥

यथा महाहिमापातनिस्सञ्चारजने दिने ।
अकस्मात् संभृतबलो राजधानीं निरुद्धवान् ॥ १२५ ॥

विरोधकारिणं बुद्धाभिधेन सह सूनुना ।
निर्द्रोहमाहवे हत्वा मन्त्रिणं रामवर्धनम् ॥ १२६ ॥

पित्र्येण वेलावित्तेन प्राभृतार्थमुपाहृताम् ।
गले पुष्पस्रजं बद्ध्वा पातितं पार्थिवासनात् ॥ १२७ ॥

स तं वक्राङ्घ्रिसंग्रामं हतमन्यत्र मन्दिरे ।
पातयित्वा वितस्तान्तः कण्ठबद्धशिलं निशि ॥ १२८ ॥

चतुर्विंशस्य वर्षस्य दशम्यां कृष्णफाल्गुने ।
पापः सखड्गकवचो न्यविक्षत नृपासने ॥ १२९ ॥

---

121. b) $I_{1,2,7}$ V °त्पाटनक्षमः (for °त्पाटनाऽक्षमः). — d) $I_{1-4,7}$ P_2 V °चारिकां (for °चारिकम्).

124. c) $I_{1,2,4,7}$ V °प्यत्तथा; P_3 °स्यद्यथा (for °म्यत्तथा). — d) P_3 om. संविद्.

127. b) SA_1 (before corr.) $I_{1,2,4,7}$ V °मुपाहृतम् (for °मुपाहृताम्).

129. b) $I_{1-4,7}$ P_{1-3} St C T V S′ °फाल्गुणे (for °फाल्गुने). After this *v.* चक्कलकम्.

पारेविशोके दिविराज्जातस्याऽभिनवाभिधात् ।
सूनुः संग्रामगुप्तस्य स तदा पार्थिवोऽभवत् ॥ १३० ॥

केचित् तत्प्रत्यवस्थानं ये पुरा प्रतिजज्ञिरे ।
ते सर्वे एव तद्भीताः प्रातरेव प्रणेमिरे ॥ १३१ ॥

पार्थिवैकाङ्गसामन्तमन्त्रिकायस्थतन्त्रिणाम् ।
तद्भीत्या द्रोहवृत्तीनां द्रोहाद्वैतमदृश्यत ॥ १३२ ॥

एकाङ्गस्य तदास्थाने सुय्याभिजनजन्मनः ।
प्रमादात् मदनादित्यनाम्नो ढक्का व्यदीर्यत ॥ १३३ ॥

हृतांशुकेन भूभर्त्रा कुपितेन खलीकृतः ।
स निकृत्तकचश्मश्रुस्तपस्वी समपद्यत ॥ १३४ ॥

तादृशस्य पुनस्तस्य सस्त्रीपुत्रत्वमीयुषः ।
अद्याऽप्यभिजने जाता वसन्ति त्रिपुरेश्वरे ॥ १३५ ॥

कुर्वता पर्वगुप्तेन भूभृता द्रविणार्जनम् ।
प्रापिताः पुनरुत्साहं प्रजारोगा नियोगिनः ॥ १३६ ॥

व्यधत्त स्कन्दभवनविहारवसुधान्तिके ।
पर्वगुप्तेश्वरं सोऽपि वृजिनार्जितया श्रिया ॥ १३७ ॥

श्रीयशस्करभूभर्तृशुद्धान्तस्य विशुद्धधीः ।
कौलीनमलुनादेका गौरीव नृपसुन्दरी ॥ १३८ ॥

---

130. a) D St C P_{1-3} I_3 SA_3 °विशोकं (for °विशोके). C P_2 शिविरा° (for दिविरा°). —d) $I_{1,2,4,7}$ C T V S′ तथा (for तदा).

131. a) D St C T $I_{1,2,4,7}$ P_{1-3} V S तं प्रत्यव° (for तत्प्रत्यव°).

132. SA_1 द्रोहाद् द्वै° (for द्रोहाद्वै°).

138. c) SA_3 gloss लोकनिन्दाम् (for कौलीनं). SA_1 (before corr.) $I_{1,2,4,7}$ V S′ P_1 °मधुनादेका (for °मलुनादेका). —d) D $P_{1,3}$ गौरीनृपतिसु° (for गौरीव नृपसु°). I_4 repeats *vv.* 139*c*—140.

सुचिराङ्कुरितप्रीतेः पर्वगुप्तस्य याऽकरोत् ।
समागमार्थिनो युक्त्या वञ्चनामुचितां सती ॥ १३९ ॥

इदं यशस्करस्वामिसुरवेश्मार्धनिर्मितम् ।
त्यक्त्वा पत्युर्विपन्नस्य कृत्वा निर्माणपूरणम् ॥ १४० ॥

अमोघमस्मि नियमाद्विधास्यामि त्वदीप्सितम् ।
स ह्युपच्छन्दयन्नेवं सुभ्रुवाऽभिहितस्तया ॥ १४१ ॥

अथ प्रवृद्धगर्वेण तत्स्वल्पैरेव वासरैः ।
संपूर्णतां सुरगृहं गमितं तेन भूभुजा ॥ १४२ ॥

सा यागज्वलने राजललना पीतसर्पिषि ।
पूर्णाहुत्या समं साध्वी जुहाव सहसा तनुम् ॥ १४३ ॥

उपर्यस्या निरस्तासोः पुष्पाः कुसुमवृष्टयः ।
तत्काङ्क्षिणस्तु न्यपतन्नवर्णमुखरा गिरः ॥ १४४ ॥

सुदीर्घसाहसारम्भचिन्तासंरम्भशोषितः ।
पर्वगुप्तो बभूवाऽथ तृष्णामयपथातिथिः ॥ १४५ ॥

व्याध्याऽधिप्रशमायासैर्ज्ञात्वाऽप्यस्थायिनीं स्थितिम् ।
मूढाः प्ररूढिं नोज्झन्ति द्रोहे श्रीलोभमोहिताः ॥ १४६ ॥

आशङ्क्य तादृङ्निष्ठोऽपि सोऽकुण्ठैः प्राक्तनैः शुभैः ।
कैश्चित् सुरेश्वरीक्षेत्रे परासुः समपद्यत ॥ १४७ ॥

षड्विंशवत्सराषाढबहुलेऽह्नि त्रयोदशे ।
द्रोहार्जितेन नृपतिः स राज्येन व्ययुज्यत ॥ १४८ ॥

---

140. d) D (before suggestion) SA_1 (before corr.) $I_{1-4,7}$ P_{1-3} V S′ T C निर्वाण° (for निर्माण°).

141. a) SA_3 gloss अस्मीति निपातः अहमित्यर्थे (for अस्मि). —d) $I_{2,7}$ V °स्तथा (for °स्तया). After this *v.* D adds युग्मम्.

145. b) $I_{1,2,7}$ V °योषितः (for °शोषितः).

146. d) St द्रोहश्री° (for द्रोहे श्री°).

अतीन्द्रियायां परलोकवृत्ता-
विहैव तीव्राशुभपाकशंसी ।
दृश्येत नाशो यदि नाम नाशु
न कः कुकृत्येन यतेत भूत्यै ॥ १४९ ॥

क्षेमगुप्ताभिधानोऽभूदथ राजा तदात्मजः ।
आसवाऽऽसेवनोत्सिक्तवित्ततारुण्यसंज्वरः ॥ १५० ॥

सोऽभूत् स्वभावदुर्वृत्तो नितरां दुर्जनाश्रयात् ।
कृष्णक्षपाक्षणो घोरमेघान्ध इव भीतिकृत् ॥ १५१ ॥

स्वतुल्यवेषालंकाराः शतं लालितका नृपम् ।
तं फल्गुणप्रभृतयो दुराचाराः सिषेविरे ॥ १५२ ॥

द्यूताऽऽसवाऽङ्गनासेवाव्यसनेऽपि स पार्थिवः ।
विटनिर्लुण्ठ्यमानोऽपि नाऽभूल्लक्ष्मीबहिष्कृतः ॥ १५३ ॥

रागी मधुप्रणयवान् विहिताक्षसक्ति-
र्यः सख्यमेति मधुपैर्हृतकोशसारैः ।
पद्मे प्रयाति दिनमात्रमपि प्रसक्तिं
श्रीस्तत्र चेत् किमिव तन्न कुतूहलाय ॥ १५४ ॥

विटाः प्रविष्टा हृदयं जिष्णुजा वामनादयः ।
पिशाचस्येव रुचितामशुचिं तस्य चक्रिरे ॥ १५५ ॥

परोपहासकुशलः परनारीरतिप्रियः ।
परायत्ताशयस्तस्थौ पार्थिवोऽनर्थतत्परः ॥ १५६ ॥

ष्ठीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु ।
तेन क्षिप्ताः प्रतीक्ष्याणां करोटीषु च टक्कराः ॥ १५७ ॥

---

149. d) $I_{1,2,7}$ V T भीत्यै; C S′ भृत्यैः (for भूत्यै).
152. a) SA_3 °वेशा° (for °वेषा°). —b) SA_3 gloss पदातयः (for लालितका).
154. d) P_1 I_4 S′ तत्र (for तन्न).
155. d) $I_{1,2,4,7}$ V सशुचिं (for °मशुचिं).
157. b) SA_1 (before corr.) °पालयः (for °पालिषु).

कटिसंघटनैर्नार्यो मृगव्यज्ञा वनाटनैः ।
विटाश्चाऽश्लीलरटनैर्वाल्लभ्यं तस्य लेभिरे ॥ १५८ ॥

पुंश्चलीजालमवैधेयबालकद्रोग्धृनिर्भरा ।
समभूदप्रवेशार्हा राजपर्षन्मनस्विनाम् ॥ १५९ ॥

जिष्णुपुत्रैः क्षेमगुप्तक्षमाभृद् यन्त्रपुत्रकः ।
चारणत्वगुणाकृष्टः किं न धूर्तैरनर्त्यत ॥ १६० ॥

तस्य कङ्कणवर्षोऽसीत्यभिधानं विधाय ते ।
तोषिताच्चाऽसकृच्चक्रुर्दोष्णोः कङ्कणवर्षिताम् ॥ १६१ ॥

निर्दोषदोषाविष्कारे नववस्तुप्रदर्शने ।
अधृष्यटक्कराधाने प्रसादः प्रापि तैर्नृपात् ॥ १६२ ॥

संलक्ष्यकुचकक्ष्यान्ताः कृत्वा निजवधूः पुरः ।
रागी राजा गृहान्नीतो द्यूते तैर्निर्धनः कृतः ॥ १६३ ॥

संभोगाभग्नसौभाग्यकृतस्पर्धैः परस्परम् ।
संभुज्यैता भवान् वक्तु विशेषमिति चोदितः ॥ १६४ ॥

उपभोगं स्वभार्याणां निर्लज्जैस्तैः स कारितः ।
का हृद्येति च रत्यन्ते पृष्टोऽभीष्टधनप्रदः ॥ १६५ ॥

तस्य लालितकेष्वास्तां मूढौ संभोगढौकने ।
मात्रोश्चारित्ररक्षित्वाद्भिक्षाकौ हरिधूर्जटी ॥ १६६ ॥

नीत्वा नर्मकथाङ्गतां निजवपुर्मुञ्चन्ति मानोन्नतिं
संदूष्य स्वयमङ्गनाः शुचितया त्यक्तं कुलं कुर्वते ।
सौख्यं घ्नन्ति सुदीर्घसेवनसमासक्तया यदर्थं श्रमः
प्रत्याख्याय तदेव वेद्मि न विटैः किं प्रार्थ्यते सेवया ॥१६७॥

---

158. a) SA_1 (before corr.) $I_{1,2,4,7}$ V T C °घटनान्ना°; S′ P_3 °घट्टनान्ना° (for °घटनैर्ना°). —b) SA_1 om. मृगव्यज्ञा with a space. P_1 S′ वनाटकैः (for वनाटनैः).
160. d) SA_1 (before corr.) °नन्द्यत (for °नर्त्यत).
161. c) All Mss. except D and I_2 read तोषिताश्चा° (for तोषिताच्चा°).
164. c) C T S′ वक्तुः (for वक्तु).
165. After this *v.* युग्मम्.
166. c) T P_1 $I_{1,7}$ V S′ मात्रोच्चारित्र° (for मात्रोश्चारित्र°). SA_1 (before corr.) °रक्षित्वा भि° (for रक्षित्वाद्भि°).
167. c) P_3 सौख्ये (for सौख्यं). $I_{1,2,4,7}$ V S′ C T P_1 °दीर्घमेव न समा° (for °दीर्घसेवनसमा°). —d) $I_{1,2,4,7}$ प्रत्याख्यायि (for प्रत्याख्याय).

यशस्करस्य भूत्वाऽपि सचिवो भट्टफल्गुणः ।
तस्याऽभूदनुजीव्यन्ते धिग्भोगाभ्यासवासनाम् ॥ १६८ ॥

फल्गुणस्वामिमुख्यानां प्रतिष्ठानां विधायिनः ।
तस्योपदेशो भूभर्त्रा पर्यहास्यसकृद्रहः ॥ १६९ ॥

गृह्णन् विद्वेषितां हन्तुं टक्करादिबलात्ततः ।
वृद्धो रक्कः कम्पनेशो दुर्गोष्ठीमध्यगोऽभवत् ॥ १७० ॥

तीक्ष्णाक्षेपे संप्रविष्टं हन्तुं संग्रामडामरम् ।
श्रीजयेन्द्रविहारं स निर्घृणो निरदाहयत् ॥ १७१ ॥

सुगतप्रतिमारीतिं हृत्वा दग्धात्ततोऽखिलात् ।
जरद्देवगृहेभ्यश्च संगृह्य ग्रावसंचयम् ॥ १७२ ॥

सुरप्रतिष्ठया दार्ढ्यं मूढः स्वयशसो विदन् ।
नगरापणवीथ्यन्तः क्षेमगौरीश्वरं व्यधात् ॥ १७३ ॥

एकः प्रयात्युपरमं द्रविणं तदीयं
हृत्वाऽपरः प्रसभमुद्वहति प्रमोदम् ।
नो वेत्ति तत्स्वनिधने परकोशगामि
धिग्वासनामसममोहकृतान्धकाराम् ॥ १७४ ॥

त्यागिना क्षेमगुप्तेन भुक्त्यर्थं खशभूभुजे ।
हृत्वा विहारान्निर्दग्धात् ग्रामाः षट्त्रिंशदर्पिताः ॥ १७५ ॥

दुर्गाणां लोहरादीनां शास्ता शतमखोपमः ।
नृपतिः सिंहराजाख्यस्तस्मै स्वां तनयां ददौ ॥ १७६ ॥

---

168. d) P_3 $I_{1,2,4,7}$ V °वासिनां (for °वासनाम्).
170. a) $I_{1,2,4,7}$ V गृह्णन्ति द्वेषतां°; SA_1 गृह्णन्विशेष° (for गृह्णन् विद्वेषि°). —c) $I_{1,2,4,7}$ V रक्तः (for रक्कः).
172. b) D $I_{1-3,7}$ P_{1-3} C S′ T V SA_1 दग्ध्वा ततो (for दग्धात्ततो). —d) $I_{1,2,4,7}$ P_{1-3} V S′ C T D SA_1 सङ्गृह्य (for संगृह्य).
173. After this *v.* D adds युग्मम् .
174. a) D °परतिं (for °परमं). —b) SA_1 (before corr.) $I_{1,2,4,7}$ V S′ T कृत्वा परः (for हृत्वाऽपरः).
175. b) T C भुक्त्वार्थं (for भुक्त्यर्थं). SA_4 gloss सिंहराजाय (for खशभूभुजे). —c) D (before suggestion) and all other Mss. read °न्निर्दग्धान् (for °न्निर्दग्धात् suggested).
176. b) SA_1 (before corr.) शतमुखो° (for शतमखो°).

स तस्यां शाहिदौहित्र्यां दिद्दायां सक्तमानसः ।
दिद्दाक्षेम इति ख्यातिं ययौ लज्जावहां नृपः ॥ १७७ ॥

मातामहेन भूभर्तृवध्वास्तस्या व्यधीयत ।
श्रीभीमशाहिनोदात्तप्रासादो भीमकेशवः ॥ १७८ ॥

चन्द्रलेखाभिधां कन्यां राज्ञे दत्तवताऽभवत् ।
फल्गुणद्वारपतिना समं दिद्दा समत्सरा ॥ १७९ ॥

गुरूपदेशः सुमहान् कुन्तविद्याश्रमस्तथा ।
तस्य निर्वहणाद् गर्ह्याद् भूभुजो हास्यतां ययौ ॥ १८० ॥

अमोघपतनान्प्रासान् योग्यान् संग्रामकर्मसु ।
सृगालमृगयाऽऽसक्तया स हि श्लाघ्यानमन्यत ॥ १८१ ॥

तं वृतं वागुरावाहिडोम्बाटविकपेटकैः ।
पर्यटन्तं श्वभिः सार्धमपश्यन् सततं जनाः ॥ १८२ ॥

तस्य दामोदरारण्यलल्यानशिमिकादिषु ।
स्थानेषु क्रोष्टुमृगयारसिकस्य वयोऽगमत् ॥ १८३ ॥

अथ कृष्णचतुर्दश्यां स कुर्वन् मृगयां नृपः ।
ज्वालामपश्यत् क्रोशन्त्याः सृगाल्या निर्गतां मुखात् ॥ १८४ ॥

तदालोकनसंजातसंत्रासाकम्पितस्ततः ।
लूतामयज्वरेणाऽभूत् परीतो मृत्युहेतुना ॥ १८५ ॥

---

178. c) D SA_1 T C $I_{1,2,4,7}$ P_{1-3} S′ श्रीभूमिस्वामिनो; D suggests श्रीभीमस्वामिना (for श्रीभीमशाहिनो). —cd) $I_{4,7}$ T C V S′ दत्तप्रसादो; $I_{1,2}$ दत्तप्रासादो (for °दात्तप्रासादो).
179. b) SA_1 (before corr.) $I_{1,2,4,7}$ V राज्ञो (for राज्ञे).
180. c) SA_1 (before corr.) $I_{1,2,7}$ V गर्ह्या (for गर्ह्याद्).
181. a) SA_1 (before corr.) $I_{1,2,4,7}$ V °प्रतिमान्प्रा° (for °पतनान्प्रा°). SA_3 °न्कुन्तान् (for न्प्रासान्). —d) SA_1 (before corr.) $I_{2,7}$ V श्लाघ्याम°; I_1 श्लाघ्यम° (for श्लाघ्यान°).
182. b) SA_1 $I_{1,2,4,7}$ V °विटपे° (for °विकपे°).
183. c) $I_{2,4}$ S′ D क्रोष्टृ° (for क्रोष्टु°).
185. b) St °सत्रासा° (for °संत्रासा°). SA_1 (before corr.) $I_{1,2,4,7}$ V °तस्थितिः (for °तस्ततः).

मर्तुं ययौ च वाराहक्षेत्रं यत्र विधायकः ।
श्रीकण्ठक्षेममठयोरासीद् धुष्कपुरान्तिके ॥ १८६ ॥

मसूरविदलाकारलूताक्लिन्नकलेवरः ।
पौषे चाऽब्दे चतुस्त्रिंशे नवमेऽह्नि सिते मृतः ॥ १८७ ॥

क्षेमगुप्तात्मजः क्षमाभृदभिमन्युरभूत् ततः ।
शिशुर्निस्त्रिंशधर्मिण्या दिद्दादेव्याऽनुपालितः ॥ १८८ ॥

सन्धिविग्रहशुद्धान्तमुख्यकर्माधिकारिणः ।
निस्साध्वसं राजवधूमवन्ध्यशयनां व्यधुः ॥ १८९ ॥

अभिमन्यौ क्षितिं रक्षत्यकस्मादेव दारुणः ।
तुङ्गेश्वरापणोपान्तादुज्जगाम हुताशनः ॥ १९० ॥

वर्धनस्वामिपार्श्वस्थभिक्षुकीपारकावधिः ।
वेतालसूत्रपातस्थान्स ददाह महागृहान् ॥ १९१ ॥

डोम्बचण्डालसंस्पृष्टभूपसंपर्कदूषितान् ।
दग्ध्वा महागृहान् वह्निर्भुवः शुद्धिमिवाऽकरोत् ॥ १९२ ॥

रक्षित्री क्षमापतेर्माता स्त्रीस्वभावाद् विमूढधीः ।
साराऽसारविचारेण लोलकर्णी न पस्पृशे ॥ १९३ ॥

राज्ञः सुतार्पणाद् बद्धवैरा तस्थौ पुरा यतः ।
पतिवत्न्येव सा सार्धं फल्गुणेनाऽग्र्यमन्त्रिणा ॥ १९४ ॥

पत्यौ मृते सपत्नीनां दृष्ट्वाऽनुमरणं ततः ।
दम्भेनाऽनुमुमूर्षन्तीमनुमेने स तां द्रुतम् ॥ १९५ ॥

---

187. d) SA_1 (before corr.) $I_{1,2,4,7}$ V S′ T C °वमेऽब्दे (for °वमेऽह्नि).

189. a) SA_1 (before corr.) $I_{1,2,4,7}$ V मन्त्रिवि° (for सन्धिवि°).

191. c) $I_{2,7}$ V °स्थात्स (for °स्थान्स).

193. d) $I_{1,2,7}$ V लोलकर्णे (for लोलकर्णी).

194. c) $I_{1,2,4,7}$ S′ V T C पतिवत्नीव; SA_4 gloss सभर्तृकैव सती (for पतिवत्न्येव).

195. a) SA_1 (before corr.) $I_{2,7}$ V P_1 पत्न्यौ (for पत्यौ). —b) $I_{1,2,4,7}$ V S′ SA_1 °नुसरणं (for °नुमरणं).

निषिषेधानुबन्धात्तु सानुतापां चितान्तिके ।
कृपालुर्मरणादेताममात्यो नरवाहनः ॥ १९६ ॥

अतो निसर्गपिशुनो रक्कस्तां मन्युदूषिताम् ।
फल्गुणाद् राज्यहरणाशङ्कां राज्ञीमजिग्रहत् ॥ १९७ ॥

विरागशंसिभिर्लिङ्गैस्तां ज्ञात्वा विषमाशयाम् ।
समन्युं साखिलामात्यां फल्गुणोऽप्यास्त शङ्कितः ॥१९८॥

स हि सर्वाधिकारस्थः सर्वस्याऽक्षिगतोऽभवत् ।
दीप्यमानोऽधिकं मन्त्रशौर्योत्साहादिभिर्गुणैः ॥ १९९ ॥

अस्थीनि क्षेमगुप्तस्य गृहीत्वा जाह्नवीं गते ।
पुत्रे कंदर्पराजाख्ये प्रबलैरन्विते बलैः ॥ २०० ॥

तत्प्रत्यागमपर्यन्तं पर्णोत्से स्थातुमुद्यतः ।
अविश्वसन्नृपगृहे फल्गुणो वैरिशङ्कितः ॥ २०१ ॥

निर्गत्य नगराद् यावत् सभाण्डागारिसैनिकः ।
काष्ठवाटान्तिकं प्राप तावद् रक्कादिचोदिता ॥ २०२ ॥

आकलय्य द्रुतं दिद्दा संत्यज्य प्रार्थनादिकम् ।
पृष्ठे प्रत्युत याष्टीकांस्तस्य हन्तुं व्यसर्जयत् ॥ २०३ ॥

नवाऽवमानखिन्नः स मिलिताऽनन्तसैनिकः ।
प्रत्यावृत्त्य ततो मानी वाराहं क्षेत्रमाययौ ॥ २०४ ॥

श्रुत्वा समेतसैन्यं तं प्रत्यायातं प्रतापिनम् ।
आस्कन्दशङ्किनी दिद्दा सामात्या समकम्पत ॥ २०५ ॥

तस्मिन् क्षेत्रे गतं शान्तं विलप्य स्वामिनं चिरम् ।
वराहपादसविधे तेन शस्त्रं समर्पितम् ॥ २०६ ॥

---

199. c) SA_1 I_4 तन्त्र°; $I_{1,2,7}$ तत्र (for मन्त्र°).
200. d) I_4 om. रन्विते बलैः. D St T C $P_{1,3}$ S′ °रन्वितो (for °रन्विते).
202. c) SA_1 (before corr.) D (before suggestion) P_{1-3} $I_{1-4,7}$ V S′ T C प्राप्य; SA_3 gloss प्राप्त इत्यर्थः (for प्राप).
203. After this *v.* D adds चक्कलकम्.
206. a) D suggests शान्तिं (for शान्तं). —d) SA_1 (before corr.) तत्र (for तेन).

द्रोहसंभावनापापं शस्त्रत्यागेन मन्त्रिणा ।
स्वस्य संमार्जितं तेन राजमातुश्च साध्वसम् ॥ २०७ ॥

युक्ताऽयुक्तविचारवाह्यमनसः सेवा महद्वैशसं
क्रुद्धेऽस्मिन्प्रतिकारकर्म गहनद्रोहापवादावहम् ।
येन न्यूनगुणेदृशोपकरणीभावोऽपि तस्मै परं
कोपः कोऽपि विवेकिनः समुचितः शास्त्राय शस्त्राय वा ॥२०८॥

पर्णोत्समेव शनकैः ससैन्ये फल्गुणे गते ।
विगताऽध्यापका बाला इवाऽमोदन्त मन्त्रिणः ॥ २०९ ॥

योगक्षेमौ चिन्तयन्ती क्षेमगुप्तवधूरपि ।
अनिशं प्रजजागार स्वयं कण्टकपाटने ॥ २१० ॥

राज्यप्रार्थी पर्वगुप्तो मन्त्रिणौ कोशपीथिनौ ।
अजिग्रहत् करौ पूर्वं पुत्र्योर्यौ छोजभूभटौ ॥ २११ ॥

तयोः प्रजातौ तनयौ ख्यातौ महिमपाटलौ ।
अवर्धिषातां यौ राजमन्दिरे राजपुत्रवत् ॥ २१२ ॥

तौ तत्राऽवस्थितावेव तत्कालं राज्यलालसौ ।
संमन्त्र्य समगंसातामुद्दामैर्हिम्मकादिभिः ॥ २१३ ॥

बलिनौ तावबलया राज्ञ्याऽपास्तौ नृपास्पदात् ।
समन्यू स्वगृहादास्तां यावत्कृतगतागतौ ॥ २१४ ॥

एकतः पृष्ठतः प्रादान्महिम्नो निर्गतस्य सा ।
निर्वासनाय याष्टीकांस्तावत्प्रकटवैकृता ॥ २१५ ॥

शक्तिसेनाऽभिधानस्य श्वशुरस्य निवेशनम् ।
प्रविवेश स तज्ज्ञात्वा तं ते तत्राऽपि दुद्रुवुः ॥ २१६ ॥

---

208. b) $I_{1,2,4,7}$ V °दापहम् (for दावहम्). —c) T °गुणेदृशेऽपक° (for गुणेदृशोपक°).
211. d) SA_1 (before corr.) T S′ °र्यौ (for °र्यौ).
213. d) $I_{1-4,7}$ V S′ P_2 SA SR SG °हिंमका° (for °हिम्मका°).
215. a) I_7 om. पृष्ठतः. After this v. D adds युग्मम्.
216. a) SA_1 (before corr.) $I_{1,2,4,7}$ V शक्तिसेवा° (for शक्तिसेना°) —c) P_2 I_3 om. स.

शक्तिसेनेन याष्टीकाः सान्त्विता नाऽचलन् यदा ।
तदा भीतस्य जामातुर्व्यक्तं प्रादात् स संश्रयम् ॥ २१७ ॥

तं लब्धसंश्रयं प्राप हिम्मको मुकुलस्तथा ।
एरमन्तकनामा च परिहासपुराश्रयः ॥ २१८ ॥

श्रीमान् उदयगुप्ताख्योऽप्यमृताकरनन्दनः ।
ललितादित्यपुरजा यशोधरमुखा अपि ॥ २१९ ॥

एकैके ते मिथः सैन्यैर्भुवनक्षोभकारिणः ।
संभूय चक्रुर्द्वैराज्यं महिम्नः पक्षमाश्रिताः ॥ २२० ॥

तस्मिन् महाभये दिद्दापक्षं मन्त्री सबान्धवः ।
एक एव तु तत्याज नाऽद्रोहो नरवाहनः ॥ २२१ ॥

प्रवर्धमानपृतना योद्धुं बद्धोद्यमास्ततः ।
पद्मस्वाम्यन्तिकं प्रापुर्दीप्यमानायुधा द्विषः ॥ २२२ ॥

अथ शूरमठे दिद्दा विसृज्याऽऽत्मजमाकुला ।
आपच्छान्तिक्षमांस्तांस्तानुपायान् समचिन्तयत् ॥ २२३ ॥

ललितादित्यपुरजान् द्विजान् स्वर्णेन भूरिणा ।
तूर्णं स्वीकृत्य विदधे रिपूणां संघभेदनम् ॥ २२४ ॥

एकाक्षेपेऽखिलैः कोपो विधेय इति वादिभिः ।
महिम्नः पीतकोशैस्तैः सन्धिर्देव्या समं कृतः ॥ २२५ ॥

गोष्पदोल्लङ्घने यस्याः शक्तिर्नाऽज्ञायि केनचित् ।
वायुपुत्रायितं पङ्ग्वा तया संघाब्धिलङ्घने ॥ २२६ ॥

---

217. b) $I_{1,2,7}$ V °चलद् (for °चलन्). —c) $I_{1,2,7}$ V भीमस्य (for भीतस्य).

218. a) SA_1 (before corr.) $I_{1,2,7}$ V तैः; SA_3 gloss महिमानं (for तं). —c) D $I_{1-4,7}$ V S′ C T °मत्तक° (for मन्तक°).

219. After this *v.* D adds युग्मम्.

220. a) D $I_{1,2,4,7}$ P_{1-3} V S′ SA_1 T C एकैकं तं (for एकैके ते). —d) $I_{1,2,4,7}$ V S′ T C °माश्रितः (for °माश्रिताः).

224. c) P_2 om. तूर्णं.

यत्संग्रहो रत्नमहौषधीनां
करोति सर्वव्यसनावसानम् ।
त्यागेन तद्यस्य भवेन्नमोऽस्तु
चित्रप्रभावाय धनाय तस्मै ॥ २२७ ॥

उत्कोचकाञ्चनादानेऽप्युच्चां ध्यायन्त्युपक्रियाम् ।
दिद्दा यशोधरादिभ्यः कम्पनादि समार्पयत् ॥ २२८ ॥

आभिचारं महिम्नश्च कृतवत्या मितैर्दिनैः ।
मण्डलेऽखण्डिताज्ञत्वं दिद्दायाः समजृम्भत ॥ २२९ ॥

कदाचित् थक्कनाख्यस्य शाहीशस्योपरि क्रुधा ।
सत्रा स्ववंशजैर्यात्रां कम्पनाधिपतिर्ददौ ॥ २३० ॥

तद्देशं निम्नगाशैलदुर्गं प्रविशता जवात् ।
अखण्डशक्तिना तेन बलादग्राहि थक्कनः ॥ २३१ ॥

स कृतप्रणतेस्तस्य करमादाय भूपतेः ।
अभिषेकाम्बुभिश्चक्रे श्रीलताप्यायनं पुनः ॥ २३२ ॥

लब्धप्रवेशैः समये तस्मिन् रक्कादिभिः खलैः ।
कम्पनाधिपतौ राज्ञ्या विद्वेषोऽग्राहि मूढया ॥ २३३ ॥

उर्वीपतेश्च स्फटिकाश्मनश्च
शीलोज्झितस्त्रीहृदयस्य चाऽन्तः ।
असंनिधानात् सततस्थितीना-
मन्योपरागः कुरुते प्रवेशम् ॥ २३४ ॥

---

227. d) SA_1 (before corr.) नमोस्तु (for धनाय).
228. c) $I_{1,2,7}$ V °रादित्यः (for °रादिभ्यः). —d) $I_{2,7}$ V कम्पनाय (for कम्पनादि). SA SR SG $I_{1-4,7}$ V S′ P_{1-3} समर्पयत् (for समार्पयत्).
229. d) SA_3 St I_3 रण्डायाः (for दिद्दायाः).
230. a) SA_1 (before corr.) T C $I_{1,2,3}$ S′ ढक्कना° (for थक्कना°).
232. d) SA_2 gloss श्री एव लता (for श्रीलता).
233. a) SA_1 (before corr.) $I_{1,2,4,7}$ V S′ C °प्रवेशः (for °प्रवेशैः). —c) $I_{1-4,7}$ V S′ C राज्ञा (for राज्ञ्या).
234. d) SA_1 (before corr.) P_2 I_3 S′ °मन्योन्यरागः; $I_{1,2,4,7}$ V °मन्योन्यरामः (for °मन्योपरागः);

स्वचित्तसंवादि वचो वदन्तो
धूर्ता वितन्वन्ति मनःप्रवेशम् ।
पृथग्जनानां गणिकावधूनां
विटाः प्रभूणामपि गर्भचेटाः ॥ २३५ ॥

द्रोग्धाऽयं थक्कनं रक्षन् धनादायीति पैशुनम् ।
तथ्यमेव तदीयं सा स्वयं वादादमन्यत ॥ २३६ ॥

अथ स्ववसतिं प्राप्ते कम्पनेशे जयोर्जिते ।
याष्टीकान् व्यसृजद् दिद्दा स्फुटं निर्वासनोद्यता ॥ २३७ ॥

तदाक्षेपं समाकर्ण्य स्मरन्तः कोशसंविदम् ।
ते हिम्मकैरमन्ताद्याः पूर्ववद्विक्रिया ययुः ॥ २३८ ॥

नरवाहनमुख्यास्तु राज्ञीपक्षं न तत्यजुः ।
विभेदं पूर्ववत्प्रापदेवं निजबलं पुनः ॥ २३९ ॥

प्रविष्टेषु ततः कोपात्पुरं शुभधरादिषु ।
भट्टारकामठे दिद्दा भूयः पुत्रं व्यसर्जयत् ॥ २४० ॥

दत्तार्गले नृपगृहे स्थितां तां दैवमोहिताः ।
ते तदैव विना पुत्रं विमूढा नोदपाटयन् ॥ २४१ ॥

राज्ञ्याः संजघटे लोकः परस्मिन्नेव वासरे ।
यद्बलेन तदा स्थैर्यं सा किंचित्समदर्शयत् ॥ २४२ ॥

जयाभट्टारिकापार्श्वाद् यावच्छूरमठान्तिकम् ।
व्याप्य स्थितैर्द्विषत्सैन्यैरथ प्रववृते रणः ॥ २४३ ॥

---

236. d) SA_3 स्वसंवादा° (for स्वयं वादा°).

238. b) $I_{1,2,4,7}$ C कोशवेदिनम्; SA_3 gloss एकाक्षेपेऽखिलैः कोपो विधेय इत्येवंरूपां (for कोशसंविदम्). —c) D T $P_{1,2}$ I_3 °रमत्ताद्याः (for °रमन्ताद्याः).

239. a) SA_1 om. मुख्या with a space.

241. d) SA_1 (before corr.) $I_{1-4,7}$ V नोपपाट° (for नोदपाट°).

242. a) D C T P_3 S′ राज्ञ्या (for राज्ञ्याः). P_3 om. घटे.

243. d) C S′ रणं (for रणः).

राजधानीं राजसैन्ये प्रविष्टे त्रासविद्रुते ।
सिंहद्वारे घटाबन्धमेकाङ्गाः समदर्शयन् ॥ २४४ ॥

शरीरनिरपेक्षास्ते भीतं संस्तम्भ्य तद्बलम् ।
अधावन् विद्विषां सैन्यं चेलुः केचिच्च शत्रवः ॥ २४५ ॥

तस्मिन्नवसरे राजकुलभट्टः समाययौ ।
तूर्यघोषैर्द्विषां सैन्यं भिन्दन्नानन्दयन् निजम् ॥ २४६ ॥

तस्मिन् प्राप्ते द्विषां सैन्यं विननाश विनश्वरम् ।
न द्रोहाविनयं जातु सहन्ते शस्त्रदेवताः ॥ २४७ ॥

त्रोटयत्यायसान् बन्धान् स्फोटयत्युपलानिति ।
यः ख्यातिमवहत्तथ्यां हिम्मको भीमविक्रमः ॥ २४८ ॥

तस्याऽसिना राजकुलभट्टदेहार्धपातिना ।
चर्ममात्रं न तुत्रोट कङ्कटस्याऽतिसङ्कटे ॥ २४९ ॥

विलोक्य तदसंभाव्यं सैन्ये दैन्यं समाश्रिते ।
अधानि हिम्मको योधैरवाष्टम्भि यशोधरः ॥ २५० ॥

तथाऽप्यासीत् स्फुरन् संख्ये य एरमन्तकः क्षणम् ।
स भग्नासिश्च्युतो वाहाज्जीवग्राहमगृह्यत ॥ २५१ ॥

---

244. a) P_2 राजसैन्यैः (for राजसैन्ये). —c) $I_{2,7}$ V सिंहद्वारैः (for सिंहद्वारे).
245. c) SA_1 (before corr.) P_3 अधावद्; $I_{2,4}$ V अधार्य° (for अधावन्). SA_1 $I_{1,2,4,7}$ om. *vv.* 245*d*—246*c*.
246. V om. this *v.* —d) SA_3 P_2 I_3 निजान् (for निजम्).
247. b) D P_{1-3} I_3 SA_3 SG SR विनेश्वरम् (for विनश्वरम्).
248. a) SA_1 (before corr.) T $I_{1,4,7}$ V तोटय° (for त्रोटय°). —b) P_3 °पलानपि; I_1 °पलानति (for °पलानिति). —c) $I_{1-4,7}$ V S′ °तिमावह° (for °तिमवह°). SA_1 om. तिमवहत्त with a space. $I_{1,2,7}$ V °हत्तस्यां; I_2 °हत्रस्यां (for °हत्तथ्यां).
249. After this *v.* D adds युग्मम्.
250. b) P_3 सैन्यं (for सैन्ये). —d) D (before suggestion) SA SR SG P_{1-3} $I_{1-4,7}$ V °वष्टम्भि (for °वाष्टम्भि).
251. b) D T C P_2 $I_{1,2,7}$ V एरमत्तकः; SR SG $P_{1,3}$ एरमन्तकः (for एरमन्तकः).

नाऽऽजौ तैरेष्यताऽऽधातुं यः श्रीमान् राजबान्धवः ।
जगामोदयगुप्तः स क्वाऽपि त्यक्त्वा महाहवम् ॥ २५२ ॥

इत्थं लब्धजया राज्ञी तत्क्षणान्न्यग्रहीद्रुषा ।
यशोधरं शुभधरं मुकुलं च सबान्धवम् ॥ २५३ ॥

काश्मीरिकाणां यः श्राद्धशुल्कोच्छेत्ता गयान्तरे ।
सोऽप्येरमन्तकः शूरः परिहासपुराश्रयः ॥ २५४ ॥

बद्ध्वा महाशिलां कण्ठे वितस्ताम्भसि पातितः ।
स्वदुर्नयफलं देव्याः प्रकोपेनाऽनुभावितः ॥ २५५ ॥

ये सप्तसप्तताद् वर्षादा गोपालनृपात् पुरा ।
अभिमन्युं यावदासन् षोडशानां महीभुजाम् ॥ २५६ ॥

वर्षषष्टिं प्रतापायुश्श्रीहरा द्रोहवृत्तयः ।
ते क्षिप्रं मन्त्रिणः सर्वे सान्ववायाः सहाऽनुगाः ॥ २५७ ॥

भीमभ्रूभङ्गमात्रेण दिद्दादेव्या सकोपया ।
आसन् निश्शेषतां नीता दुर्गयेव महासुराः ॥ २५८ ॥

अभवन् विहिता राज्ञ्या तानुत्पाट्य मदोद्धतान् ।
रक्कादयः कम्पनादिकर्मस्थानाधिकारिणः ॥ २५९ ॥

इत्थं मन्त्रिप्रकाण्डः स रण्डामाखण्डलोपमाम् ।
अखण्डमण्डलां चक्रे निर्द्रोहो नरवाहनः ॥ २६० ॥

राज्ञी कृतज्ञभावेन साऽपि मन्त्रिसभान्तरे ।
तमाजुहाव निर्द्रोहं स्वयं राजानकाख्यया ॥ २६१ ॥

सुप्ते सुष्वाप निष्पन्नभोजनेऽस्मिन्नभुङ्क्त सा ।
हृष्टे जहर्ष निर्विण्णे निर्विवेदाऽऽनुकूल्यतः ॥ २६२ ॥

---

253. d) $I_{1,2,4,7}$ V सकुलं (for मुकुलं).

254. a) SA_1 (before corr.) $I_{1,4,7}$ V °रकाणां (for °रिकाणां). —b) SA_1 (before corr.) °शुष्कोच्छता (for °शुल्कोच्छेत्ता). SA_1 (before corr.) $I_{1,2,7}$ V गमान्तरे (for गयान्तरे). —d) SA_1 (before corr.) परिहार° (for परिहास°).

255. c) $I_{1,2,7}$ V °पुरं (for °फलं). After this *v.* D adds युग्मम्.

258. After this *v.* तिलकम्.

आरोग्यान्वेषणं शिक्षाप्रार्थनां गृहवर्तिनः ।
साऽऽत्मवस्तुविसर्गं च नाऽकृत्वा तस्य पिप्रिये ॥ २६३ ॥

अभूतां युग्यवाहस्य कुय्यनाम्नः सुतौ पुरा ।
यौ सिन्धुभुय्यौ तज्ज्यायान् सिन्धुर्ललितकः किल ॥ २६४ ॥

पर्वगुप्तगृहे भूत्वा गञ्जाध्यक्षे स्थिते क्रमात् ।
लब्ध्वा गञ्जाधिकारित्वं तस्या राज्ञ्यः शनैरभूत् ॥ २६५ ॥

रूढ्या तयैव गञ्जेशो नवायासविधायकः ।
कर्मस्थानस्य निर्माता सिन्धुगञ्जाभिधस्य यः ॥ २६६ ॥

प्रायशो हृतराज्यस्ते वर्तते नरवाहनः ।
इति नेयधियं राज्ञीं सोऽभ्यधत्त दुराशयः ॥ २६७ ॥

सा तथेत्यब्रवीद् यावत् तावत् प्रेम्णा स जातुचित् ।
मन्त्री तां प्रार्थयामास भोक्तुं निजगृहागमम् ॥ २६८ ॥

सा सानुगां तत्र यातां ध्रुवं त्वामेव भन्त्स्यति ।
इत्युक्ता सिन्धुनाऽपृच्छत् तत्कर्तव्यं भयाकुला ॥ २६९ ॥

अनुक्त्वैव प्रचलिता राजधानीमलक्षिता ।
स्त्रीधर्मिण्यस्मि जातेति पश्चाद् वार्तां व्यसर्जयत् ॥ २७० ॥

संप्रवृत्तोपचारायां गतायां तत्पथात्तथा ।
राज्ञ्यां नाशममात्यस्य प्रीतिः संविच्च सा ययौ ॥ २७१ ॥

तयोस्ततः प्रभृत्येव निष्कृष्टस्नेहयोः कृतम् ।
चाक्रिकैरतिरूक्षत्वं तिलपिण्याकयोरिव ॥ २७२ ॥

---

263. c) D suggests सात्म्य° (for साऽऽत्म°).
265. b) SA_3 gloss खनौ सुरागृहे गञ्जा भण्डागारे पुमानथेति कोशः (for गञ्जा). SG *sec. manu* substitutes गञ्जाध्यक्षस्ततः क्रमात् for *b*.
266. b) SR SA SG (before corr.) $I_{1-4,7}$ V S′ C T P_{1-3} नवायाम° (for नवायास°).
269. b) D $I_{2,4,7}$ V SA_1 बन्त्स्यति; C P_1 I_3 S′ वत्स्यति; SG SP बत्स्यति SR P_2 भत्स्यति (for भन्त्स्यति).
271. a) $I_{1,2,4,7}$ V स प्रवृ° (for सम्प्रवृ°). SA_3 °वृत्तापचा° (for °वृत्तोपचा°). —b) SA_3 तन्मतात्तथा (for तत्पथात्तथा). —c) C P_2 I_{1-4} V राज्ञां (for राज्ञ्यां).
272. c) C T $I_{1,2,7}$ V S′ °तिरूढत्वं (for °तिरूक्षत्वं).

कुलिशं सर्वलोहानामम्भसां शैलसेतवः ।
अभेद्याः प्रतिभाव्यन्ते न किंचिदसतां पुनः ॥ २७३ ॥

ये बालादपि संमूढाः प्राज्ञाः सुरगुरोरपि ।
तेषां न विद्मः किं तावन्निर्माणपरमाणवः ॥ २७४ ॥

विश्वासोज्झितधीः शिशून्कलयते काकोऽन्यदीयान्निजान्
हंसः क्षीरपयोविभागकुशलस्त्रस्यत्यसाराद्घनात् ।
लोकावेक्षणतीक्ष्णधीः खलगिरं जानाति सत्यां नृपो
धिग्वैदग्ध्यविमुग्धताव्यतिकरस्पृष्टं विधानं विधेः ॥ २७५ ॥

मूढाऽऽचरणहीना सा श्रुतिबाह्यतया तया ।
वैधेयविप्रप्रकृतिरिव प्रायाद् विगर्ह्यताम् ॥ २७६ ॥

उद्वेजितस्तया शश्वत्तथा स नरवाहनः ।
यथा विमाननोत्तप्तः स्वयं तत्याज जीवितम् ॥ २७७ ॥

प्रकुप्यत्यप्रतीकार्ये स्वतेजस्तप्तचेतसाम् ।
शरणं मरणं त्यक्त्वा किमिवाऽन्यद्यशोऽर्थिनाम् ॥ २७८ ॥

शशिहीनेव रजनी सत्यत्यक्तेव भारती ।
विरराज न राजश्रीर्नरवाहनवर्जिता ॥ २७९ ॥

सा क्रौर्याभ्यासविषमा हन्तुं विततविक्रमान् ।
संग्रामडामरसुतान् समीपस्थानचिन्तयत् ॥ २८० ॥

निजमुत्तरघोषं ते तद्भयेन विनिर्गताः ।
कन्यकद्वारपत्यादीन् कृतारब्धीन् व्यपादयन् ॥ २८१ ॥

उत्पिञ्जभीतया राज्ञ्या त्यक्त्वा परिभवत्रपाम् ।
ते यत्नात् समघट्यन्त मानः स्वार्थार्थिनां कुतः ॥ २८२ ॥

स्थानेश्वरादिभिर्मुख्यैर्डामरैरितरैः समम् ।
ते भीताः पुरतस्तस्याः पुनरेत्य जजृम्भिरे ॥ २८३ ॥

---

274. c) SA_3 St I_3 के (for किं).

275. b) C °राद्धनात् ; S′ °राद्धनात् (for °राद्घनात्).

अथ तद्भीतया राज्ञ्या रक्षे प्रमयमागते ।
आनीतः फल्गुणो भूयो वीरार्थिन्या निजान्तिकम् ॥ २८४ ॥

राजकार्याणि कुर्वाणः स भूयः शस्त्रमग्रहीत् ।
न्यस्तशस्त्रोऽपि यत्सत्यं दुस्त्यजा भोगवासना ॥ २८५ ॥

महिमा राजपुर्यादिजयिनस्तस्य पश्चिमः ।
अद्भुतो वृद्धबन्धक्या अवरुद्ध इवाभवत् ॥ २८६ ॥

अभूदुदयराजस्य देवीभ्रातुरतिप्रियः ।
यः सहायोऽक्षपटले जयगुप्ताभिधः कुधीः ॥ २८७ ॥

अन्येऽधिकारिणस्तेन सहिताः क्रूरवृत्तयः ।
कश्मीरेषु व्यधुर्लुण्ठं दुष्कृतैस्तदुपार्जितैः ॥ २८८ ॥

दौश्शील्यभाजो मातुश्च पाप्मभिर्विधुरीकृतः ।
अभिमन्युः क्षणे तस्मिन् क्षयरोगेण पस्पृशे ॥ २८९ ॥

पण्डितः पुण्डरीकाक्षो विद्वत्पुत्रैरुपस्कृतः ।
कृतश्रुतः स वैदुष्यतारुण्याभ्यां विदिद्युते ॥ २९० ॥

तथा विशुद्धप्रकृतेस्तस्य दुष्कृतसंगमः ।
शोषाधायी शिरीषस्य रवितापः इवाऽभवत् ॥ २९१ ॥

अर्धमानः प्रजाचन्द्रस्तृतीयस्यां स कार्तिके ।
शुक्लेऽष्टचत्वारिंशाब्दे ग्रस्तो नियतिराहुणा ॥ २९२ ॥

तत्पुत्रो नन्दिगुप्तस्तु बालश्चक्रे निजासने ।
वृद्धस्तनयशोकस्तु दिद्दाया हृदये पदम् ॥ २९३ ॥

सा शोकपिहितक्रौर्या तस्थौ प्रशमशीतला ।
रविरत्नशलाकेव ध्वान्तच्छन्नोष्मवैकृता ॥ २९४ ॥

---

290. b) C $I_{1,2,4,7}$ V S′ विद्युत्पुत्रै° (for विद्वत्पुत्रै°). —c) D suggests °श्रुतो यो (for °श्रुतः सः). —d) T विदुद्युते (for विदिद्युते).

292. a) SR SG (after corr.) D (after suggestion) S′ C T वर्धमानः; SA_2 gloss अर्धवयाः खण्डबिम्बश्च (for अर्धमानः).

ततः प्रभृत्यद्भुताभिस्तस्या धर्मप्रवृत्तिभिः ।
कुकर्मभिरुपोढाऽपि लक्ष्मीः प्राप्ता पवित्रताम् ॥ २९५ ॥

नगराधिपतिर्भुय्यः सिन्धुभ्राता शुभाशयः ।
तदीयधर्मचर्यायां बभूव परिपोषकः ॥ २९६ ॥

सा तेनोत्पादितानर्घजनरागा गतैनसा ।
ततः प्रभृत्यभूद्देवी सर्वलोकस्य संमता ॥ २९७ ॥

राज्ञः स सचिवः सत्यं दुष्प्रापो लुप्तचण्डिमा ।
कुर्याद्यः सुखसेव्यत्वं हेमन्त इव भास्वतः ॥ २९८ ॥

सा निर्मात्री विपन्नस्य सूनोः सुकृतवृद्धये ।
अभिमन्युस्वामिनोऽभूदभिमन्युपुरस्य च ॥ २९९ ॥

अथ दिद्दापुरोपेतो दिद्दास्वामी तया कृतः ।
मठश्च मध्यदेशीयलाटशौडोत्रसंश्रयः ॥ ३०० ॥

भर्तुः कङ्कणवर्षस्य पुण्योत्कर्षाभिवृद्धये ।
चकार कङ्कणपुरं रमणी स्वर्णवर्षिणी ॥ ३०१ ॥

श्वेतशैलमयं चाऽन्यं सा दिद्दास्वामिनं व्यधात् ।
धवलं चरणोद्भूतगङ्गाम्भःप्लवनैरिव ॥ ३०२ ॥

चक्रे काश्मीरिकाणां च दैशिकानां समाश्रयः ।
तयाऽत्युच्चचतुश्शालो विहारश्चारुसम्पदा ॥ ३०३ ॥

श्रीसिंहस्वामिनं नाम्ना सिंहराजस्य सा पितुः ।
मठं च विदधे स्थित्यै दैशिकानां द्विजन्मनाम् ॥ ३०४ ॥

मठप्रतिष्ठावैकुण्ठनिर्माणाद्यैः स्वकर्मभिः ।
तयाऽतिपावनश्चक्रे वितस्तासिधुसंगमः ॥ ३०५ ॥

---

300. [d]) D (before suggestion) and all other Mss. read शौडोत्र; but it may be emended as शौडोड्र. उड्र is an old designation of Orissa, cf. St Tr. and P W., *sv.*

303. [a]) $I_{1,2,4,7}$ V °रकाणां (for °रिकाणां). —[b]) SA_1 (before corr.) $I_{1,2,4,7}$ V जनाश्रयः (for समाश्रयः). —[d]) I_4 °संपदः (for °सम्पदा).

304. I_4 om. *vv.* 304*c*—305. —[c]) SA_1 om. स्थित्यै.

305. [b]) D suggests सुकर्मभिः (for स्वकर्मभिः). —[c]) $I_{1,2,4,7}$ V °पवन° (for °पावन°).

तेषु तेषु प्रदेशेषु किमुक्तैर्भूरिभिः शुभैः ।
सा प्रतिष्ठा व्यरचयच्चतुष्षष्टिमिति श्रुतिः ॥ ३०६ ॥

जीर्णोद्धारकृता देव्या प्लुष्टप्राकारमण्डलाः ।
प्रायः सुरगृहाः सर्वे शिलावप्रावृताः कृताः ॥ ३०७ ॥

क्रीडाचङ्क्रमणे राज्ञ्याः पङ्ग्वा विग्रहवाहिनी ।
वल्गाभिधा वैवधिकी वल्गामठमकारयत् ॥ ३०८ ॥

तीर्थासेवनमौनभागपि तिमिः सक्तः स्वकुल्याशने
वाताशान्ग्रसते शिखी घनपयोमात्राशनोऽप्यन्वहम् ।
विश्वस्ताञ्चलचारिणः प्रकटितध्यानोऽपि भुङ्क्ते बकः
सत्कर्माचरणेऽपि दोषविकृतौ न प्रत्ययः पापिनाम् ॥३०९॥

चर्षणी वर्षमात्रेण शान्तशोका बभूव सा ।
भोगोत्सुकाऽर्भके तस्मिन् नप्तरि व्यभिचारकृत् ॥ ३१० ॥

वर्षे एकोनपञ्चाशे नीतः पक्षे सिते क्षयम् ।
स मार्गशीर्षद्वादश्याममार्गव्यग्रया तया ॥ ३११ ॥

पौत्रस्त्रिभुवनो नाम मार्गशीर्षे सितेऽहनि ।
पञ्चमेऽप्येकपञ्चाशे वर्षे तद्वत्तया हतः ॥ ३१२ ॥

अथ मृत्युपथे राज्यनाम्नि स्वैरं निवेशितः ।
क्रूरया चरमः पौत्रो भीमगुप्ताभिधस्तया ॥ ३१३ ॥

---

306. b) SA_1 $I_{1,2,7}$ V श्रुताः (for शुभैः).
307. a) $I_{1,2,7}$ V S′ T C °द्धाराः कृता (for °द्धारकृता). —b) S′ P_1 °मण्डलः (for °मण्डलाः).
309. a) I_7 °सेचन° (for °सेवन°). —d) D P_{1-3} I_3 SA_3 °विरतौ (for °विकृतौ).
310. a) V $I_{1,2,7}$ चर्षिणी; T वर्षिणी; SA_2 gloss चर्षणी असती इत्यर्थः (for चर्षणी). —b) P_3 °शङ्का (for °शोका).
311. a) D St T C P_3 $I_{4,7}$ V S′ SA_1 एकान्नप° (for एकोनप°). —b) P_3 मिते (for सिते).
312. b) SA_1 (before corr.) मार्गशीर्ष° (for मार्गशीर्षे).
313. d) T I_4 °स्तथा (for °स्तया).

तस्मिन्नवसरे वृद्धः फल्गुणोऽपि व्यपद्यत ।
निगूढक्रौर्यदौश्शील्या दिद्दा यद्गौरवादभूत् ॥ ३१४ ॥

बभूव साऽथ सुस्पष्टदुष्टचेष्टाशतोत्कटा ।
भ्रष्टवक्त्रपटा मत्तदन्तिमूर्तिरिवोत्कटा ॥ ३१५ ॥

महाभिजनजातानामपि हा धिङ् निसर्गतः ।
सरितामिव नारीणां वृत्तिर्निम्नानुसारिणी ॥ ३१६ ॥

स्रोतोऽधिराज्यमधिगम्य विराजमानात्
सिन्धोः प्रसूय कमलाऽल्पपयोनिकेते ।
जाते सरस्यविरतं जलजे प्रसक्ता
नार्यो महाभिजनजा अपि नीचभोग्याः ॥ ३१७ ॥

खशस्य बद्दिवासाख्यपर्णोत्सग्रामजन्मनः ।
बाणस्य सूनुस्तुङ्गाख्यो विशां महिषपालकः ॥ ३१८ ॥

प्रविष्टो जातु कश्मीराँल्लेखहारककर्मणा ।
सुगन्धिसीहप्रकटनागाट्टयिकषण्मुखैः ॥ ३१९ ॥

पञ्चभिर्भ्रातृभिः सार्धं सांधिविग्रहिकान्तिके ।
देव्या दृग्गोचरं यातो हृदयावर्जकोऽभवत् ॥ ३२० ॥

रहः प्रवेशितो दूत्या स भाव्यर्थबलाद् युवा ।
संभुक्तभूरिजाराया अपि तस्याः प्रियोऽभवत् ॥ ३२१ ॥

तुङ्गानुरागिणी राज्ञी पापा लज्जोज्झिता ततः ।
रसदानेन वैमुख्यभाजं भुय्यमघातयत् ॥ ३२२ ॥

---

315. a) SA_1 om. बभूव साथ with a space.

318. a) SA_4 gloss बोदोल् ग्रामः (बद्दिवास). —b) $I_{1,2,4,7}$ V °वासिनः (for °जन्मनः). —d) D (before suggestion) and all other Mss. except I_4 and P_1 read [अ]विशन्म° (for विशां म°).

319. a) $I_{4,7}$ V S′ काश्मीरा° (for कश्मीरा°).

320. b) D $I_{1,2,4,7}$ V S′ T C P_3 सन्धिविग्रह°; SA_1 (before corr.) सन्धिविग्रहि° (for सान्धिविग्रहि°).
SA_3 °कान्तरे (for °कान्तिके). After this *v.* तिलकम् .

धिङ् निर्विचारान् कुपतीन् येषां विषमचेतसाम् ।
फलशून्या स्तुतिस्तोषे दोषे प्राणधनक्षयः ॥ ३२३ ॥

रक्कजो देवकलशो वेलावित्तः कृतस्तया ।
मुख्याधिकारे कौट्टन्यमाचरन्निस्त्रपो विटः ॥ ३२४ ॥

येऽपि कर्दमराजाद्या वीरा द्वारादिनायकाः ।
तेऽपि कौट्टन्यमभजन्नन्येषां गणनैव का ॥ ३२५ ॥

चतुष्पञ्चानि वर्षाणि तिष्ठन् नृपगृहे शिशुः ।
भीमगुप्तोऽभवद् यावत्किंचित् प्रौढीभवन्मतिः ॥ ३२६ ॥

राज्यव्यवस्था यावच्च पितामह्याश्च वृत्तयः ।
दुस्स्थिताः प्रत्यभासन्त संस्थाप्यास्तस्य चेतसि ॥ ३२७ ॥

अङ्कशीलविहीनाया निर्घृणाया निसर्गतः ।
तावन्नेयधियस्तस्याः स चिन्त्यः समपद्यत ॥ ३२८ ॥

अभिमन्युवधूस्तं हि चक्रे गूढप्रवेशितम् ।
महाभिजनजं पुत्रं तस्मात्सोऽभूत्तथाविधः ॥ ३२९ ॥

सा देवकलशेनाऽथ दत्तमन्त्रा विशङ्किता ।
त्रपोज्झिता स्पष्टमेव भीमगुप्तमबन्धयत् ॥ ३३० ॥

निगूढे नन्दिगुप्तादिद्रोहे लोकस्य योऽभवत् ।
संदेहः स तया तेन व्यक्तकृत्येन वारितः ॥ ३३१ ॥

ताभिस्ताभिर्यातनाभिर्भीमगुप्तं निपात्य सा ।
षट्पञ्चाशेऽभवद्वर्षे स्वयं क्रान्तनृपासना ॥ ३३२ ॥

---

323. cd) P_3 °स्तोषो दधे (for °स्तोषे दोषे).

324. c) $I_{1,2,4,7}$ V S′ P_2 कौट्टन्यामा° (for कौट्टन्यमा°). —d) V $I_{1,2,7}$ विटा: (for विट:).

325. c) SA_1 (before corr.) $I_{1,2,4,7}$ V कौटिन्य°; C S′ कौटिल्य; T कौट्टिन्य• (for कौट्टन्य•).

328. d) $I_{1,2,4,7}$ V S′ P_1 चिन्त्या: (for चिन्त्य:). After this *v.* D adds तिलकम्.

332. c) $I_{1,2,4,7}$ V भवेद्व° (for ⌊अ⌋भवद्व°).

प्रवृद्धरागया राज्ञ्या दत्तोद्रेको दिने दिने ।
सर्वाधिकारी तुङ्गोऽथ बभूवाऽऽधरिताखिलः ॥ ३३३ ॥

सभ्रातृकेण तुङ्गेन मीलिताः पूर्वमन्त्रिणः ।
राज्यविप्लवमाधातुमयतन्त विरागिणः ॥ ३३४ ॥

तेऽथ संमन्त्र्य कश्मीरानानिन्युः क्रूरपौरुषम् ।
उग्रं विग्रहराजाख्यं दिद्दाभ्रातुः सुतं नृपम् ॥ ३३५ ॥

मुख्याग्रहारान् स प्राप्तो विधातुं राज्यविप्लवम् ।
धीमान् प्रायोपवेशाय द्रुतं प्रायोजयद् द्विजान् ॥ ३३६ ॥

विहितैक्येषु विप्रेषु लोकः सर्वोऽपि विप्लुतः ।
अन्वियेषाऽन्वहं तुङ्गं तत्र तत्र जिघांसया ॥ ३३७ ॥

कस्मिंश्चित् पिहितद्वारे तुङ्गं प्रच्छाद्य वेश्मनि ।
दिनानि कतिचिद् दिद्दा तस्थावास्कन्दशङ्किनी ॥ ३३८ ॥

तया स्वर्णप्रदानेन सुमनोमन्तकादयः ।
ब्राह्मणाः समगृह्यन्त ततः प्रायो न्यवर्तत ॥ ३३९ ॥

एवं तस्मिन् महाऽऽक्षेपे तया दानेन वारिते ।
ययौ विग्रहराजः स भग्नशक्तिर्यथागतम् ॥ ३४० ॥

अथ दार्ढ्यं समासाद्य तुङ्गाद्याः प्रभविष्णवः ।
शनैः कर्दमराजादीञ्जघ्नुर्विहितविप्लवान् ॥ ३४१ ॥

---

333. d) SA_1 om. धरि with a space. C P_1 S′ °धारित्रा°; P_3 °राधिता° (for °धरिता°).

334. a) $I_{1-3,7}$ V S′ P_{1-3} St C T सभ्रातृकेन (for सभ्रातृकेण).

336. c) SA_3 gloss प्राय: भोजनत्याग: (for प्रायोपवेशाय). —d) $I_{1,2,7}$ St SA_1 T C S′ V प्रावेशय° (for प्रायोजय°).

338. a) C S′ °द्वारो; I_4 °द्वारं (for °द्वारे).

339. b) I_4 स्वमनो° (for सुमनो°). $I_{1-3,7}$ V S′ °मत्तका°; I_4 °मतुका° (for °मन्तका°).

सुलक्कनो रक्कसूनुस्तथाऽन्ये मुख्यमन्त्रिणः ।
रुष्टैर्निर्वासिता देशात्तुष्टैस्तैः संप्रवेशिताः ॥ ३४२ ॥

प्रवर्धमानवैरेण गूढदूतैर्विसर्जितैः ।
प्रायं विग्रहराजेन ब्राह्मणाः कारिताः पुनः ॥ ३४३ ॥

उत्कोचादित्सया विप्रा भूयः प्रायविधायिनः ।
लब्धस्थैर्येण तुङ्गेन सन्निपत्यापहस्तिताः ॥ ३४४ ॥

तेषां मध्ये वसन् गूढमादित्याख्यः पलायितः ।
हतो विग्रहराजस्य प्रियः कटकवारिकः ॥ ३४५ ॥

शस्त्रक्षतः प्रतीहारो वत्सराजाभिधः पुनः ।
न्यङ्कोतकादिभिर्धावञ्जीवग्राहमगृह्यत ॥ ३४६ ॥

ते स्वर्णग्राहिणो विप्राः सुमनोमन्तकादयः ।
सर्वेऽपि बद्धास्तुङ्गेन कारागारं प्रवेशिताः ॥ ३४७ ॥

अथ फल्गुणनाशेन दृप्ते राजपुरीपतौ ।
तां प्रत्यारब्धिरभवत् क्रुध्यतां सर्वमन्त्रिणाम् ॥ ३४८ ॥

निपत्य सङ्कटे वीरः पृथ्वीपालाभिधस्ततः ।
चक्रे राजपुरीराजः काश्मीरिकबलक्षयम् ॥ ३४९ ॥

शिपाटको हंसराजो विपन्नौ तत्र मन्त्रिणौ ।
चन्द्राद्यैर्दुर्गतिर्दृष्टा मरणं यत्र भेषजम् ॥ ३५० ॥

अथाऽन्येन पथाऽकस्मात् तुङ्गः सार्धं सहोदरैः ।
कृत्स्नां राजपुरीं वीरः प्रविश्य सहसाऽदहत् ॥ ३५१ ॥

---

342. a) $I_{2,4,7}$ V सलक्कनो (for सुलक्कनो). —c) $I_{2,7}$ V om. देशा. $I_{2,3}$ P_3 दुष्टैः (for रुष्टैः).
347. a) St स्वर्णाग्रा° (for स्वर्णग्रा°). —b) $I_{1-3,7}$ V S′ °मत्तका°; I_4 °मतुका° (for °मन्तका°).
349. d) St (after corr.) $P_{1,2}$ I_3 काश्मीरक° (for काश्मीरिक°).
350. c) C P_1 S′ चन्द्राद्रेर्दु° (for चन्द्राद्यैर्दु°). $I_{1,2-4,7}$ $P_{1,2}$ V S′ SA_1 °र्दुर्गतिं दृष्ट्वा (for °र्दुगतिर्दृष्टा). —d) SA_1 (before corr.) $I_{1,2,7}$ भैषजं (for भेषजम्).
351. b) $I_{1,2,4,7}$ V सहोदरः (for सहोदरैः).

ननाश तेनोपायेन पृथ्वीपालः स पार्थिवः ।
शेषाणां मन्त्रिणां सैन्यं प्राप मुक्तिं च सङ्कटात् ॥ ३५२ ॥

अबलः सन् स भूपालस्तुङ्गाय प्रददौ करम् ।
एवं कृतं तदा तेन नष्टस्याऽर्थस्य योजनम् ॥ ३५३ ॥

प्रविशन् नगरं तुङ्गस्ततः स्वीकृतकम्पनः ।
चकार डामरग्रामसंहारं सिंहविक्रमः ॥ ३५४ ॥

दिद्दाऽप्युदयराजस्य भ्रातुः पुत्रं परीक्षितम् ।
चक्रे संग्रामराजाख्यं युवराजमशङ्किता ॥ ३५५ ॥

सा हि सर्वाञ्शिशुप्रायान् पुरो भ्रातृसुतान्स्थितान् ।
परीक्षितुं मुमोचाऽग्रे पालेवतफलावलिम् ॥ ३५६ ॥

शक्तः कियन्ति कः प्राप्तुं फलान्यत्रेति वादिनी ।
साऽभवद्राजपुत्राणां तेषां कलहकारणम् ॥ ३५७ ॥

गृहीताल्पफलाँल्लब्धप्रहारांस्तान् ददर्श च ।
संग्रामराजं त्वस्वल्पफलभाजमविक्षतम् ॥ ३५८ ॥

अनन्तफलसंप्राप्तावक्षतत्वे च कारणम् ।
सविस्मयं तया पृष्टः स तामेवं तदाऽब्रवीत् ॥ ३५९ ॥

अन्योन्यकलहव्यग्रानेतान् कृत्वा पृथग्वसन् ।
समवापं फलान्यस्मिन्न चाऽभूवं परिक्षतः ॥ ३६० ॥

व्यसने सम्प्रवेश्यान्यान्स्थितानामप्रमादिनाम् ।
न काः क्लेशविहीनानां घटन्ते स्वार्थसिद्धयः ॥ ३६१ ॥

---

353. c) $I_{1,2,4,7}$ V S′ P_1 ततः (for तदा). —d) SA_1 om. नष्टस्या with a space.

356. d) St Tr. पालेवत is believed to mean apple.

357. d) T °कारिणम् (for °कारणम्).

358. c) SA_1 om. राजं. $I_{1,2,4,7}$ V substitute संग्रामं त्वद्भुतं स्वल्प° for *c*. —d) I_4 om. तम्.

361. a) St SA_3 व्यसनं (for व्यसने). $I_{1,2,4,7}$ V S′ V SA_1 सम्प्रविश्या° (for सम्प्रवेश्या°). —b) I_3 °प्रसादिनां (for °प्रमादिनाम्). —c) $I_{1,2,4,7}$ V कः (for काः). SA_1 (before corr.) °विहीनां (for °विहीनानां).

श्रुत्वेति तस्य सा वाचमप्रमत्तत्वदूतिकाम् ।
भीरुर्नारीस्वभावेन राज्येऽमन्यत योग्यताम् ॥ ३६२ ॥

शूरस्य लभ्यं शौर्येण भीरोर्भीरुतया यथा ।
कार्यं हि प्रतिभात्यन्तर्न भवेच्च तदन्यथा ॥ ३६३ ॥

काष्ठं वह्न्युज्झितमपि भवेच्छीतशान्त्यै कपीनां
लोम्नां शुद्ध्यै सलिलमनलश्चाग्निशौचैणकानाम् ।
जन्तोर्भावा विदधति यथाभाविनः कार्यसिद्धिं
तत्त्वं तेषां क्वचन सहजं वस्तुतो नास्ति किञ्चित् ॥ ३६४ ॥

तस्यामेकान्नशीत्यब्दशुक्लभाद्राष्टमीदिने ।
देव्यां दिवं प्रयातायां युवराजोऽभवन्नृपः ॥ ३६५ ॥

स्त्रीसंबन्धेन भूपालवंशानां भुवनाद्भुतः ।
तृतीयः परिवर्तोऽयं वर्ततेऽमुत्र मण्डले ॥ ३६६ ॥

निर्नष्टकण्टककुले वसुसंपदाढ्ये
श्रीसातवाहकुलमाप महीतलेऽस्मिन् ।
दावाग्निदग्धकुतरौ जलदाम्बुसिक्ते
चूतप्ररोह इव केलिवने प्रवृद्धिम् ॥ ३६७ ॥

---

364. b) SA_3 gloss अग्निशौचा मृगा अग्निमश्नन्ति विषभूषकाः विषं च न विपद्यन्ते जीविता……(for अग्निशौचैणकानाम्). —c) SA_3 I_3 यथाभावनं (for यथाभाविनः). —d) I_2 तत्त्वे (for तत्त्वं). $I_{1,2,4,7}$ T वस्तुते; $P_{1,3}$ I_3 वस्तुता (for वस्तुतो).

365. a) $I_{1,2,4,7}$ V °न्नशीताब्द° (for °न्नशीत्यब्द°).

366. b) SA_1 (after corr.) St $P_{1,2}$ I_3 S′ °वंश्यानां (for °वंशानां).

367. a) SA_1 (before corr.) $I_{1,2,4,7}$ V निष्पन्न° (for निर्नष्ट°). —b) SA_1 (before corr.) I_3 °सालवाह°; P_3 S′ °मातवाह°; P_2 °माल्लवाह° (for °सातवाह°). —d) I_4 दूतप्र° (for चूतप्र°). I_4 om. केलिव. SA_3 प्ररूढिम् (for प्रवृद्धिम्).

अथ स मृदुतयाऽन्तर्गूढधैर्यानुभावः
सुखमवनिमशेषां दोष्णि संग्रामराजः ।
बिसकुलनिभशोभानिहुतप्राणसारः
फणकुल उरगाणामीशितेव न्यधत्त ॥ ३६८ ॥

—*—

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कृतौ राजतरङ्गिण्यां
षष्ठस्तरङ्गः ॥

—*—

---

368. [d]) SA_1 (before corr.) फलकुल; T फणकुले (for फणकुल).
After *v.* 368 SA_3 $P_{1,3}$ I_3 insert रा° १०, ग्रं ३६९, आदितः रा° ९१, ग्रन्थः २६६३; I_1 राजानः १०, आदितः ९०; I_2 राजानः १०, आदितः ९०, ग्रन्थाणि ३३८, आदितः २६२८; I_4 V राजानः १०, आदितः ९७, ग्रन्थानि ३६८, आदितः २६२८; I_7 संवत् १८७७ मिती जेठ वदि २ वारः। अतरवारः लिखा काश्ये मध्ये गंगातटे.

Colophon : $I_{1,2,4,7}$ V S′ °त्यचम्पक°; I_3 °त्याचार्यक° (for °त्यचण्पक°).
SA_1 I_3 add लिखितश्चैष राजानकरत्नकण्ठेन after तरङ्गः.

After colophon : a *v.* is inserted in all Mss. :—

अत्र वर्षचतुष्षष्टौ मासेऽप्यर्धे दिनेषु च ।
अष्टस्वभूवन् भूपाला दश भूभोगभागिनः ॥

[[d]) St T C $I_{1,2,7}$ V S′ °भोगभोगिनः (for °भोगभागिनः).]

अथ

सप्तमस्तरङ्गः

मातुस्तेऽजनि निर्मिते पितृकुले श्लाघ्या तनुर्वेधसा
त्वं सन्ध्याहितसंनिधिर्मम जपारक्तेऽधरे खेलसि ।
संन्ध्यावन्दनसाभ्यसूयगिरिजास्तुत्येदृशैर्वाक्छलै-
र्यः संन्ध्यामपि वन्दते स्म स जगत्प्रीणातु गौरीश्वरः ॥१॥

क्षमां क्षमापतिर्बिभ्रन्मनसा च भुजेन च ।
गाम्भीर्येण च शक्त्या च सोऽजयद्वाहिनीपतीन् ॥ २ ॥

जज्ञे राज्ञीक्षये भङ्गो यैस्तुङ्गस्य तदाऽखिलैः ।
दिनश्रीविगमे सन्ध्याप्रसङ्गस्येव रागिणः ॥ ३ ॥

तत्तत्प्रतिभटाऽऽटोपत्रोटनात् प्रत्युताऽस्य तैः ।
उदयो ददृशे शश्वद्गतिं को वेत्ति वेधसः ॥ ४ ॥

नृपेण जातज्ञातेयः शूरः शक्तिसमन्वितः ।
सर्वाधिकारयोग्योऽगात्तदा चन्द्राकरः क्षयम् ॥ ५ ॥

अन्ये भीमतिकाग्रामदिविरस्योरुसंपदः ।
पुण्याकरस्य तनयाः शूराः शान्तिं प्रपेदिरे ॥ ६ ॥

समर्थमन्त्रिविरहादनिच्छन्नपि वेधसा ।
निन्ये गत्यन्तरत्यक्तस्तुङ्गपक्षं क्षमापतिः ॥ ७ ॥

$P_{1,3}$ begin with ओम् श्रीगणेशाय नमः.

1. a) St P_2 $I_{3,5}$ निर्मले (for निर्मिते). —d) S′ यैः; P_2 वः (for यः). P_3 °मभिवन्दते (for °मपि वन्दते).
2. a) SA_3 gloss सुवं क्षान्तिं च (for क्षमां). —d) SA_3 gloss सेनापतीन् समुद्रांश्च (for वाहिनीपतीन्).
3. a) S′ C राज्ञः क्षये (for राज्ञीक्षये).
4. After this v. युग्मम् .
5. d) S′ om. चन्द्रा.

संग्रामराजतुङ्गादीन् देवी कोशमपाययत् ।
मुमूर्षन्ती पुरा स्थातुमद्रोहेणेतरेतरम् ॥ ८ ॥

क्लेशासहो महीपालस्ततः कार्यवशादपि ।
तुङ्गन्यस्तप्रजाकार्यो भोगाभ्यासालसोऽभवत् ॥ ९ ॥

पर्याप्तं तस्य भीरुत्वं कियदन्यत्प्रकाश्यताम् ।
असमैर्यौनसंबन्धैश्चक्षमे यशसः क्षतिम् ॥ १० ॥

साहायकार्थी यत् प्रादाच्छ्रीशौर्यादिमते सुताम् ।
दिद्दामठाधिपतये प्रेमनाम्ने स लोठिकाम् ॥ ११ ॥

क लोकोद्वहनोन्नद्धभूभृद्योग्या नृपात्मजा ।
प्रतिग्रहजलक्लिन्नपाणिः काऽल्पमना द्विजः ॥ १२ ॥

अथ तुङ्गादिभङ्गाय प्रायं ब्राह्मणमन्त्रिणः ।
परिहासपुरे विप्रपारिषद्यानकारयन् ॥ १३ ॥

विप्रमन्त्रिमतैक्येन कृतो राज्ञः स विप्लवः ।
दुस्सहः पवमानाग्निसमागमसमोऽभवत् ॥ १४ ॥

राज्ञोऽप्युत्पाटने सज्जैः कथंचित्प्रार्थितैर्द्विजैः ।
मतिः क्षान्तिचरुप्राये तुङ्गनिस्सारणे कृता ॥ १५ ॥

राज्ञा तुङ्गादिभिश्चैतद्यावत्तेभ्यः प्रतिश्रुतम् ।
अन्यत्प्रार्थयितुं लग्नास्तावत्ते शठबुद्धयः ॥ १६ ॥

---

8. b) SA_3 gloss कोशं दिव्यं अपाययत् अकारयत् । पीतकोशान् कृतवती इत्यर्थः (for कोशमपाययत्).

10. b) P_3 °त्प्रकाशताम् (for °त्प्रकाश्यताम्). —d) P_3 य यशःक्षतिम् (for यशसः क्षतिम्).

11. d) P_2 लोटिकाम् (for लोठिकाम्).

13. d) P_3 S′ °नकारयत् (for °नकारयन्).

15. b) D (before suggestion) SA_1 (before corr.) C P_{1-3} I_5 S′ °त्प्रार्थितो द्वि° (for °त्प्रार्थितैर्द्वि°). —c) SA_3 P_3 °प्रायैः (for °प्राये).

16. a) SA_1 (before corr.) D (before suggestion) C P_{1-3} S′ I_5 राज्ञस्तुङ्गा° (for राज्ञा तुङ्गा°). SA_3 gloss निःसारणं (for एतत्).

तुङ्गास्कन्देन विप्रोऽयं यो मृतस्तद्गृहे वयम् ।
तं निर्दहाम इत्युक्त्वा शवः कोऽप्यरघट्टतः ॥ १७ ॥
तैरुद्धृत्य यदा नीतः शठैस्तुङ्गगृहान् प्रति ।
केशहोमाच्च विहिताद्या कृत्योत्थापिताऽभवत् ॥ १८ ॥
तया प्रतीपपातिन्या निश्शौचानां द्विजन्मनाम् ।
अकस्मान्निरगाच्छस्त्रं विनाशायोत्थिते कलौ ॥ १९ ॥
ततः पलायिता विप्रा यस्तेषां मन्त्रदोऽभवत् ।
निगूढं राजकलशस्तद्देश्म प्राविशन् भयात् ॥ २० ॥
स व्यक्तीभूतकौटिल्यः संग्रामं सुचिरं व्यधात् ।
अपद्वारैस्तु ते विप्राः पलाय्य स्वगृहान्ययुः ॥ २१ ॥
विजिते राजकलशे समकार्या द्विजातयः ।
मन्त्रिणः श्रीधरसुताः सप्ताऽऽगत्य व्यधुर्मृधम् ॥ २२ ॥
ते कृत्वा सुमहत्कर्म समाप्तिं समरे गताः ।
निर्भिद्य मण्डलं सप्त सप्तसप्तेर्द्रुतं ययुः ॥ २३ ॥
जितः सुगन्धिसीहेन तेषु शान्तेषु संयुगे ।
बद्ध्वाऽथ राजकलशस्तुङ्गेनाऽऽनायितो गृहम् ॥ २४ ॥
नीयमानोऽधिरोऽप्याशु स्कन्धं मार्गेषु विक्षतः ।
तुङ्गस्य युग्यवाहैः स नर्तितोऽपहृतायुधः ॥ २५ ॥
अन्योऽपि भूतिकलशो नाम मन्त्री विनिर्जितः ।
सुतेन राजकाख्येन सह शूरमठं ययौ ॥ २६ ॥
क्रमात् सुगन्धिसीहाद्यैर्मुक्तः करुणया ततः ।
सपुत्रः सोऽवमानाग्नितप्तो देशान्तरं ययौ ॥ २७ ॥

---

17. b) SA_4 gloss तुङ्गगृहे (for तद्गृहे).
18. c) C $I_{3,5}$ P_{1-3} S′ °होमाश्च (for °होमाच्च).
19. After this *v.* तिलकम् .
21. a) $I_{3,5}$ व्यर्थीभूत° (for व्यक्तीभूत°).
24. a) SA_4 gloss तुङ्गानुजेन (for सुगन्धिसीहेन).
25. D (before suggestion) and all other Mss. read स्कन्दं (for स्कन्धं suggested).
27. b) S′ C °मुक्ताः (for °मुक्तः).

परिहासपुरादेवं जातो यो देशविप्लवः ।
स दैवयोगात् तुङ्गस्य शुभाय प्रत्युताऽभवत् ॥ २८ ॥

ततः प्रसादिते राज्ञि गुणदेवेन मन्त्रिणा ।
आययौ भूतिकलशः कृतगङ्गानिमज्जनः ॥ २९ ॥

पुनर्नृपगृहे तस्मिन् किंचिल्लब्धपदे शनैः ।
तुङ्गं निहन्तुं राज्ञैनं गूढं दूताः प्रयोजिताः ॥ ३० ॥

ज्ञातवार्तेन तुङ्गेन तस्मिन्नर्थे प्रकाशिते ।
सपुत्रो भूतिकलशो राज्ञा निर्वासितः पुनः ॥ ३१ ॥

अवष्टम्भं मनाग्लेभे चन्द्राकरसुतः शनैः ।
यो मय्यामन्तकः सोऽपि तस्मिन् काले व्यपद्यत ॥ ३२ ॥

भूत्वा किंचित्क्षणं भूभृत्कन्यासंभोगभाजनम् ।
राजोपकारकृच्छ्रीमान् प्रेमाऽपि प्रमयं ययौ ॥ ३३ ॥

विपेदिरेऽन्ये गङ्गाद्याः सर्वेऽपि नृपतिप्रियाः ।
अवाशिष्यत भोगाय तुङ्गः सभ्रातृकः परम् ॥ ३४ ॥

इति यो यो हि वृत्तान्तस्तस्य नाशाय शङ्कितः ।
स स दैवानुकूल्येन प्रत्युतोद्रेचकोऽभवत् ॥ ३५ ॥

कालक्रमत्रुटितसंश्रयभूः स्वमूल-
मात्राश्रयी तटतरुः सरितोऽम्बुपूरैः ।
यैः शङ्क्यते निपततीति वितीर्णमृद्धि-
स्तैरेव तस्य हि भवेत्स्थितिभूमिदार्ढ्यम् ॥ ३६ ॥

नीत्युज्ज्वलं व्यवहरन् प्रजाराधनतत्परः ।
प्राक्पुण्यसंक्षयात् तुङ्गः शनैस्त्वासीत् स्खलन्मतिः ॥३७॥

यत्स्वभाग्यापहाराय हीनजन्मानमाददे ।
साहायकाय कायस्थं क्षुद्रं भद्रेश्वराभिधम् ॥ ३८ ॥

---

32. c) D P_2 S′ C $I_{3,5}$ °मत्तकः; P_1 °नंतकः (for °मन्तकः).
33. a) D suggests कंचि° (for किंचि°).
34. a) C $P_{1,3,5}$ S′ विवेदिरे (for विपेदिरे).
35. d) SA_3 gloss वृद्धिकरः (for उद्रेचकः).
37. d) SA SR SG I_5 P_1 खलन्म° (for स्खलन्म°).

विड्वाणिज्यं सौनिकत्वं काष्ठविक्रयितादि च ।
आरामिकस्य यस्याऽऽसीत्कृत्यं वंशक्रमोचितम् ॥ ३९ ॥

कम्बलोद्घृष्टपृष्ठोऽथ भोजनार्थमवालगत् ।
भस्त्रामषीभाण्डवाही यश्च पश्चान्नियोगिनाम् ॥ ४० ॥

अनन्तराजकार्यादिचिन्ताश्रान्तो विधाय तम् ।
तुङ्गः सहायं नाऽबुद्ध संसर्गाद् भाग्यसंक्षयम् ॥ ४१ ॥

धार्मिकं तेन धर्मार्कं विनिवार्याऽऽर्यचेतसम् ।
गृहकृत्याधिकारे स दुष्कृती विनिवेशितः ॥ ४२ ॥

देवगोब्राह्मणानाथातिथिराजोपजीविनाम् ।
अकालमृत्युर्विदधे वृत्तिच्छेदं स दुर्मतिः ॥ ४३ ॥

शवाजीवोऽपि पुष्णाति क्रूरः कापालिको निजान् ।
भद्रेश्वरस्तु पापोऽभूत् निजानामपि जीवहृत् ॥ ४४ ॥

तुङ्गेन चैत्रे सर्वत्र कृते भद्रेश्वरे प्रभौ ।
सुगन्धिसीहः प्रययावाषाढे मासि संक्षयम् ॥ ४५ ॥

परलोकं गते तस्मिन् सर्वभारसहेऽनुजे ।
तुङ्गश्छिन्नोत्तमाङ्गत्वं सदैन्योऽमन्यतात्मनः ॥ ४६ ॥

श्रीत्रिलोचनपालस्य शाहेः साहायकार्थिनः ।
देशं ततो मार्गशीर्षे मासि तं व्यसृजन्नृपः ॥ ४७ ॥

---

39. a) SA_2 gloss गोमयविक्रयित्वं (for विड्वाणिज्यं). —b) SA_1 °विक्रयिका° (for °विक्रयिता°). —d) I_5 वेशक्रमो° (for वंशक्रमो°).

40. SA_1 I_5 om. *ab*.

42. a) D (before suggestion) P_{1-3} धर्मात्कं; C S′ धर्मोत्कं; D suggests धर्माख्यं (for धर्मार्कं). —c) SA_1 (before corr.) °धिकारी (for °धिकारे).

44. d) I_5 जीविनाम् (for जीवहृत्).

45. d) I_6 om. मासि.

47. b) P_2 शाहैः (for शाहेः). P_2 साहायिका°; SA_4 gloss तुरुष्कसमरे (for साहायकार्थिनः). —d) SA_4 gloss तुङ्गं (for तं).

राजपुत्रमहामात्यसामन्तादिनिरन्तरम् ।
सैन्यं तमन्वगाद् भूरि भुवनक्षोभणक्षमम् ॥ ४८ ॥

अग्रागतेन स तथा शाहिना कृतसत्क्रियः ।
पञ्चषाणि दिनान्यासीत् तद्देशे स यदोन्मदः ॥ ४९ ॥

प्रजागरचरन्यासशस्त्राभ्यासादिवासनाः ।
अभियोगोचिताः शाहिरपश्यंस्तं तदाऽब्रवीत् ॥ ५० ॥

तुरुष्कसमरे यावन्न यूयं कृतबुद्धयः ।
आलस्यविवशास्तावत् तिष्ठताऽस्मिन् गिरेस्तटे ॥ ५१ ॥

एवं त्रिलोचनेनोक्तं सोऽग्रहीन्न हितं वचः ।
तस्थौ परं समं सैन्यैरुत्सेकादाहवोत्सुकः ॥ ५२ ॥

हम्मीरेण तदा सैन्यं जिज्ञासार्थं विसर्जितम् ।
तौषीपारे मितप्रायैस्ततस्तीर्त्वाऽवधीद् बलैः ॥ ५३ ॥

ततस्तमाहितोत्सेकमपि शाहिः पुनः पुनः ।
जगादाऽऽहवतत्त्वज्ञः पूर्वोक्तामेव संविदम् ॥ ५४ ॥

स तस्य नाऽग्रहीद्वाक्यं रणौत्सुक्यवशंवदः ।
प्रत्यासन्नविनाशानामुपदेशो निरर्थकः ॥ ५५ ॥

प्रातस्ततः स्वयं कोपात् तुरुष्कानीकनायकः ।
सर्वाभिसारेणाऽऽगच्छच्छलाऽऽहवविशारदः ॥ ५६ ॥

---

48. d) I_5 S′ भुवने (for भुवन°). St C P_{1-3} $I_{3,5}$ S′ °क्षोभन° (for °क्षोभण°).

49. a) St P_2 SA_3 ससुत: (for स तथा).

50. d) SA_1 (before corr.) °श्यत्तं (for °श्यंस्तं). After this *v.* युग्मम्.

51. c) P_2 S′ °विवश° (for °विवशा°).

52. a) SA_1 (before corr.) °नेनोक्ता: (for °नेनोक्तं).

53. a) SA_1 (after corr.) I_3 P_2 हसीरेण (for हम्मीरेण). —c) SA_1 (before corr.) तौषीप्राय°; SA_3 gloss तौषी नाम नदी (for तौषीपारे).

56. b) I_5 नायका: (for नायक:). —c) S′ I_5 $P_{1,3}$ SA_1 °रेणोद्गच्छ° (for °रेणाऽऽगच्छ°).

अथ तुङ्गस्य कटकः सहसा भङ्गमाययौ ।
शाहिसैन्यं परं संख्ये ददृशे विचरत् क्षणम् ॥ ५७ ॥

शाहिसैन्ये गतेऽप्यासीज्जयसिंहः स्फुरन् रणे ।
श्रीवर्धनश्च सांग्रामि विभ्रमार्कश्च डामरः ॥ ५८ ॥

घोरे तुरंगतुमुले प्रहरद्भिस्त्रिभिर्भटैः ।
वीरक्षेत्रे निजे देशे रक्षितस्तैर्यशःक्षयः ॥ ५९ ॥

कस्त्रिलोचनपालस्य माहात्म्यं वक्तुमीश्वरः ।
निस्संख्या अपि यं संख्ये न जेतुमशकन् द्विषः ॥ ६० ॥

शुशुभे रुधिरासारवर्षी युद्धे त्रिलोचनः ।
कल्पान्तदहनज्योतिर्विसारीव त्रिलोचनः ॥ ६१ ॥

स योधयित्वा संग्रामे कोटीः कङ्कटवाहिनाम् ।
एकाकी कार्यमर्मज्ञो निर्ययौ रिपुसंकटात् ॥ ६२ ॥

गते त्रिलोचने दूरमशेषं रिपुमण्डलम् ।
प्रचण्डचण्डालचमूशलभच्छायमानशे ॥ ६३ ॥

संप्राप्तविजयोऽप्यासीन्न हम्मीरः समुच्छ्वसन् ।
श्रीत्रिलोचनपालस्य स्मरञ्शौर्यमसानुषम् ॥ ६४ ॥

त्रिलोचनोऽपि संश्रित्य हास्तिकं स्वपदाच्च्युतः ।
सयत्नोऽभून्महोत्साहः प्रत्याहर्तुं जयश्रियम् ॥ ६५ ॥

यथा नामाऽपि निर्नष्टं शीघ्रं शाहिश्रियस्तथा ।
इह प्रासङ्गिकत्वेन वर्णितं न सविस्तरम् ॥ ६६ ॥

स्वप्नेऽपि यदसम्भाव्यं यत्र भग्ना मनोरथाः ।
हेलया तद्विदधतो नाऽसाध्यं विद्यते विधेः ॥ ६७ ॥

---

58. b) P_2 स्फुरद्रणे (for स्फुरन् रणे). —c) D C S′ I_5 P_{1-3} SA_1 संग्रामे; SA_3 gloss संङ्ग्रामस्याऽपत्यं साङ्ग्रामिः (for सांग्रामि).
61. P_3 om. *cd*.
62. b) P_2 कर्कट° (for कङ्कट°).
63. b) St SA_3 क्षितिम° (for रिपुम°).
67. b) I_5 महारथाः (for मनोरथाः). —d) I_5 नामाख्यं (for नाऽसाध्यं).

ईषद्यद्भूमिवैपुल्यं राज्ञः शंकरवर्मणः ।
वृत्तान्तवर्णने पूर्वममुत्र प्रकटीकृतम् ॥ ६८ ॥

स शाहिदेशः सामात्यः सभूभृत् सपरिच्छदः ।
किमभूत् किमु वा नाऽभूदिति संचिन्त्यतेऽधुना ॥ ६९ ॥

अवतारं तुरुष्काणां दत्त्वाऽशेषे महीतले ।
प्राप्तभङ्गस्ततस्तुङ्गः स्वदेशं प्राविशच्छनैः ॥ ७० ॥

सृगालायेव तुङ्गाय लब्धभङ्गाय भूपतिः ।
न तत्रागसि चुक्रोध स धैर्यसदृशाशयः ॥ ७१ ॥

किं तु खेदाय समभूत् तुङ्गायत्तत्वमीशितुः ।
परायत्ततया चित्तं पशोरप्युपतप्यते ॥ ७२ ॥

तुङ्गात्मजोऽपि कन्दर्पसिंहः श्रीशौर्यगर्वितः ।
राजोचितं व्यवहरंस्तस्योद्वेगप्रदोऽभवत् ॥ ७३ ॥

गूढलेखैः क्षणे तस्मिंश्छिद्रान्वेषी स भूभुजम् ।
भ्राता विग्रहराजोऽपि प्रैरयत् तुङ्गमारणे ॥ ७४ ॥

कोशादिस्मरणाद् राजा चिरं दोलायमानधीः ।
अभीक्ष्णप्रेरणोद्विग्नः प्रेरकानब्रवीत् ततः ॥ ७५ ॥

---

68. a) SA_3 gloss यस्य देशस्य भूमेः वैपुल्यं (for भूमिवैपुल्यं). —c) P_2 °वर्णनैः (for °वर्णने).

69. a) I_3 सदा हि देशः (for स शाहिदेशः).

70. b) I_5 °शेषमही° (for °शेषे मही°).

71. d) I_5 सुधैर्य° (for स धैर्य°).

72. d) SA_1 om. पशोर with a space.

73. c) D (before suggestion) SA P_{1-3} $I_{3,5}$ S′C राज्योचितं (for राजोचितं).

74. b) SA_1 (after corr.) D (before suggestion) P_{1-3} C S′ SG SR भूमुजाम्; I_3 भूर्मुजाम् (for भूमुजम्).

75. a) SA_3 gloss वयं देव्या पीतकोशाः कृता इति स्मरणात् (for कोशादिस्मरणात्). —c) I_5 अतीक्ष्ण° (for अभीक्ष्ण°).

'एकाक्येव सपुत्रः स गोचरे नः कदाचन ।
पतेद् यदि क्षणे तस्मिन् पश्यामः किं विदध्महे ॥ ७६ ॥

अन्यथा ध्रुवमाक्षिप्तो हन्यादस्मानसौ बलात् ।'
इति कालापहारार्थमुक्त्वाऽभूद् विरतो नृपः ॥ ७७ ॥

तावन्मात्रं वचो बीजभूतं हृदि निधाय ते ।
विधातुं तदवस्थत्वं तुङ्गस्याऽऽसन् कृतोद्यमाः ॥ ७८ ॥

षण्मासाभ्यन्तरे तुङ्गो भूपेनाऽकारितो गृहात् ।
ससुतो निर्ययौ दृष्टदुःस्वप्नोऽपि विधेर्वशात् ॥ ७९ ॥

स प्रविश्य नृपास्थानं स्थित्वा राज्ञोऽग्रतः क्षणम् ।
पञ्चभिः सहितो भृत्यैः प्राविशन्मन्त्रमण्डपम् ॥ ८० ॥

पश्चात् प्रविष्टास्तत्रैनं पर्वशर्करकादयः ।
अनुक्त्वाऽपि महीपालं तुङ्गं शस्त्रैरपातयन् ॥ ८१ ॥

मन्त्री महारथो नाम योऽभूच्छंकरवर्मणः ।
तद्वंश्यस्तुङ्गभृत्येषु श्लाघ्यः सिंहरथः परम् ॥ ८२ ॥

निश्शस्त्रो यः क्षणे तस्मिन् परित्राणविधित्सया ।
हन्यमानस्य तुङ्गस्य पृष्ठे स्वं वपुरक्षिपत् ॥ ८३ ॥

तुङ्गस्य प्रथमाघाते रुद्धश्वासोऽभवद्भयात् ।
राजा तस्मिन् निरुच्छ्वासे सोच्छ्वासः समपद्यत ॥ ८४ ॥

---

76. b) All Mss. except D read गोचरो (for गोचरे cf. St Tr.).
77. a) SA_1 (before corr.) I_5 ह्ययमाक्षि° (for ध्रुवमाक्षि°).
79. b) SA_1 (before corr.) गृहान् (for गृहात्).
80. d) I_5 °मण्डलम् (for °मण्डपम्).
81. b) I_5 °शंकरकादयः (for °शर्करकादयः). —d) S' °रपातयत् (°रपातयन्).
82. d) I_5 पुमान् (for परम्).
83. d) P_8 °राक्षिपत् (for °रक्षिपत्). After this *v.* D adds युग्मम्.
84. b) St emends रुद्धः श्वासो° (for रुद्धश्वासो°).

आस्थानब्राह्मणस्याऽऽसीद् धर्मनाम्नः सुतोऽन्तिके ।
यः पापकारी तुङ्गस्य पार्थः कङ्कश्च दुर्मतिः ॥ ८५ ॥

ताभ्यामाशुविरेकिभ्यां त्राणार्थं स्वाङ्गुलीर्मुखे ।
क्षिपद्भ्यां पशुवत्तत्र शस्त्रं त्रासवशाज्जहे ॥ ८६ ॥

अन्तरङ्गाश्च चङ्गाद्या येऽभूवंस्तुङ्गमन्त्रिणः ।
तैः स्त्रीवदासितं तूष्णीं त्रस्तैः शस्त्रान्वितैरपि ॥ ८७ ॥

अज्ञाततुङ्गमृत्युभ्यस्तुमुले तत्र भूपतिः ।
तद्भृत्येभ्यः शङ्कमानो वह्निदानाऽऽहवादिकम् ॥ ८८ ॥

आश्वासाय स्वभृत्यानां छित्वा खड्गेन सत्वरम् ।
पातयामास तुङ्गस्य ससुतस्य शिरो बहिः ॥ ८९ ॥

दृष्ट्वा स्वामिशिरश्छिन्नं सैन्ये दैन्यात्पलायिते ।
भृत्यतामुज्ज्वलीचक्रुः कतिचित् तुङ्गसेवकाः ॥ ९० ॥

भुजंगनामा सामन्तद्विजापत्यो गृहागतः ।
संग्रामराजं विदधे गेहाद्गेहं पलायितम् ॥ ९१ ॥

द्वारं कनकदण्डेन भञ्जन्नर्गलितं ततः ।
विंशतिं हतवान् योधान् स राजास्थानमण्डपे ॥ ९२ ॥

कोशाधिकारी त्रैलोक्यराजनामा हतो रणे ।
कय्यामन्तकधात्रेयो वीरोऽप्यभिनवाभिधः ॥ ९३ ॥

अङ्गने त्रिंशदेकाङ्गा वीरास्तुङ्गोपजीविनः ।
श्रेणीं बबन्धुर्निहता निश्श्रेणीं स्वर्गपद्धतेः ॥ ९४ ॥

---

85. d) S′ कर्कश्च (for कङ्कश्च).
86. After this *v.* D adds युग्मम् .
87. a) SA_1 om. च with a space. —b) I_5 °स्तत्र म° (for °स्तुङ्गम°).
89. After this *v.* D adds युग्मम् .
92. b) SA_1 (before corr.) रञ्जन्तेर्गलितं हतः; I_5 वंजतेर्गलितं हतः (for भञ्जन्नर्गलितं ततः).
93. c) D S′ P_2 $I_{3,5}$ C कय्यामत्तक°; D suggests मैय्यामत्तक° (for कैय्यामन्तक°).
94. a) I_5 P_2 अङ्गेन (for अङ्गने).

संग्रामं पद्मराजाख्यः कृत्वा यो निस्सृतोऽक्षतः ।
स्वामिप्रमयदुःखाग्नितापं तीर्थाश्रयाज्जहौ ॥ ९५ ॥

अन्ये लोकद्वयत्राणमित्रं शस्त्रं रणाङ्गने ।
संत्यजन्तो व्ययुज्यन्त यशसा जीवितेन च ॥ ९६ ॥

चन्दाख्यः सुभटंमन्यो दैशिकश्चाऽर्जुनाभिधः ।
हेलाचको डामरश्च त्यक्तशस्त्राः परैर्हताः ॥ ९७ ॥

लोठितावसथस्तुङ्गो लुण्ठितश्रीर्महीभुजा ।
आषाढशुक्लद्वादश्यां कथाशेषो व्यधीयत ॥ ९८ ॥

निर्द्रोहवृत्तौ भूभर्त्रा तुङ्गे सतनये हृते ।
लब्धोदया व्यजृम्भन्त खलप्राया नृपास्पदे ॥ ९९ ॥

राज्ञो मनः कलुषयन् गूढपैशुन्यकर्मणा ।
यो भ्रातृभ्रातृसुतयोर्विपत्तौ हेतुतां गतः ॥ १०० ॥

स दुष्प्रवादनिर्दग्धो नागो निजकुलान्तकः ।
तुङ्गभ्राता ततो राज्ञा कम्पनाधिपतिः कृतः ॥ १०१ ॥

भार्या कन्दर्पसिंहस्य क्षेमा परमचर्षणी ।
नागेन संगमं चक्रे रक्षसेवाऽसितक्षपा ॥ १०२ ॥

---

95. a) P_2 संग्रामे (for संग्रामं). P_3 °राजाख्याः; SA_1 (before corr.) राजाख्य (for राजाख्यः). —b) D C $P_{1,3}$ I_3 S′ SA_3 निसृतो° (for निस्सृतो°). —d) I_5 °तापतीर्था° (for °तापं तीर्था°).

96. a) P_2 °प्राण° (for °त्राण°).

97. a) C S′ चंद्राख्यः; P_1 चर्दाख्यः (for चन्दाख्यः). —d) I_3 °शस्त्रापरे हताः (for °शस्त्राः परैर्हताः).

99. a) S′ भूभर्ता; I_3 भूभर्त्री (for भूभर्त्रा). —c) $P_{1,2}$ I_3 D व्यजृम्भन्त [sic] (for व्यजृम्भन्त).

100. b) St I_3 °पैशुन° (for °पैशुन्य°). —c) SA_1 (before corr.) $P_{1,3}$ I_5 भ्रातृपुत्रसुत° (for भ्रातृभ्रातृसुत°).

101. After this *v.* युगलकम् .

102. b) SA I_5 °चर्षिणी (for °चर्षणी). —d) SA_3 gloss रक्षो हि रात्रौ चरति (for रक्षसेवाऽसितक्षपा).

प्रशान्ते तुमुले बिम्बा चतुर्भिर्दिवसैः सती ।
तुङ्गस्नुषा सुता शाहेः प्रविवेश हुताशनम् ॥ १०३ ॥

मम्मायामवरुद्धायां कंदर्पो यावजीजनत् ।
पुत्रं विचित्रसिंहं च मातृसिंहं च विश्रुतौ ॥ १०४ ॥

गृहीत्वा तौ स्नुषां तां च मङ्खना तुङ्गवल्लभा ।
देशाद्विनिर्गता दीना राजपुर्यां स्थितिं व्यधात् ॥ १०५ ॥

तुङ्गस्थाने ततो राज्ञा पापो भद्रेश्वरः कृतः ।
भूतेश्वरादिदेवानां चक्रे कोशादिलुण्ठनम् ॥ १०६ ॥

कियद्विवेकवैकल्यमस्य राज्ञः प्रकाश्यताम् ।
तादृशानपि यश्चक्रे पार्थादीनधिकारिणः ॥ १०७ ॥

पार्थः परमदुर्मेधाः ख्यातो भ्रातृकलत्रगः ।
निर्विचारेण यत् तेन नगराधिकृतः कृतः ॥ १०८ ॥

वधादिपापं पार्थेन सुकृतत्यक्तचेतसा ।
पवित्रे प्रवरेशस्य रङ्गपीठे प्रवर्तितम् ॥ १०९ ॥

चक्रे लुब्धस्य भूभर्तुर्मतङ्गः कृपणाग्रणीः ।
सिन्धोः सुतः कोशवृद्धिं प्रजापीडनपण्डितः ॥ ११० ॥

पुरा देवमुखाख्यस्य दिविरस्य किलाऽजनि ।
आपूपिकायां वेश्यायां पुत्रश्चन्द्रमुखाभिधः ॥ १११ ॥

यस्तुङ्गोपाश्रयाल्लब्ध्वा लालितत्वं महीपतेः ।
वराटकात् प्रभृत्यासीत् कोटीनां कृतसंचयः ॥ ११२ ॥

---

103. a) S′ C ठिण्ठा (for बिम्बा).

104. a) P_1 I_3 सम्माया° (for मम्माया°). —b) SA_3 gloss कन्दर्पसिंहः (for कन्दर्पो). —d) S′ C भ्रातृसिं° (for मातृसिं°).

105. b) I_3 संखना; S′ संखानां (for मङ्खना). After this v. युग्मम् .

108. d) I_3 °धिकृता (for °धिकृतः).

110. b) D P_3 पतङ्गः; P_2 I_3 SA SR सतङ्गः (for मतङ्गः).

111. c) I_5 अपूपिकायां (for आपूपिकायां).

112. d) P_3 °त्कटीनां (for °त्कोटीनां).

विभूतिमध्ये लुब्धस्य प्राभृतायान्यढौकितैः ।
अपूपैर्निजभृत्येषु विक्रयोऽभूत् कुलोचितः ॥ ११३ ॥

प्रभूताग्निररोगश्च भूत्वा लब्धोदयः पुनः ।
यो मन्दाग्निः सरोगश्च तिष्ठंल्लोकैर्व्यहस्यत ॥ ११४ ॥

एकमेवाऽभवद्यस्य सुकृतं मरणक्षणे ।
कोटेस्त्रिभागं यददाच्छ्रीरणेश्वरयोजने ॥ ११५ ॥

तदात्मजाः कृता नानभागनन्दिमुखास्त्रयः ।
अधीशाः पृतनाङ्गस्य राज्ञा तुङ्गोपजीविनः ॥ ११६ ॥

हास्यं बभूव भूभर्तुस्तेषां तुङ्गपदार्पणम् ।
बन्धनं यवकाण्डीनां हेमस्थाने शिशोरिव ॥ ११७ ॥

ते तुरुष्काहवे राज्ञा तुङ्गवत्प्रहिताः पुनः ।
प्रत्यावृत्त्य ययुर्देशं निजमेव पलायिताः ॥ ११८ ॥

इत्थं मन्त्रिष्वयोग्येषु क्षान्तिशीले च भूपतौ ।
केचिदुद्रेकमभजन् दरद्दिविरडामराः ॥ ११९ ॥

सा लोठिकामठं कृत्वा लोठिका नृपतेः सुता ।
तिलोत्तमाया विदधे मातुर्नाम्नाऽपरं मठम् ॥ १२० ॥

पापिनामपि हन्तेयं काऽपि सत्कर्मवासना ।
भद्रेश्वरोऽपि यच्चक्रे विहारं सुकृतोज्ज्वलम् ॥ १२१ ॥

सत्यं विवेक्ता संग्रामराजो यो न्याय्यतोऽर्जितम् ।
निजं ब्रुवाणो द्रविणं प्रपामपि न निर्ममे ॥ १२२ ॥

---

113. b) SA_3 gloss कोशलिकार्थं (for प्राभृताय). —d) S′ विक्रियो° (for विक्रयो°).
114. a) P_3 प्राभूता° (for प्रभूता°). —c) P_3 °झिररोग° (for °झिः सरोग°).
116. b) D नानभोग°; S′ C p_2 I_3 नानाभाग° (for नानभाग°).
117. b) P_2 SA_3 °पदेऽर्पणं (for °पदार्पणं).
118. c) I_5 Ms. is available only upto ययुः.
120. d) S′ C °म्ना मठं परम् (for °म्नाऽपरं मठम्).
121. c) D (before suggestion) P_{1-3} I_3 C S′ यश्चक्रे (for यच्चक्रे).
122. b) D C P_{1-3} यो न्यायतोऽर्जितम्; St योन्याय्यतोऽर्जितम् (for यो न्याय्यतोऽर्जितम् cf. St Tr.).

श्रीलेखा पार्थिववधूः श्रीयशोमङ्गलात्मजा ।
पत्यौ शिथिलसामर्थ्ये स्वैरिणीत्वमसेवत ॥ १२३ ॥

सुतः सुगन्धिसीहस्य जयलक्ष्म्यां बभूव यः ।
वल्लभो निर्भरं देव्याः सोऽस्यात्रिभुवनोऽभवत् ॥ १२४ ॥

स जयाकरगञ्जादिगञ्जस्रष्टाऽतितीक्ष्णधीः ।
कोशोपकारकृत् तस्या जारोऽप्यासीज्जयाकरः ॥ १२५ ॥

मयग्रामीणगञ्जादिकर्त्री संचयतत्परा ।
साऽभूद्भर्तुः प्रसादेन सुभगा भूरिवैभवा ॥ १२६ ॥

स चतुर्थसमाषाढप्रारम्भाहे महीपतिः ।
हरिराजाभिधं पुत्रमभिषिच्याऽस्तमाययौ ॥ १२७ ॥

सुमनस्सेवितः कुर्वन्नशेषाऽऽशाप्रकाशनम् ।
ह्लादावहः स सर्वस्य चैत्रोत्सव इवाऽभवत् ॥ १२८ ॥

अमोघाज्ञेन तेनेमां निश्चौरां कुर्वता महीम् ।
पण्यवीथ्यां निशीथिन्यां निषिद्धा द्वारसंवृतिः ॥ १२९ ॥

अचिरस्थायिनी राज्ञस्तस्याज्ञाऽचिन्तितोन्नतिः ।
वन्द्या नवेन्दुलेखेव पार्थिवानामजायत ॥ १३० ॥

द्वाविंशतिमहान्युर्वीं स रक्षित्वा क्षमापतिः ।
क्षयं ययौ शुचियशाः शुचिशुक्लाष्टमीदिने ॥ १३१ ॥

प्राणिनां द्योतमानानां नक्षत्राणामिव क्षणात् ।
लक्ष्मीर्ग्रीष्मक्षपेवेयं संगता भङ्गदायिनी ॥ १३२ ॥

---

124. b) SA_1 (before corr.) $P_{1,3}$ °लक्ष्मीं (for °लम्क्ष्यां).
125. SA_1 om. from गञ्जादि in *a* to मयग्रामीण in 126 *a*.
126. a) D यमग्रा° (for मयग्रा°).
128. a) SA_3 gloss पण्डितैः पुष्पैश्च (for सुमनः): I_3 सेविताः (for सेवितः). —b) SA_3 gloss आकाङ्क्षा दिशश्च (for आशा). —c) SA_3 gloss शैत्यं तोषश्च (for ह्लादा°).
129. c) SA_1 (before corr.) पुण्य° and निषी° (for पण्य° and निशी°). —d) C S′ हारसं° (for द्वारसं°).
130. b) C $P_{1,3}$ SA_1 °ज्ञा चिन्तनो° (for °ज्ञाऽचिन्तितो°).

समन्योः स्वैरिणीवृत्तिः सुतस्य जननी निजा।
अभिचारं चकाराऽस्येत्यविगाना जनश्रुतिः ॥ १३३ ॥

राज्योपकरणे सज्जीकृते राज्यार्थिनी स्वयम्।
सा राजमाता श्रीलेखा यावत्स्नात्वा समागता ॥ १३४ ॥

मिलितैस्तावदेकाङ्गैर्भ्रात्रा धात्रेयकेण च।
सागराख्येन तत्पुत्रो बालोऽनन्तो नृपः कृतः ॥ १३५ ॥

रत्नं जिघृक्षोरन्येन हृते तत्र प्रमापणम्।
तद्रक्षिणोऽहेर्लुब्धस्य पापायैव यथा किल ॥ १३६ ॥

राजमातुस्तथा राज्यलुब्धायाः पुत्रनाशनम्।
अभूदन्यहृते राज्ये वृजिनायैव केवलम् ॥ १३७ ॥

सा राज्यविप्रलम्भेन तादृश्या व्यथिताशया।
व्यसरत्तनयस्नेहं धिग्भोगाभ्यासवासनाम् ॥ १३८ ॥

अथाऽऽजगाम स्थविरः पितृव्यो बालभूपतेः।
राज्यं विग्रहराजाख्यो हर्तुं विततविक्रमः ॥ १३९ ॥

स लोहरात् प्रचलितो दग्ध्वा द्वारमतर्कितः।
दिनद्वयेन सार्धेन नगरं सत्वरोऽविशत् ॥ १४० ॥

श्रीलेखाप्रेरिताः सेनाः प्रविष्टं लोठिकामठम्।
उद्दीपिताग्नयस्तत्र निजघ्नुस्तं सहाऽनुगम् ॥ १४१ ॥

---

133. d) SA_1 om. °त्यविगाना with a space

135. c) $P_1 I_3$ D सागाराख्येण (for सागराख्येन).
SA_4 gloss तस्याः अपरः पुत्रः (for तत्पुत्रो). After this *v.* युग्मम्.

136. a) St SA_3 निधिं (for रत्नं).

137. After this *v.* युग्मम्.

138. a) S′ C सराज्य• (for सा राज्य°). —b) D St S C I_3 तादृशा (for तादृश्या). S′ C °ताशयाः (for °ताशया). —c) C S′ व्यसरंस्त° (for व्यसरत्त°).

139. d) D (before suggestion) C S′ P_{1-3} SG हन्तुं; I_3 दत्तं (for हर्तुं).

141. b) SA_1 (before corr.) प्रविष्टो (for प्रविष्टं).

मठद्वयं ततः कृत्वा स्वस्य भर्त्तुः सुतस्य च ।
तस्थौ व्ययवती राज्ञी राज्यद्रोहोद्यताऽनिशम् ॥ १४२ ॥

ततो नरपतिः किंचिच्छनैः शिथिलशैशवः ।
अतिव्ययादिव्यसनी गर्भेश्वरतयाऽभवत् ॥ १४३ ॥

तस्याऽऽसन् रुद्रपालाद्याः शाहिपुत्राः परं प्रियाः ।
अनल्पवेतनाऽऽदानै राज्योत्पत्त्यपहारिणः ॥ १४४ ॥

कृतप्रत्यहनिर्वाहः सार्धलक्षेण भूभुजः ।
रुद्रपालो दरिद्रत्वं कदाचिदपि नाऽत्यजत् ॥ १४५ ॥

दिद्दापालः क्षमापाललब्धया प्रतिवासरम् ।
सहस्राणामशीत्याऽपि शेते स्म न सुखं निशि ॥ १४६ ॥

अनङ्गपालवेतालश्चक्रे क्ष्मापाललालितः ।
शश्वत्सुवर्णगीर्वाणप्रतिमापाटने मनः ॥ १४७ ॥

रुद्रपालः परित्राता धनप्राणादिहारिणाम् ।
बभूव चौरचण्डालप्रायाणां वज्रपञ्जरः ॥ १४८ ॥

कायस्था रुद्रपालाप्ताः प्रजानां पीडनं व्यधुः ।
चकाराऽन्धमठं श्रीमान् उत्पलाख्यो यदग्रणीः ॥ १४९ ॥

कियद्भूपालवाल्लभ्यमन्यत् तस्याऽभिधीयताम् ।
जालन्धराधिपस्येन्दुचन्द्रस्येन्दुमुखीं सुताम् ॥ १५० ॥

उपयेमे मनोज्ञत्वाज्ज्येष्ठामासमतिं स्वयम् ।
यया मठः स्वाभिधया विदधे त्रिपुरेश्वरे ॥ १५१ ॥

---

144. b) P_2 शालिपुत्राः (for शाहिपुत्राः).
145. a) S′ C कृतप्रत्याह°; P_2 कृतप्रत्यय° (for कृतप्रत्यह°). —b) S′ C °लक्ष्येण (for °लक्षेण). All Mss. read भूभुजा (for भूभुजः suggested).
146. d) S′ C तस्मिन् (for स न).
147. b) P_3 °लालिताः (for °लालितः). —c) C S′ °त्सवर्ण° (for °त्सुवर्ण°). —d) SA_1 (before corr.) °मापटले (for °मापाटने).
150. a) S′ C विय° (for किय°).
151. b) SA_1 om. मास with a space.

तस्याः किंचिद्वयोन्यूनां स्वसारं यो यवीयसीम् ।
अथ सूर्यमतीं देवीं भूभुजे परिणीतवान् ॥ १५२ ॥

रुद्रेण भूपतिः सख्या स कर्णसुखदायिना ।
पात्रीकृतो दुर्नयानां कर्णेनेव सुयोधनः ॥ १५३ ॥

कम्पनाधिपतिस्तत्र क्षणे त्रिभुवनो बली ।
आययौ भूपतेर्हर्तुं राज्यं संभृतडामरः ॥ १५४ ॥

आकृष्टाशेषकटके तस्मिन् योद्धुमुपागते ।
एकाङ्गाः सहयारोहा राजपक्षं न तत्यजुः ॥ १५५ ॥

असिना लङ्घयन् प्रासानमोघाञ् श्लाघ्यविक्रमः ।
प्रजहाराऽनन्तदेवः स्वयं त्रिभुवनं रणे ॥ १५६ ॥

सन्नाहरक्षिताङ्गः स दृढप्रहृतिपीडितः ।
विदद्रौ वदनेनाऽसृक् स्वप्रतापमिवोद्वमन् ॥ १५७ ॥

विनयच्छन्नशौटीर्यः शिशुप्रायः स भूपतिः ।
दृष्ट्वा बलमसम्भाव्यं तस्मिंस्त्यक्त्वा रणं गते ॥ १५८ ॥

शमालाडामरं घ्नन्तं प्रासैरभिनवाभिधम् ।
शालास्थले व्यधाच्छ्लाघ्यविक्रमो मोघविक्रमम् ॥ १५९ ॥

मांसासृग्वेष्टनाद्यष्टीभूतखड्गो भ्रमन् रणे ।
भुवनक्षोभकृदभूद् भैरवोऽनन्तभूपतिः ॥ १६० ॥

---

152. a) SA_3 C S′ I_3 किंचिदिव (for किंचिद्वयो°). —c) S′ C सूर्यमतां (for सूर्यमतीम्).

153. b) P_3 सुकर्ण° (for स कर्ण°). S′ °दायिनी (for दायिना). —c) P_2 दुर्नयनां (for दुर्नयानां).

154. c) S′ C P_1 I_3 °हंन्तुं (for °हर्तुं).

157. c) SA_3 gloss चचाल (for विदद्रौ).

158. a) SA_3 gloss शौटीर्यं अभिमानः प्रागल्भ्यं वा (for °शौटीर्यः). —b) SA_3 gloss शिशुसदृशः (for शिशुप्रायः). —c) C S′ बालम° (for बलम°). —d) P_1 रणे (for रणं).

159. d) SA_1 (before corr.) °वाक्रियम् (for °विक्रमम्).

पश्यन् प्रहारत्रुनाङ्गानेकाङ्गान् स पदे पदे ।
निवेद्यमानानग्रस्थैर्नामग्रहणपूर्वकम् ॥ १६१ ॥

क्षितिभृज्जातदाक्षिण्यो विलब्धिस्थावरे ततः ।
चाञ्चल्यमक्षपटलादेकाङ्गानां न्यवारयत् ॥ १६२ ॥

एवं तत्र कृतज्ञेन भृत्येभ्यः प्रतिपादिता ।
विलब्धिस्तेन दीन्नारकोटिषण्णवतेः क्रमात् ॥ १६३ ॥

राज्ञो रणान्निवृत्तस्य दुग्धसेकैः करात्सरुः ।
स्थिरग्रहदृढः कृष्टश्चिरेणेति जनश्रुतिः ॥ १६४ ॥

अहो महत्त्वं भूभर्तुर्दीनो देशान्तरागतः ।
तादृक् त्रिभुवनो येन संविभेजे विमन्युना ॥ १६५ ॥

ब्रह्मराजाभिधस्तेन बन्धुर्गञ्जाधिपः कृतः ।
रुद्रपालकृतद्वेषो विरक्तश्चलितो ययौ ॥ १६६ ॥

सप्तभिर्म्लेच्छभूपालैः समं मिलितडामरः ।
तेनाऽऽनीतो दरद्राजो यत्नादचलमङ्गलः ॥ १६७ ॥

क्षीरपृष्ठाभिधं ग्रामं प्राप्तस्य समरोत्सुकः ।
तस्याऽग्रं विक्रमोदग्रो रुद्रपालो विनिर्ययौ ॥ १६८ ॥

श्वो व्यवस्थापिते युद्धे सैन्याभ्यां दरदीश्वरः ।
क्रीडन् पिण्डारकाख्यस्य नागस्य भवनं ययौ ॥ १६९ ॥

दुर्नयाचरणात्तत्र पार्श्वस्थैर्वारितोऽपि सः ।
प्लवमानस्य मत्स्यस्य गात्रे कुन्तमपातयत् ॥ १७० ॥

---

162. After this *v.* युग्मम्.

166. b) SA P_2 कृपः (for कृतः).

167. c) SA_3 gloss ब्रह्मराजेन (for तेन). —d) SA_1 om. दचलमङ्गल with a space. SA_3 gloss नाम (for अचलमङ्गलः).

168. a) SA_3 खरपृष्ठ° with gloss खरोट् इति ग्रामः क्रमराज्ये (for क्षीरपृष्ठा°).

169. c) C S' क्रीडापिण्डा°; P_2 क्रीडपिण्डा° (for क्रीडन् पिण्डा°).

अथोज्जगाम गोमायुवपुः कुण्डाद् भुजङ्गमः ।
स च तं मृगयौत्सुक्यादधावद् दरदीश्वरः ॥ १७१ ॥

तमापतन्तमालोक्य व्यवस्थोन्मूलनं विदत् ।
आस्कन्दाशङ्कि भूभर्तुः सैन्यं युद्धाय निर्ययौ ॥ १७२ ॥

अभूत् ततोऽस्त्रसंघर्षसंजातानलसंहतिः ।
कृतस्वर्गाङ्गनोद्वाहो वीराणां समरोत्सवः ॥ १७३ ॥

तस्मिन्महाभटाऽऽटोपे शिरश्छिन्नं दरत्पतेः ।
रुद्रस्य रौद्रमहसः संप्ररूढं यशः पुनः ॥ १७४ ॥

समरे वधबन्धादि म्लेच्छराजाः प्रपेदिरे ।
संप्राप हेमरत्नादि पुनः कश्मीरभूपतिः ॥ १७५ ॥

उत्तंसमुक्ताद्योताम्भःक्षालितास्त्रझलज्झलम् ।
रुद्रपालो दरद्राजशिरो भर्तुरुपानयत् ॥ १७६ ॥

भ्रात्रोदयनवत्सेन कृतप्रायैस्तथा द्विजैः ।
बह्वयश्चैवंविधास्तस्य बभूवुरवदालिकाः ॥ १७७ ॥

रुद्रपाले ततो लूतामयेन प्रमयं गते ।
अन्येऽपि शाहितनयाः क्षिप्रमेव क्षयं ययुः ॥ १७८ ॥

पालस्नेहान्ध्यविगमे शुद्धाशयजुषोऽभवत् ।
देवी सूर्यमती भर्तुर्दर्पणस्येव बिम्बिता ॥ १७९ ॥

---

172. b) C S′ P_{1-3} I_3 SA विदन् (for विदत्).
175. b) P_2 °राज: (for °राजा:). —d) P_2 काश्मीर° (for कश्मीर°).
176. ab) SA_3 gloss उत्तंसभूताः या मुक्ताः मुक्तामणयः तासां यो द्योतः दीप्तिः स एवाऽम्भः तेन क्षालिता अस्त्रस्य रुधिरस्य झलज्झलाकाचकच्यं प्रकाशः स्फार इति यावत् यस्य तत् इति शिरोविशेषणम् । झलज्झला तु शोभायामिति कोशः । मुक्ताफलदीप्तिरतिशुक्लत्वादम्भरत्वेन रूपणम् । जलस्य हि शुक्लं रूपमिति वैशेषिकाः SA_1 (before corr.) S′ C °झलज्जलम् (for °झलज्झलम्). —d) D C S′ °रुपानयन्; SA_1 (before corr.) °रुपायनम् (for °रुपानयत्).
177. a) S′ गात्रो° (for भ्रात्रो°). —c) S′ C D P_{1-3} SA_1 तथा ह्येवं° (for बह्वयश्चैवं°).

7819/A

सुभटाऽपरनाम्नी सा गौरीश्वरविधायिनी ।
पुण्यं वितस्तापुलिने निर्ममे सुभटामठम् ॥ १८० ॥

गोहेमहयरत्नादिप्रदानैः सुबहून् द्विजान् ।
सदाशिवप्रतिष्ठायामदरिद्रांश्चकार सा ॥ १८१ ॥

आशाचन्द्राऽपराख्यस्य कल्हनस्याऽनुजन्मनः ।
नाम्ना व्यधायि वात्सल्यात् साग्रहारो मठस्तया ॥ १८२ ॥

सिल्हनाख्यस्य च भ्रातुर्भर्तुश्चाऽभिधया सती ।
मठौ चाकारयत् पार्श्वे विजयेशामरेशयोः ॥ १८३ ॥

अष्टोत्तरं चाग्रहारशतं श्रीविजयेश्वरे ।
ब्राह्मणेभ्यो महापुण्यं विद्वद्भ्यः प्रत्यपादयत् ॥ १८४ ॥

पत्युर्नाम्नाऽप्यग्रहारान् प्रददावमरेश्वरे ।
त्रिशूलबाणलिङ्गादिप्रतिष्ठाश्च विनिर्ममे ॥ १८५ ॥

दंपती राजराजाख्ये मृते पुत्रे प्रचक्रतुः ।
सदाशिवान्तिके राजवेश्म सन्त्यज्य तौ स्थितिम् ॥ १८६ ॥

ततः प्रभृति सन्त्यज्य पूर्वराजकुलस्थितिम् ।
तयैव रूढ्या भूपालास्तत्रैव वसतीर्व्यधुः ॥ १८७ ॥

पार्थिवस्याश्वशालीयाः प्रियवाजितया प्रियाः ।
प्रसादैर्देशलुण्ठ्या च सर्वतः समतां ययुः ॥ १८८ ॥

गर्भेश्वरतया भर्तुर्वल्लभो नर्मकोविदः ।
अलुण्ठयत् प्रजा नित्यं डल्लको नाम दैशिकः ॥ १८९ ॥

मालवाधिपतिर्भोजः प्रहितैः स्वर्णसंचयैः ।
अकारयद्येन कुण्डयोजनं कपटेश्वरे ॥ १९० ॥

---

182. c) S′ St व्यधापि (for व्यधायि). —d) S′ °स्त्वया (for °स्तया).
183. c) S′ P_1 C चकार यत्पार्श्वे (for चाकारयत् पार्श्वे).
184. d) P_2 प्रतिपादयत् (for प्रत्यपादयत्).
187. c) SA_1 (before corr.) S′ C रूढा (for रूढ्या).
188. b) S′ om. b. —c) SA_1 (before corr.) °लुण्ठा (for °लुण्ठ्या).
189. b) P_3 नय° (for नर्म°) —d) D P_3 दाशिकः (for दैशिकः).
190. a) SA_1 (before corr.) °भोंजैः (for °भोंजः).

प्रतिज्ञा भोजराजेन पापसूदनतीर्थजैः ।
सततं वदनस्नाने या तोयैर्विहिताऽभवत् ॥ १९१ ॥

अपूरयत्तस्य यस्तां दुस्तरां नियमादितः ।
प्रहितैः काचकलशीकुलैस्तद्वारिपूरितैः ॥ १९२ ॥

स तस्य पद्मराजाख्यः पर्णप्राप्तिकदैशिकः ।
प्रियताम्बूलशीलस्य त्यागिनो वल्लभोऽभवत् ॥ १९३ ॥

तेन नागरखण्डादिपर्णविक्रयिणा नृपः ।
देशोत्पत्तिधनं प्रायो निश्शेषं दापितस्तदा ॥ १९४ ॥

पञ्चचन्द्रकशोभाङ्कमौलिसिंहासने नृपात् ।
बन्धायाऽदत्त लब्धव्ये धने स धनिकोऽधिके ॥ १९५ ॥

तद्राजचिह्नमास्थानोपयुक्तं तस्य मन्दिरात् ।
आनीयमानं मासार्धवासरे मासि मास्यभूत् ॥ १९६ ॥

स्वकोशसञ्चयं दत्वा देवी सूर्यमती ततः ।
पद्मराजोद्भवां देशस्याऽव्यवस्थां न्यवारयत् ॥ १९७ ॥

शमिते चाऽश्वशालीयडल्लकादिभये तदा ।
प्रावर्तन्त पुनर्देशे व्यवस्था निरुपद्रवाः ॥ १९८ ॥

ततः प्रभृति राज्येव राजकार्योद्यताऽभवत् ।
तस्थौ शौर्यकथां त्यक्त्वा राजा कार्यकरः पुनः ॥ १९९ ॥

---

192. a) SA_3 gloss प्रतिज्ञां (for तां). —c) SA_1 (before corr.) प्रहितै काशकलशी°; S′ C प्रहितैका च कशली° (for प्रहितैः काचकलशी°). —d) SA_3 gloss शेष इति भाषया (for कुलैः).

193. b) P_1 पूर्णप्राप्ति°; P_3 कर्णप्राप्ति°; SA_3 gloss ग्रामविशेषः (for पर्णप्राप्तिक°). After this *v.* चक्कलकम्.

194. d) I_3 शापित° (for दापित°).

195. a) For पञ्चचन्द्रक cf. *v.* 231. —b) I_3 °सिंहासनैः; SA_1 (before corr.) D (after suggestion) °सिंहासनं (for °सिंहासने).

196. c) S′ C मासार्चवासरे (for मासार्धवासरे).

198. b) S′ P_3 °दुल्लका° (for °डल्लका°).

199. d) S′ substitutes राजकार्यकरः पुरः for *d*.

भर्तुर्नारीविधेयत्वं तस्या भर्तृजयस्तथा ।
निष्कलङ्केन शीलेन नाऽन्योन्यं गर्ह्यतामगात् ॥ २०० ॥

भवभक्तिव्रतस्नानत्यागशीलादिभिर्गुणैः ।
कृतिनाऽनन्तदेवेन मुनयोऽपि विनिर्जिताः ॥ २०१ ॥

राज्ये तस्य महीभर्तुर्दीर्घे तांस्तानलङ्घयत् ।
पतिंवरेव राजश्रीर्भृत्यान्नवनवोन्मुखी ॥ २०२ ॥

क्षेमाभिधो राजगञ्जपूरणं बालभञ्जकः ।
व्यधाद् द्वादशभागादिप्रकारैर्ढौकयन् धनम् ॥ २०३ ॥

मन्त्री ततोऽभवत् साधुस्त्रैगर्तः केशवो द्विजः ।
सौधश्चन्द्रातपेनेव भूपालो येन भूषितः ॥ २०४ ॥

भ्राम्यन् गतश्रीरेकाकी स एव ददृशे जनैः ।
भाग्याम्बुवाहतडितो निविडाः कस्य सम्पदः ॥ २०५ ॥

भाग्याधीनं धनं ध्यात्वा मुधा मुग्धधियामसौ ।
कुलविक्रमयोर्दर्पो मिथ्यैव पृथुतां प्रति ॥ २०६ ॥

प्रासादपालवैश्यस्य गौरीशत्रिदशालये ।
भूतेर्हलधरो वज्रो वराहश्चाऽभवन् सुताः ॥ २०७ ॥

तेभ्यो हलधरः सूर्यमत्या विहितसेवनः ।
वृद्धिं दिने दिने गच्छँल्लेभे सर्वाधिकारिताम् ॥ २०८ ॥

विधेयान् बुद्धियुक्तेन कुर्वतः क्षित्यनन्तरान् ।
सपत्नीकोऽभवत्तस्य मुखप्रेक्षी क्षमापतिः ॥ २०९ ॥

---

200. d) SA_1 (before corr.) C S′ P_1 गृह्यता° (for गर्ह्यता°).
201. a) $P_{1,2}$ I_3 °व्रतास्नान°; SA_1 (before corr.) °व्रतस्थान° (for °व्रतस्नान°).
203. a) C क्षेमाभिधे (for क्षेमाभिधो). —b) SA_3 gloss नापितः (for बालभञ्जकः).
204. b) SA_1 (before corr.) कैशवो (for केशवो).
205. After this *v.* युग्मम्.
207. c) SA_3 भूतिर्ह° (for भूतेर्ह°).
209. a) SA_3 °युद्धेन (for °युक्तेन). —b) D (before suggestion) SA_1 (before corr.) P_{1-3} C °नन्तरम् (for °नन्तरान्).

क्षेमेण सूत्रितं पूर्वं स पादाग्रमुदग्रधीः ।
कर्मस्थानं स्फुटीचक्रे सर्वस्थानधुरंधरम् ॥ २१० ॥

अभूद्वर्णकमूल्यादिलेखनं कनकस्य यत् ।
राजायत्तं जनस्याऽर्थसञ्चयानां प्रकाशकम् ॥ २११ ॥

स तन्निवारयामास भाविनां भूभुजां विदन् ।
ज्ञाने सञ्चितवित्तस्य दण्डाद्यायासकारिताम् ॥ २१२ ॥

भर्त्सितानश्वशालीयान् धनदारापहारिणः ।
कांश्चिद् व्यापाद्य स शमं निन्ये लोकस्य विप्लवम् ॥ २१३ ॥

तेनाऽऽयासहृता नीतः कचत्स्वर्णैः सुरास्पदैः ।
शोभां मठाग्रहारैश्च वितस्तासिन्धुसंगमः ॥ २१४ ॥

भ्रातरश्च सुताश्चाऽस्य लक्ष्मीपरिचयोन्मदाः ।
द्विरदा इव न काऽपि दानप्रणयितां जहुः ॥ २१५ ॥

तद्भ्रातृपुत्रो बिम्बाख्यः श्रीमान् वीरो वराहजः ।
द्वाराधिकारकार्यासीद् दानप्रलयवारिदः ॥ २१६ ॥

स डामरकुलाकालमृत्युः स्वल्पानुगो भवन् ।
खशाहवे जहौ प्राणान् पलायनपराङ्मुखः ॥ २१७ ॥

चम्पायां सालभूपालमुन्मूल्याऽनन्तभूपतिः ।
तत्तन्नृपजयी नव्यं धराधवमरोपयत् ॥ २१८ ॥

मन्त्रशून्येन शौर्येण परदेशेषु भूपतिः ।
हठप्रवेशान् विदधत्सोऽभूत् कृच्छ्रगतोऽसकृत् ॥ २१९ ॥

---

210. d) SA_3 I_3 सर्वकार्य°; S′ सर्व स्थान° (for सर्वस्थान°).
212. c) D St P_{1-3} I_3 ज्ञानी (for ज्ञाने).
214. b) SA_1 (before corr.) S′ $P_{1,2}$ कश्चित्स्व°; SA_3 gloss कचत् देदीप्यमानं स्वर्णं येषां तैः (for कचत्स्व°).
216. c) S′ C दूराधिका° (for द्वाराधिका°).
217. b) SA_1 S′ P_2 I_3 °नुगोऽभवत् (for °नुगो भवन्). —c) D C S′ P_{1-3} I_3 °वेऽजहत् (for °वे जहौ).
218. S′ om. *vv.* 218*c*—219*d*. —a) I_3 मालभूपा° (for सालभूपा°).

तुक्कात्मजस्य कलशस्याऽऽरब्धौ खिन्नसैनिकम् ।
अमोचयद्धलधरो युक्त्या वल्लापुरादमुम् ॥ २२० ॥

उरशां च प्रविष्टस्य वैरिरुद्धाऽध्वनो व्यधात् ।
कम्पनाधिपतिस्तस्य मार्गान् संशोध्य निर्गमम् ॥ २२१ ॥

कालेऽनन्तमहीभर्तुर्वैरिविग्रहसङ्कटे ।
साहसान्युदजृम्भन्त तानि तानि क्षणे क्षणे ॥ २२२ ॥

राजेश्वरो द्वारपतिः श्रीमान् भद्रेश्वरात्मजः ।
डामरैः क्रमराज्यस्थैरन्येऽपि बहवो हताः ॥ २२३ ॥

वीक्ष्य नीतिदशा कार्यं भीत्या व्यवहरन्नपि ।
भृत्यतां निष्परिभवां को भुङ्क्ते नृपमन्दिरे ॥ २२४ ॥

दुष्प्रवादास्पदीभूतो देव्या निबिडसेवनात् ।
आशाचन्द्रादिभिः क्रुद्धैर्बद्धो हलधरोऽप्यभूत् ॥ २२५ ॥

स राज्ञा हृतसर्वस्वो बन्धनक्लेशमन्वभूत् ।
भाग्यप्रभावे निस्सारे सुखमेकान्ततः कुतः ॥ २२६ ॥

नृपेण बन्धनात्त्यक्तं तं श्रीः प्रत्यागता पुनः ।
आलिलिङ्ग सितच्छत्रलज्जास्मितसिताननां ॥ २२७ ॥

स राज्ञ्याः प्रावृष इव प्रणयेन क्षणे क्षणे ।
कोपप्रसादमेघार्कपर्यायाऽऽपातमन्वभूत् ॥ २२८ ॥

ततः सरलचित्तस्य क्रमेण समपद्यत ।
भार्याजितत्वं भूभर्तुर्दुर्विपाकार्पणोन्मुखम् ॥ २२९ ॥

अधिकारपरित्यागाद् दोषाननुशयावहान् ।
वदद्भिर्वार्यमाणोऽपि प्राज्ञैर्हलधरादिभिः ॥ २३० ॥

---

220. a) SA_1 (before corr.) om. तुक्का with a space.
221. d) SA_1 (before corr.) S' C मार्गात्सं° (for मार्गान् सं°).
222. b) C S' °सङ्कटम् (for °सङ्कटे).
225. c) P_3 शुचौ च° (for आशाच°).

पत्न्या संप्रेरितः शश्वत्तनयस्नेहमूढया ।
पुत्राय कलशायाभूद्राज्यं दातुं समुद्यतः ॥ २३१ ॥

यास्यस्यनुशयं राजन्नेवंवाद्यपि कारितः ।
सज्जं तेन रणादित्यनामा क्षत्ताऽभिषेचनम् ॥ २३२ ॥

एकान्नचत्वारिंशस्य वर्षस्य तनयः सिते ।
षष्ठेऽह्नि बाहुलस्याऽभूदभिषिक्तो महीभुजा ॥ २३३ ॥

अथाऽऽस्थाने रणादित्यो राजपुत्रान्निवेदयन् ।
चिन्तयन् राज्यमाहात्म्यं प्रतिपत्तिषु निष्ठुरः ॥ २३४ ॥

अनन्तो राजपुत्रोऽयं देवेति कथयन् वचः ।
कृकाटिकान्यस्तहस्तः क्षितिपालं न्यवेदयत् ॥ २३५ ॥

कुपितेन स भूभर्त्रा परिवृत्यावलोकितः ।
एवं कृतस्मितो व्यक्तं तमूचे नीतिनिष्ठुरः ॥ २३६ ॥

इत्थं यत्र निवेद्यन्ते कान्यकुब्जादिभूभुजः ।
तत्रैव त्यक्तराज्यस्य काऽन्याऽस्तु प्रक्रिया तव ॥ २३७ ॥

दिने दिने सानुशयो नियतं भविता भवान् ।
नाभिमानपरित्यागः कर्तुं शक्यो मुनेरपि ॥ २३८ ॥

---

231. d) P_1 °द्राज्ये (for °द्राज्यं).

232. c) SA_1 (before corr.) om. सज्जं with a space. P_2 सज्जे (for सज्जं). —d) C क्षत्रा°; SA_3 gloss तेनाऽनन्तदेवेन रणादित्यनामा क्षत्ता प्रतीहारः अभिषेचनं सज्जं कारित इत्यन्वयः। कथं भूतः एवंवादी अपि (for क्षत्ता°).

233. a) S′ C एकोनचत्वा° (for एकान्नचत्वा°). —b) SA_2 gloss कलशः (for तनयः). —c) SA_1 (before corr.) C S′ P_3 बहुलस्या°; SA_2 gloss कार्तिकस्य (for बाहुलस्या°).

234. b) D (before suggestion) St C P_{1-3} °न्निवेशयन्; S′ °न्निवेशयत् (for °न्निवेदयन् cf. SL St Tr.). I_3 om. *vv.* 234 *c*—235 *d*.

236. a) S′ C भूभर्ता (for भूभर्त्रा).

सुदूरदर्शिनां तत्र मन्त्रिणां हृदयंगमम् ।
राजा तस्य वचः श्रुत्वा प्रतिवाक्याक्षमोऽभवत् ॥ २३९ ॥

दृष्ट्वाऽन्येद्युर्नवं भूपं राजचक्रेण सेवितम् ।
नवेतरं च सहितं परिमेयैः परिच्छदैः ॥ २४० ॥

धीमान् हलधरो युक्त्या कृतकासूयया नृपम् ।
एवं निर्भर्त्सयँल्लक्ष्मीं तं प्रत्याजीहरत् पुनः ॥ २४१ ॥

विधाय निस्सुखं सूनुं राज्यभारार्पणाच्छिशुम् ।
कस्मात् स्वसुखसापेक्षो न जिह्रेष्यत्र वार्द्धके ॥ २४२ ॥

तत्स्वयं राजकार्याणां कार्यमुद्वहनं त्वया ।
अशून्यो यौवनाभोगैरयमस्तु सुतस्तव ॥ २४३ ॥

इत्युक्त्वा स पुनर्भूपमधिकारमजिग्रहत् ।
चक्रे कलशदेवं च कलया युक्तिवञ्चितम् ॥ २४४ ॥

पित्रोरेवान्तिके कुर्वन्नाहाराद्यपि संततम् ।
ततो बभूव कलशो नाममात्रमहीपतिः ॥ २४५ ॥

सर्वाऽऽस्थानाऽस्त्रपूजादिविधाने पार्थिवोचिते ।
पितुः सहायकल्पः स पौरोहित्यमिवाऽकरोत् ॥ २४६ ॥

अनिमित्तप्रहृष्टानामनिमित्तानुतापिनाम् ।
न क्वाऽपि चलचित्तानां तिरश्चामिव निश्चयः ॥ २४७ ॥

दापयित्वा पतिं राज्यं निर्बन्धेनाऽपि तावता ।
सूनौ बभूव यद्राज्ञी क्षिप्रमेवाऽनुतापिनी ॥ २४८ ॥

---

239. a) I_3 S′ सदूर° (for सुदूर°). P_3 °दर्शिना (for °दर्शिनां). —b) P_3 मन्त्रिणा (for मन्त्रिणां).

242. c) P_2 °माक्षेपो (for °सापेक्षो).

246. a) S′ C $P_{1,2}$ I_3 सर्वस्थान° (for सर्वास्थान°). —d) P_2 °मपाकरोत् (for °मिवाऽकरोत्).

248. d) S′ C विप्रमेवा°; St P_{1-3} I_3 विप्रेमेवा°; P_2 विप्रे सेवा°; SA_2 gloss विप्रेमा निस्स्नेहा; SA_3 क्षिप्रमेवानुतापिनीत्यन्यादर्शे (for क्षिप्रमेवा°).

सेर्ष्या स्नुषाणामुत्कर्षं पार्थिवप्रमदोचितम् ।
वेषालङ्करणादौ सा रूक्षचित्ता न चक्षमे ॥ २४९ ॥

दासीकृत्यं तया पुत्रमहिष्यः कारिताः सदा ।
गृहोपलेपने यावन्न वैमुख्यमदर्शयन् ॥ २५० ॥

पुत्रो विग्रहराजस्य क्षितिराजाभिधस्ततः ।
राज्ञः पितृव्यजो भ्राता कदाचित्पार्श्वमाययौ ॥ २५१ ॥

तस्मै न्यवेदयत् खेदं स चित्तस्योपतापकम् ।
पुत्रे भुवनराजाख्ये राज्यलुब्धेऽतिविप्लुते ॥ २५२ ॥

स हि तस्याऽऽत्मजो नीलपुरराजं समाश्रितः ।
तद्बलैः पितुरारब्धिं विधातुं सोद्यमोऽभवत् ॥ २५३ ॥

नाम भागवतानां च पूज्यानां स्वपितुर्व्यधात् ।
दत्तयज्ञोपवीतानां शुनामशुचिमानसः ॥ २५४ ॥

क्षितिराजः स्ववध्वां च विरुद्धायां विशुद्धधीः ।
मनस्तापापहे चक्रे सर्वत्यागामृते स्पृहाम् ॥ २५५ ॥

राज्यं कलशपुत्राय ज्येष्ठानन्तरजन्मने ।
रामलेखाभिधानायां राज्ञ्यां जाताय सत्वरम् ॥ २५६ ॥

दत्त्वा स्तनंधयायाऽपि तदोत्कर्षाभिधाय सः ।
राजर्षिर्विबुधैः सार्धं विदधे तीर्थसेवनम् ॥ २५७ ॥

भुक्त्वा शमसुखं भूरीन् वर्षान् परमवैष्णवः ।
स चक्रायुधसायुज्यं ययौ चक्रधरे सुधीः ॥ २५८ ॥

---

249. a) S' सेर्ष्यां (for सेर्ष्या). —d) P_2 रूक्षचिन्ता (for रूक्षचित्ता).
250. d) S' °मदर्शयत् (for °मदर्शयन्).
252. d) S' C °विश्रुते (for °विप्लुते).
253. ab) S' C नीलः पुरा राज्यं; D St P_{1-3} I_3 नीलपुराराज्यं; SA_3: नीलपूरराजं (for नीलपुरराजं cf. SL St Tr.). —c) SA_1 (before corr.) C S' °रालब्धिं; SA_3 gloss आस्कन्दं (for °रारब्धिं).
254. c) SA_1 om. दत्त with a space.
256. b) SA_4 gloss कलशदेवस्य द्वौ पुत्रौ । ज्येष्ठो हर्षदेव एकः । कनिष्ठ उत्कर्षो द्वितीयः (for ज्येष्ठानन्तरजन्मने). —d) P_3 राज्ञां (for राज्ञ्यां).
258. d) P_2 स्वधीः (for सुधीः).

स च भोजनरेन्द्रश्च दानोत्कर्षेण विश्रुतौ ।
सूरी तस्मिन् क्षणे तुल्यं द्वावास्तां कविबान्धवौ ॥ २५९ ॥

पितुः पितृव्यजाद् भ्रातुर्जातस्याऽनन्तभूभुजा ।
तन्वङ्गराजस्योत्सङ्गे नप्ता न्यासीकृतः शिशुः ॥ २६० ॥

तन्वङ्गोऽपि विवृद्धिं तन्नीत्वा राष्ट्रं शिशुं च तम् ।
पुनः प्रविष्टः कश्मीरानस्तं चक्रधरे ययौ ॥ २६१ ॥

सर्वसाधारणीभूतभोगानां राजबीजिनाम् ।
तावज्ज्ञातेयमभवन्नेह द्रोहकलङ्कितम् ॥ २६२ ॥

इन्दुराजात्मजात् सिद्धराजो यो बुद्धराजतः ।
जातो मदनराजाख्यं वीरं पुत्रमजीजनत् ॥ २६३ ॥

अत्युत्सिक्तः सुतस्तस्य दूरन्नृपतिमण्डलात् ।
विधुरे राज्ञि निर्यातः शौर्योद्रेकादखण्डितः ॥ २६४ ॥

तदानीं जिन्दुराजाख्यो डामरोद्रेकखिन्नया ।
राज्ञ्या स्वयं गृहं नीत्वा साचिव्यं ग्राहितोऽभवत् ॥ २६५ ॥

काणः शोभाभिधस्तेन गाढोद्वेगावहः प्रभोः ।
देग्रामस्थो डामरोऽथ दत्त्वाऽस्कन्दं निपातितः ॥ २६६ ॥

---

259. a) SA_4 gloss भोजराजश्च (for भोजनरेन्द्र).

260. SA_4 gives in marg. a genealogical list showing the descendants of the brothers उदयराज and कान्तिराज i. e. उदयराज, संग्रामदेव, अनन्तदेव, कलश and कान्तिराज, जस्सराज, तन्वङ्गः. —a) SA_4 gloss संग्रामदेवस्य (for पितुः). SA_4 gloss कान्तिराजपुत्रजस्सराजात् (for पितृव्यजाद्). —b) SA_4 gloss तन्वङ्गस्य (for जातस्य). —c) SA_1 (before corr.) तन्वन्राज° (for तन्वङ्गराज°). —d) SA_4 gloss पौत्र उत्कर्षः (for नप्ता).

264. a) SA_1 (before corr.) इत्यु° (for अत्यु°). —b) St D S′ C P_{1-3} I_3 दरन्नृपति°; SL दूरे नृपति° (for दूरं नृपति° SA_3 *varia lectio* cf. St Tr.).

265. c) SA_3 गत्वा (for नीत्वा).

266. c) SA_3 gloss देगामो इति भाषया (for देग्राम).

कम्पनाधिपतां दत्त्वा ततस्तस्य प्रतापिनः ।
पार्थिवो राजपुर्यादीन् देशांश्चक्रे करप्रदान् ॥ २६७ ॥

अनन्तभूभुजो राज्ये तत्तत्स्खलितसङ्कटे ।
आलम्बयष्टिप्रतिमो ययौ हलधरः क्षयम् ॥ २६८ ॥

मुमूर्षुणा चक्रधरे तेन पार्श्वस्थितो नृपः ।
सजानिरुपदेशार्थी स तदेत्थमकथ्यत ॥ २६९ ॥

मा कार्ष्ट परराष्ट्रेषु रभसाऽऽरब्धिसाहसम् ।
युक्त्या वल्लापुरादौ वो व्यपोढं व्यसनं मया ॥ २७० ॥

विशङ्क्यो जिन्दुराजोऽयं परार्ध्यां वृद्धिमागतः ।
भेदं वः सह पुत्रेण जयानन्दो विधास्यति ॥ २७१ ॥

कथितं तेन तत् स्मृत्वा जिन्दुराजं महौजसम् ।
बिज्जेनाबन्धयद् राजा युक्तिमांस्त्याजितायुधम् ॥ २७२ ॥

अथ कालेन कलशक्ष्माभृत् कलुषिताशयः ।
भृत्यैरसाधुसंसेव्ये प्रसक्तिं ग्राहितोऽध्वनि ॥ २७३ ॥

तस्याऽभवन् बिज्जपित्थराजपाजादयः प्रियाः ।
उत्सेकदा राजपुत्राश्चत्वारः शाहिवंशजाः ॥ २७४ ॥

पुत्रो गञ्जपतेर्नागनाम्नो निकटसेवकः ।
सोऽपि तस्य जयानन्दः कौटिल्याध्यापकोऽभवत् ॥ २७५ ॥

द्विजेन्द्रेऽमरकण्ठे तु याते शिवसमानताम् ।
राजा प्रमदकण्ठस्य ययौ तज्जस्य शिष्यताम् ॥ २७६ ॥

---

267. c) SA_3 gloss राजविर् (for राजपुरी).
269. d) S' °देत्थं प्रकथ्यत (for °देत्थमकथ्यत).
270. c) C S' वल्लोयुरादौ वा (for वल्लापुरादौ वो).
271. c) SA_4 gloss कलशेन (for पुत्रेण). —d) SA_4 gloss अनन्तदेव-गञ्जपतेर्नागनाम्नो भृत्यस्य पुत्रः (for जयानन्दो).
272. a) SA_4 gloss हलधरेण (for तेन).
274. a) D (before suggestion)SA SR SG [अ]भवद् (for [अ]भवन्).
275. ab) SA_4 gloss तुङ्गभ्रातुः (for नागनाम्नो).
276. a) P_{1-3} द्विजेन्द्रो° (for द्विजेन्द्रे°). —d) SA_1 (before corr.) तज्जनशि° (for तज्जस्य शि°).

दुश्शीलस्य प्रकृत्यैव तस्याऽकृत्योपदेशकृत् ।
गम्याऽगम्यविचारस्य परिहर्ताऽभवद् गुरुः ॥ २७७ ॥

गुरोर्गतविकल्पत्वं तस्याऽन्यत् किमिवोच्यताम् ।
त्यक्तशङ्कः प्रववृते स्वसुतासुरतेऽपि यः ॥ २७८ ॥

महासमयसञ्चारचतुरैर्यैरभीतितः ।
गण्यते स्वप्रभावोग्रैर्भैरवोऽपि न निर्भयैः ॥ २७९ ॥

ते भट्टपादास्त्रासेन पतिता भग्नजानवः ।
बिडालवणिजा स्वस्थाः शिरोहस्तार्पणैः कृताः ॥ २८० ॥

पुरा कृष्णबिडालाङ्को वणिक् कश्चिदिहाभिधाम् ।
बिडालवणिगित्यात्मनामविस्मारिकां दधे ॥ २८१ ॥

यो व्याजमूर्खो वैद्यत्वगुरुत्वाहंकृतः क्रमात् ।
पदकृद् रजकादीनां शिल्पिनां गुरुतामगात् ॥ २८२ ॥

स भट्टपादानुल्लाघांश्चक्रे मूर्ध्न्यधिरोपयन् ।
श्रेष्ठी बिडालविष्ठौघहिङ्गुगन्धोत्कटं करम् ॥ २८३ ॥

एवं प्रकृतिनिस्सारैरपि गर्जद्भिरन्वहम् ।
आन्ध्यं स गुरुभिर्निन्ये दिवसोऽम्बुधरैरिव ॥ २८४ ॥

ये दीर्घजागरा रात्रौ भूरिभोजनसेविनः ।
अजीर्णपिशितोद्गारनित्यदुर्गन्धकन्धराः ॥ २८५ ॥

---

278. d) SA_3 gloss स्वा आत्मीया चासौ पुत्री तस्याः सुरते सम्भोगे (for स्वसुतासुरते). S′ याः (for यः).

279. c) S′ C स्वप्न° (for स्वप्र°). —d) SA_3 S′ P_2 I_3 निर्भयः (for निर्भयैः).

280. c) SA_1 (before corr.) बिडाज° (for बिडाल°).

281. c) SA_1 (before corr.) बिडालनाम इत्या° (for बिडालवणिगित्या°).

282. SA_1 om. this *v.* and SA_3 adds the same in marg. —c) D (after suggestion) S′ C पादूकृद् [cf. MW.] (for पदकृद्).

283. b) P_3 °पयत् (for °पयन्).

285. a) SA_1 I_3 °जागराद्रा° (for जागरा रा°).

अवस्करप्रणालाभाः पृष्ठे क्षितमधःपथैः ।
शौचपाथ इव क्षिप्रमुज्झन्ति मधुनिर्झरम् ॥ २८६ ॥

नक्तमातोद्यवाद्यज्ञैस्तैः सार्धं कृतसेवनः ।
चारणो वेणुवाद्यज्ञो योषितो धर्षयन् हठात् ॥ २८७ ॥

कनकाख्ये मदोद्दामे क्रुद्धे हलधरात्मजे ।
स्तम्भे निबध्य तद्भृत्यैश्छिन्ननासो व्यधीयत ॥ २८८ ॥

यो विटश्चमकोनाम लूनाङ्गोऽमङ्गलावहः ।
शनैर्लेभे स वाल्लभ्यं कौट्टन्यान्नवभूपतेः ॥ २८९ ॥

प्रसादवित्तो भूभर्तुरन्तरे मन्त्रिणामपि ।
लब्धप्रतिष्ठः स प्राप ठक्कुराख्यां नृकुक्कुरः ॥ २९० ॥

प्रथां प्रातस्त्रपाहेतुं स भञ्जन् वंशमञ्जसा ।
प्रागेव नासावंशस्य भञ्जनं बह्वमन्यत ॥ २९१ ॥

तेनोद्दीपितदौश्शील्यः स यच्चक्रे त्रपोज्झितः ।
अवाच्यमपि वृत्तान्तं मध्यपातात् तदुच्यते ॥ २९२ ॥

कल्हनाख्या स्वसा राज्ञो नागाख्या च तदात्मजा ।
परदारप्रसक्तेन संभोक्तुं नावशेषिता ॥ २९३ ॥

तमुदन्तं सपत्नीको बुद्धवान् वृद्धभूपतिः ।
न प्रत्यभैत्सीत् त्रपया तस्थौ तु निभृतव्यथः ॥ २९४ ॥

भिक्षुको धान्यमुष्टीनामोवनाग्रामजो द्विजः ।
योऽप्यभूद् ग्रामदैवज्ञो वैधेयो लोष्टकाभिधः ॥ २९५ ॥

---

286. b) SA_1 (before corr.) क्षिप्रम° (for क्षिप्तम°).
287. d) All Mss. except D (after suggestion) read योषितां (for योषितः suggested). S′ हर्षय° (for धर्षय°).
288. S′ om. *vv.* 288—345. —a) P_1 कनकाख्यो (for कनकाख्ये).
289. c) D वात्सल्यम् (for वाल्लभ्यं). —d) P_2 कौटल्या°; SA_1 (before corr.) कौढल्या° (for कौट्टन्या°).
291. a) SA_1 P_2 कथामाप्तो (for प्रथां प्राप्तः).
292. b) P_2 SA यश्चक्रे (for यच्चक्रे).
295. a) St SA SR SG I_3 भिक्षकः; SL भिक्षाकः (for भिक्षुकः). —b) P_2 ओवनग्राम°; SA_2 gloss उयन् नाम ग्रामः (for ओवनाग्राम°).

स ग्रामक्षेत्रपालस्य प्रसादात् पर्यटन्निशि ।
वस्तूनां मुष्टिबद्धानां विज्ञानान्मुष्टिलोष्टकः ॥ २९६ ॥

परां प्रसिद्धिं संप्राप्तो नवक्ष्मापस्य रागिणः ।
आसीद् गुरुत्वकौट्टन्यदैवज्ञत्वैरतिप्रियः ॥ २९७ ॥

भट्टारकमठाधीशः साधुर्व्योमशिवो जटी ।
खुर्खुटाख्याधिकरणे गृहीतनियतव्रतः ॥ २९८ ॥

अन्धगान्धर्विकान्मम्मनाम्नः स्वार्चनसेवकात् ।
अवन्तिपुरजं हस्तग्राहकद्विजचेलकम् ॥ २९९ ॥

परिभ्रष्टमुपादत्त लालितत्वेन यं पुरा ।
स तेन वारिताशस्तभङ्गासूत्रमयाम्बरः ॥ ३०० ॥

विसृज्यमानः पुष्पाणि ग्राहयित्वा नृपान्तिकम् ।
मदनो नाम वाचालः प्रपेदेऽत्यन्तरङ्गताम् ॥ ३०१ ॥

शनैः कौट्टन्यदुर्गोष्ठीमध्यपातं समाश्रयन् ।
... ... ॥ ३०२ ॥

तैश्चान्यैश्च विटैश्चाटुकारैः क्षिप्रविमोहितः ।
दोषानपि गुणान् मेने कलशः कलुषीकृतः ॥ ३०३ ॥

नर्म ह्रेपणकारि वाक्यमुचितं कृत्यं प्रजापीडनं
तेजस्वित्वमलज्जता सरसताऽगम्याङ्गनासंगमः ।
सारल्यं खलगालिदानसहनं येषां न तत्सन्निधौ
किंचित्कर्म कुकर्म दोष इति यद्विज्ञाय संत्यज्यते ॥ ३०४ ॥

---

296. a) C °संग्राम° (for स ग्राम°).
297. After this *v.* तिलकम् .
298. a) SA_3 gloss भ्रडीमड् (for भट्टारकमठा°).
299. SA_1 om. *cd*. —a) C °न्मर्म्म° (for °न्मम्म°). —b) C °सेवकान् (for °सेवकात्).
300. b) SA_4 gloss मदनं वक्ष्यमाणं (for यं); —c) SA_4 gloss व्योमशिवेन (for तेन).
301. St reads *cd* of the *v.* 301 as *ab* of the *v.* 302 as per SA_1 which indicates the omission of 301 *cd*.
302. All the Mss om. *cd* of this *v.* and P_2 filled the same with *cd* of the *v.* 299. After this *v.* D (before suggestion) St add चक्कलकम् (for कुलकम् suggested).
303. b) P_2 °विमोहिताः (for °विमोहितः).
304. a) P_3 प्रजापीडने (for प्रजापीडनं).

राजा चौर्यरतौत्सुक्यात् प्रतिगेहं परिभ्रमन् ।
स्वदाराऽऽलिङ्गनैः प्रीतिं क्षणदासु न लब्धवान् ॥ ३०५ ॥

पारतन्त्र्यकृतापारप्रीतिः परवधूरतिः ।
अभिलाषाऽनलोत्सेके रागभाजां घृताहुतिः ॥ ३०६ ॥

तान् कुट्टनान् पुरस्कृत्य पञ्चषानेकदा नृपः ।
जिन्दुराजगृहं प्रायात् स रात्रौ चौर्यकामुकः ॥ ३०७ ॥

तत्राऽऽसीज्जिन्दुराजस्य स्नुषा परमपुंश्चली ।
स्वगृहे दत्तसंकेता नक्तं कलशभूभुजः ॥ ३०८ ॥

प्रविशन्तमधावंस्तं भषद्भिः सूचितं श्वभिः ।
धृतासयो गृहद्वारं चण्डालाश्चौरशङ्किताः ॥ ३०९ ॥

तान् हन्तुमुद्यतान् दृष्ट्वा तं क्षितौ पतितं भयात् ।
पृष्ठन्यस्तस्त्रवपुषो ररक्षुरनुयायिनः ॥ ३१० ॥

तेभ्यः स मुष्टिघातादि ददद्भ्यः कथमप्यभूत् ।
मैवं कलशदेवोऽयमित्युक्त्वा त्याजितो निजैः ॥ ३११ ॥

घ्राणहीनं पुरस्कृत्य नारीमभिससार यत् ।
तदेव कामिनस्तस्य नूनमासीदमङ्गलम् ॥ ३१२ ॥

स निर्यातो गृहात् कान्ताकटाक्षविवशीकृतः ।
पथि कालीकटाक्षाच्च दैवान्न प्रलयं ययौ ॥ ३१३ ॥

निजचित्तापराधेन कुर्वन् नीतिव्यतिक्रमम् ।
अस्पृश्येभ्यः परिभवं भूपालोऽप्युपलब्धवान् ॥ ३१४ ॥

---

306. d) $P_{2,3}$ रागभाजा (for रागभाजां).
307. a) SA_1 (before corr.) तान्कुट्टनात् (for तान् कुट्टनान्).
309. c) P_3 धृतामयो (for धृतासयो).
311. c) P_{1-3} I_3 दैवं (for मैवं).
312. a) I_3 प्राणहीनं; SA_4 gloss चंमकं विटं (for घ्राणहीनं). —c) P_2 तदैव (for तदेव).
313. c) SG *sec. manu* C P_{1-3} I_3 St D कालीकटाक्षाच्च (for कालकटाक्षाणाम् cf. SL St Tr.).

इन्द्रियैरिन्द्रचन्द्राद्या ह्रेपिता यैः सुरा अपि ।
अपरिम्लानमानत्वं तैर्मर्त्यस्याऽथवा कथम् ॥ ३१५ ॥

प्रागुन्मीलति दुर्यशः सुविषमं गर्ह्योऽभिलाषस्ततो
धर्मः पूर्वमुपैति संक्षयमथो श्लाघ्योऽभिमानक्रमः ।
सन्देहं प्रथमं प्रयात्यभिजनं पश्चात् पुरोजीवितं
किं नाऽभ्येति विपर्ययं विगलने शीलस्य चिन्तामणेः ॥३१६॥

राजधानीमवाप्तस्य दुश्शीलस्य महीपतेः ।
क्षपायामेव तां वार्तां पितरावधिजग्मतुः ॥ ३१७ ॥

तौ रुदित्वा सुतस्नेहलज्जाशोकान्वितौ चिरम् ।
निश्चयं बन्धने तस्य सदोषस्य प्रचक्रतुः ॥ ३१८ ॥

सर्वविद्यानिधिं ज्येष्ठं नप्तॄणां वप्पिकात्मजम् ।
हर्षं राज्ये चिकीर्षू च निन्यतुस्तां निशीथिनीम् ॥ ३१९ ॥

आकारितस्ततस्ताभ्यां प्रातः कलशभूपतिः ।
ऊचे विजजयानन्दौ साशङ्को जनकाद्भयम् ॥ ३२० ॥

तन्मतेन जयानन्ददत्तहस्तः कथंचन ।
अन्वीयमानो विजेन स पित्रोः प्राविशद् गृहम् ॥ ३२१ ॥

पिता प्रविष्टमात्रं तं वक्त्रे दत्तचपेटकः ।
अभाग्यभागिञ्जहिहि क्षुरिकामित्यथाऽब्रवीत् ॥ ३२२ ॥

एनं त्रासविसूत्राङ्गसंधिमालम्ब्य पाणिना ।
सावष्टम्भं स्पृशञ्शस्त्रं विजो राजानमब्रवीत् ॥ ३२३ ॥

---

315. a) P_2 °चन्द्राद्यैः (for °चन्द्राद्या).

316. a) P_2 °न्मीलितदुर्यशः (for °न्मीलति दुर्यशः). —b) P_2 श्लाघ्योऽतिमान° (for श्लाघ्योऽभिमान°). —c) C P_{1-3} I_3 St D पुनर्जीवितं (for पुरोजीवितं cf. SL St Tr.).

320. c) SA_3 gloss जयानन्दः नागपुत्रः तुङ्गभ्रातृपुत्रः (for जयानन्द-). —d) P_2 C साशङ्कौ (for साशङ्को).

322. a) P_3 ते (for तं).

राजन् मानवतां धुर्यो भवन्नपि भवान् कथम् ।
नाऽत्याज्यं मानिनां वेत्ति मानग्रहमहाव्रतम् ॥ ३२४ ॥

गृहीतवेतनेनाऽयं राजपुत्रेण शस्त्रिणा ।
सङ्कटेऽस्मिन् मया स्वामी जीवता त्यज्यते कथम् ॥ ३२५ ॥

पिता भवानयं पुत्रः क्षणेऽन्यस्मिन् महीपते ।
मय्यसन्निहितेऽमुष्य यद्योग्यं तद्विधीयताम् ॥ ३२६ ॥

मुग्धं विमोह्य नृपतिं वचोभिः स्निग्धकर्कशैः ।
विज्जः स्वामिनमादाय निराक्रामत्तदन्तिकात् ॥ ३२७ ॥

विज्जस्यापूजयन् धीरास्तद्धैर्यमतिमानुषम् ।
अनन्तदेवस्याऽप्यग्रे यदेवं स व्यजृम्भत ॥ ३२८ ॥

चण्डी नरपतेः पत्नी भाव्यर्थबलवत्तया ।
अत्याज्यजपमौनस्था तस्मिन्नवसरेऽभवत् ॥ ३२९ ॥

सा चेदासिष्यतोद्युक्ता नाऽभविष्यत्तदेतरत् ।
नियमात् सर्वनाशाद् वा बन्धनात् कलशस्य वा ॥ ३३० ॥

ततो विज्जेन कलशः सत्वरेण प्रवेशितः ।
त्रस्यन् दिल्हाभिधानाया वल्लभाया निवेशनम् ॥ ३३१ ॥

शिरोर्तिरस्य संजातेत्युक्त्वा भीतं पतिं व्यधात् ।
सा प्राज्ञा ज्ञातवृत्तान्ता तैलेनाऽभ्यक्तमस्तकम् ॥ ३३२ ॥

व्याजेन तेन सर्वस्य संप्रवेशं निषिध्य सा ।
पतिं जुगोप विन्यस्य विज्जं द्वारस्य रक्षणे ॥ ३३३ ॥

ततः समाधेर्विरता राज्ञी निर्भर्त्स्य भूपतिम् ।
कुशलान्वेषणमिषात् तनयस्याऽन्तिकं ययौ ॥ ३३४ ॥

---

324. c) SA_1 (before corr.) P_3 I_3 न त्याज्यं (for नाऽत्याज्यं).
328. d) P_2 विजृम्भत (for व्यजृम्भत).
329. a) SA_1 om. ण्डी नरपतेः with a space. —d) SA_1 om. न्नवसरेऽभवत् with a space.
330 a) SA_1 om. सिष्यतो with a space. P_3 °शिष्यतो° (for °सिष्यतो°). —cd) SA_1 om. र्वनाशाद्वा बन्ध with a space.
332. b) P_1 भीतिं (for भीतं).

बन्द्धुं बद्धोद्यमो राजा तथैव प्रययौ यदा।
दत्तप्रवेशो विजेन तदैकाक्येव सोऽभवत् ॥ ३३५ ॥

निषेधादनुगन्तॄणां ततः क्रुद्धो धराधवः।
रुषित्वा विजयक्षेत्रं गन्तुं प्रावर्ततोद्धतः ॥ ३३६ ॥

तं प्रयान्तं सपत्नीकं प्राप्तं पद्मपुरान्तिकम्।
अवोचन्नेत्य तत्रस्था विश्शावट्टादयो द्विजाः ॥ ३३७ ॥

अधिकारं स्वयं त्यक्त्वा राजन् किमनुतप्यसे।
कृतस्याऽनुशयो युक्तो न सतो नाऽसतोऽपि वा ॥ ३३८ ॥

न च ते दुर्मतौ त्यक्ताः प्रजा एता मयेत्यपि।
ध्यात्वा सूनोः समुचिता कर्तुं दुष्टस्य वाच्यता ॥ ३३९ ॥

न यन्त्रपुत्रकस्येव शक्तिः काऽपि हि भूभुजः।
भवेत् साधुरसाधुर्वा स प्रजानां शुभाऽशुभैः ॥ ३४० ॥

उज्झन्ति यत् पयोवाहा जलानि तडितोऽथवा।
वनस्पतीनां सदसत्कर्मपाकस्य तत्फलम् ॥ ३४१ ॥

यच्चाऽपथस्थितं पुत्रं त्यक्त्वेच्छस्यासितुं सुखम्।
कोशं त्यक्त्वा प्रस्थितस्य घटते तत् कथं तव ॥ ३४२ ॥

धाराधिरूढसामर्थ्यः सद्वंशः शुचिमानपि।
संस्पृश्यते क्षीणकोशः कृपाण इव कैः पुमान् ॥ ३४३ ॥

---

335. a) St बद्धुं (for बन्द्धुम्). D व्यद्धो°; C व्यधामो (for बद्धोद्यमो). C राजनं (for राजा).

337. d) SA $P_{1,2}$ विश्वा°; I_3 बिर्चा° (for विश्शा°). P_1 °वद्वा° I_3 °वट्ट° (for °वट्टा°).

338. c) All St Mss. except SA_3 om. कृतस्या.

339. a) SA_1 (before corr.) त्यक्त्वा; $P_{2,3}$ त्यक्तः (for त्यक्ताः). SA_3 gloss दुर्मतौ दुष्टबुद्धिविशिष्टे पुत्रे मया एताः प्रजाः त्यक्ताः। पुत्र एव राज्यस्थापनादित्यपि ध्यात्वा दुष्टस्य वाच्यता निन्दा कर्त्तुं न समुचिता ते···त्यन्वयः (for *v.* 339).

341. a) P_{1-3} °वाहो (for °वाहा). —b) P_3 °तो यथा (for °तोऽथवा).

342. a) P_2 I_3 यश्चापथ°; P_3 यश्चापथं (for यच्चाऽपथ°). —c) SA_3 gloss भाण्डागारं (for कोशं).

343. a) P_3 धरा° (for धारा°).

श्रुत्वेत्यैच्छन्नृपो यावत् प्रत्यावृत्तिं विचारवान् ।
तावत् स पुत्रेणाऽभ्येत्य सभार्येण प्रसादितः ॥ ३४४ ॥

अथ प्रविश्य नगरं स प्रसादापवर्जिताम् ।
अशान्तमन्युरादाय लक्ष्मीं भूयो विनिर्ययौ ॥ ३४५ ॥

हयायुधतनुत्रादि स्वयं स्वीकृत्य निर्गतः ।
देवीं प्रतीक्षमाणोऽस्थात् सरित्पारे ततः क्षणम् ॥ ३४६ ॥

नानाप्रकारानारोप्य कोशान् नौषु नृपाङ्गनाः ।
नाऽयश्शङ्कूनपि गृहे निर्यान्त्यः पर्यशेषयन् ॥ ३४७ ॥

अज्ञातवार्तः प्राक् तूष्णीं तत्प्रस्थानेऽभवद् जनः ।
ज्ञातवार्तस्तदा त्वासीदाक्रन्दमुखराननः ॥ ३४८ ॥

प्रतिमोक्तुं पुरे ताभ्यां दत्तपुष्पाञ्जलौ जनः ।
बाष्पबिन्दुमिषादौज्झीद् दीर्घानर्घकणानिव ॥ ३४९ ॥

हा मातर्हा पितः क्वेत्थं गच्छतः परिदेवितात् ।
इत्यस्मादपरः शब्दो मार्गेषु न तदा श्रुतः ॥ ३५० ॥

मार्गेऽन्तरान्तराक्रन्दविरतौ निर्झरध्वनिः ।
शैलानां शोकनिश्श्वासशूत्कार इव शुश्रुवे ॥ ३५१ ॥

तयोराक्रन्दितैः शश्वत् पथि संजातसंस्तवौ ।
कर्णौ शून्येऽप्यश्शृणुतामाक्रन्दितमिवाऽसकृत् ॥ ३५२ ॥

पुत्रागसा तादृशौ तौ दृष्ट्वा मार्गे द्रुमौकसाम् ।
खगानां शावभरणमपि लोको व्यगर्हत ॥ ३५३ ॥

तयोः पुत्रानयोत्तप्तचेतसोर्विजयेश्वरः ।
मनःप्रसादं सन्दृष्टः स्निग्धबन्धुरिवाऽकरोत् ॥ ३५४ ॥

---

345. b) St प्रासादा°; P_{1-3} SA_1 प्रसादा° (for प्रमादा°). P_2 °वर्जितम् (for °वर्जिताम्).
346. cd) SA_1 (before corr.) P_3 °स्था सरि° (for °स्थात् सरि°).
348. c) SA_1 (before corr.) °स्तदाप्यासी° (for °स्तदा त्वासी°). —d) P_3 °मुखुराननः (for °मुखराननः).
353. c) SA_2 gloss शावाः पोताः तेषां भरणं पोषणं (for शावभरणं).

तत् तत्र भाण्डागाराश्वभृत्याद्यावसथार्पणैः ।
संविधानक्रियाभिश्च व्यग्रयोरगमद् दिनम् ॥ ३५५ ॥

देशे कोशोपकरणपूर्णगोणीगणावृते ।
आसन्निन्धनगण्डालीच्छन्नरथ्यां इवाऽऽपणाः ॥ ३५६ ॥

तन्वङ्गराजतुङ्गादिज्ञातिपुत्रा नृपात्मजाः ।
तं सूर्यवर्मचन्द्राद्या डामराश्चाऽनुवव्रजुः ॥ ३५७ ॥

डामरान् क्षीरभूपादीन् राजा नौनगरादिषु ।
स्थानेषु स्वेषु निक्षिप्य रक्षित्वे गुप्तिमानभूत् ॥ ३५८ ॥

विश्रान्तसर्वचित्तस्य श्रीमतोऽनन्तभूपतेः ।
प्रावर्तन्तोत्सवैर्गन्तुं दिनानि विजयेश्वरे ॥ ३५९ ॥

राजपुत्रहयारोहशस्त्रिडामरमण्डलैः ।
कृत्स्नैरेव स्थितिर्बद्धा सविधे वृद्धभूभुजः ॥ ३६० ॥

वत्सरे पञ्चपञ्चाशे ज्येष्ठे मासि विनिर्गतः ।
आसाद्य विजयक्षेत्रं स स्वर्गसुखमन्वभूत् ॥ ३६१ ॥

कलशस्तु गते राज्ञि प्राप वीतवसुं महीम् ।
रक्षाहौ चलिते यातरत्नां निधिमहीमिव ॥ ३६२ ॥

स्वराज्यमुज्ज्वलीकर्तुं रिक्तोऽपि विहितोद्यमः ।
चक्रे संमन्त्र्य विजाद्यैः सम्मतानधिकारिणः ॥ ३६३ ॥

तेन सर्वाधिकारेषु जयानन्दो नियोजितः ।
द्वारे वराहदेवश्च वितस्तात्रपुरोद्भवः ॥ ३६४ ॥

---

355. a) C S' °गाराश्व (for °गाराऽश्व°).
356. c) SA_2 gloss गण्डाल्यः गण्य इति भाषया (for गण्डाली).
357. a) SA_1 (before corr.) °गुङ्गा° (for °तुङ्गा°).
358. c) P_2 ह्येषु (for स्वेषु).
359. a) S' °चित्तस्य; D and St Tr. suggest °चिन्तस्य (for °चित्तस्य).
361.) d) SA_2 gloss अनन्तदेवः (for स). SA_2 gloss स्वर्गसुखं परमानन्दं न तु मृतिम् (for स्वर्गसुखं).
362. b) SA_3 gloss धनरहितां (for वीतवसुं).
364. d) SA_3 gloss वितस्तात्रं नाम यत्पुरं तस्मादुद्भवो यस्य स वितस्तात्रपुरोद्भवः (for वितस्तात्रपुरोद्भवः).

यो ह्यम्बराधिकार्यासीज्जिन्दुराजस्य कम्पने ।
राज्ञा विजयमित्रः स कम्पनाधिपतिः कृतः ॥ ३६५ ॥

यथाऽधिकारमन्यांश्च विनिधायाऽधिकारिणः ।
राजाऽर्थचिन्तामारेभे संरब्धः पितृविग्रहे ॥ ३६६ ॥

जयानन्दः पदातीनां चिकीर्षुरथ संग्रहम् ।
यत्नादनुचितेभ्योऽपि धनिकेभ्योऽग्रहीद् ऋणम् ॥ ३६७ ॥

स्वीकृत्य पत्तीन् विज्जादिराजपुत्रगणान्वितः ।
अथाऽवन्तिपुरं प्राप योद्धुं वृद्धनराधिपम् ॥ ३६८ ॥

अभ्यर्थ्य कारितो वेलां राज्ञा काराविनिर्गतः ।
शिमिकावर्त्मना योद्धुं जिन्दुराजो विनिर्ययौ ॥ ३६९ ॥

तेषामुद्योगमाकर्ण्य क्रुद्धा वृद्धमहीभुजम् ।
स्वे डामराश्ववाराद्याः संरम्भादुपतस्थिरे ॥ ३७० ॥

अजायत न्यस्तगुडक्रीडत्तुरगमण्डला ।
शस्त्रैः सत्राटवी कृत्स्ना सङ्कटा विजयेश्वरे ॥ ३७१ ॥

ततः सूर्यमती यत्नात् पत्तिं परमकोपनम् ।
ययाचे पुत्रवात्सल्यादयुद्धं दिवसद्वयम् ॥ ३७२ ॥

अत्याप्तानथ मन्त्र्यादीन् द्विजान् निशि विसृज्य सा ।
तन्मुखेनाऽतिवात्सल्यादिदमूचे रहः सुतम् ॥ ३७३ ॥

विनाशशंस्ययं पुत्र कंस्ते मतिविपर्ययः ।
तीव्रशौर्येण पित्राऽद्य यदेवं योद्धुमिच्छसि ॥ ३७४ ॥

यस्य भ्रूभङ्गमात्रेण दरद्राजादयो हताः ।
तत्प्रकोपानले कस्मादीहसे शलभायितुम् ॥ ३७५ ॥

---

365. c) SA_3 gloss कलशेन (for राज्ञा).
369. a) S' अभ्यर्थकारि° (for अभ्यर्थ्य कारि°).
370. d) SA_1 om. संरम्भा with a space.
371. c) SL छत्रछायाटवी (for शस्त्रैः सत्राऽटवी).
375. d) SA_1 (before corr.) °दीशिषे (for °दीहसे).

अस्मिंस्तु वीतिमारूढे वीतिहोत्रसमे नृपे ।
कस्त्राता स्यात् त्वदीयानां तृणानामिव शस्त्रिणाम् ॥ ३७६ ॥

सेनाङ्गैः कतमैः केन शौर्येण कतमैर्धनैः ।
भवान् शक्तिमतां धुर्यं योद्धुमेनं प्रधावति ॥ ३७७ ॥

दैवात् संत्यक्तमेतेन भुङ्क्ष्व राज्यमखण्डितम् ।
पित्रा तीर्थोपविष्टेन किमिवाऽपकृतं तव ॥ ३७८ ॥

द्वैधेच्छुभिः पात्यमानो व्यसनेऽस्मिन् सुदारुणे ।
प्रयास्यसि दिनैरेव रिक्तोऽप्यत्यन्तरिक्तताम् ॥ ३७९ ॥

नय सेनाः पितुर्भीतिर्जीवन्त्यां मयि नास्ति ते ।
ऋजुमेनं नयार्द्रत्वं प्रत्युताऽनुनयोक्तिभिः ॥ ३८० ॥

इति दूतमुखैर्गूढं पुत्रो मात्रा कृतार्थनः ।
सर्वाशाभ्योऽनयत् सैन्यं रात्रावेव निजान्तिकम् ॥ ३८१ ॥

श्रुतापसारं सैन्यानां दूतैश्चैत्य प्रसादितम् ।
उपालेभे पतिं प्रातर्धृष्टा प्रत्युत वल्लभा ॥ ३८२ ॥

राज्ञ्या मिथस्तयोरेवं शमिताऽऽक्षेपयोरपि ।
पिशुनप्रेरणात् प्राप कालुष्यां धीः क्षणे क्षणे ॥ ३८३ ॥

वैरस्य रूपमेतद्धि भेदं याति मुहुर्मुहुः ।
संधीयमानमपि यत्क्लिन्नाम्बरमिवाऽऽशयम् ॥ ३८४ ॥

---

376. a) SA_3 gloss अश्वं (for वीति). —c) C कस्त्राता च त्वदी°; S′ कस्त्राताऽद्य त्वदी° (for कस्त्राता स्यात् त्वदी°).

379. b) P_3 °चारुणे (for °दारुण).

380. b) C S′ मे (for ते). —c) P_2 I_3 ऋजुसेनं (for ऋजुमेनं). St (before suggestion in Tr.) D P_{1-3} I_3 नयस्वार्द्रम्, SL नयान्द्रत्वम्; S′ नयस्वार्हं (for नयार्द्रत्वम् suggested).

382. d) P_{1-3} °वृष्टा (for °धृष्टा).

383. a) SA_3 gloss अनन्तकलशयोः (for तयोः). —b) P_{1-3} °येरिव (for °योरपि).

384. a) SA_1 om. रूप with a space.

बाह्याल्यादौ सुतोदन्तं श्रुत्वा तप्ताशयो नृपः ।
गृहं प्रविष्टो धृष्टस्त्रीभाषितैर्जडतां ययौ ॥ ३८५ ॥

एवं प्रतिदिनं तप्तस्त्यक्तताप: प्रतिक्षपम् ।
स्वच्छाशयः शरत् तुच्छतडाकौपम्यमाययौ ॥ ३८६ ॥

चकार पितृपक्ष्याणां पुत्रो वेश्मादिनाशनम् ।
पिता तु पुत्रपक्ष्याणां न किंचित् स्त्रीवशीकृतः ॥ ३८७ ॥

पुत्रस्नेहान्धया पत्न्या बाधितैश्चाऽनुयायिभिः ।
रूक्षोक्तिभिस्ताप्यमानस्तस्थौ दुःस्थः सदा नृपः ॥ ३८८ ॥

राज्यं जिहीर्षुः पुत्रस्य निश्शूरं तद्बलं विदन् ।
ईषत् स जिन्दुराजस्य गणनां पौरुषेऽकरोत् ॥ ३८९ ॥

पुत्रात् जिहीर्षुणा राज्यं तेन तन्वङ्गनन्दनाः ।
प्रार्थ्यन्ते स्म यदा राज्यकृतये तत्पराङ्मुखाः ॥ ३९० ॥

सम्प्रेर्य तं तदा रात्रौ स्वान्वयाशर्मशङ्किनी ।
हर्षं देवी नृपं कर्तुं दूतैराहूतवत्यभूत् ॥ ३९१ ॥

स पितामहयोर्दूतैराहूतः साहसोन्मुखः ।
बाह्याल्यां निर्गतः सज्जै रक्ष्यमाणोऽपि रक्षिभिः ॥ ३९२ ॥

दत्तपार्ष्णिकषाघातः क्षणार्धेनोदलङ्घयत् ।
मनोजवेनाऽभग्नौजा वाजिना पञ्चयोजनीम् ॥ ३९३ ॥

वाजिनं विजिताभ्यासमनुगन्तुं समुद्यताः ।
अगच्छन् बहवो मार्गे दीनाः सेनाहयाः श्रमम् ॥ ३९४ ॥

---

385. a) SA_1 (before corr.) बाह्याला°; C बाह्यात्पा°; P_2 बाह्याल्पा; S' बाह्यात्या° (for बाह्याल्या°).
386. P_2 reads this *v.* in mar. —b) C S' प्रतिक्षणम् (for प्रतिक्षपम्). —c) SA_1 om. तुच्छ with a space.
387. a) D C S' $P_{1,2}$ °तृपक्षाणां (for °तृपक्ष्याणां). —c) D C S'_1 $P_{1,2}$ °त्वपक्षाणां (for °त्वपक्ष्याणां).
388. b) C S' बाधित° (for बाधितै°). —d) SA_1 तदा (for सदा).
390. b) P_3 I_3 °नन्दनः (for °नन्दनाः). —c) All Mss. except SL read तदा (for यदा).
392. a) SA_2 gloss पितामहपितामह्योः (for पितामहयोः).

प्रातस्य पादयोस्तस्य पतितस्य पितामहौ ।
आनन्दाश्रुजलस्यन्दैरभिषेकं प्रचक्रतुः ॥ ३९५ ॥

पुत्रे तन्निकटं प्राप्ते कलशः कम्पिताशयः ।
अप्रियाचरणात् पित्रोः संधित्सुः स न्यवर्तत ॥ ३९६ ॥

स तस्य नगरात् पत्रीः पार्श्वं प्राज्ञो व्यसर्जयत् ।
अकरोद् विप्लुते राष्ट्रे स्वभेदस्याप्रकाशनम् ॥ ३९७ ॥

एवं प्रवर्तमानेऽपि वैरे कलशभूपतिः ।
कंचित्कालं मते मातुरवर्तिष्ट मनागिव ॥ ३९८ ॥

खशालीः कलशादेशाद् यियासोः कम्पनापतेः ।
तया प्रावर्तितनतेर्मार्गं संत्याजितः पतिः ॥ ३९९ ॥

अत्रान्तरे शमयितुं वैरं देशोपघातकृत् ।
तावुद्दिश्य पितापुत्रौ द्विजाः प्रायं प्रचक्रिरे ॥ ४०० ॥

सन्धिबन्धे समुत्पन्ने ततस्तदनुरोधतः ।
दम्पती संप्रविष्टौ तौ सार्धं मासद्वयं पुरम् ॥ ४०१ ॥

जयानन्दादिबुद्ध्याऽथ बुद्ध्वा बन्धोद्यतं सुतम् ।
भूयोऽपि ययतुः खेदान्निर्गत्य विजयेश्वरम् ॥ ४०२ ॥

तस्याऽश्वघासकूटानि पुत्रो रात्रावदाहयत् ।
व्यापादयत् पदातींश्च विषशस्त्राग्नियुक्तिभिः ॥ ४०३ ॥

तथा प्रवर्धमानेऽपि विरोधे सत्यरोधयत् ।
वात्सल्यविवशा राज्ञी भर्तुः प्रतिचिकीर्षितम् ॥ ४०४ ॥

---

397. a) S′ °त्पित्रोः (for °त्पत्रीः).

398. a) St C S′ प्रवर्धमा° (for प्रवर्तमा°); —d) P_3 °वातिष्टन्म° (for °वर्तिष्ट म°).

399. b) C S′ °देशान्यिया° (for °देशाद् यिया°). —a) All Mss. except SL read खशाला: (for खशाली: cf. Tr.).

400. d) P_2 द्विज: (for द्विजा:).

403. b) P_1 om. दाहयत्.

404. a) D (before suggestion) C S′ P_{1-3} तया (for तथा).

लुड्डाभिधाऽभूत् कैवर्तबन्धकी तद्विधेयधीः ।
थक्कडामरनामा च तज्जारः खलतिस्तदा ॥ ४०५ ॥

स तन्नाम्नैव दुष्टात्मा कथ्यमानौ समीपगैः ।
शुश्राव पितरौ नित्यं लीलास्मितसिताननः ॥ ४०६ ॥

तौ दम्पती पुनर्हेमतुलापुरुषयुग्मदौ ।
चित्राभिर्धर्मचर्याभिर्मनस्तापममुञ्चताम् ॥ ४०७ ॥

यदा पुनस्तयोर्दार्ढ्यमाढ्यत्वात् न व्यहीयत ।
तदा सेर्ष्यः स दुष्पुत्रो रात्रौ वह्निमदापयत् ॥ ४०८ ॥

तेनाऽग्निनोर्वरीशस्य सर्वोपकरणैः समम् ।
भस्मावशेषमभवद् विजयेश्वरपत्तनम् ॥ ४०९ ॥

सर्वनाशशुचा दीना राज्ञी मर्तुं समुद्यता ।
तन्वङ्गपुत्रैश्चक्रुषे कथंचिज्ज्वलतो गृहात् ॥ ४१० ॥

त्यक्त्वांशुकानि शय्याभ्यो निशायां सुप्तमुत्थितम् ।
निश्शेषं राजसैन्यं तदजायत दिगम्बरम् ॥ ४११ ॥

तद्राजधानीसौधाग्रात् पश्यन् कलशभूपतिः ।
तोषादनृत्यत् ज्वालौघैर्गगनालिङ्गिभिः समम् ॥ ४१२ ॥

अतरन्नष्टसर्वस्वः स पारं सरितो नृपः ।
निममज्ज सजानिस्तु दुस्तरे शोकसागरे ॥ ४१३ ॥

संप्राप्य प्रातरप्लुष्टं रत्नलिङ्गं नृपाङ्गना ।
व्यक्रीणात् लक्षसप्तत्या टाकानां पूर्वमीयुषाम् ॥ ४१४ ॥

---

406. c) SA_2 gloss पितराविति पितरौ राजा राज्ञी च राजा थक्कडामरनाम्ना समीपगैः कथ्यमानः राज्ञी च लुड्डाभिधा कैवर्ती नाम्ना कथ्यमाना उपहासार्थमित्यर्थः (for पितरौ). After this *v.* युग्मम् .

407. c) C S′ °र्धन°; P_2 °र्बहु° (for °र्धम°).

411. a) P_3 शय्याद्यै (for शय्याभ्यो).

414 b) SA_1(before corr.) नृपात्मजा; P_2 नृपाङ्गता (for नृपाङ्गना). —c) SA_1 (before corr.) विक्री° (for व्यक्री°). —d) D P_{1-3} जाकानां (for टाकानां). St S′ P_1 I_3 SA_3 पार्श्वमी° (for पूर्वमी°).

क्रीत्वा च प्रददौ पूर्वं भृत्यानां भोजनांशुके।
धनेन तेन निर्दग्धान्यपि धामान्यशोधयत् ॥ ४१५ ॥

भस्मकूटतलात्तावल्लब्धं स्वर्णादि भूभुजा।
कथाऽपि यावतो हन्त ग्रथयत्यद्य कौतुकम् ॥ ४१६ ॥

राजा शून्याटवीभूते पत्तने तत्र सानुगः।
नडत्वग्ग्रथितच्छत्रपटलाच्छादितोऽवसत् ॥ ४१७ ॥

तावत्यप्यर्थसामर्थ्ये चिकीर्षोस्तत्पुरं नवम्।
विना राजोचितामाज्ञां न सिद्धं वृद्धभूपतेः ॥ ४१८ ॥

अदृष्टाभिभवो मातुरानुकूल्यान्नवो नृपः।
परितापं पितुस्तैस्तैर्दुस्सन्देशैः सदाऽकरोत् ॥ ४१९ ॥

निर्बन्धादथ पुत्रेण पर्णोत्सगमनं पिता।
निर्वासनोत्सुकेनोक्तः शश्वद् दूतमुखैर्यदा ॥ ४२० ॥

प्रभवन्त्या यदा चाऽऽसीत् पत्न्या तस्यैव वस्तुनः।
निष्पत्तये प्रेर्यमाणः साऽधिक्षेपं क्षणे क्षणे ॥ ४२१ ॥

तदा जातु रहः कुप्यंस्तान्वङ्गे थक्कने स्थिते।
उवाचाऽनुक्तपूर्वं तामेवं स परुषं वचः ॥ ४२२ ॥

अभिमानो यशः शौर्यं राज्यमोजो मतिर्धनम्।
मया जायाविधेयेन हन्त किं किं न हारितम् ॥ ४२३ ॥

मिथ्योपकरणं नारीर्गणयन्ति नृणां जनाः।
परिणामे तु नारीणां क्रीडोपकरणं नराः ॥ ४२४ ॥

---

415. a) SA_3 D P_{1-3} I_3 C S′ तत्प्र° (for च प्र°).
416. a) D (before suggestion) and all other Mss. except SL read भस्मकूल° (for भस्मकूट°).
417. c) P_2 नरुत्वक्ग्र° (for नडत्वग्ग्र°). —d) D (before suggestion) St P_{1-3} C I_3 °च्छादितेव° (for °च्छादितोऽव°).
418. b) P_3 °स्तत्परं (for °स्तत्पुरं). —c) I_3 S′ राज्ञोचिता°(for राजोचिता°). —d) P_2 सिद्धिं (for सिद्धं).
420. c) P_2 °नोक्ता: (for °नोक्तः).
422. b) All Mss. except SL read °स्तन्वङ्गे (for °स्तान्वङ्गे). After this *v.* तिलकम्.

द्वेषोन्मेषात् प्रसक्ताभिर्विरक्ताभिरसूयया ।
के नाम नाऽत्र कान्ताभिः कृतान्तस्याऽतिथीकृताः ॥ ४२५ ॥

रूपं काश्चिद्बलं काश्चित्प्रज्ञां काश्चिच्च कार्मणैः ।
पुंस्त्वं काश्चिदसून् काश्चिद्भर्तॄणां जह्रुरङ्गनाः ॥ ४२६ ॥

हरन्ति ग्रावभिरिव क्ष्मां पुत्रैरन्यगोत्रजैः ।
मत्ताः पयोधरौन्नत्यात् तरङ्गिण्य इवाऽङ्गनाः ॥ ४२७ ॥

पर्यन्ते वेतनमिमे किं जीर्णैरीदृशैरिति ।
पोषयन्ति सुतान् भर्तॄञ्शोषयन्ति तु योषितः ॥ ४२८ ॥

सर्वकालं विदित्वाऽपि दोषान् योषित्कृतानमून् ।
प्रतिपत्त्यनुरोधेन मयेयं नाऽवधीरिता ॥ ४२९ ॥

प्रभविष्णुर्निहत्येयमैहिकीः सुखसम्पदः ।
परलोकसुखस्याऽऽशामपि हन्तुं ममोद्यता ॥ ४३० ॥

वलीपलितयुक्तस्य नेदीयो मरणावधेः ।
विहाय विजयक्षेत्रं कुत्र गन्तुं ममोचितम् ॥ ४३१ ॥

क्षपाकरकलामौलेः किल्विषक्षपणक्षमा ।
द्वारोपकण्ठसंसेवोत्कण्ठा कुण्ठीभवेत् कथम् ॥ ४३२ ॥

पुत्रो लोकद्वयत्राता कस्याऽन्यस्येदृशो भवेत् ।
तीर्थात् प्रस्थापयन्मां यत्कुपथे मृतमिच्छति ॥ ४३३ ॥

प्रतिभात्यवगीतोयं प्रवादो मेऽद्य चेतसि ।
अनयाऽन्यकुलोद्भूतो यदयं सम्प्रवेशितः ॥ ४३४ ॥

विसंवादिनमाकाराचारैर्बन्धुविरोधिनम् ।
पुत्रं पितुरसंस्निग्धं जानीयादन्यरेतसम् ॥ ४३५ ॥

---

425. b) S′ °विंसक्ता° (for °विरक्ता°). —c) P_2 तत्र (for नाऽत्र).
426. b) S′ कर्मणैः (for कार्मणैः). —c) SA_1 om. दसून्काश्चि with a space.
428. b) S′ om. किं.
430. d) C S′ P_2 °मायि (for °मपि).
434. c) P_2 °न्यत्कुलो° (for °न्यकुलो°).

सुचिराविष्कृताकूतां त्यक्त्वा प्राणाय यन्त्रणाम् ।
एवं वदन् पतिस्तस्याश्चक्रे मर्मसु ताडनम् ॥ ४३६ ॥

गोत्रजस्य पुरः पुत्रोत्पत्तिगुह्ये प्रकाशिते ।
आमृष्टविप्रियालापा साऽभूदधिकलज्जिता ॥ ४३७ ॥

महत्तमस्य पुत्रो हि प्रशस्ताख्यस्य सोऽभवत् ।
विपन्नापत्ययोपात्तस्तयेत्यासीज्जनश्रुतिः ॥ ४३८ ॥

उत्सिक्तभाषितं भर्तुर्योषितो जितभर्तृकाः ।
जानन्त्यन्याङ्घ्रिसंवृत्तशिरस्ताडनसन्निभम् ॥ ४३९ ॥

अतः सा सुदृढं प्रौढिसंस्कारपरुषं वचः ।
प्राकृतप्रमदेवोच्चैरित्युवाच रुषा पतिम् ॥ ४४० ॥

गतश्रीस्तापसो मन्दो जातभाग्यविपर्ययः ।
वृथा वृद्धः क्व किं वाच्यमिति मूढो न वेत्ययम् ॥ ४४१ ॥

स्नात्वोत्थितस्य यस्याऽस्य नाऽभूत् प्रावरणं पुरा ।
लोको जानात्ययं किं न तेन मां प्राप्य हारितम् ॥४४२ ॥

स्वकुलस्त्रीसमुचितं यत्किंचित् मामभाषथाः ।
क्रियते किं न कालोऽयं यत्प्रायश्चित्तसेवने ॥ ४४३ ॥

अकर्मण्यो गतवया देशात् पुत्रेण वारितः ।
पत्न्याऽपि त्यक्त इत्यस्मात् परिवादाद्धि मे भयम् ॥ ४४४ ॥

कुलदोषादिवृत्तान्तगर्भोपालम्भनिर्भरैः ।
वचोभिर्व्यथितस्तस्यास्तस्थौ तूष्णीं यदा नृपः ॥ ४४५ ॥

तदा तस्याऽऽसनप्रान्तनिस्सृतः प्रसरन् बहिः ।
निर्विकाराकृतेर्व्यक्तं ददृशे रक्तनिर्झरः ॥ ४४६ ॥

---

436. a) I_3 सचिरा° (for सुचिरा°). —b) Here the word प्राणाय means प्राणसंबन्धिनीम् i. e. षष्ठ्यर्थे चतुर्थी.
437. c) P_1 असृष्ट° (for आमृष्ट°).
438. The terms महत्तम, महत्तर etc. are official designations, cf. *vv.* vii. 659, 1106, 1170, 1176; viii. 440, 560. —c) S′ C °त्ययायातस्त° (for °त्ययोपात्तस्त°).
439. c) St I_3 S′ °नन्त्यन्त्या°; P_1 °नन्त्यत्या°; P_2 °नन्त्यान्या° (for °नन्त्यन्या°).
440. d) P_2 यतिं (for पतिम्).
442. d) P_2 संप्राप्य (for मां प्राप्य).

संभ्रान्तायां ततो राज्यामपश्यत् थक्कनो रुदन् ।
असिधेनुं गुदे तेन क्रुधा राज्ञा प्रवेशिताम् ॥ ४४७ ॥

ततोऽतिधीरो राजैव तं लज्जाचकितोऽन्वशात् ।
राज्ञो रक्तातिसरणं जातमित्युच्यतां बहिः ॥ ४४८ ॥

विधेया नारीणां तनयनिहिताशेषविभवाः
कृतम्लानौ भृत्ये पुनरुदितविस्रम्भरभसाः ।
नयन्तो गण्यत्वं प्रसभमभियोगैर्लघुमरिं
नयत्यक्ताः क्ष्मापाः प्रलयमुपगच्छन्ति न चिरात् ॥४४९॥

नृपतिर्वाहितहयः शरदातपखेदितः ।
तृष्यन्निपीय धान्याम्बु च्युताऽसृग्जात इत्यभूत् ॥ ४५० ॥

गम्भीरै राजपुरुषैस्तथा वार्ता प्रवर्तिता ।
यथा नाऽबुद्ध वृत्तान्तमेतं कोऽपि बहिर्जनः ॥ ४५१ ॥

वत्सरे सप्तपञ्चाशे पौर्णमास्यां स कार्तिके ।
विजयेशाग्रतो राजा जीवितेन व्ययुज्यत ॥ ४५२ ॥

पत्न्याः पुत्रस्य चोद्वेगैस्त्यक्तो राजा सुखोचितः ।
प्रसार्य पादौ निद्रातुं प्राप सोऽवसरं चिरात् ॥ ४५३ ॥

चुकोपाऽसौ न कस्मैचिच्चुकोपाऽस्मै न कश्चन ।
चक्रे सुखी विमन्युश्च मरणेन महामनाः ॥ ४५४ ॥

संग्रामराजदायादो न कस्यचिदिव प्रियः ।
अंशुकाच्छादितो भूमावनाथ इव सोऽस्वपत् ॥ ४५५ ॥

न प्रियाक्रन्दितैः स्निह्यन्न कुप्यन्नप्रियोक्तिभिः ।
सर्वत्यागी ययौ राजा दीर्घनिद्रारसज्ञताम् ॥ ४५६ ॥

---

447. d) I_3 राज्या (for राज्ञा).
449. c) D (before suggestion) SA_1 S′ C $P_{1,2}$ (°भियोगं ल°) (for °भियोगैर्ल°).
450. b) S′ C शारदातप° (for शरदातप°). —c) SA_2 gloss धान्यं धनिका धान्यवल् इति भाषया । तदम्बु (for धान्याम्बु).
451. After this *v.* युग्मम् .
452. b) SA_1 (before corr.) क्षपान्तिके (for स कार्तिके).
455. d) SA_1 (before corr.) सोऽभवत् (for सोऽस्वपत्).

दाक्षिण्योल्लङ्घनप्रायश्चित्तायेव त्यजन्नसून् ।
कृतज्ञया पतिः पत्न्या ततो निन्ये सनाथताम् ॥ ४५७ ॥

आराजपुत्रचण्डालं देयं प्रत्यहवेतनम् ।
ददौ स्वस्थेव भृत्येभ्यः सा कर्तुमनृणं पतिम् ॥ ४५८ ॥

गृहीतवेतना भृत्याः कोशं सर्वे तया स्वयम् ।
पुरस्ताद् विजयेशस्य नप्तुः क्षेमाय पायिताः ॥ ४५९ ॥

पादन्यस्तशिराः पौत्रो रुदन्नर्पितकोशया ।
मूर्धन्याघ्राय कथितो मा पितुर्विश्वसीरिति ॥ ४६० ॥

उत्थितैव ततो भूत्वा स्वयमात्तलता सती ।
प्रातिहार्यं व्यधाद् भर्तुः कारयन्त्यन्तमण्डनाम् ॥ ४६१ ॥

सादिनां शतमादिश्य नप्तुस्तत्रैव रक्षणे ।
सा पुरः शिबिकारूढमथ प्रास्थापयत् पतिम् ॥ ४६२ ॥

क्षपामेकां दिनार्धं च स्थित्वैवं पतिदेवता ।
प्रणम्य विजयेशानं युग्यारूढा विनिर्ययौ ॥ ४६३ ॥

निर्यान्तौ वीक्ष्य तौ प्रेततूर्यकल्लोलमिश्रितैः ।
लोकस्याऽऽक्रन्दतुमुलैर्भग्ना इव दिशोऽभवन् ॥ ४६४ ॥

विमानस्योत्पताकस्य परिष्कारेषु बिम्बिताः ।
प्रजा राज्ञोऽन्तिके रेजुरनुगन्तुमिवोद्यताः ॥ ४६५ ॥

राज्ञां वितीर्णस्कन्धानां मरुल्लोलाः शिरोरुहाः ।
विमानस्थस्य नृपतेरवहंश्चामरश्रियम् ॥ ४६६ ॥

---

459. P_2 om. *vv.* 458 *d*—459 *a*. —[b]) SA_3 gloss दिव्यं (for कोशं). —[d]) S′ यापिताः (for पायिताः).

461. [a]) SA_1 om. उत्थि with a space. P_2 I_3 उत्थितेव (for उत्थितैव). —[b]) C °माकुलिता; S′ °माकुलता; P_{1-3} I_3 °मातुलता; SA_3 gloss आत्ता गृहीता लता यया (for °मात्तलता). —[c]) SA_3 gloss द्वारस्थत्वं (for प्रातिहार्यं).

462. [c]) All Mss. except SL read पुनः (for पुरः). —[d]) P_{1-3} प्रस्थाप° (for प्रास्थाप°).

466. [a]) St P_{1-3} I_3 °स्कन्दानां; SA_3 gloss वितीर्णाः दत्ताः स्कन्दाः भुजशिरांसि शिविकावाहनार्थं यैः तेषां (for स्कन्धानां).

पश्यन्ती पश्चिमां सेवां सैन्यानां नृपतिप्रिया ।
अस्ताभिलाषिणि दिने प्रपेदे पितृकाननम् ॥ ४६७ ॥

दुस्त्यजात् सुतवात्सल्याद् यद्वा केनाऽपि हेतुना ।
सा बभूव क्षणे तस्मिंस्तनयालोकनोत्सुका ॥ ४६८ ॥

जानन्ती पवनोद्धूतं रजः सेनासमुत्थितम् ।
चकितोत्कण्ठिता साऽभूत् कलशागमनाशया ॥ ४६९ ॥

तस्मिन् क्षणे जनाः केचिदायाता नगराध्वना ।
अङ्ग किं कलशः प्राप्त इति पृष्टास्तया स्वयम् ॥ ४७० ॥

स तु पुत्रः क्षणे तस्मिन् यियासुर्मातुरन्तिकम् ।
दत्त्वा विभीषिकास्तास्ता निरुद्धो द्वैधकारिभिः ॥ ४७१ ॥

ततो गृहीतनैराश्या राज्ञी पुत्रावलोकने ।
सा प्रार्थयित्वा वैतस्तं वारि श्लोकमथाऽपठत् ॥ ४७२ ॥

वैतस्तेन तु तोयेन जठरस्थेन ये मृताः ।
मोक्षं गच्छन्त्यसन्देहं ते यथा ब्रह्मवादिनः ॥ ४७३ ॥

उपनीतं वितस्ताम्बु पीत्वोपस्पृश्य चाऽथ सा ।
एवं शशाप पिशुनान् स्नेहसंक्षयकारिणः ॥ ४७४ ॥

जनितं प्राणहृद्वैरं यैः पुत्रेण सहाऽऽवयोः ।
सान्वयानां क्षयस्तेषां भूयात् परिमितैर्दिनैः ॥ ४७५ ॥

तस्यास्तेनोपतप्तायाः शापेनाऽव्यभिचारिणा ।
क्षिप्रमेव जयानन्दजिन्दुराजादयो मृताः ॥ ४७६ ॥

चक्रे हलधराप्तत्वजातकौलीनशान्तये ।
परलोकं पणीकृत्य युक्त्या च शपथं सती ॥ ४७७ ॥

---

467. a) SA_1 (before corr.) °श्यन्त्यपश्चि° (for °श्यन्ती पश्चि°).

469. a) S′ °नोद्भूतं (for °नोद्धूतं). —d) SA_1 (before corr.) °गमाशया (for °गमनाशया).

472. c) P_{1-3} स (for सा).

474. b) S'_1 C P_{1-3} पीतोप° (for पीत्वोप°).

476. b) P_3 शापेन व्यभि° (for शापेनाऽव्यभि°).

एवं विशुद्धशीलत्वं सम्प्रकाश्य शुचिस्मिता ।
कर्णीरथाददाज्ज्ञम्पां ज्वलिते जातवेदसि ॥ ४७८ ॥

अजायत नभो वह्निज्वालावलयमालितम् ।
तदागमोत्सवे दत्तसिन्दूरमिव निर्जरैः ॥ ४७९ ॥

साक्रन्दैर्न चटत्कारी दुःखोत्तप्तैर्न चोष्मलः ।
परमालेख्यलिखित इव जज्ञे शिखी जनैः ॥ ४८० ॥

गङ्गाधरष्टक्किबुद्धो युग्यवाहश्च दण्डकः ।
तावुद्दा नोनिका वल्गा चेति दास्यस्तदान्वयुः ॥ ४८१ ॥

बप्पटोद्भटयोः कुल्यौ सेनटक्षेमटावुभौ ।
भूपालवल्लभावास्तां वैराग्याद् विजयेश्वरे ॥ ४८२ ॥

भावा यत्र निसर्गभङ्गुरतरास्तिष्ठन्ति नैते चिरं
चेतःकाचघटस्य तस्य घटते दीर्घोऽयमेको गुणः ।
यत्तस्मिन्निहितप्ररूढि न गलत्यायाति न म्लानतां
धत्ते नाऽपचयं चमत्कृतिवचोगीर्वाणगङ्गापयः ॥ ४८३ ॥

एकषष्टिमतिक्रम्य वर्षान् भूपतिरायुषः ।
सपत्नीकः पुरारातिगौरीसायुज्यमासदत् ॥ ४८४ ॥

अथाऽस्थीनि समादाय चतुर्थे दिवसे तयोः ।
पुत्रास्तन्वङ्गराजस्य सर्वे गङ्गां प्रतस्थिरे ॥ ४८५ ॥

पैतामहेन कोशेन परिवारेण चाऽन्वितः ।
पित्रा विरोधं जग्राह हर्षस्तु विजयेश्वरे ॥ ४८६ ॥

---

479. b) C °मिलितम्; S′ °मीलितम् (for °मालितम्). —d) S′ P_2 निर्झरैः (for निर्जरैः).

481. b) SL चण्डकः (for दण्डकः). —c) SL उद्धा (for [उ]द्दा).

482. b) D P_{1-3} C सोनट° (for सेनट°).

483. a) St C S′ यन्त्र° (for यत्र). —b) SA_3 gloss चेतोरूपे काचघटे शीश इति प्रसिद्धे (for चेतःकाचघटस्य). —d) P_2 नापचये (for नाऽपचयं). St °वचो गीर्वा° (for °वचोगीर्वा°).

आद्ये पितापुत्रवैरे पिता श्रीविजयेश्वरे ।
तस्मिन् पुत्रस्तु तत्राऽऽसीत् पिता तु नगरान्तिके ॥ ४८७ ॥
ततोऽतिव्ययिनं पुत्रं दरिद्रो नीतिमान् पिता ।
अभ्यर्थ्याऽनर्थभीतश्च सन्धिं दूतैरयाचत ॥ ४८८ ॥
स तैरसकृदायातैरुत्सिक्तो युक्तवादिभिः ।
राजपुत्रः समं पित्रा संन्धिं निन्ये कथंचन ॥ ४८९ ॥
रक्षां पैतामहे कोशे शरीरे चाऽऽत्मजन्मने ।
प्रतिशुश्राव जनकः कृतप्रत्यहवेतनः ॥ ४९० ॥
नृपतेः पुत्रमानेतुं विशतो विजयेश्वरम् ।
दृष्टिः प्लुष्टैर्गृहैर्दग्धा श्रुतिश्च जनगर्हया ॥ ४९१ ॥
स पीतकोशः संगृह्य तनयं प्राविशत् पुरम् ।
कोशं चाऽस्थापयन्मुद्रां दत्त्वा तदभिधाङ्किताम् ॥ ४९२ ॥
अत्रान्तरे तस्य राज्ञो धार्मिकी धीरजायत ।
दारिद्र्यच्छेदिनी धर्म्या धनवृद्धिश्च सर्वतः ॥ ४९३ ॥
तनयो नयनाख्यस्य कल्यः सेल्यपुरौकसः ।
कुटुम्बिनो जय्यकाख्यः क्रमाद्डामरतामगात् ॥ ४९४ ॥
स्थलोत्पत्तिः स दिग्देशविक्रीतान्नो वणिज्यया ।
संभृतार्थः शनैर्लुब्धो धनेशस्पर्धितां दधे ॥ ४९५ ॥
सार्धं क्रोशं खनित्वा स नित्यं दीनारराशिभिः ।
पूरितायाः क्षितेः पृष्ठे बहून् व्रीहीनवापयत् ॥ ४९६ ॥

---

487. a) D (before suggestion) P_{1-3} I_3 C S′ SA पितापुत्रवरे; SG St पिता पुरवरे (for पितापुत्रवैरे cf. SL St Tr.).
490. b) D suggests °जन्मनः (for °जन्मने).
493. d) St $P_{1,2}$ I_3 धनबुद्धि° (for धनवृद्धि°).
494. b) $P_{1,2}$ I_3 कल्पः (for कल्यः). S′ सैल्यपु°; $P_{1,2}$ I_3 सेल्पपु° (for सेल्यपु°).
495. a) D C P_3 स्थूलोत्पत्तिः (for स्थलोत्पत्तिः). —b) S′ °विक्रीतान्तो (for °विक्रीतान्नो). —d) SA_1 om. शस्प with a space. SA_1 (before corr.) °र्धतामगात्; I_3 °र्धतां दधत् (for °र्धितां दधे).

दीन्नारन्यसनं भृत्यैः कारयित्वा प्रतिक्षपम् ।
बहवो भेदभीतेन तेन गूढं निपातिताः ॥ ४९७ ॥

स भाङ्गिलं लब्धुमिच्छन् बलेऽकस्मात् पलायिते ।
द्राक्षालतानिरुद्धाश्वो हतः केनाऽपि पत्तिना ॥ ४९८ ॥

तदीयेनोपलब्धेन धनेन वसुधातलात् ।
पर्यातेनाऽत्यजद् राजा यावदायुर्दरिद्रताम् ॥ ४९९ ॥

समृत्सु क्षाल्यमानेषु तद्दीन्नारेष्वहर्निशम् ।
कलुषाम्भा बहून् मासान् वितस्ता समपद्यत ॥ ५०० ॥

दानोपभोगरहिताः काले क्लेशेन भूयसा ।
अन्यार्थमर्थान् रक्षन्ति चित्रं लुब्धा महाशयाः ॥ ५०१ ॥

प्राणान् धारयते निपीय मरुतः शेते तमोन्धे बिले
संभोगे परदत्तमिच्छति पटं नग्नस्त्रपाशान्तये ।
विस्तार्येति कदर्यतामहिरवत्यन्यस्य हेतोर्निधी-
न्नाऽन्यः कोऽपि परं परोपकृतिषु प्रौढोऽस्ति लुब्धं विना ॥५०२॥

अन्यैश्च बहुभिर्मार्गैर्नद्यः सिन्धुमिवाऽविशन् ।
नानार्थसंपदस्तास्ता भाग्यभाजं महीभुजम् ॥ ५०३ ॥

अर्था भाग्योदये जन्तुं विशन्ति शतशः स्वयम् ।
दिग्भ्योऽभ्युपेत्य सर्वाभ्यः सायं तरुमिवाऽण्डजाः ॥ ५०४ ॥

स्रोतांसि प्रबलत्वमेत्य वसुधां मूलेषु पुष्णन्त्यधो
व्योम्नोऽम्भः पतति त्यजन्ति हरितो वारि प्रणालीमुखैः ।
इत्थं शुष्कसरः पयोदसमये संपूर्यते सर्वतो
भाग्यानामुदये विशन्ति शतशो द्वारैर्न कैः सम्पदः ॥५०५॥

---

497. b) S′ प्रतिक्षयं; P_2 प्रतिक्षिपं (for प्रतिक्षपम्).

500. b) SA °द्दीना° (for °द्दीन्ना°).

501. b) SL *varia lectio* कायक्लेशेन (for काले क्लेशेन).

502. a) P_1 शीते (for शेते).

503. c) SA_1 (before corr.) °स्ताता [sic] (for °स्तास्ता).

जनरक्षणदाक्षिण्ये ततः पितुरिवाऽन्वहम् ।
कुशला कलशस्याऽऽसीत् प्रजापुण्योदयैर्मतिः ॥ ५०६ ॥

स्वयं वणिगिवाऽर्थानां गणनाकुशलोऽपि सः ।
विवेक्ता सत्पथत्यागे मुक्तहस्तः सदाऽभवत् ॥ ५०७ ॥

उपस्थितौ भाविनौ च पश्यन्नायव्ययौ स्वयम् ।
अन्तिकान्नाऽत्यजद् भूर्जखटिकादि नियोगिवत् ॥ ५०८ ॥

तस्य स्वरूपमूल्येन रत्नादि क्रीणतः स्वयम् ।
नाऽशकन् वञ्चनां कर्तुं केऽपि विक्रयकारिणः ॥ ५०९ ॥

त्रिवर्गं सेवमानः स विभज्य समयं सुखी ।
मध्याह्नादूर्ध्वमभवद्दृश्यः सर्वकार्यिणाम् ॥ ५१० ॥

तस्य स्वेषां परेषां च कृत्यमन्विष्यतश्चरैः ।
अज्ञातः स्वप्नवृत्तान्तः प्रजानामभवत् परम् ॥ ५११ ॥

स्ववेश्मेव गृहस्थस्य ध्यायतश्चाऽस्य मण्डलम् ।
जनो जनपदे जातु न कश्चिद् दैन्यमस्पृशत् ॥ ५१२ ॥

कौलीनचकितो राजा कुर्वन् कण्टकशोधनम् ।
प्रकटं नाऽत्यजद्दण्डं चौरेभ्योऽपि स जातुचित् ॥ ५१३ ॥

न तस्याऽर्थः कोऽपि नष्टो मन्त्रिणो यमयोजयन् ।
मन्त्रिणां स पुनश्चक्रे नष्टस्याऽर्थस्य योजनम् ॥ ५१४ ॥

विवाहयज्ञयात्रादिमहोत्सवशताकुलः ।
नित्यप्रहृष्टो निर्दैन्यस्तद्राज्ये ददृशे जनः ॥ ५१५ ॥

तेन नीतिविदाक्रान्ताः क्ष्माभुजः क्षित्यनन्तराः ।
आहाराचरणेऽप्यासंस्तदध्यक्षान् विनाऽक्षमाः ॥ ५१६ ॥

---

506. b) SA_1 om. ततः with a space. SA_1 (before corr.) °वान्तिकम् (for °वाऽन्वहम्).
508. d) S′ विनियोगिवित्; P_3 °दि नियोगवत् (for °दि नियोगिवत्).
511. d) All Mss. except SL read यदि (for परम्).
512. d) I_3 °मादृशात् (for °मस्पृशत्).
513. a) P_2 °चलितो (for °चकितो).
515. d) D (before suggestion) SA_1 (before corr.) C I_3 P_{1-3} S′ जनैः (for जनः).

तन्वङ्गजांस्थक्कनादींस्त्रीनायातान् दिगन्तरात् ।
व्ययितैकानुजान् मल्लप्रमुखान् गुङ्गजानपि ॥ ५१७ ॥

अप्रीणयद्बन्धुभृत्यान् स भव्याभिर्विभूतिभिः ।
कलाभिरमृतार्द्राभिः सोमः सुरपितॄनिव ॥ ५१८ ॥

अवाप्तपरिपाकोऽपि दौश्शील्येन न भूपतिः ।
कुदैशिकोपदिष्टेन दुष्टाचारेण चोज्झितः ॥ ५१९ ॥

टक्केन वुल्लियाख्येन कन्यकाः समुपाहृताः ।
क्रीतास्तस्य तुरुष्केभ्यो नानादिग्देशसंभवाः ॥ ५२० ॥

स ताभिः परदारैश्च रूपलोभादुपाहृतैः ।
अवरोधपुरन्ध्रीणां द्वासप्ततिमढौकयत् ॥ ५२१ ॥

वह्नीः कामयमानस्य योषितः प्रतिवासरम् ।
मत्स्ययूषादिभिर्वृष्यैर्नाऽस्य पुष्टिरहीयत ॥ ५२२ ॥

महासमयपूजासु व्यग्रः स गुरुभिः समम् ।
महाचरूणामाहारं नीतिमुत्सृज्य चाऽकरोत् ॥ ५२३ ॥

एवं शबलकृत्येन पुरं तेन नवीकृतम् ।
निर्दग्धे विजयक्षेत्रे शिलावेश्म च शूलिनः ॥ ५२४ ॥

विजयेशशिलावेश्ममौलावातपवारणम् ।
नृपोऽम्बरशिरश्चुम्बि जाम्बूनदमयं व्यधात् ॥ ५२५ ॥

---

517. a) All Mss. except SL read तन्वङ्गस्थक्कना° (for तन्वङ्गजांस्थक्क°).
518. d) SA_1 om. मः with a space. After this ν. युग्मम्.
519. d) P_2 दुराचारेण; P_1 दुष्टाचरेण (for दुष्टाचारेण).
520. c) S′ P_3 I_3 क्रीडा° (for क्रीता°). SA_1 तुरुष्केन (for तुरुष्केभ्यो).
—d) P_3 °सम्भवः (for °संभवाः).
521. a) SL पोरदारैश्च (for परदारैश्च). —b) S′ लोभरूपा° (for रूपलोभा°).
522. c) SA_3 gloss वृष्यैः वाजीकरणैः; SA_2 quotes as a gloss :—
" ... ... वृष्यकल्पतरौ ।
पारिभद्ररसेनैव हिङ्गुलं याममात्रकम् ॥
समर्पयित्वा पारदवत् पातयेत् पूर्वयुक्तितः ।
योजयेत् सर्वयोगेषु सप्तकञ्चुकवर्जितम् ॥" (for वृष्यैः).
523. a) D $P_{1,2}$ °पूजास्वव्य° (for °पूजासु व्य°). —c) °माहारैः (for °माहारं).
524. d) D (before suggestion) $P_{2,3}$ °वेश्मनि; St C P_1 I_3 S′ SA_3 वेश्म न and SA_1 om. न with a space (for वेश्म च cf. SL St Tr.).

व्ययस्थितिं चाऽनपायां व्यधत्त त्रिपुरेश्वरे ।
पिनाकिनश्च प्रासादं स स्वर्णामलसारकम् ॥ ५२६ ॥

ततः सत्कर्मकुशलश्चकार कलशेश्वरम् ।
निस्संख्यहाटकघटीपटलाङ्कशिलागृहम् ॥ ५२७ ॥

कलशेशोपरि छत्रं चिकीर्षोः काञ्चनाञ्चितम् ।
तरुष्कदेशजः शिल्पी राज्ञोऽभ्यर्णमुपाययौ ॥ ५२८ ॥

सहस्रैर्भूरिभिर्हेम्नश्छत्रसिद्धिं वदन्कलाम् ।
स छादयन्निजां ताम्रे काञ्चनारोपणं विदन् ॥ ५२९ ॥

कानिचिद् दिवसान्यासीत् प्राप्नुवन्नृपसत्क्रियाम् ।
ततोऽतितीक्ष्णप्रज्ञेन नोनकाख्येन मन्त्रिणा ॥ ५३० ॥

अभ्यूह्य शिक्षितकलो विलक्षोऽगाद् यथाऽऽगतम् ।
तच्च छत्रं ययौ सिद्धिमत्यल्पैरेव काञ्चनैः ॥ ५३१ ॥

अनन्तेशाभिधं बाणलिङ्गमन्याश्च भूपतिः ।
प्रतिष्ठा विविधाश्चक्रे स शक्राधिकवैभवः ॥ ५३२ ॥

नृपे सहजपालाख्ये शान्तिं यातेऽभ्यषिच्यत ।
ततः संग्रामपालाख्यो राजपुर्यां तदात्मजः ॥ ५३३ ॥

राज्यं जिहीर्षुर्बालस्य पितृव्यस्तस्य भूपतेः ।
भेजे मदनपालाख्यो बलीयानुद्यमं मदात् ॥ ५३४ ॥

तद्भयाच्छरणं प्रायान्नृपं साहायकार्थिनी ।
स्वसा संग्रामपालस्य जस्सराजश्च ठक्कुरः ॥ ५३५ ॥

कृतप्रसादो नृपतिः साहायककृते ददौ ।
तयोः पश्चाज्जयानन्दं शूरैर्विजादिभिः समम् ॥ ५३६ ॥

---

526. a) D P_{1-3} व्यवस्थितिं (for व्ययस्थितिं). —d) I_3 सा स्वर्णा° (for स स्वर्णा°).
530. c) S′ ततोऽपि तीक्ष्ण° (for ततोऽतितीक्ष्ण°).
531. b) P_2 °थाकृतम् (for °थाऽऽगतम्).
533. d) SA_3 gloss राजविर् इति भाषया (for राजपुर्यां).
534. d) I_3 पदात् (for मदात्).
535. c) SA_1 (before corr.) °राजस्य (for °पालस्य).

तत्र विद्राविताभित्रः स स्फूर्जन् क्रान्तमण्डलः ।
संग्रामपालामात्यानां कार्यान्ते शङ्क्यतां ययौ ॥ ५३७ ॥

काङ्क्षन्तो गमनं तस्य दत्त्वा तास्ता विभीषिकाः ।
ते त्रासमैच्छन्नाधातुं स वीरो न त्वकम्पत ॥ ५३८ ॥

मतिं राजपुरीयाणामसावेतामदादिति ।
शङ्कमानेन तेनाऽथ बिज्जे मन्युरुपाहृतः ॥ ५३९ ॥

तैस्तत्र दत्तद्रविणैः प्रार्थितोऽथ महामतिः ।
रक्षापदेशात् स्वं सैन्यं स्थापयित्वा न्यवर्तत ॥ ५४० ॥

एवं राजपुरीं तस्मिन् स्वीकृत्याऽन्तिकमागते ।
तुतोष कार्यमर्मज्ञः प्राज्ञः कलशभूपतिः ॥ ५४१ ॥

क्रमाद् राजायमानेषु बिज्जादिष्वथ पस्पृशे ।
आमयेन जयानन्दो दैवात् प्रमयहेतुना ॥ ५४२ ॥

स्वास्थ्यवार्तोपलम्भाय भूपतिं गृहमागतम् ।
वाच्यमस्ति रहः किंचिदित्यूचे स कथान्तरे ॥ ५४३ ॥

निर्यातेष्वथ सर्वेषु किंचिन्नैवाऽब्रवीद् यदा ।
तदा ताम्बूलतित्यक्षाव्याजाद् बिज्जो विनिर्ययौ ॥ ५४४ ॥

आप्तेनोक्तोऽपि निर्गच्छन् किं प्रयासीति मन्त्रिणा
भूभुजा चैत्य स प्राज्ञो बहिरेव व्यलम्बत ॥ ५४५ ॥

जयानन्दोऽभ्यधाद् भूपमुक्त्वा राजपुरीकथाम् ।
व्यक्तं नास्त्येव ते राज्यं बिज्जे वृद्धिमुपागते ॥ ५४६ ॥

आदीयमानाद् बिज्जेन कार्येभ्यो वेतनादपि ।
दर्शयामास गणनां बहुमूल्यां महीभुजे ॥ ५४७ ॥

प्राप्तः कलुषतां राजा प्रयातः स्वगृहांस्ततः ।
याचितो गमनानुज्ञां बिज्जेनेङ्गितवेदिना ॥ ५४८ ॥

---

537. ab) D P_1 C °मित्रः संस्फूर्जत्का°; S′ °मित्रमस्फूर्जत्का° (for °मित्रः स स्फूर्जन् क्रा°). —b) SA_4 gloss जयानन्दः (for स). —d) SG *prima manu* D C S′ P_{1-3} I_3 SA शक्यतां (for शङ्क्यताम्).

545. bc) All Mss. except SL transpose मन्त्रिणा and भूभुजा, cf. St Tr.

निषेधन्निव दाक्षिण्यलेशान्निर्बन्धकारिणः ।
तस्याऽनुज्ञां ददौ गन्तुं सान्तस्तोषो महीपतिः ॥ ५४९ ॥
लब्धाऽऽदेशो गृहान् गत्वा सर्वोपकरणैः समम् ।
प्रस्थाप्य सोऽग्रतो भ्रातृनाप्रष्टुं नृपतिं ययौ ॥ ५५० ॥
राजधर्मगभीरत्वक्रूरयोः स्वामिभृत्ययोः ।
काचिदेव क्षणे तस्मिंश्चेष्टाऽभूदद्भुतावहा ॥ ५५१ ॥
न यत्प्रभुः प्रियं भृत्यं गमनात् स न्यवर्तयत् ।
उपालेभे समन्युश्च न यद्भृत्यः प्रियं प्रभुम् ॥ ५५२ ॥
सहोत्थितेन कतिचित्पदानि सह भूभुजा ।
चिरं कृत्वा कथां नीचैर्हसन् विज्जो विनिर्ययौ ॥ ५५३ ॥
जिन्दुराजं हलधरो मुमूर्षुर्दूषयन् यथा ।
तथा बिज्जं जयानन्दः स व्यवारोपयत् पदात् ॥ ५५४ ॥
त्वल्लक्ष्मीमात्रशेषां क्ष्मां कृत्वा गच्छन् विधीयताम् ।
हृतार्थो बिज्ज इत्युक्तिं नाऽग्रहीन्मन्त्रिणां नृपः ॥ ५५५ ॥
निवर्तयिष्यति क्ष्माभृन्नियतं गमनादमुम् ।
इत्याशयाऽन्वगाद् बिज्जं राजवर्जं जनोऽखिलः ॥ ५५६ ॥
आस्कन्दं शङ्कमानोऽस्थाद् बिज्जाद् राजा बलोर्जितात् ।
तृणस्पन्देऽपि चकितो निर्निद्रः पञ्च यामिनीः ॥ ५५७ ॥
तस्मिञ्शूरपुराद् याते निवृत्तेष्वनुगन्तृषु ।
निवृत्तशङ्कस्तां शङ्कां प्रादुश्चक्रे स मन्त्रिणाम् ॥ ५५८ ॥
ते तदाकर्ण्य यं मन्त्रं बिज्जार्थहरणेऽब्रुवन् ।
तस्याऽविधाने भूभर्तुरमन्यन्त नयज्ञताम् ॥ ५५९ ॥
बिज्जादयस्तु निर्द्रोहा यं यं देशमशिश्रयन् ।
तत्र तत्रैव पूज्यत्वं रत्नानीव प्रपेदिरे ॥ ५६० ॥

---

551. a) SA_1 (before corr.) राज्यध° (for राजध°).
555. a) All Mss. except SL read तल्ल° (for त्वल्ल°). P_3 °शेषा (for °शेषां).
558. a) S′ om. तस्मि. SA_3 gloss हूरपुर (for शूरपुर). —c) S′ om. निवृत्त.
560. b) St (after corr.) °शिश्रियन् [Aorist] (for °शिश्रयन् [Pluperfect] found in all Mss.).

बिज्जोऽधिकं प्रवृद्धोऽपि दैवतस्येव भक्तिमान् ।
पद्भ्यां कलशदेवस्य सत्यंकारः सदाऽभवत् ॥ ५६१ ॥

एवं निर्वास्य बिज्जादीनचिरावाप्तवैभवः ।
क्षिप्रं सूर्यमतीशापाज्जयानन्दः क्षयं ययौ ॥ ५६२ ॥

राज्ञो विरोधकृद्वक्तुं शापस्याऽव्यभिचारिताम् ।
प्रमयं जिन्दुराजोऽपि तस्मिन्नेव क्षणे ययौ ॥ ५६३ ॥

तेऽपि बिज्जादयः क्षिप्रमचिरावाप्तसम्पदः ।
प्रापुः शापोचितं सर्वे प्रमयं गौडमण्डले ॥ ५६४ ॥

आकस्मिकेऽथ प्रमये बिज्जः प्रमयमाययौ ।
सुदीर्घबन्धनक्लेशं प्रापुस्तदनुजा अपि ॥ ५६५ ॥

पलायितेषु कारायास्तेषु व्याघ्रेण पाजकः ।
हतस्तदनुजाः शेषा भुक्तक्लेशाः क्षयं ययुः ॥ ५६६ ॥

द्वित्रास्तद्द्वैधकाराणां नाऽनश्यन् मदनादयः ।
अदीर्घेणैव कालेन दुरन्तैर्यैर्भविष्यते ॥ ५६७ ॥

जयानन्दसहायोऽथ तत्पुत्रान् परिपालयन् ।
सर्वाधिकारी भूपेन वामनाख्यो व्यधीयत ॥ ५६८ ॥

यस्य तास्ता व्यवहृतीर्नीतिज्ञस्याऽद्भुतावहाः ।
वर्णयन्ति वयोवृद्धा गोष्ठीष्वद्याऽपि धीमताम् ॥ ५६९ ॥

ग्रामानवन्तिस्वाम्यादिभोग्यानाहृत्य लुब्धधीः ।
राजा कलशगञ्जाख्यं कर्मस्थानं विनिर्ममे ॥ ५७० ॥

---

561. a) P_2 I_3 प्रवृद्धेपि (for प्रवृद्धोऽपि).
563. b) I_3 शापस्य व्यभि° (for शापस्याऽव्य°). S′ °चारताम् (for °चारिताम्).
564. c) P_2 प्राप्ता: (for प्रापु:).
565. a) SL St Tr. कलहे; SA_2 gloss आकस्मिके प्रमये मारीदोष इत्यर्थः (for प्रमये).
566. b) P_{1-3} SR SG SA_3 पाजका: (for पाजक:). —c) P_1 SA_3 ततस्त° (for हतस्त°).
567. a) P_2 I_3 SA_3 द्वित्रास्तु द्वैध° (for द्वित्रास्तद्द्वैध°). —d) SA_1 °रतैस्तैर्भवि° (for °रन्तैर्यैर्भवि°).
568. c) D P_3 सर्वाधिकारे (for सर्वाधिकारी).
569. d) All St Mss. except SA_3 om. पि.
570. a) P_2 ग्राम्यानव° (for ग्रामानव°).

मन्त्रिणे नोनकायाऽसौ धनोत्पादविदेऽप्यदात् ।
क्रौर्यत्रस्तो न पादाग्रं जनरक्षणदक्षिणः ॥ ५७१ ॥

मन्त्रिणो राजकलशापत्यान्यत्यन्तरङ्गताम् ।
लेभिरे क्ष्माभुजः पार्श्वे प्रशस्तकलशादयः ॥ ५७२ ॥

सुताः स्वाच्छन्द्यविवशाश्चौराः संध्यादिसंश्रयाः ।
युक्त्या निदधिरे राज्ञा निबद्धस्वाधिकारिणः ॥ ५७३ ॥

पुनर्मदनपालेन क्रान्ते राजपुरीपतौ ।
साहायकाय व्यसृजत् सेनान्यं बप्पटं नृपः ॥ ५७४ ॥

प्रतापैर्भूपतेस्तेन भृत्यांशेनाऽपि निर्जितः ।
बद्ध्वा मदनपालोऽपि कश्मीरान् सम्प्रवेशितः ॥ ५७५ ॥

भ्राता वराहदेवस्य कंदर्पाख्यो महीभुजा ।
कृतो द्वाराधिपो वीरो विदधे डामरक्षयम् ॥ ५७६ ॥

बभूव जिन्दुराजात् स शिक्षितो नयविक्रमौ ।
भूम्यनन्तरसामन्तमुकुटस्पृष्टशासनः ॥ ५७७ ॥

स राजपुर्यादिजयी द्वारं परमकोपनः ।
क्षणे क्षणेऽत्यजद् राज्ञा प्रसाद्य ग्राहितः स्वयम् ॥ ५७८ ॥

मदनः क्षितिपालेन प्रापितः कम्पनेशताम् ।
लब्धप्रकर्षान् बोपादीन् डामरान् बहुशोऽवधीत् ॥ ५७९ ॥

सेवावशीकृतः स्तेनपालं स नगराधिपम् ।
चक्रे विजयसिंहाख्यं हताशेषमलिम्लुचम् ॥ ५८० ॥

---

571. c) I_3 क्रौर्यत्रस्ते (for क्रौर्यत्रस्तो).

575. b) SA_1 (before corr.) °शेनाति° (for °शेनाऽपि). —d) P_2: काश्मीरात्सम्प्र°; I_3 कश्मीरात्सम्प्र° (for कश्मीरान् सम्प्र°).

577. d) P_2 °कुटस्पष्ट° (for °कुटस्पृष्ट°).

579. a) SA_3 gloss मदनपालः (for मदनः).

580. a) All Mss. except SL *varia lectio* read श्येन° (for स्तेन° cf. *v.* viii. 62). —b) All St Mss. except SA_3 om. स.

कंदर्पोदयसिंहाद्यैः प्रहितैः लोहरे सकृत् ।
राजा भुवनराजस्य दूरं निस्सारणं व्यधात् ॥ ५८१ ॥

कीर्तिराजस्य तनयां स च नीलपुरप्रभोः ।
लब्ध्वा भुवनमत्याख्यां रिपोश्छिन्नामयोऽभवत् ॥ ५८२ ॥

कार्यप्रतिग्रहे कर्तुं प्रवृत्तिं ग्राहितोऽभवत् ।
हृत्वा विजयसिंहाद्यो नृपेण नगरेशताम् ॥ ५८३ ॥

गुङ्गात्मजः स मल्लोऽथ तेन द्वारपतिः कृतः ।
राज्ञां मौलिमणिस्थाने स्वप्रतापमरोपयत् ॥ ५८४ ॥

शौर्यं निष्परिवारस्य पार्थस्योत्तरगोग्रहे ।
उरशासम्प्रवेशे वा श्रुतं मल्लस्य मानिनः ॥ ५८५ ॥

पञ्चषैस्तुरगैर्यत्स कृष्णां तीर्त्वा व्यपाहरत् ।
राज्यं वाजिव्रजैः सार्धमभयाख्यस्य भूभुजः ॥ ५८६ ॥

एवं वशीकृतभुवो भूपतेर्नयवेदिनः ।
सममेवाऽष्ट भूपालास्त्रिषष्टेऽब्देऽविशन् पुरम् ॥ ५८७ ॥

कीर्तिर्बद्धापुराधीशश्चाम्पेयो भूभृदासटः ।
तुक्कात्मजस्तु कलशो वल्लापुरनरेश्वरः ॥ ५८८ ॥

राजा संग्रामपालाख्यः स च राजपुरीपतिः ।
उत्कर्षो लोहरोर्वीभृद्दौरशो सङ्कटो नृपः ॥ ५८९ ॥

---

581. a) SA_1 (before corr.) °र्पोभयसिं° (for °र्पोदयसिं°). —b) D (before suggestion) and all other Mss. except SL read प्रहिते (for प्रहितैः).
582. d) SA_1 (before corr.) °च्छिन्नाश्रयो° (for °च्छिन्नामयो°).
584. After this *v.* युग्मम्.
585. b) SA_3 gloss अर्जुनस्य (for पार्थस्य). SA_3 gloss उत्तरो विराटपुत्रः (for उत्तर). —c) S′ C P_2 I_3 उरसा° (for उरशा°). —d) C S′ P_{1-3} I_3 SA_3 द्रुतं (for श्रुतं).
586. a) All Mss. except SL read पञ्चाशैः (for पञ्चषैः). —b) S′ कृत्स्नां (for कृष्णां).
588. a) C कीर्त्तिन्यर्व्वपुरा°; D P_{1-3} I_3 कीर्तिन्यर्ध्वपुरा°; St कीर्तिन्यब्बपुरा° (for कीर्तिर्बद्धापुरा° cf. SL St Tr.).
589. d) All Mss. except SL read °वंशो मुङ्गजो (for °रशो सङ्कटो cf. *v.* viii. 2178).

गाम्भीरसीहः कान्देशः काष्ठवाटधराधिपः ।
श्रीमानुत्तमराजोऽपि राजानमुपतस्थिरे ॥ ५९० ॥

राजलोकः प्रवृद्धोऽपि घने जनपदेऽभवत् ।
दुर्लक्ष्यो वार्षिकसरित्पूरो वारिनिधाविव ॥ ५९१ ॥

तस्मिन् क्षणे शिलीभूतवितस्तासलिले नृपैः ।
शीतक्षणेऽप्यसंक्षीणं सुखं तैरन्वभूयत ॥ ५९२ ॥

मनसाऽपि हि भूपाला यत्ते किंचिदचिन्तयन् ।
प्राप्तमेव पुरोऽपश्यन् वामनेन तदाहृतम् ॥ ५९३ ॥

कौशलं मन्त्रिणस्तस्य रराजेतरदुर्लभम् ।
निमित्तं तदसंभ्रान्तो नित्यवद् योऽत्यवाहयत् ॥ ५९४ ॥

पार्थिवेष्वथ यातेषु मल्ले कार्यपराङ्मुखे ।
क्षितिपालेन कन्दर्पो द्वारं स्वीकारितः पुनः ॥ ५९५ ॥

अभिमानधनो मन्त्री कृतारब्धिर्निजैर्धनैः ।
दुर्गं स स्वापिकं नाम युक्त्या दुर्ग्रहमग्रहीत् ॥ ५९६ ॥

स प्रविष्टोऽथ नगरं खिन्नः केनाऽपि हेतुना ।
पार्थिवाभ्यर्थ्यमानोऽपि कार्यं नैवाऽग्रहीद् यदा ॥ ५९७ ॥

तदा प्रशस्तकलशो नित्यं दूत्यं समाचरन् ।
तदुत्सिक्तोक्तिसंतप्तः संस्पृशन्नभिमानिताम् ॥ ५९८ ॥

निजश्रियाऽतिभूयस्या भूरीन् संगृह्य शस्त्रिणः ।
तत्पदे रत्नकलशं स्वभ्रातरमकारयत् ॥ ५९९ ॥

---

590. After this *v.* तिलकम् .

592. c) S′ °क्षणेऽपि संक्षी° (for °क्षणेऽप्यसंक्षी°).

593. c) St C S′ P_{1-3} I_3 SA पुरे° (for पुरो° also found in SL).

594. d) S′ °वद्यो न्यवाह° (for °वद योऽत्यवा°).

596. c) S′ om. स स्वा. SL मासिकं (for स्वापिकं).

597. a) All the Mss. except SL read प्रविष्टोऽपि (for प्रविष्टोऽथ).

598. a) D (before suggestion) and all other Mss. except SL read °कलशं (for °कलशो).

सोऽर्थैः क्रीतप्रथोऽप्यासीन्न कन्दर्पसमः क्वचित् ।
किं चित्रोल्लिखितः सिंहः सत्यसिंहक्रियां स्पृशेत् ॥ ६०० ॥

ततः क्रमेण भूभर्त्रा भृत्यरत्नं कथंचन ।
राजस्थानाधिकारं स नगरे ग्राहितः पुनः ॥ ६०१ ॥

अतिताडनतश्चौरे विपन्नेऽथ कृपाकुलः ।
त्यक्त्वा तमप्यधीकारं विषण्णो जाह्नवीमगात् ॥ ६०२ ॥

पटान्तकृतसंरोधस्ताडयित्वा करं प्रभोः ।
कोपाद् देशान्तरं यातं तं प्रत्यास्ते स्म मन्युमान् ॥ ६०३ ॥

अत्यन्तखेदितोऽप्यासीदानीतस्याऽन्तिकं पुनः ।
दर्पं हर्तुं नृपस्तस्य सन्नद्धो न तु जीवितम् ॥ ६०४ ॥

इत्थं पुरुषसिंहानां प्रौढदार्ढ्यो विसोढवान् ।
आरोहमवरोहं च सोऽन्तरङ्गः क्षमापतिः ॥ ६०५ ॥

उपाङ्गगीतव्यसनं नर्तकीसंग्रहादरः ।
देशान्तरोचितं राज्ञा तेनैवेह प्रवर्त्तितम् ॥ ६०६ ॥

ततो जयवनोपान्ते निरन्तरमहागृहम् ।
स्वनामाङ्कं पुरं कर्तुं प्रावर्तत विशांपतिः ॥ ४०७ ॥

मठाऽग्रहारप्रासादमहागृहपरम्पराः ।
सतोयोपवनास्तत्र ययुः सिद्धिं सहस्रधा ॥ ६०८ ॥

अत्राऽन्तरे राजसूनुर्हर्षः सोत्कर्षपौरुषः ।
गुणैर्लेभे प्रकाशत्वमन्यभूपालदुर्लभैः ॥ ६०९ ॥

सोऽशेषदेशभाषाज्ञः सर्वभाषासु सत्कविः ।
कृत्स्नविद्यानिधिः प्राप ख्यातिं देशान्तरेष्वपि ॥ ६१० ॥

लुब्धेन पित्रा संत्यक्ता जना नानादिगागताः ।
गुणशौर्योज्ज्वलास्तेन गृहीताः कृतवेतनाः ॥ ६११ ॥

---

600. a) SA_3 P_2 I_3 नीतप्र° (for क्रीतप्र°). —b) SA_1 (before corr.) S' I_3 कन्दर्पः समः (for कन्दर्पसमः).

603. c) All Mss. except SL read यातस्तं (for यातं तं). —d) SA_1 (before corr.) प्रत्यास्ते [sic] (for प्रत्यास्ते).

604. a) SA_3 °खेदितस्यासीदा° (for °खेदितोऽप्यासीदा°). —c) $P_{2,3}$ I_3: हन्तुं (for हर्तुं).

608. c) St I_3 सत्तो°; $P_{1,3}$ सन्तो° (for सतो°).

अपर्याप्ते पितृकृते वेतने व्ययशालिनः ।
एकाहान्तरितं तस्य भोजनं त्यागिनोऽभवत् ॥ ६१२ ॥

पितरं गायन इव व्यक्तं गीतैः स रञ्जयन् ।
भर्तव्यभरणं चक्रे तद्दत्तैः पारितोषिकैः ॥ ६१३ ॥

उद्गायति पुरस्तस्मिन् कदाचिदथ पार्थिवः ।
सभ्येषु प्रीयमाणेषु शौचायोत्थाय निर्ययौ ॥ ६१४ ॥

तेन प्रसङ्गभङ्गेन जाततेजोवधः सुधीः ।
क्षुभ्यन् वैलक्ष्यकोपाभ्यां कुमारः क्षितिमैक्षत ॥ ६१५ ॥

प्रभुर्वीतक्षान्तिः सुहृदतिशठः स्त्री परुषवाक्
सुतो गर्वोन्नद्धः परिजन उदात्तप्रतिवचाः ।
इयान् सोढुं शक्यो ननु हृदयदाही परिकरो
न तु श्रोताऽवज्ञालुलितनयनान्तं परिभवन् ॥ ६१६ ॥

पितुरेव तदा भृत्यो विश्शावट्टाभिधो विटः ।
शाधि राज्यं निहत्येमं नर्मणेवेत्युवाच तम् ॥ ६१७ ॥

अधिक्षिपन् स तं रोषान्नाऽनेनोक्तमसाम्प्रतम् ।
इत्यासन्नेन हसता धम्मटेनाऽप्यकथ्यत ॥ ६१८ ॥

अग्रे भोगेच्छवश्छन्नं कुमाराननुगाः पितुः ।
स्नेहं प्रदर्श्य स्वीकुर्युर्वेश्या कामिसखीनिव ॥ ६१९ ॥

पुनः सभां संप्रविष्टस्तं पिता पर्यतोषयत् ।
प्रीतिदायैस्ततस्तैस्तैः साधुवादैश्च मानिनम् ॥ ६२० ॥

---

613. d) D P_{1-3} I_3 SA पारितोषकैः (for पारितोषिकैः).
615. c) SA_3 P_2 क्षुभ्यद्वै° (for क्षुभ्यन् वै°). —d) SA_1 (before corr.) कुमाराः (for कुमारः).
616. a) I_3 पुरुष° (for परुष°).
617. b) S′ विश्वा°; I_3 धिश्शा°; P_2 विश्चा° (for विश्शा°).
618. d) SA P_{1-3} I_3 धर्मटेना° (for धम्मटेना°).
619. a) S′ अग्रे (for अग्रे). All Mss. except SL read °श्छन्नाः (for °श्छन्नं). —b) All Mss. except SL read °ननुगान्पि° (for °ननुगाः पि°). —d) SA_3 $P_{2,3}$ कामी सखीरव; D (before suggestion) St P_1 S′ C कामिसखीरिव (for कामिसखीनिव cf. SL St Tr.).
620. d) D (before suggestion) St C S′ P_{1-3} I_3 मानिनाम् (for मानिनम् also found in SL).

अन्येद्युस्तु पितुः पार्श्वात् स भुक्त्वा स्वगृहान् गतः ।
अभ्येत्य विश्शावट्टेन तदेव जगदे रहः ॥ ६२१ ॥

उपपन्नं तत्तदुक्त्वा तेनाऽभीक्ष्णं निषेधता ।
निर्बध्नन्नपि हस्तेन सोऽथ कोपादताडयत ॥ ६२२ ॥

लग्नाभिघातं रुधिरं वमन्तं घ्राणवर्त्मना ।
तं वीक्ष्य सोऽभिजातोऽभूत् सदाक्षिण्यो नृपात्मजः ॥६२३॥

भृत्यैः प्रक्षालयन्नस्रं तस्येदृक्पाप्मनो भवेत् ।
उक्तेनाऽपीति कथयन् स्मित्वा वासांस्यदापयत् ॥ ६२४ ॥

अनिच्छोरपि तस्येच्छा दानात्तेनाऽन्वमीयत ।
दुश्शीलेनाऽन्यकामिन्याः स्मितमात्रादिव स्पृहा ॥ ६२५ ॥

असकृत्कृतयत्नः स ततः कालेन भूयसा ।
तं प्रैरयत्तत्र कृत्ये मध्ये स्वीकृत्य धम्मटम् ॥ ६२६ ॥

स रोहद्द्रोहसंकल्पजन्मना पाप्मना श्रितः ।
संमन्त्र्य पितरं हन्तुं तीक्ष्णान् प्रायुङ्क्त सर्वतः ॥ ६२७ ॥

शश्वत् स गोचरीभूतस्तेन स्नेहलवस्पृशा ।
न घातितः सूनुना च वर्जिता न च तत्कथा ॥ ६२८ ॥

आप्तत्वं तीक्ष्णवर्गेऽथ प्रतिभेदभयाद्गते ।
तां विश्शावट्ट एवाऽऽशु वार्तां राज्ञे न्यवेदयत् ॥ ६२९ ॥

बुद्धवान् राजपुत्रस्तत्तस्मिन्नहनि जातभीः ।
भोक्तुं नाऽगात् पितुः पार्श्वमपि दूतैः कृतार्थनः ॥ ६३० ॥

---

621. c) S′ विश्वा°; P_2 विश्वा° (for विश्शा°).
622. d) I_3 दोष° (for सोऽथ).
623. b) I_3 P_3 वसन्तं (for वमन्तं).
625. c) SA_1 (before corr.) दुःशीलान्य° (for दुश्शीलेनाऽन्य°). —d) I_3 °दिवास्पृहा (for °दिव स्पृहा).
627. c) All St Mss. except SA_3 om. रं in पितरं.
628. b) All Mss. except SL read °स्तेषां (for °स्तेन). D St P_{1-3} I_3 C °स्पृशाम्; S′ °स्पृहाम् (for °स्पृशा cf. SL St Tr.).
629. c) S′ विश्वा°; P_2 विश्वा° (for विश्शा°). —d) P_{1-3} वार्ता (for वार्तां). S′ राज्ञो (for राज्ञे).
630. a) P_2 बुद्धिमान् (for बुद्धवान्). —ab) P_2 °त्रस्तु त°; SA_1 (before corr.) °त्रस्तस्त° ⌊sic⌋ (for °त्रस्तत्त°).

सोऽपि तस्मिन्ननायाते तत्राऽर्थे शान्तसंशयः ।
दिने तत्र मनस्तापान्नाऽभुङ्क्त सपरिच्छदः ॥ ६३१ ॥

सभ्रातृकस्य प्रातस्य प्रातर्दुःखं निवेदयन् ।
सुचिरं थक्कनस्याङ्के शिरो विन्यस्य सोऽरुदत् ॥ ६३२ ॥

उक्त्वा च धम्मटोदन्तं बद्ध्वा तस्य समर्पणम् ।
विधेहीत्यभ्यधत्ताऽपि तं भङ्गीभणितिक्रमैः ॥ ६३३ ॥

न कृताधिगमावावां कृत्यस्याऽस्येत्युदीर्य तम् ।
अभाषेतां भ्रातुरर्थे पुनस्तन्वङ्गनन्दनौ ॥ ६३४ ॥

त्वत्प्रसादबलाद् राजन्नापन्नत्राणदीक्षितौ ।
यावावां तत्प्रवेशार्थं व्यक्तद्वारौ निशास्वपि ॥ ६३५ ॥

कथं नु पृथिवीपाल प्राप्ते प्राणात्ययक्षणे ।
निर्दोषो वा सदोषो वा ताभ्यां संत्यज्यतेऽनुजः ॥ ६३६ ॥

स्वामिद्रोहापवादश्च भवेत् तद्रक्षणाद् ध्रुवम् ।
देशत्यागं तदुत्सृज्य शरणं नाऽन्यदावयोः ॥ ६३७ ॥

इत्यादि सम्भाष्य तयोः पादन्यस्तोत्तमाङ्गयोः ।
रुदित्वा गमनानुज्ञां कथंचित् पार्थिवो ददौ ॥ ६३८ ॥

---

631. b) SA_1 तत्रार्थेऽशान्त° (for तत्रार्थे शान्त°).
632. b) D (before suggestion) St P_{1-3} I_3 S′ C न्यवेदयत् (for निवेदयन् also found in SL).
633. a) SA दम्मटो° (for धम्मटो°). —b) D (before suggestion) बुद्धया; SA P_{1-3} I_3 बुद्ध्वा; S′ C बद्धा (for बद्ध्वा). —c) D (before suggestion) St C S′ P_{1-3} I_3 °भ्यधान्नापि; D suggests °भ्यधाच्चापि (for °भ्यधत्ताऽपि cf. SL St Tr.).
634. b) D (before suggestion) C P_{1-3} ताम् (for तम्). —c) SA_4 gloss धम्मटस्य (for भ्रातुः).
635. c) SA_1 om. यावावां तत्प्रवेशा with a space. —d) All Mss. except SL read °द्वारम् (for °द्वारौ).
636. After this *v.* युगलकम् .
637. c) P_2 °त्यागे (for °त्यागं).
638. a) All Mss. except SL read सम्भाव्य (for सम्भाष्य).

पथि कश्चिदमुं हन्यान्मध्यीकृत्येति धम्मटम् ।
तौ विनिर्जग्मतुर्देशात् ततः सबलवाहनौ ॥ ६३९ ॥

तन्वङ्गजेषु यातेषु विविक्तीकृतमन्दिरः ।
सुतमानीय नृपतिः सान्त्वयन्निदमब्रवीत् ॥ ६४० ॥

आसंसारं जगत्यस्मिन् सर्वतः ख्यातकीर्तिना ।
जनकेनैव जन्यस्य ज्ञप्तिरुत्पाद्यते जनैः ॥ ६४१ ॥

पुत्र शीतांशुनेवाऽत्रि दिग्द्वीपख्यातकीर्तिना ।
भवता तु सुपुत्रेण मां जानात्यखिलो जनः ॥ ६४२ ॥

स त्वं गुणवतामग्र्यो निरर्गलयशा भवन् ।
असाधुसेव्यमध्वानं वद कस्मान्निषेवसे ॥ ७४३ ॥

पैतामहं निजं चाऽर्थं यन्न तुभ्यं समार्पयम् ।
तत्र हेतुमनाकर्ण्य नाऽसूयां कर्तुमर्हसि ॥ ६४४ ॥

रिक्तः स्वेभ्यः परेभ्यश्च प्राप्नोत्यभिभवं नृपः ।
इति निर्ध्याय हि मया क्रियते कोशरक्षणम् ॥ ६४५ ॥

पुरप्रतिष्ठां निष्पाद्य क्षिप्त्वा राज्यधुरं त्वयि ।
वाराणस्यां गमिष्यामि नन्दिक्षेत्रेऽथवा मुनिः ॥ ६४६ ॥

तद्राज्यकोशयोः स्वामी बुभूषुर्न चिराद् भवान् ।
अतितात्पर्यतः कस्मादनार्योचितमीहते ॥ ६४७ ॥

---

639. b) D P_{1-3} मध्येकृत्ये° (for मध्यीकृत्ये°). SA_1 om. धम्मटम् with a space. SA_3 C S′ P_2 दम्मटम् ; I_3 दंपटम् (for धम्मटम्).

640. a) P_2 °जेष्वया° (for °जेषु या°). —b) S′ °मन्दिरं (for °मन्दिरः).

641. c) SA_4 gloss पुत्रस्य (for जन्यस्य).

642. b) P_2 I_3 °द्वीपाख्यात° (for °द्वीपख्यात°).

644. a) SA_4 gloss अनन्तदेवसंबन्धिनं (for पैतामहं). —b) SA S′ P_{1-3} I_3 समर्पयम् (for समार्पयम्).

646. d) SA पुत्रः and all other Mss. except SL read पुनः (for मुनिः).

647. c) P_2 अभिता° (for अतिता°). —d) All Mss. except SL read °मीहसे (for °मीहते).

संभाव्यते त्वयि न तद्यन्ममाऽऽवेदितं खलैः ।
यथार्थकथनात् तस्मात् कौलीनं विनिवार्यताम् ॥ ६४८ ॥

विशुद्धये करोत्वेष स्वकृतस्याऽप्रतिश्रवम् ।
स्नेहादितीच्छंस्तद् राजा साभिप्रायं वचोऽभ्यधात् ॥६४९॥

अपलापवचोमात्रं निनीषुस्तस्य हेतुताम् ।
जनप्रत्यायने सोऽभूद् यस्मात् क्षान्तिसमुत्सुकः ॥ ६५० ॥

हर्षस्तु साधुवादैस्तत्पितुः संपूज्य भाषितम् ।
वक्ष्याम्याप्तमुखे तत्त्वमित्युक्त्वा निर्ययौ बहिः ॥ ६५१ ॥

ममाऽन्यप्रेरणादेषा चिकीर्षाऽभूदिति ब्रुवन् ।
स पितृप्रहितं दूतं ह्रीतः स्वावसथं ययौ ॥ ६५२ ॥

दूतं म्लाननानं वीक्ष्य पाणिभ्यां ताडयञ्शिरः ।
हा पुत्रेति वदन् राजा तस्याऽऽस्कन्दमदापयत् ॥ ६५३ ॥

हतेऽस्मिन् स्वशिरश्छिन्द्यामिति प्रोक्तवतः प्रभोः ।
निदेशाद् वेष्टयित्वैव तस्थुस्तद्वेश्म शस्त्रिणः ॥ ६५४ ॥

तीक्ष्णास्तु पिहितद्वाराः परिवार्य नृपात्मजम् ।
ऊचुः सपरुषां वाचमेवं निश्चितमृत्यवः ॥ ६५५ ॥

अस्मान् घृणी प्रमादी च विरुद्धं छद्म कारयन् ।
घातयित्वा दुराचार क्व जीवन् स्थातुमिच्छसि ॥ ६५६ ॥

रक्षिष्यति सुतं स त्वां स पिता रक्षितस्त्वया ।
ज्ञातेयं युवयोरस्ति वयमेव हताः पुनः ॥ ६५७ ॥

---

649. a) I_3 करोद्वेष (for करोत्वेष). —b) P_2 सुकृत° (for स्वकृत°).

652. a) All Mss. except SL read सामान्य° (for ममाऽन्य°). I_3 °रणाशेषा (for °रणादेषा). —b) P_3 ध्रुवम् (for ब्रुवम्). —d) C S′ भीतः (for ह्रीतः). SA C S′ $P_{1,2}$ I_3 सावसथं (for स्वावसथं).

653. d) S′ °दापयेत् [sic] (for °दापयत्).

655. a) I_3 तीक्ष्ण° (for तीक्ष्णा°). —c) St सुपरुषां; I_3 सुपुरुषां; S′ सुपुरुष°; P_3 सपुरुषो (for सपरुषां). —d) SA_4 gloss स्वकीया एव पूर्वं राजवधं प्रति प्रोत्साहिताः (for निश्चितमृत्यवः).

युध्यस्व मध्यगोऽस्माकं त्वां निहन्मोऽन्यथा वयम् ।
एवं सर्वप्रकारं ते व्यक्तं नास्त्येव जीवितम् ॥ ६५८ ॥

तां वार्तां भूपतेः श्रुत्वा व्याकुलस्याऽग्रतः स्थितः ।
हर्षान्तिकं दण्डकाख्यः प्रायान्निजमहत्तरः ॥ ६५९ ॥

तीक्ष्णैर्निजतया दत्तप्रवेशः स नृपात्मजम् ।
प्रसृत्योवाच मतिमानेवं सर्वान् विमोहयन् ॥ ६६० ॥

क्षत्रियापुत्र जीवित्वा कल्पानल्पेतरानपि ।
कारणैरपि गन्तव्यं नियमान्नियतेर्वशम् ॥ ६६१ ॥

तदेतस्मिन् समासन्ने मरणेऽव्यभिचारिणि ।
यदर्थं गृह्यते शस्त्रं स मानः पाल्यतां त्वया ॥ ६६२ ॥

कृतश्रुतः ख्यातयशा युवा सुक्षत्रियो भवान् ।
तदाहवविलम्बेन कार्यं किमिव पश्यसि ॥ ६६३ ॥

एतेषु सुसहायेषु मयि चाऽग्रेसरेऽधुना ।
विपत्तिर्विजयो वाऽपि प्रतापिंस्तव शोभते ॥ ६६४ ॥

उत्तिष्ठ नखकेशादियोजनं कारय द्रुतम् ।
वीरपट्टं बधानाऽपि स्वःस्त्रीपरिणयस्रजम् ॥ ६६५ ॥

इत्युक्त्वा क्षुरकर्मार्थं राजपुत्रं सनापितम् ।
प्रावेशयत् पूज्यमानस्तीक्ष्णैराभ्यन्तरं गृहम् ॥ ६६६ ॥

न्यस्तासिधेनुर्हर्षेण दत्तझम्पः क्षणात् स्वयम् ।
पश्चात् प्रविश्य तद्वेश्म चक्रे सुनिहितार्गलम् ॥ ६६७ ॥

ततः स राजस्थानीयं तमारादब्रवीद्वचः ।
रक्षितो राजपुत्रोऽयं क्रियतां स्वोचितं त्वया ॥ ६६८ ॥

---

658. b) S' त्वा (for त्वां).
659. c) P_3 हर्षान्तिके (for हर्षान्तिकं). SL चण्डका° (for दण्डका° cf. *v.* vii. 481).
661. c) SA_2 gloss कारणानि ब्रह्मादीनि पञ्च (for कारणैः). —d) P_3 °र्वशात् (for °र्वशम्).
668. b) P_3 तामारा°; SL तमोराद° (for तमाराद°); तम् (*बार– 'window' cf. Ṛg i. 116. 9; viii. 40. 5; x. 106. 10; NIA. बारी–; MIA. [cf. Hem. i. 79], Pers. *bār*>) तम्बा°>तम्मा°>तमा° (*versus*

भूतग्रहादिभवमोषधिभिर्विरोधि-
जातं बलैः प्रहरणप्रभवं तनुत्रैः ।
निर्वाप्यते प्रतिभयं पृथिवीपतीनां
सार्वत्रिकं तु रभसाद् भुवि बुद्धिवृद्धैः ॥ ६६९ ॥

नदन्तस्तुमुलं योधास्ततो राजसुतास्पदे ।
आरोढुमाययुर्वप्रहर्म्यादि प्रविविक्षवः ॥ ६७० ॥

तीक्ष्णा दृढद्वारगृहस्थितं त्यक्त्वा नृपात्मजम् ।
यावन्निर्गन्तुमिच्छन्ति हन्यमाना युयुत्सवः ॥ ६७१ ॥

द्वित्राः प्रसङ्गसान्निध्यान्मध्यपातं समाश्रिताः ।
तावद्विनिर्ययुर्वीरा निर्द्रोहा अभिमानिनः ॥ ६७२ ॥

ते निर्याताः सूर्यमतीगौरीशाश्रयिणो गृहात् ।
सदाशिवाऽन्तिकं प्रापुर्घ्नन्तो युधि विरोधिनः ॥ ६७३ ॥

रक्ष्यमाणोऽपि भूभर्तुर्गिरा ज्ञातेयशालिनः ।
राजज्ञातिर्हतस्तेषु प्रथमं सहजाभिधः ॥ ६७४ ॥

द्विजस्तिव्याभिधो वीरः पण्डितः शौर्यमण्डितः ।
रामदेवश्च केशी च कर्णाटोऽरिभटैर्हतः ॥ ६७५ ॥

केचित्त्यजन्तः शस्त्राणि स्वं घ्नन्तः केऽपि च स्वयम् ।
लेभिरे वधबन्धादि पापाः कापुरुषोचितम् ॥ ६७६ ॥

सितषष्ठ्यां सहस्यस्य चतुष्षष्टे स वत्सरे ।
वैरं नीत्वा पितापुत्रौ विप्लवः कारितो विटैः ॥ ६७७ ॥

St Tr. तमोर- with SL [=तमोरि- 'window'] > °रात् ?). Obviously, St. has mistaken तमोरि 'sun' (cf. *v.* ii. 100) for तमोरि- विवर- 'sun-hole' (cf. *v.* vii 774) and sought to equate his *तमोर- with that. After *v.* 667 St. supposes a lacuna of one leaf, cf. St. Tr.

670. [d]) D (before suggestion) St P_{1-3} I_3 प्रविवेक्षवः (for प्रविविक्षवः also found in SL).

675. [a]) SL °जस्त्रिव्या° (for °जस्तिव्या°). —[c]) SG कशश्च (for केशीच).

677. [a]) S′ P_2 St °षष्ट्यां (for °षष्ठ्यां). P_3 सहस्रस्य (for सहस्यस्य). —[b]) St °षष्ठे (for °षष्टे). —[d]) °P_3 विधैः (for विटैः).

हठत्यागासक्तिः प्रिययुवतिसंप्रेरणवचः
खलाऽऽसङ्गः पूर्वप्रणयपरिहारो जनयितुः ।
अमात्येन भ्रात्रा सममपरमात्राऽथ कलहः
कुमाराणां बुद्धिं पितरि विपरीतां प्रतनुते ॥ ६७८ ॥

एवं स खलसंगत्या कुमारो लब्धलाघवः ।
बद्धः कारागृहे प्रापदसुखानि सुखोचितः ॥ ६७९ ॥

राज्ञी भुवनमत्यस्मिन् बद्धे माध्यस्थ्यसंविदि ।
स्थापिता मानिनी कण्ठच्छेदं कृत्वा जहावसून् ॥ ६८० ॥

रक्षिणो मन्त्रिणामाप्तांस्तस्य विन्यस्य भूपतिः ।
प्राहिणोदुचितान् भोगान् सुतस्नेहाद् दिने दिने ॥ ६८१ ॥

चक्रिकायामशक्तोऽयमिति संचिन्त्य भूभुजा ।
भृत्यः प्रयागनामाऽस्य निजः पार्श्वान्न वारितः ॥ ६८२ ॥

नोनको हर्षमुद्दिश्य स्वेनाऽन्यैश्च महीभुजम् ।
जीवितं लोचने वाऽस्य कृष्येतामित्यभाषत ॥ ६८३ ॥

नृपः स शीलवैकल्यात् पशुतुल्यो ह्रियं त्यजन् ।
रिपोरिव तनूजस्य चकमे कतिचित्प्रियाः ॥ ६८४ ॥

तासु श्वशुरवाल्लभ्यमवाप्य सुगलाभिधा ।
बभूव तुङ्गभूभर्तृनप्त्री भर्तृवधार्थिनी ॥ ६८५ ॥

---

679. c) All Mss. except D (after suggestion) and SL read बन्धं (for बद्धः).
680. b) SC SG *Prima manu* D C S′ P_1 माध्यस्थ° (for माध्यस्थ्य°). —c) P_2 स्थापित्वा (for स्थापिता).
681. d) P_2 °गान्स तत्स्ने° (for °गान् सुतस्ने°).
682. d) P_2 पर्श्वान्निवा° (for पार्श्वान्न वा°).
684. a) All Mss. except SL read °वैकल्ये (for °वैकल्यात्). —b) P_3 पथ° (for पशु°). All Mss. except SL read °तुल्ये (for °तुल्यो).
685. d) D (before suggestion) P_{1-3} I_3 S′ C SG SR SC °नप्तृ°; SL °नप्ती [which supports the emendation in the text.] (for °नप्त्री emended with St). SL भर्तुर्वधा°; SG SR °भर्त्रूपधा°; D (before suggestion) P_3 °भर्तृपदा°; SC °भर्तृपधा° (for भर्तृवधा°).

संमन्त्र्य नोनकः सा च द्वौ सूदमशनान्तरे ।
रसं प्रदातुं हर्षस्य पापं प्रैरयतां ततः ॥ ६८६ ॥

अन्यसूदमुखाद्वार्तां प्रयागस्तामवाप्तवान् ।
प्रभुं तद्दाप्यमानान्नपरिहारमकारयत् ॥ ६८७ ॥

तेनाऽन्नेन परीक्षार्थं दापितेनाऽपजीवितौ ।
हर्षः श्वानौ निशम्याऽभून्निराशो निजजीविते ॥ ६८८ ॥

प्रयुक्तिं गूढदण्डस्य पितुरेव स तां विदन् ।
ततः सर्वाणि भोज्यानि स्पृष्ट्वैवौज्झीद् दिने दिने ॥ ६८९ ॥

प्रयागोपहृतेनाऽऽसीत्परं बाह्येन सर्वदा ।
भोज्येन येन केनाऽपि कुर्वञ्जीवितधारणम् ॥ ६९० ॥

अन्नस्याऽभोजनं श्रुत्वा राजा सूदैर्निवेदितम् ।
ततः प्रयागमानीय तत्र पप्रच्छ कारणम् ॥ ६९१ ॥

प्रयोजकौ च सूदं च सोपलप्य न्यवेदयत् ।
रसार्पणकथां कृत्स्नां तज्ज्ञानं च स्वयं प्रभोः ॥६९२॥

अथाऽन्येष्वपि सूदेषु पित्रा दत्तेषु शङ्कितः ।
राजसूनुर्न बुभुजे प्रयागोपहृतं विना ॥ ६९३ ॥

स सर्वेषु विरुद्धेषु यद्यत्तत्राऽत्यवाहयत् ।
मेने तत्तद्दिनं लब्धं शेषेष्वास्थापराङ्मुखः ॥ ६९४ ॥

अत्राऽन्तरे समुदभूदकस्मान्नाशसूचकः ।
अदृष्टपूर्वो भूभर्तुः सदाचारविपर्ययः ॥ ६९५ ॥

उत्पाट्य ताम्रस्वाम्याख्यं पूर्वं ताम्रमयं रविम् ।
स रीतिप्रतिमाः स्वैरं विहारेभ्योऽप्यपाहरत् ॥ ६९६ ॥

---

686. b) All Mss. except SL read सूदाव° (for सूदम°). —c) SR रसं (for रसं). —d) D suggests पापौ (for पापं).
687. P_2 om. *bc*.
688. a) SA SR SG P_{1-3} I_3 तेनात्तेन (for तेनाऽन्नेन).
692. a) St D C P_{1-3} S′ सूदौ; I_3 सूर्यौ (for सूदं found in SL). —b) All Mss. except SL read सोपलभ्य (for सोपलप्य).
695. b) I_3 °न्नादसू° (for °न्नाशसू°).

धनानि निरपत्यानामाहर्तुं व्यवसायिना ।
न्यवार्यताऽऽर्यमर्यादा क्रौर्याक्रान्तेन भूभुजा ॥ ६९७ ॥

ततोऽभिशापसंतापव्यञ्जकेनाऽञ्जसाऽभवत् ।
अतिसंभोगजातेन धातुक्षैण्येन सोऽर्दितः ॥ ६९८ ॥

कुम्भप्रतिष्ठासंभारं चिकीर्षोर्हरमन्दिरे ।
तस्याऽपतन्महाकालकुम्भे नासापुटादसृक् ॥ ६९९ ॥

आकस्मिकं दुर्निमित्तं तत्प्रतीकारसंविदा ।
न मनागप्यगाच्छान्तिं प्रवृद्धिं प्रत्युताऽऽययौ ॥ ७०० ॥

अस्रस्रुत्यनुबन्धेन तेन ग्लपितसौष्ठवः ।
शनैः शय्याप्रणयितामन्तः स प्रत्यपद्यत ॥ ७०१ ॥

बलमांसकृतक्षैण्यमग्निमान्द्याद्युपद्रवैः ।
कलाशेषेण शशिना तद्वपुः साम्यमाययौ ॥ ७०२ ॥

राज्यं स दित्सुर्हर्षाय दृष्ट्वाऽमात्यान् पराङ्मुखान् ।
ततोऽभिषेक्तुमुत्कर्षमानिन्ये लोहराचलात् ॥ ७०३ ॥

उच्चावचास्तेन सर्वे संविभक्ता मुमूर्षुणा ।
परमीर्ष्याविधेयेन न शुद्धान्तवधूजनः ॥ ७०४ ॥

कृत्वा धनार्पणं कुर्यां देशादस्य प्रवासनम् ।
इत्युक्त्वा हर्षमानेतुं तेन प्रार्थ्यन्त मन्त्रिणः ॥ ७०५ ॥

ते तु गोप्तृन्निवार्याद्यांष्टक्कुरांल्लोहराश्रितान् ।
विन्यस्य रक्षिभावे तमुत्कर्षाय न्यवेदयन् ॥ ७०६ ॥

---

698. a) St P_2 I_3 °तिशाप° (for °भिशाप°).

701. a) D (before suggestion) P_{1-3} C SA अस्रु°; I_3 आस्रु°; S′ अस्तु स्तुत्य° (for अस्रस्रुत्य° suggested). —b) P_3 ग्लापित° (for ग्लपित°). —d) C S′ सम्प्रत्य° (for स प्रत्य°).

702. d) S′ om. साम्य.

703. c) All Mss. except D (after suggestion) and SL read °षेकमौत्क° (for °षेक्तुमुत्क°).

705. d) D (before suggestion) St P_{1-3} S′ C तेनाप्रा° (for तेन प्रा° also found in SL).

706. a) S′ गोतृन्नि°; P_1 SA गोप्तृन्नि° (for गोप्तृन्नि°).

स नाट्यमण्डपात्तेन निष्कृष्टः क्षामविग्रहः ।
निवेशितश्चतुस्स्तम्भे बद्ध्वा बान्धववर्जितः ॥ ७०७ ॥

अथोज्जिगमिषून् प्राणान् निस्सामर्थ्यो विदन्नृपः ।
मुमूर्षुरभवत्तीर्थप्रस्थानाय कृतत्वरः ॥ ७०८ ॥

स जानन् दैवतक्रोधं ताम्रस्वामिविपाटनात् ।
इयेष शरणं कर्तुं मार्ताण्डं प्राणलब्धये ॥ ७०९ ॥

संत्यज्य विजयक्षेत्रमत एवाऽपवर्गदम् ।
माहेश्वरोऽपि प्रययौ तत्र त्रासवशंवदः ॥ ७१० ॥

अधीकारप्राप्त्या तृणमिव विदन् विश्वमखिलं
नियोगी जातार्तिर्नमति गृहदासीरपि रुदन् ।
नदन् मूर्खज्ञानी बहुदुरुपदेशाधिगमतः
करोति प्राणान्ते शिशुरिव च किं किं न विगुणम् ॥ ७११ ॥

तादृश्या कृपणप्रायसेव्यया क्लैब्यसंविदा ।
गुरूपदेशाहंकारस्तस्य हास्यत्वमाययौ ॥ ७१२ ॥

शुक्लायां मार्गशीर्षस्य तृतीयस्यां निशामुखे ।
तत्पादेवाऽऽश्रितो युग्यं भूभृन्मर्तुं विनिर्ययौ ॥ ७१३ ॥

स भेरीतूर्यनिर्घोषैर्जनाक्रन्दं तिरोदधत् ।
सामात्यान्तःपुरो नौभिः प्रतस्थे जलवर्त्मना ॥ ७१४ ॥

यामशेषे दिनेऽन्यस्मिन् प्राप्तः स चरणान्तिके ।
मार्ताण्डस्य स्वजीवाप्त्यै सौवर्णीं प्रतिमां व्यधात् ॥ ७१५ ॥

---

708. a) P_{1-3} I_3 अथोज्जग°; SA अथोजग° (for अथोज्जिग°).

710. c) All Mss. except D (after suggestion) and SL read महीश्वरो° (for माहेश्वरो°).

711. c) All Mss. except SL read मूर्खो ज्ञानी (for मूर्खज्ञानी). D SA $P_{1,2}$ I_3 °पदेशोधि° (for °पदेशाधि° also found in SL).

713. P_3 om. this *v.* —c) D (before suggestion) I_3 St $P_{1,2}$ S′ C तला° (for तत्पा° also found in SL).

715. b) All Mss. except SL read प्राप्तस्य (for प्राप्तः स).

भृत्यैरगणिताज्ञस्य दिदृक्षोर्ज्येष्ठमात्मजम् ।
औत्सुक्येनाऽरतिस्तस्य व्यथितस्याऽधिकाऽभवत् ॥७१६॥

बहिर्हर्षकृतं गीतं गायनानां स गायताम् ।
विवृतद्वारविवरः शृणोति स्म विनिश्श्वसन् ॥ ७१७ ॥

प्राणावसानसमये परिसंकुचन्ती
स्वप्नप्रसङ्ग इव धावनशक्तिराज्ञा ।
प्राचुर्यदा खलु रुजो मरणोद्भवाया
मर्मव्यथां प्रथयते पृथिवीपतीनाम् ॥ ७१८ ॥

प्रजाज्येष्ठं तनूजं च संविभक्तुं कृताऽर्थनः ।
उत्कर्षं ग्राहयञ्शिक्षां बद्धजिह्वोऽभवत्ततः ॥ ७१९ ॥

अव्यक्तं वदतो हर्ष इति वाचं पुनः पुनः ।
निह्नोतुं नोनको भावं तस्याऽऽदर्शमढौकयत् ॥ ७२० ॥

स तन्निवार्य विहसन् दष्टौष्ठः कम्पयञ्शिरः ।
जपन् किमपि सार्धं द्वे बद्धवागभवद्दिने ॥ ७२१ ॥

आसन्नप्राणनिर्याणः संज्ञयाऽऽहूय मन्त्रिणः ।
ततः स्वं तैरसंमूढैर्मार्तण्डाग्रमनाययत् ॥ ७२२ ॥

वर्षानेकान्नपञ्चाशद् भुक्तवान् स सितेऽहनि ।
मार्गस्य पञ्चषष्टेऽब्दे षष्ठ्यां निष्ठामथाऽऽसदत् ॥ ७२३ ॥

सप्त मम्मनिकामुख्या देव्यः परिणयाहृताः ।
अवरुद्धाऽपि जयमत्यभिधाना तमन्वगुः ॥ ७२४ ॥

प्रसादवित्तया तस्य पुनः कय्याभिधानया ।
अवरुद्धिकया कृत्स्ना स्त्रीजातिरपवित्रिता ॥ ७२५ ॥

---

720. d) I_3 °कयन्; SA_2 gloss हर्ष आनीयतामिति राज्ञो भावमभिप्रायं निह्नोतुं आदर्शो नोनकेनाऽऽनीत इत्यर्थः। हर्षः आदर्श इति पाठमात्रसाम्यादित्यर्थः (for तस्याऽऽदर्शमढौकयत्).

721. c) SL किमिव (for किमपि).

723. c) D °षष्ठे° (for °षष्टे°).

724. c) SA_2 gloss उरद्धा इति देशभाषया (for अवरुद्धा).

सर्वावरोधप्राधान्यप्रदानं नाऽस्मरद्यदि ।
मा स्मार्षीन्नाम भर्तुस्तदनुच्चाभिजनोद्भवा ॥ ७२६ ॥

संश्रित्य विजयक्षेत्रं क्रमाद् ग्रामनियोगिनः ।
भेजे यत्त्ववरुद्धात्वमतो दुःखाकरोति नः ॥ ७२७ ॥

भूपालभोग्यं स्ववपुः सा भोगाभ्यासभासुरम् ।
निनाय ग्राम्यभोग्यत्वं धिङ्नारीर्नीचचेतसः ॥ ७२८ ॥

उत्कर्षस्याऽभिषेकाय व्यग्रेष्वखिलमन्त्रिषु ।
अन्त्येष्टिमकरोद् राज्ञः कृतज्ञो वामनः परम् ॥ ७२९ ॥

घोषोऽभिषेकतूर्याणामेकतो गीतमङ्गलः ।
साक्रन्दः प्रेततूर्याणां नादोऽन्यत्र समुद्ययौ ॥ ७३० ॥

जातः पद्मश्रियो देव्याः पुत्रः कलशभूभुजा ।
ततो विजयमल्लाख्यो भ्रातुर्वैमत्यमादधे ॥ ७३१ ॥

यददाद्धर्षदेवस्य पिता प्रत्यहवेतनम् ।
प्रतिशुश्राव तस्मै स तदेवोत्कर्षभूपतिः ॥ ७३२ ॥

आश्वासाय च मध्यस्थान् ददौ सामन्तमन्त्रिणः ।
कय्यात्मजस्य चक्रे च जयराजस्य वेतनम् ॥ ७३३ ॥

अन्विष्यन्ति रुदत्य एव तरला गत्यन्तरं योषितो
योगक्षेमकथां चितान्तिकगता एवाऽऽत्मजाः कुर्वते ।
अन्येषां शतशोऽवसानसमये चर्चां विचार्येदृशीं
स्त्रीपुत्रादिकृते कुकर्मभिरहो संचिन्वतेऽर्थं जडाः ॥७३४॥

प्रविवेश ततः श्रीमान् नगरं नृपतिर्नवः ।
न तु हर्षोदयाकाङ्क्षि हृदयं नगरौकसाम् ॥ ७३५ ॥

---

728. b) P_{1-3} °भास्वरम् (for °भासुरम्).
729. c) D (before suggestion) SA P_{1-3} I_3 अन्तेष्टि° (for अन्त्येष्टि°).
730. c) C S′ °क्रन्दाः; P_1 I_3 °क्रन्दोः (for °क्रन्दः).
731. c) All St Mss. except SA_3 om. ज in विजय.
732. d) S′ P_{1-3} I_3 SA तदैवो° (for तदेवो°).
735. d) S′ नागरौ° (for नगरौ°).

तद्राज्यलाभदिवसो जनस्याऽभोगदूषितः ।
सन्नपि प्रत्यभान्नैव स रोगार्तेरिवोत्सवः ॥ ७३६ ॥

हर्षदेवस्तु पितरि प्रयाते मर्तुमातुरे ।
नवबद्धश्चतुस्स्तम्भे न तस्मिन्नह्नि भुक्तवान् ॥ ७३७ ॥

सार्थभ्रष्टमिवाऽध्वन्यमन्यस्मिन्नह्नि ठक्कुराः ।
ते शोकमूकं संप्रार्थ्य कथंचित्तमभोजयन् ॥ ७३८ ॥

राज्यं दातुं निजे देशे चक्रुश्चाऽस्य प्रतिश्रवम् ।
राज्यद्वयं नायमर्हत्येक एवेति वादिनः ॥ ७३९ ॥

एवं मिलितचित्तस्तैर्विपत्तिं श्रुतवान् पितुः ।
कृतोपवासः सोऽन्येद्युः शुश्रावोत्कर्षमागतम् ॥ ७४० ॥

बाष्पैः पित्रे प्रयच्छन्तं निर्वापसलिलाञ्जलीन् ।
तं दूतैरनुजो राजा स्नातुं प्रार्थयताऽथ सः ॥ ७४१ ॥

तस्य स्नानक्षणे राज्ञि सज्जे राज्याभिषेचने ।
घोषोऽभिषेकतूर्याणामुदभूत् सजयध्वनिः ॥ ७४२ ॥

स तेन सुनिमित्तेन प्राप्तां मेने निमित्तवित् ।
विद्युद्द्योतेन जीमूतगर्जामिव नृपश्रियम् ॥ ७४३ ॥

ततः प्रभृत्युन्मुखता सुनिमित्तैरगृह्यत ।
तस्याऽत्यासन्नराज्यस्य भृत्यैरिव दिने दिने ॥ ७४४ ॥

स भोजनं कारयितुं दूतान् भ्रात्रा विसर्जितान् ।
देशान्निर्वासयतु मां राजा संत्यज्य बन्धनात् ॥ ७४५ ॥

स्थातुमप्रत्यवस्थित्या विदध्यां कोशसंविदम् ।
म्रियेऽन्यथा निरशनैः संदिश्येति व्यसर्जयत् ॥ ७४६ ॥

---

737. d) SA_1 (before corr.) °न्नास्मि (for °न्नह्नि).
740. a) P_2 C S′ °चित्तै° (for °चित्त°).
742. a) D suggests राज्ञः (for राज्ञि). —b) P_3 राजाभि° (for राज्याभि°).
743. b) P_2 °त्तवत् (for °त्तवित्).
745. d) SA_1 (before corr.) C S′ D P_{1-3} राज्यात्सं° (for राजा सं°).
746. a) SA_1 om. त्या in स्थित्या with a space.

स तन्मिथ्या प्रतिश्रुत्य तं दूतैः प्रहितैस्ततः ।
कृतकोशं सान्त्वयित्वा राजा भोज्यमभोजयत् ॥ ७४७ ॥

नित्यं च श्वो विधास्ये तदर्थ्यमान इति ब्रुवन् ।
कालापहारं कुर्वाणः शङ्कां तस्योदपादयत् ॥ ७४८ ॥

विश्वासाय स्वताडङ्कपाणिं कृत्वा प्रयागकम् ।
पार्श्वं विजयमल्लस्य सोऽथ गूढं व्यसर्जयत् ॥ ७४९ ॥

तदेवोक्त्वा तमूचे स त्वां ब्रूते दुःखितोऽग्रजः ।
कुमारे त्वयि राज्यस्मिञ्शुष्यामो बन्धने वयम् ॥ ७५० ॥

संक्रान्तदुःखः संचिन्त्य चिरेणाऽपि तमब्रवीत् ।
कार्यं कुर्यात् कथमिदं मद्विरा नीतिमान् नृपः ॥ ७५१ ॥

तथाऽप्यस्मिन् यथाशक्ति यतिष्ये त्वद्विमोक्षणे ।
त्वया तु सावधानेन रक्षणीयं स्वजीवितम् ॥ ७५२ ॥

तं पार्श्वं हर्षदेवस्य संदिश्येति व्यसर्जयत् ।
उपायांश्चिन्तयन्नासीत्तस्य कार्यस्य सिद्धये ॥ ७५३ ॥

उत्कर्षः प्राप्तराज्यस्तु दैवतैरिव मोहितः ।
नाऽऽदधे किंचिदारम्भं व्यवस्थाग्रथनक्षमम् ॥ ७५४ ॥

समर्पिताधिकारोऽपि कंदर्पादीन् स मन्त्रिणः ।
राज्यकृत्यं न पप्रच्छ विदधे स च न स्वयम् ॥ ७५५ ॥

---

748. b) D (before suggestion) SA P_{1-3} S′ C तदर्थमान; I_3 तदर्थमग्न (for तदर्थ्यमान also found in SL).
749. SA_1 om. ताड with a space.
750. b) St S′ P_3 I_3 दुःस्थितो° (for दुःखितो°). —c) All Mss. except SL read राज्ये° (for राज्य° found in SL). —d) St C S′ P_2 I_3 °ञ्शुच्यामा; D (before suggestion) $P_{1,3}$ °ञ्शुश्यामो (for °ञ्शुष्यामो also found in SL).
753. a) P_3 ते (for तं).
755. b) D suggests °दर्पादीन्सुम° (for °दर्पादीन् स म° found in all Mss.). —c) P_3 राज्यं कृ° (for राज्यकृ°).

परिमातुं परीमाणं कोशसंचयवीक्षणे ।
परं क्षमापतेस्तस्य दिनकृत्यमजायत ॥ ७५६ ॥

कर्मणा निर्व्ययेनाऽस्य चिन्त्यमानव्ययेन वा ।
सुदीर्घदर्शी लोकोऽभूत्तेन लुब्धत्वनिश्चयी ॥ ७५७ ॥

सा तस्य लुब्धताख्यातिः समुद्गान्नप्रदायिनः ।
भूभर्तुः पितृपत्नीभिः स्वैरिणीभिः प्रवर्धिता ॥ ७५८ ॥

स श्रोत्रिय इवोत्कम्पी व्यवहारमिताशयः ।
महाहृदयभोग्यानां प्रजानां नाऽभवत् प्रियः ॥ ७५९ ॥

ततो नियमितां वृत्तिं तस्माल्लुब्धादनाप्नुवन् ।
कुप्यन् विजयमल्लोऽभूद् देशाद् गन्तुं कृतोद्यमः ॥ ७६० ॥

स्वं रक्षितुं स मध्यस्थाननुव्रज्याकृतेऽखिलान् ।
प्रार्थयामास ते चाऽपि सज्जास्तमनुवव्रजुः ॥ ७६१ ॥

लवणोत्से निशामेकां पुरान्निर्गत्य तस्थुषः ।
मध्यस्थसैन्यात्तस्यैव योधाः पक्षमशिश्रयन् ॥ ७६२ ॥

हर्षे बद्धे त्वयि गते कृतकृत्यो भवेन्नृपः ।
तत्तं निष्कृष्य काराया गमनं तव सांप्रतम् ॥ ७६३ ॥

---

756. a) S′ परिमाणं (for परीमाणं).

757. b) SA_1 om. येन वा with a space. All Mss. except SL read चिन्त्यमानस्य ये° (for चिन्त्यमानव्यये°).

759. a) SA_3 gloss उत्कम्पी दानसमये सकम्प इत्यर्थः (for उत्कम्पी).

760. d) D (before suggestion) and all other Mss. except SL read देशान् (for देशाद्).

761. c) D (before suggestion) St P_{1-3} S′ C I_3 तेनाऽपि and SA_4 explains it as हेतुनापि (for ते चाऽपि also found in SL, cf. *v.* vii. 733).

762. c) SA_1 om. मध्यस्थ with a space and reads the rest as सैन्यास्तस्या···; D (before suggestion) P_3 I_3 °स्थदेव्यास्त°; P_2 °स्थदैत्यास्त°; P_1 °स्थदेन्यास्त°; St °स्थसैन्यास्त°; SL °स्थसैन्यातुस्याग्रे; St. in Tr. suggests with SL °स्थसैन्यात्तस्याग्रे; D suggests °स्थदेश्यास्त° (for °स्थसैन्यात्तस्यैव suggested). —d) St (after corr.) D $P_{1,3}$ °श्रियन् (for °श्रयन् cf. *v.* vii. 560 fn.).

इति तैः प्रेर्यमाणः स राजसूनुरुदायुधैः ।
विनिवृत्याऽकरोद् यात्रां प्रत्यूषे नगरोन्मुखः ॥ ७६४ ॥

श्रुत्वा चिकीर्षितं तस्य व्यावृत्तस्य तथाविधम् ।
सहायाः समपद्यन्त कतिचिद्वामरा अपि ॥ ७६५ ॥

अकरोन्मधुरावट्टो हयसेनापतिः सुतम् ।
राजसूनोर्यियासोर्यं माध्यस्थ्यादनुयात्रिकम् ॥ ७६६ ॥

नागाह्वयो द्रोहहीनो राजपक्षमसंत्यजन् ।
कैश्चित्सह हयारोहैः स पद्मपुरवर्त्मना ॥ ६६७ ॥

आगच्छन्नन्तिकं राज्ञो दुर्निमित्तहृतत्वरः ।
न यावन्नगरं प्राप क्षिप्रकारी नृपात्मजः ॥ ७६८ ॥

शकुनैराहितोत्साहः शूलाग्रोद्दीपिताग्निभिः ।
सैन्यैर्गृहान् दहंस्तावद् राजधानीमवेष्टयत् ॥ ७६९ ॥

समराय विनिर्यातं त्यक्त्वोत्कर्षं महीभुजम् ।
तत्पक्षं जयराजोऽपि राजसूनुरशिश्रयत् ॥ ७७० ॥

सहस्थितौ राजपुत्रौ तस्याऽचिन्तयतां गतिम् ।
नवौ कवी व्यवहृतिं सिद्धवाचः कवेरिव ॥ ७७१ ॥

हर्षदेवे परित्यक्ते यास्याम इति वादिभिः ।
स हस्तिमहिषादीनां शालाः सैन्यैरदाहयत् ॥ ७७२ ॥

---

766. cd) All Mss. except SL read राजसूनुः, यियासुः, माध्यस्थान् (for राजसूनोः, यियासोः, माध्यस्थ्यात् respectively).

769. b) St C P_{1-3} I_3 D शालाग्रो° (for शूलाग्रो° also found in SL). After this *v.* चक्कलकम् .

770. a) All Mss. except SL read समयाय (for समराय). —b) SA_1 (before corr.) S′ P_3 त्यक्तो° (for त्यक्त्वो°). —d) St (after corr.) D P_3 °श्रियत् (for °श्रयत् cf. *v.* vii. 560 fn.)

771. a) All Mss. except SL read हस्तस्थितौ (for सहस्थितौ).

772. b) All Mss. except SL read वादिनः (for वादिभिः).

त्यागप्रलयजीमूतो हर्षदेवोऽभिषिच्यताम् ।
लुब्धः खशो वणिक्प्रायो राज्यादेष निवार्यताम् ॥ ७७३ ॥

एवं वदन्तः सन्तोऽपि हर्षमेत्य पुरौकसः ।
पुष्पैः प्राच्छादयन् बद्धं तमोरिविवरार्पितैः ॥ ७७४ ॥

उत्पिञ्जे तत्र संजाते भग्नसैन्यस्य भूपतेः ।
संप्रेष्य ठक्कुरान् हर्षस्तटस्थं तद्बलं व्यधात् ॥ ७७५ ॥

इत्थं बद्धोऽपि तत्कृत्वा वैरिकार्यविरोधिनः ।
संदेहवेपमानाङ्गस्ततस्तानेवमब्रवीत् ॥ ७७६ ॥

वर्तेऽद्य सङ्कटे दुष्टे तन्मां मुञ्चत बन्धनात् ।
न चेदाशु महीपालादनिष्टं नियमाद् भवेत् ॥ ७७७ ॥

इत्युच्यमानास्ते यावद् विमृशन्ति स्म तन्मुहुः ।
पादप्रहारा न्यपतंस्तावद् द्वारि गृहाद्बहिः ॥ ७७८ ॥

उच्चचार च किं द्रोहः प्रक्रान्तोऽयं दुराशयैः ।
रे ठक्कुरा विवृणुत द्वारमित्युच्चकैर्वचः ॥ ७७९ ॥

ठक्कुरेष्वथ भीतेषु धैर्यादगणयन् भयम् ।
अकारयद्धर्षदेव एव द्वारमपावृतम् ॥ ७८० ॥

नेत्रमात्रस्थितप्राणो ददर्श विशतस्ततः ।
लोहराञ्शस्त्रिणो हन्तुं प्राप्तान् षोडश वारिकान् ॥ ७८१ ॥

ते हि छित्त्वोज्झिते हर्षशीर्षे सर्वमिदं क्षणात् ।
शाम्येदिह भयं मन्त्रं नोनकस्येति जल्पतः ॥ ७८२ ॥

उत्कर्षेणाऽसकृच्छ्रुत्वा तं निहन्तुं विसर्जिताः ।
विमृश्य चोक्ता गच्छन्तः कार्यशेषं विविञ्चता ॥ ७८३ ॥

---

775. d) P_2 I_3 तद्वलं (for तद्बलं).
776. b) SA om. कार्यं with a space. SC S′ वैरिकानवि°; P_2 वैरिकामवि° (for वैरिकार्यवि°).
778. d) All Mss. except SL read द्वारगृ° (for द्वारि गृ°).
779. a) All Mss. except SL read स (for च).
781. c) St लोहरा° ⌊sic⌋ (for लोहरा°). —d) P_2 SR वार्षिकान् (for वारिकान्).
783. c) St C P_{1-3} I_3 चोक्त्वा (for चोक्ता also found in SL). —d) All Mss. except SL read विमुञ्चता (for विविञ्चता).

कदाचित्तेन कृत्यं स्यादहतेनेति तत्क्षणम् ।
निवार्य ठक्कुरान् रक्ष्यो हन्तव्यश्च यदोर्मिकाम् ॥ ७८४ ॥

इमां दद्यामभिज्ञानं यदा चेयं विसृज्यते ।
तदा तु बन्धनात् त्याज्य इत्युदीर्याऽङ्गुलीयके ॥ ७८५ ॥

पाणौ दर्शयता चोक्ता विलम्बालम्बनं यतः ।
निवार्य ठक्कुरांस्तस्मिन् क्षिप्रं न प्राहरंस्ततः ॥ ७८६ ॥

स तु प्रत्येकमाहूय नामग्रहणपूर्वकम् ।
अजिग्रहत् तांस्ताम्बूलमप्युपावेशयत् पुरः ॥ ७८७ ॥

जहुस्ते कृतसत्कारास्ताम्बूलग्रहणक्षणे ।
ह्रीताः कराग्राच्छस्त्राणि प्रजिहीर्षां च मानसात् ॥ ७८८ ॥

धत्ते श्रियं सृजति कीर्तिमघं लुनीते
मित्रत्वमानयति हन्त विरोधिनोऽपि ।
यात्यध्वभिः प्रतिपदं सुमनोऽनुकूलै-
र्गौः कामधुक् कमिव नाऽपहरत्यनर्थम् ॥ ७८९ ॥

राजपुत्रः स तानूचे किं ह्रीता इव तिष्ठथ ।
निर्दोषाः सर्वथा प्रेष्याः स्वाम्यादेशानुपालने ॥ ७९० ॥

विलम्ब्यतां तथाऽप्यत्र द्रष्टव्यं महदद्भुतम् ।
यथोदेष्यत्यवस्थानामन्यथात्वं क्षणे क्षणे ॥ ७९१ ॥

द्विपद्वीपिक्रव्यादुरगतुरगादिभ्रमकृतो
यथाऽस्यां भिद्यन्ते दिवि किल त एवाऽम्बुदलवाः ।
तथा सौम्यक्रूरक्रमविकृतिभाजस्तनुभृतां
क्षणानां नानात्वान्ननु हृदि विकारोर्मय इमाः ॥ ७९२ ॥

क्षणानुवृत्तिं कुर्वाणास्तद् यथाऽत्र स्थिता वयम् ।
तथा सन्तु भवन्तोऽपि कार्यान्तरदिदृक्षवः ॥ ७९३ ॥

---

785. c) S' त्याज्या (for त्याज्य). —d) All Mss. except SL read °लीयकम् (for लीयके).
786. c) S' P_3 I_3 ठक्कुरास्त° (for ठक्कुरांस्त°). After this v. कुलकम्.
791. b) SA_1 (before corr.) I_3 °द्भुताम् (for °द्भुतम्). —c) SA_1 om. देष्यत्य with a space.

अपि चैवंविधा एव वितन्वन्तो रसान्तरम् ।
आसन्नराज्यप्राप्तीनां राज्ञां स्युः प्राणसंशयाः ॥ ७९४ ॥

ग्रीष्मस्योष्मा व्रजति घनतां नूनमासन्नवृष्टे-
नैशं गाढीभवति तिमिरं संनिकृष्टप्रभातम् ।
जन्तोरेवं प्रसभविभवस्फारसंपत्प्रचारा-
न्निष्क्रामन्ती विपदुपचितोपद्रवोद्रेकमेति ॥ ७९५ ॥

प्राणचारेण शकुनं निश्चित्येति वदन् सताम् ।
आचचक्षे शुभोदर्काः स्वोदन्तसदृशीः कथाः ॥ ७९६ ॥

कालं क्षेप्तुमुपन्यस्तशुद्धिव्यक्तीभवद्रसाम् ।
तेभ्यश्च कथयामास हरिश्चन्द्राश्रयां कथाम् ॥ ७९७ ॥

तद्रञ्जने स्वरक्षायां बाह्यवार्तागवेषणे ।
व्यापृतत्वं गभीरस्य न तस्य समलक्ष्यत ॥ ७९८ ॥

अत्राऽन्तरे समुद्दिश्य मते जाते नवे नवे ।
राजश्रियश्च काल्याश्च शतशोऽभूद् गतागतम् ॥ ७९९ ॥

उत्कर्षो भूमिपस्तस्य परित्यागं ह्यमन्यत ।
आदिदेशाऽनुगांस्तांस्तान् भूरिशश्च प्रमापणे ॥ ८०० ॥

अभिज्ञानोर्मिकादानं वधादेशे तु नाऽस्मरत् ।
तेनोक्तिं तस्य दूतानामन्वतिष्ठन्न रक्षिणः ॥ ८०१ ॥

स तान् वन्ध्यश्रमान् वीक्ष्य स्मृत्वाऽभिज्ञानसंविदम् ।
सत्यात्मजं राजपुत्रं शूराख्यं व्यसृजत् ततः ॥ ८०२ ॥

---

794. c) S′ °प्राप्तानां (for °प्राप्तीनां).
795. b) SA_1 (before corr.) °प्रतापम् ; S′ °कृष्टं प्रभातम् ; SA_3 °प्रभाते (for °कृष्टप्रभातम्).
796. b) S′ सुताम् (for सताम्). —c) SA_1 (before corr.) शुचोदर्काः (for शुभोदर्काः).
798. a) P_3 सुरक्षायां; S′ सुरक्षार्थां (for स्वरक्षायां).
799. c) S′ कल्यश्च; SA_3 gloss काली यमस्त्री (for काल्याश्च).
801. c) St ते नोक्तिं; P_3 तेनोक्तं (for तेनोक्तिं also found in SL). —d) D (before suggestion) St P_{1-3} I_3 S′ C °ष्ठन्त (for °ष्ठन्न also found in SL).
802. c) All Mss. except SL read सत्वा° (for सत्या°).

अभिज्ञानं वितरतस्तत्करे तस्य मुह्यतः ।
दैवयोगात् क्षणे तस्मिन्नूर्मिकाव्यत्ययोऽभवत् ॥ ८०३ ॥

यः पातार्थमुपार्जितोऽन्यशिरसस्तेनैव सिन्धुप्रभु-
वृद्धक्षत्रधराधवः स्वशिरसः पातं वरेणाऽन्वभूत् ।
दिव्या स्वैव गदा श्रुतायुधनृपं हन्ताऽवधीदाहवे
यत् त्राणाय विगण्यते विधिवशात्तेनैव नाशो भवेत् ॥८०४॥

तथा चैकस्य विस्मृत्या व्यत्ययेनाऽपरस्य च ।
अभिज्ञानस्य स नृपो नाशं प्रत्युत लब्धवान् ॥ ८०५ ॥

आभिजन्येन हर्षस्य ते क्षणादेव रक्षिणः ।
प्रपेदिरे हितैषित्वमुत्कर्षाज्ञाविरोधिनः ॥ ८०६ ॥

द्वारमाक्रान्तमुत्क्रोधो वधायाऽयमुपागतः ।
इति निर्ध्याय ते शूरं हन्तुमैच्छन्नुदायुधाः ॥ ८०७ ॥

उद्घाटितारिपुटा दृष्ट्वा तस्योर्मिकां करे ।
तेनैव साकं नृत्यन्तो हर्षं समुपतस्थिरे ॥ ८०८ ॥

पादन्यस्तोत्तमाङ्गैस्तैर्निर्गच्छेत्यर्थितस्ततः ।
अविश्वसन् राजसूनुः क्षणमासीत् स चिन्तयन् ॥ ८०९ ॥

तस्मिन् क्षणे हर्षदेवं हतं ज्ञात्वा रणे स्थितः ।
क्रुध्यन् विजयमल्लोऽभूदधिकोद्रिक्तपौरुषः ॥ ८१० ॥

---

803. b) P_3 °त्करं (for °त्करे).

804. SA_2 gloss यः पातार्थमिति एतद्वृत्तद्वयोपाख्यानं महाभारते द्रोणपर्वणि ज्ञेयं (for this *v.*). —b) St C S′ $P_{1,2}$ I_3 °क्षेत्र° (for °क्षत्र° also found in SL). SL St Tr. °धरः (for °धवः). According to St. the compound beginning with वृद्धक्षत्र is an epithet of जयद्रथ, cf. St Tr. fn. But it should be taken as an epithet of वृद्धक्षत्र himself, father of जयद्रथ, कस. —c) P_2 I_3 स्रुतायु° (for श्रुतायु°).

805. b) C S′ ° येन पर° (for ° येनाऽपर°).

806. a) SA_3 gloss आभीजन् इति देशभाषया [Kāś. derivative, *ābizun*, 'familiarity', cf. St Tr.] (for आभिजन्येन).

807. P_2 om. *ab*. —c) $P_{1,2}$ निर्व्याय (for निर्ध्याय).

808. a) For अररि cf *v.* iv. 274 fn. —c) SA_1 om. कं नृत्यन्तो with a space.

809. b) C S′ °च्छन्प्रार्थि° (for °च्छेत्यर्थि°).

810. c) P_2 क्रुध्यद् (for क्रुध्यन्).

तं दग्धुमुद्यतं राजधानीं जीवति तेऽग्रजः।
अभिधायेति रुरुधुः कथंचित् पार्थिवानुगाः ॥ ८११ ॥

प्रत्ययार्थं ततस्तस्य राज्ञा हर्षवधूर्द्रुतम्।
गृहीतभर्तृताडङ्का सुगला प्रैष्यताऽन्तिकम् ॥ ८१२ ॥

तां विलोक्यैव विरते वह्निदाहान्नृपात्मजे।
राजा भयप्रतीकारं हर्षत्यागादमन्यत ॥ ८१३ ॥

गत्वाऽमात्याः स्वयं नोनप्रशस्तकलशादयः।
हर्षं निर्निगडं कृत्वा कारागारात् ततोऽत्यजन् ॥ ८१४ ॥

मन्त्रः स तेषां क्लेशेन वक्त्रात् कृतगतागतः।
अन्त्यक्षणे श्वास इव प्रससार बहिः क्षणात् ॥ ८१५ ॥

हर्षः प्रच्छाद्यमानस्तु पौराणां पुष्पवृष्टिभिः।
हयमारुह्य सामात्यो रणस्थं नृपमासदत् ॥ ८१६ ॥

अभिनन्द्याऽनुजो राजा तमूचे भ्रातरं रणात्।
निवार्याऽऽगम्यतां कुर्मः प्राप्तकालं ततो वयम् ॥ ८१७ ॥

तथेति प्रस्थिते तस्मिंस्त्यक्त्वा तत्स रणाजिरम्।
प्राविशन्मन्त्रिभिः सार्धं कोशं हेमादिसंश्रयम् ॥ ८१८ ॥

उत्तीर्णं महतः कृच्छ्राद्धर्षदेवमुपस्थितम्।
दृष्ट्वा विजयमल्लोऽभूत् प्रहर्षान्निष्क्रियः क्षणम् ॥ ८१९ ॥

---

811. a) S′ तान्दग्धमु° (for तं दग्धुमु°). —b) D (before suggestion) and all other Mss. except SL read तेऽनुजः (for तेऽग्रजः).

812. b) P_1 °वधूश्शृतम् (for °वधूर्द्रुतम्). —cd) C S′ P_2 °ताडङ्कसु° (for °ताडङ्का सु°).

814. a) S′ नोनं (for नोन°).

815. a) All Mss. except SL read शोकेन (for क्लेशेन). —d) All Mss. except SL read बहिश्चरन् (for बहिः क्षणात्).

816. a) S′ P_2 प्रसाद्यमान°; I_3 तश्च्छाद्यमान° (for प्रच्छाद्यमान°).

819. a) I_3 तत्तीर्णं (for उत्तीर्णं).

ततो ववन्दे तत्पादौ स चोत्थाप्याऽऽलिलिङ्ग तम् ।
तास्ताः कथास्तयोरासन्नुपकर्त्रुपकार्ययोः ॥ ८२० ॥

व्यापादयैनमेवाऽऽदौ हत्वोत्कर्षं ततो नृपः ।
निष्कण्टकोऽसि भवितेत्याप्तस्योपांशु जल्पतः ॥ ८२१ ॥

ततो विजयमल्लेन नाऽद्रोहेणाऽऽदृतं वचः ।
ज्ञात्वेङ्गितज्ञो हर्षस्तत्तस्थौ तु चकितः क्षणम् ॥ ८२२ ॥

स्वदेहमामिषीभूतं स भ्रात्रोः श्येनयोरिव ।
निष्पक्षपत्रिप्रतिमो ररक्षाऽर्वगतश्चरन् ॥ ८२३ ॥

आसन्नाभ्रजलस्य दावविगमे विद्युद्भयं शाखिनो
नक्रास्याद् गलतश्च मज्जनमयी शङ्का भवेद् वारिधौ ।
भोक्तव्यस्य विधिः शुभस्य रभसात् स्वादुत्वनिष्पत्तये
जन्तोः सन्तनुते निराकृतभियो भीत्यन्तरोत्पादनम् ॥८२४॥

तं हयभ्रमणव्याजाद् रक्षन्तं निजजीवितम् ।
ज्ञातवार्ता निजाः केचित् पत्तयः पर्यवारयन् ॥ ८२५ ॥

साकं विजयमल्लेन ततः संमन्त्र्य स क्षणात् ।
चचाल विप्लवापायमाख्यातुं तं महीभुजे ॥ ८२६ ॥

अग्रं तद्देशमनः प्राप्तं विनिर्यान्तं नृपात्मजात् ।
ततो विजयसिंहस्तं संप्रवेशान्न्यवारयत् ॥ ८२७ ॥

---

820. b) SA_1 om. चोत्थाप्या with a space. All Mss. except SL read चोत्क्राम्या° (for चोत्थाप्या°). —d) SA °कर्त्रूप° (for °कर्त्रुप°).

821. b) All Mss. except SL read हर्षोत्क° (for हत्वोत्क°).

822. d) C D St $P_{2,3}$ I_3 °त्ततस्तु (for °त्तस्थौ तु). After this *v.* युग्मम्.

823. c) St and D (before suggestion) C S′ P_{1-3} I_3 निष्पत्रपक्षप्र°; St and D suggest निष्पत्रपक्षि° (for निष्पक्षपत्रिप्र° found in SL).

824. b) SA_3 *varia lectio* marg. नक्रास्याच्चलतश्च मज्जनमयी शङ्का प्लवस्याम्बुधौ with a gloss नक्रः जलप्राणिविशेषः यो जलहस्तिनो पीर (?ड)यति तन्मुखात्सकाशाद्दैववशाच्चलितस्यापि मुडनमयी शङ्का उडुपस्य स्यादेवेत्यर्थः (for *b*). —d) P_2 °कृतिभयो (for °कृतभियो).

825. b) C St $P_{1,2}$ I_3 रक्षितुं (for रक्षन्तं also found in SL).

827. a) S′ अग्रे (for अग्रं).

ऊचे च मरणात्तीर्णो मर्तुं विशसि किं पुनः ।
निष्प्रश्न गत्वोपविश त्यक्तशङ्कं नृपासने ॥ ८२८ ॥

एवमुक्तवतस्तस्य भृत्यैः कोशादुपाहृते ।
सिंहासने हर्षदेवस्ततस्तूर्णमुपाविशत् ॥ ८२९ ॥

वैयात्यच्छादितानन्तप्रातिकूल्या तदन्तिके ।
उपाविशच्च सुगला महादेवीत्वसिद्धये ॥ ८३० ॥

तस्याऽभिषेकशब्देन समघट्यन्त सर्वतः ।
रसितेनाऽम्बुवाहस्य चातका इव मन्त्रिणः ॥ ८३१ ॥

तद्वार्ताश्रवणेनाऽऽर्तमुत्कर्षं मन्दिरात् ततः ।
धूर्त्तो विजयसिंहोऽपि कृष्ट्वाऽन्यमनयद् गृहम् ॥ ८३२ ॥

आस्थानस्थस्य भूभर्तुरग्रेण स मितानुगः ।
नष्टश्रीर्ददृशे गच्छन् स्थिराः कस्य विभूतयः ॥ ८३३ ॥

तस्य वेश्म प्रविष्टस्य बहिर्विन्यस्य रक्षिणः ।
राज्ञो विजयसिंहस्तत्कृतं कार्यं न्यवेदयत् ॥ ८३४ ॥

कारायां संस्तुतान् राजा पार्श्वमानीय ठक्कुरान् ।
तत्सैन्येऽग्रस्थितेऽत्याक्षीद् भयं विजयमल्लतः ॥ ८३५ ॥

सोऽप्यग्रजं प्राप्तराज्यं श्रुत्वा तत्सविधं व्रजन् ।
निन्ये संमान्य तद्दूतैः स्वामेव वसतिं क्षणात् ॥ ८३६ ॥

तत्सैन्यं स्वान्तिकं प्राप्तमथ वीक्ष्य क्षमापतिः ।
आनिनाय तमभ्यर्णं क्षणमात्रेण नीतिवित् ॥ ८३७ ॥

मह्यं प्राणाश्च राज्यं च त्वया दत्तमिति ब्रुवन् ।
स प्राञ्जलिस्तमकरोत् क्लेशसाफल्यदायिनम् ॥ ८३८ ॥

---

830. P_3 om. *cd*.
832. a) S′ $P_{1,3}$ I_3 °णेनान्तमु° (for °णेनाऽऽर्तमु°).
835. a) P_3 ससुतान् (for संस्तुतान्). —ab) All Mss. except SL read °राजपा° (for °राजा पा°). —c) S′ °न्येऽग्रे स्थि° (for °न्येऽग्रस्थि°).

तस्य दैवानुकूल्येन नीत्यैवं सुप्रयुक्तया ।
तत्कालमेव तद्राज्यं शय्यायां समुपाविशत् ॥ ८३९ ॥

कारागृहान्तस्संवीतान्येव वासांसि धारयन् ।
सिंहासने स शुशुभे श्रीसान्निध्यान्नवो नृपः ॥ ८४० ॥

तादृक्साहससंरम्भपरिश्रान्तो दिनात्यये ।
कृतारोहोऽथ शय्यायां त्यक्तभार इवाऽपतत् ॥ ८४१ ॥

पश्यन्निवसतामेव सर्वतो विशरारुताम् ।
न स निद्रासुखं तत्र मीलिताक्षोऽपि लब्धवान् ॥ ८४२ ॥

उत्कर्षो युधि बद्धस्तु मन्त्रं पृच्छन् स्वमन्त्रिणः ।
आक्षिप्याऽन्यान्वचो रूक्षं नोनकेनेत्यकथ्यत ॥ ८४३ ॥

प्रातः प्रोक्तोऽसि यन्मन्त्रं तन्नाकार्षीर्महीपते ।
पतितामनयादस्माद् भाविनीं शृणु संविदम् ॥ ८४४ ॥

अध्यार्पिपो बन्धनस्थं त्वं तमुच्छिष्टभोजिनाम् ।
श्वः श्वमांसाशिनां हस्ते स तु त्वामर्पयिष्यति ॥ ८४५ ॥

शरणं मरणादन्यत् तस्मादस्मिन् क्षणेऽस्ति किम् ।
त्यक्ताहवानामस्माकं तदप्यप्राप्यतां गतम् ॥ ८४६ ॥

---

839. b) St P_1 नीत्यैव; S′ नीत्वैवं (for नीत्यैवं also found in SL). —c) All Mss. except SL and D (before suggestion) read तद्राज्यश° (for तद्राज्यं श°).

840. c) All Mss. except SL read °सनेन (for °सने स).

841. c) All Mss. read कृतारोहोऽथ but it may be emended as कृताहारोऽथ.

842. c) D °न्निव स ता° and suggestes च in the place of स (for °न्निवसता°).

843. a) D C P_{1-3} I_3 युद्धिव° (for युधि व°). —c) All Mss. except SL read आक्षिप्यान्यद्र° (for आक्षिप्याऽन्यान् व°).

844. b) C S′ $P_{2,3}$ I_3 °कार्षीन्म° (for °कार्षीर्म° also found in SL).

845. a) All Mss. except SL read अध्याक्षिपो (for अध्यार्पिपो). —c) All Mss. except SL read °सार्पिणां (for °साशिनां).

अवसादफलास्वादकालेऽत्यन्तमरुंतुदम् ।
यद्वोपालम्भपाण्डित्यं न विपक्षेषु शोभते ॥ ८४७ ॥

त्वयाऽपायमनालोच्य य उपायः प्रवर्त्तितः ।
सर्वमेकपदे तेन मुहूर्तेनैव हारितम् ॥ ८४८ ॥

संस्थाप्यमानो दुर्नीत्या सूच्येव जरठः पटः ।
प्रत्युतोपद्रवोऽल्पोऽपि शतद्वारः प्रजायते ॥ ८४९ ॥

एवं श्रुत्वा स तन्मध्यान्निर्गत्याऽऽभ्यन्तरं गृहम् ।
अवरुद्धिकया सार्धं विवेश सहजाख्यया ॥ ८५० ॥

तत्र सन्ध्यासमाधिस्थस्तिष्ठामीत्यभिधाय ताम् ।
क्षणं तिरस्करिण्यन्तरेकाक्येवाऽकरोत् स्थितिम् ॥ ८५१ ॥

निश्शस्त्रेण गले क्षिप्त्वा पटच्छेदनकर्त्तरीम् ।
नाड्यः प्राणवहास्तेन छिन्नाः खिन्नात्मना ततः ॥ ८५२ ॥

फणत्कारेण कर्तर्याश्च्युताया भुवि शङ्किता ।
अपश्यत् सहजा रक्तं श्च्योतज्जवनिकान्तरात् ॥ ८५३ ॥

सोऽथ लम्बशिरोनिर्यत्सान्द्रासृग्दृशे तया ।
वज्रावभग्नशृङ्गान्तः श्च्योतद्धातुरिवाऽचलः ॥ ८५४ ॥

तस्यास्तदानीमौचित्यं निर्व्यूढं येन योषिताम् ।
भर्तृप्रसादपात्राणामद्याऽप्युच्चैस्तरां शिरः ॥ ८५५ ॥

---

847. a) SA_1 om. अवसाद with a space. C S′ अविस्वाद°; P_2 अवस्वाद° (for अवसाद°).

849. a) P_3 दुर्नीता (for दुर्नीत्या). —b) St (before emendation in corrigenda) जरटः; D C S′ $P_{1,3}$ I_3 जरढः; P_2 जरहः [sic] (for जरठः suggested). For a similar simile, cf. *v.* vii. 384.

852. c) SL प्राणवह°; all other Mss. read प्राणहरा° (for प्राणवहा° suggested with SL).

853. d) C S′ P_1 च्योत° (for श्च्योत°).

854. b) $P_{1,2}$ °सार्द्रा° (for °सान्द्रा°).

व्रजति रजनी त्यक्त्वा काऽपि क्षये क्षणदाकरं
पदमुपगतस्याऽस्तं सन्ध्या रवेरनुगच्छति ।
इति परिणतौ प्रेमण्युच्चावचे परिचिन्तिते
क्वचन नियमान्निन्द्या वन्द्या न वा सुधियां स्त्रियः ॥८५६॥

कुलाचारपतिप्रेमसादृश्येऽप्यभवत् तदा ।
कन्यासहजयोर्यस्मान्निन्द्या वन्द्या च पद्धतिः ॥ ८५७ ॥

साऽपि हि द्युसदो वेश्मनर्तकी नाट्यमण्डपे ।
दृष्ट्वा तेनाऽवरुद्धात्वं निन्ये राजवधूः पुरा ॥ ८५८ ॥

कान्तास्रगैरिकास्यन्दकृतसान्द्राङ्गरागया ।
प्रेम्णो हेम्न इवौज्ज्वल्यं प्रविश्याऽग्निं तयाऽर्पितम् ॥ ८५९ ॥

हर्षदेवस्याऽपि पूर्वं वेश्यात्वे साऽभवत् प्रिया ।
अतस्तेनाऽर्थ्यमानाऽपि मरणान्न न्यवर्तत ॥ ८६० ॥

चतुर्विंशाब्ददेशीयो दिनद्वाविंशतौ नृपः ।
मृतस्तिष्ठन्निशामेकां प्रातः सोऽक्रियताऽग्निसात् ॥ ८६१ ॥

तस्याऽवरोधलोलाक्ष्यो लोहराद्रिस्थिता अपि ।
कृशानुवर्त्मना काश्चित् पदवीं द्रुतमन्वयुः ॥ ८६२ ॥

शस्त्रं संत्याज्यमानेषु तन्मन्त्रिषु नृपानुगैः ।
सुमूर्षुर्नोनकः शस्त्रं न तत्याज क्षणं यदा ॥ ८६३ ॥

विनाऽस्मान्मन्त्रदो राज्ञः कोऽन्यः स्याद् यद्दिनैरसौ ।
मोक्ष्यत्यस्मांस्ततः प्राणान्नोपेक्षिष्ठा विचारयन् ॥ ८६४ ॥

---

856. a) P_3 क्षणे (for क्षये).
857. After this *v.* युग्मम्.
858. a) S' द्युपदो; I_3 द्युमदो (for द्युसदो).
859. a) SL °गैरिकस्यन्द° (for °गैरिकास्यन्द°).
863. d) C S' तदा (for यदा).
864. d) D °न्नोपै°; °न्मोपे° is suggested (for °न्नोपे° found in all other Mss.). D $P_{1,2}$ I_3 C °क्षिष्टावि° (for °क्षिष्ठा वि°).

स्वयूथ्य एवेति वचः प्रशस्तकलशो वदन् ।
तदा संत्याजयामास स्वयं तच्च समार्पिपत् ॥ ८६५ ॥

नोनसिल्हारभट्टारप्रशस्तकलशादयः ।
बद्ध्वाऽथ हर्षदेवेन कारागारं प्रवेशिताः ॥ ८६६ ॥

इत्येवमेकेनैवाऽह्ना तादृग् राजविपर्ययः ।
कृतश्च हर्षदेवेन दैवेनेव महाद्भुतः ॥ ८६७ ॥

यथाकथञ्चिद् व्युत्क्रान्ता बहवः पृथिवीभृतः ।
प्रतीतिविषमो मार्गः कष्टमापतितोऽधुना ॥ ८६८ ॥

सर्वोत्साहोदयक्षेत्रं सर्वानुल्लासदूतिका ।
सर्वव्यवस्थाजननी सर्वनीतिव्यपोहकृत् ॥ ८६९ ॥

उद्रिक्तशासनस्फूर्तिरुद्रिक्ताज्ञाक्षयक्षितिः ।
उद्रिक्तत्यागसम्पत्तिरुद्रिक्तहरणग्रहा ॥ ८७० ॥

कारुण्योत्सेकसुभगा हिंसोत्सेकभयंकरी ।
सत्कर्मोत्सेकललिता पापोत्सेककलङ्किता ॥ ८७१ ॥

स्पृहणीया च वर्ज्या च वन्द्या निन्द्या च सर्वतः ।
निश्चोद्या चोपहास्या च काम्या शोच्या च धीमताम् ॥८७२॥

आशास्या चाऽपकीर्त्या च स्मार्या त्याज्या च मानसात् ।
हर्षराजाश्रया चर्चा कथं व्यावर्णयिष्यते ॥ ८७३ ॥

नूनं स तैजसैरेव सस्रजे परमाणुभिः ।
कुतोऽन्यथाऽभूत् पूषेव दुष्प्रेक्ष्यो महतामपि ॥ ८७४ ॥

---

865. d) All Mss. except SL read समर्पितम् (for समार्पिपत्). After this *v.* तिलकम्.

867. d) P_2 दैवनैव (for दैवेनेव). सहाद्भु° (for महाद्भु°).

869. P_1 om. *bc.* —a) All Mss. except SL read °होदक° (for °होदय°).

873. cd) All Mss. except SL read चर्चाकथा (for चर्चा कथं). After this *v.* कुलकम्.

874. c) All Mss. except SL read प्रसवे (for पूषेव).

न मर्त्येषु न देवेषु तद्वेषो दृश्यते क्वचित् ।
दानवेन्द्रेषु स प्राज्ञैः परमुत्प्रेक्ष्यते यदि ॥ ८७५ ॥

प्रतिमार्कपरीमाणज्वलत्कुण्डलमण्डितः ।
उत्तुङ्गमुकुटानद्धविकटोष्णीषमण्डलः ॥ ८७६ ॥

प्रसन्नासिंहविप्रेक्षी नीचश्मश्रुच्छटाञ्चितः ।
वृषस्कन्धो महाबाहुः श्यामलोहितविग्रहः ॥ ८७७ ॥

व्यूढवक्षाः क्षाममध्यो मेघघोषगभीरवाक् ।
सोऽमानुषाणामपि यत् प्रतिभाभङ्गकार्यभूत् ॥ ८७८ ॥

सिंहद्वारे महाघण्टाश्चतुर्दिक्कमबन्धयत् ।
ज्ञातुं विज्ञप्तिकामान् स प्राप्तांस्तद्वाद्यसंज्ञया ॥ ८७९ ॥

आर्तां च वाचमाकर्ण्य तेषां तृष्णानिवारणम् ।
प्रावृषेण्यः पयोवाहश्चातकानामिवाऽकरोत् ॥ ८८० ॥

अचित्रवस्त्रो निर्हेमभूषणोऽल्पपरिच्छदः ।
ददृशे विगतोत्साहो न कश्चिद् राजमन्दिरे ॥ ८८१ ॥

सिंहद्वारे नरपतेर्नानाजनपदाश्रिते ।
सर्वदेशश्रियोऽश्रान्तमासन् राशीकृता इव ॥ ८८२ ॥

अपेतसंख्याः सौवर्णशृङ्खलाकटकान्विताः ।
भ्रेमुर्मन्त्रिप्रतीहारमुख्याः क्ष्मापतिमन्दिरे ॥ ८८३ ॥

---

875. b) $P_{1,2}$ उद्देश्यो (for तद्वेषो).

878. a) D (before suggestion) C P_{1-3} °वक्षः (for °वक्षाः). —d) S′ °भासङ्ग° (for °भाभङ्ग°). After this *v.* तिलकम् .

879. SA_1 (before corr.) मघा° (for महा°).

880. ab) SA_1 om. कर्ण्य and तृष्णा with a space.

881. c) P_1 I_3 SA_1 have a *lacuna* of two syllables after विगतो; D′ °तोष्णीषो; P_3 °तोष्णीके; C °तोत्तापे; St suggests. °तोद्वगे; P_2 °तो राजा; S′ °तोत्तापि (for °तोत्साहो found in SL).

882. b) All the Mss. except SL read °समाश्रिते (for °पदाश्रिते). —d) SA °मासीत्राशी°; $P_{1,3}$ I_3 °मासीद्राशी°; S′ °मासन्नासी° [sic] (for °मासन् राशी°).

एवं स्फूर्जन् स नृपतिर्नवसाम्राज्यसुन्दरः ।
अभूद् विजयमल्लस्य गुरोरिव मते स्थितः ॥ ८८४ ॥

आदीयमानवचसः कृतज्ञेन महीभुजा ।
तस्याऽभूत् पार्थिवस्येव सेवकैः संकटा सभा ॥ ८८५ ॥

स्वसेवकाननादृत्य रक्षन् संस्थाव्यतिक्रमम् ।
पित्र्येभ्य एव मन्त्रिभ्यः सोऽधिकारान् समार्पयत् ॥ ८८६ ॥

द्वारे चकार कंदर्पं मदनं चाऽपि कम्पने ।
अन्यान् विजयसिंहादीन् कर्तव्ये च निजे निजे ॥ ८८७ ॥

तेन प्रशस्तकलशप्रमुखाः शान्तमन्युना ।
बन्धात् संत्यज्य कार्येषु निजेष्वेव नियोजिताः ॥ ८८८ ॥

स्मृत्वाऽपकारान् सुबहूनमात्यो नोनकः परम् ।
धात्रेयेण समं भ्रात्रा कोपाच्छूले विपादितः ॥ ८८९ ॥

काले काले तु कार्येषु संकटेषु महामतिम् ।
संस्मरन् स्वामिभक्तं तं पश्चात्तापेन पस्पृशे ॥ ८९० ॥

योग्यः कृतापकारोऽपि कदाचिदुपयुज्यते ।
विहितागारदाहोऽग्निः शरणं भोज्यसिद्धये ॥ ८९१ ॥

संदर्श्याऽग्रे स्वभार्यायाः कर्णनासावकर्तनम् ।
विश्शावट्टो राजभृत्यैः शूलेनैव विपादितः ॥ ८९२ ॥

उदये संविभेजे स भृत्यान् काराविनिर्गतान् ।
मधौ प्रफुल्लः शाखीव भृङ्गान् भूविवरोत्थितान् ॥ ८९३ ॥

---

886. d) D (before suggestion) St P_{1-3} I_3 समर्पयत् (for समार्पयत् also found in SL).

888. d) SA_1 om. निजेष्वेव.

889. a) SA_1 (before corr.) P_2 I_3 स्मृत्वोप° (for स्मृत्वाऽप°).

890. c) P_3 °रन्भूमि° (for °रन् स्वामि°).

892. c) SL भिःशाव°; D C S′ P_{1-3} I_3 विश्शाभ° (for विश्शाव° suggested cf. *vv.* vii. 617–629).

893. SA_2 gloss मधौ वसन्ते भूविवरोत्थिता भृङ्गा नीज्यबम्बर इति भाषया प्रसिद्धाः ये अस्तावलम्बिनि सूर्ये सूक्ष्मेभ्यः भूविवरेभ्यः वसन्तसमये उत्तिष्ठन्ति शाद्वलोपरि सञ्चारार्थं (for *cd*).

राक्केः क्षेमस्य यः पौत्रो वज्रजः स महीभुजा ।
सर्वामात्यप्रधानत्वं निन्ये सुन्नः सहाऽनुजः ॥ ८९४ ॥

राज्ञो यात्रादिसमये प्रेक्षकाणां पदे पदे ।
एक एकोऽभवन्मन्त्री महीपालभ्रमप्रदः ॥ ८९५ ॥

सर्वप्रतीहारघटामूर्धानमधिरोपितः ।
जयराजोऽनुजस्तस्य जीवितादधिकोऽभवत् ॥ ८९६ ॥

जाह्नवीयात्रया भ्रात्रोरानृण्यं शान्तयोर्गतः ।
धम्मटः सोऽपि तान्वङ्गिर्भ्रातृपुत्रैः सहाऽऽययौ ॥ ८९७ ॥

संमान्य तं नरपतिः स्वकृते हारिताग्रजम् ।
सभ्रातृपुत्रमद्राक्षीत् स्वाऽविशेषेण सर्वदा ॥ ८९८ ॥

विभज्य भुञ्जतो राज्यं तस्यैवं प्रेरितः खलैः ।
क्रमाद् विजयमल्लोऽथ दुध्रुक्षुर्विकृतिं दधे ॥ ८९९ ॥

राज्यं प्रादाः किमन्यस्मै जित्वेत्युक्तः स दुर्जनैः ।
तल्लिप्सुर्मन्त्रयामास वधं प्रथमजन्मनः ॥ ९०० ॥

विजने मन्दिरे हन्यामिति संमन्त्र्य भूपतिः ।
यागं विधाय व्याजेन तेनाऽऽगन्तुं निमन्त्रितः ॥ ९०१ ॥

मन्त्रे श्रुतिं गते राज्ञः सोऽथाऽऽस्कन्दविशङ्कितः ।
आदिदेश स्वसैन्यानां द्रुतं संनहनोद्यमम् ॥ ९०२ ॥

संनद्धे राजसैन्येऽथ द्रुतं निगर्त्य भूपतेः ।
हृता विजयमल्लेन मन्दुराभ्यस्तुरंगमाः ॥ ९०३ ॥

---

895. c) S′ C एवाभव° (for एकोऽभव°). —d) P_2 °प्रदा (for °प्रदः).
896. c) D $P_{1,3}$ C यायराजो°; S′ यायराज्ञो° (for जयराजो°).
897. b) D St P_{1-3} I_3 read °नृशंस्या and then indicate a *lacuna* of four syllables after that; S′ C °नृंशंस्याद्विचक्षणः (for °नृण्यं शान्तयोर्गतः found in SL). —c) All Mss. except SL read तान्वङ्गै° (for तान्वङ्गि°).
899. d) D (before suggestion) St (before corr.) C S′ P_{1-3} I_3 दुद्रुक्षु° (for दुध्रुक्षु°).
902. b) SA_1 om. थास्कन्द with a space. —d) D (before suggestion) SA P_{1-3} I_3 C S′ °नोद्यतम् (for °नोद्यमम् also found in SL).

संहरंस्तुरगान् वीक्ष्य प्रहरन् नृपतेर्बलम् ।
कुर्वन्महाहवं वीरो निर्गन्तुं तत्वरे पुरात् ॥ ९०४ ॥

आश्लिष्य पृष्ठं तिष्ठन्त्या जायया सहितो व्रजन् ।
स चकार तुरंगस्थः संग्राममतिमानुषम् ॥ ९०५ ॥

धारासारैः क्षणे तस्मिन्नकालजलदोज्झितैः ।
विपर्यस्तेव पृथिवी सर्वतः समलक्ष्यत ॥ ९०६ ॥

भांकारमारुतारब्धभूरिभेरीरवे रणे ।
आसारेण शरैश्चासीच्छाद्यमानो नृपात्मजः ॥ ९०७ ॥

तं क्षीयमाणपृतनं यान्तं हन्तुं समुद्यताः ।
कर्माणि प्राक्तनानीव न चण्डकसुता जहुः ॥ ९०८ ॥

भग्नसेतुं पयोवेगैर्वितस्तासिन्धुसंगमम् ।
सजानिरतरद्दोर्भ्यामवतीर्य स वाजिनः ॥ ९०९ ॥

सत्त्ववान्नाकरोत् पत्न्या मज्जनं रिपुसंकटे ।
सिन्धुं प्रवृद्धामुत्तीर्य तुरंगोऽपि तमन्वगात् ॥ ९१० ॥

द्विषां दृग्गोचराद् यातः स तमारुह्य वाजिनम् ।
दरदेशोन्मुखो वीरः प्रायाल्लहरवर्त्मना ॥ ९११ ॥

कंदर्पद्वारपतिना सर्वतो रुद्धपद्धतिः ।
गिरीनुल्लङ्घ्य चाऽविक्षद् गिरिगुप्तां दरत्पुरीम् ॥ ९१२ ॥

---

904. a) SA_1 om. संहरन् with a space.

906. c) C S′ °स्तैव (for °स्तेव).

908. c) St D P_{1-3} C S′ I_3 प्रकृतानीव; St suggests प्राक्कृतानीव (for प्राक्तनानीव found in SL).

909. c) SA_1 om. सजानिर with a space. SA_1 (before corr.) तरन्दो° (for °तरद्दो°). —d) SA_1 (before corr.) °तार्य (for °तीर्य).

910. a) SA_1 (before corr.) °वामक°; D C S′ St P_{1-3} I_3 °वानकरो°; SL °त्वानाकरो° (for °वान्नाकरो° as suggested by St Tr. fn.). SA_1 om. त्पत्न्या with a space. —b) SA_1 om. नं in मज्जनं with a space. D P_{1-3} सज्जनं (for मज्जनं).

दरदाऽभ्यर्चितं तत्र श्रीविद्याधरशाहिना ।
केचिन्निजाः परिजनाः शनकैस्तं प्रपेदिरे ॥ ९१ ॥

श्रुत्वा स्वीकार्यमाणं च संरम्भं डामरादिभिः ।
प्रायुङ्क्त हर्षपृथ्वीभृदुपायांश्चकितोऽन्वहम् ॥ ९१४ ॥

तेषु वन्ध्येषु शीतर्तुं सोऽतिवाह्य दरत्पुरे ।
डामरैः प्रहितालापश्चैत्रे यात्रामदान्मदात् ॥ ९१५ ॥

उत्तीर्य संकटांस्तिष्ठन्मार्गान्तः पटमण्डपे ।
अकस्मादभवन्मानी हिमानीहृतजीवितः ॥ ९१६ ॥

यदुल्लासाय संरम्भो धीरैर्विस्तार्यते महान् ।
कृत्यं हिनस्ति तद्दैवमत्यल्पेनैव वस्तुना ॥ ९१७ ॥

उन्मीलनं तिग्मरुचिः प्रयत्नाद्
येषां सहस्रेण करैः करोति ।
उन्मूलयत्येककरेण तानि
पद्मानि धाता कुपितो द्विपेन ॥ ९१८ ॥

द्वैराज्यशङ्कया कंचित्कालं संकुचितं ततः ।
भूयः प्रभवितुं लग्नं राज्यं हर्षमहीभुजः ॥ ९१९ ॥

राजशब्दस्तदा सेहे न कुत्राऽप्यधिरोहणम् ।
अत्युदग्रतया तस्मिल्लघुत्वेनाऽन्यराजसु ॥ ९२० ॥

स शोभादायिनीर्भङ्गीः प्रावर्तयत मण्डले ।
निर्मत्सरो नरपतिः पुष्पर्तुरिव कानने ॥ ९२१ ॥

---

913. [a]) SA_1 (before corr.) दरद्या° (for दरदा°). —[b]) St SA P_3 I_3 have a *lacuna* of one syllable before हिना; D S′ C $P_{1,2}$ °देहिना (for °शाहिना).

915. [a]) C S′ P_1 I_3 शीतन्तु (for शीतर्तुं). —[d]) SA_1 om. न्मदात् with a space.

916. [b]) SA_1 (before corr.) पुर° (for पट°).

919. [cd]) SA_1 om. प्रभवितुं लग्नं राज्यं with a space. D St P_{1-3} S′ C प्रभयतो; I_3 प्रभायतो; D suggests प्रभवतो (for प्रभवितुं found in SL).

920. [b]) S′ St $P_{1,3}$ I_3 °रोपणम् (for °रोहणम् also found in SL).

921. [a]) All St. Mss. read सुशोभा° (for स शोभा°).

मुक्तकेशा निरुष्णीषा निष्कर्णाभरणा पुरा ।
संत्यज्यैकं महीपालमभवन्निह देहिनः ॥ ९२२ ॥

धम्मिल्लग्रथनाद् यत्र मदनः कम्पनापतिः ।
जयानन्दोऽप्यमात्याग्र्यश्चित्रार्धोरुकधारणात् ॥ ९२३ ॥

अन्वभूत् पार्थिवक्रोधमविशेषेण मण्डले ।
तेन राज्योचितो वेषस्तत्र राज्ञा प्रवर्तितः ॥ ९२४ ॥

स केषांचिदमात्यानामाकल्पोल्लासशोभिनाम् ।
निर्मत्सरः स्वदासीभिरारात्रिकमकारयत् ॥ ९२५ ॥

दाक्षिणात्याऽभवद्भङ्गिः प्रिया तस्य विलासिनः ।
कर्णाटानुगुणष्टङ्कस्ततस्तेन प्रवर्तितः ॥ ९२६ ॥

लडत्तालीदला स्थूलचन्दनस्थाससुन्दराः ।
रेजुर्जनास्तदाऽऽस्थाने श्लाघ्यदीर्घासिधेनवः ॥ ९२७ ॥

स्वर्णकेतकपत्राङ्कजूटलम्बोर्जितस्रजः ।
चटुलातिलकाश्लिष्टविलोलतिलकाङ्कुराः ॥ ९२८ ॥

अपाङ्गश्रोत्रयोर्बद्धसंधयोऽञ्जनरेखया ।
निर्नीरङ्गिककेशान्तबद्धहेमोपवीतकाः ॥ ९२९ ॥

अधराम्बरपुच्छान्तैर्लम्बैश्चुम्बितभूतलाः ।
प्रच्छादितार्धदोर्लेखकञ्चुकाङ्कपयोधराः ॥ ९३० ॥

कर्पूरोद्धूलनस्मेरा भ्रमन्त्यस्तरलभ्रुवः ।
बभुराश्रितपुंवेषा झषाङ्कच्छलदङ्कताम् ॥ ९३१ ॥

अन्योपजीव्यतां प्रापुस्तस्याऽर्थित्वेन मार्गणाः ।
विश्वाप्यायकतां मेघाः प्रणयेनेव वारिधेः ॥ ९३२ ॥

---

922. b) All Mss. except SL read निष्कला° (for निष्कर्णा°). D P_2 C पुरः (for पुरा).

924. After this *v.* युग्मम् .

928. c) C S′ चटुलास्तिलका°; SA_3 gloss ललाटलम्ब्यलंकारश्चटुलातिलको मतः (for चटुलातिलका°).

931. c) SA_1 °पुंवेशा (for °पुंवेषा). —d) °च्छलदङ्गताम् is suggested (for °च्छलदङ्कताम् found in all Mss.). After this *v.* चक्कलकम् .

932. d) P_2 °येनैव (for °येनेव).

प्रसादैस्त्यागिनस्तस्य राज्ञः कनकवर्षिणः ।
समस्ता गाथकगणाः पार्थिवस्पर्धितां ययुः ॥ ९३३ ॥

विद्वच्चूडामणिर्भूभृत् पण्डितान् रत्नमण्डितान् ।
चकार युग्यतुरगच्छत्त्रादिप्रक्रियाभृतः ॥ ९३४ ॥

कश्मीरेभ्यो विनिर्यातं काले कलशभूपतेः ।
विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः ॥ ९३५ ॥

प्रसर्पतः करटिभिः कर्णाटकटकान्तरे ।
राज्ञोऽग्रे ददृशे तुङ्गं यस्यैवाऽऽतपवारणम् ॥ ९३६ ॥

त्यागिनं हर्षदेवं स श्रुत्वा सुकविबान्धवम् ।
बिल्हणो वञ्चनां मेने विभूतिं तावतीमपि ॥ ९३७ ॥

सौवर्णामलसाराढ्या राजधान्यो धरापतेः ।
सुबद्धयोऽभ्रलिहगृहा भ्रेजिरे भुवनाद्भुताः ॥ ९३८ ॥

तदीये नन्दनवने द्रुमेभ्यो न व्यधुः स्थितिम् ।
त्यागिना निर्जितास्तेन केवलं कल्पपादपाः ॥ ९३९ ॥

विविधाभिरशून्याम्बु विहङ्गमृगजातिभिः ।
तेन व्याप्तदिगाभोगं चक्रे पम्पाभिधं सरः ॥ ९४० ॥

सोऽङ्गासीद् यावतीर्विद्यास्तासां नामाऽपि निश्चितम् ।
वक्तुं नास्त्येव सामर्थ्यं व्यक्तं वाचस्पतेरपि ॥ ९४१ ॥

गीतमाकर्ण्यतेऽद्याऽपि तस्य वाग्गेयकारिणः ।
विपक्षैरपि पक्ष्माग्रलुठद्बाष्पोदबिन्दुभिः ॥ ९४२ ॥

स्वपतो दिनयामौ द्वौ सर्वकालं विलासिनः ।
दत्तास्थानस्य तस्याऽऽसीद् यामिनीषु प्रजागरः ॥ ९४३ ॥

---

935. a) D (before suggestion) and All Mss. except SL read विनिर्यान्तं (for विनिर्यातं). —b) All Mss. except SL read राज्ये (for काले). —c) P_2 यः (for यं).
937. c) S' रिल्हणो (for बिल्हणो).
938. a) SA_1 (before corr.) सौवर्णामाल° (for सौवर्णामल°). SA_1 om. राढ्या with a space.
939. b) St I_3 नो व्यधुः (for न व्यधुः).
943. c) All Mss. except SL read दत्तस्थानस्य (for दत्तास्थानस्य).

तस्य दीपसहस्राङ्के स्थितस्याऽऽस्थानमण्डपे ।
विद्वद्गोष्ठीगीतनृत्तप्रस्तावेन क्षपा ययुः ॥ ९४४ ॥

कथान्ते शुश्रुवे तत्र पर्णचर्वणजः परम् ।
कान्ताधम्मिल्लशेफालीत्रुटिजन्मा च मर्मरः ॥ ९४५ ॥

वितानैः सपयोदेव साग्निवप्रेव दीपकैः ।
रुक्मदण्डैः सशम्पेव सधूमेवाऽसिमण्डलैः ॥ ९४६ ॥

साप्सरा इव कान्ताभिः सनक्षत्रेव मन्त्रिभिः ।
सर्षिसंघेव विबुधैः सगन्धर्वेव गायनैः ॥ ९४७ ॥

नित्यसंकेतवसतिर्धनदस्य यमस्य च ।
एकं विहरणारण्यं दानस्य च भयस्य च ॥ ९४८ ॥

क्षपास्थानस्थितिस्तस्य राज्ञः शक्राधिकश्रियः ।
कस्य वाचस्पतेर्वाचा वक्तुं कार्त्स्न्येन शक्यते ॥ ९४९ ॥

रौक्मैश्च राजतैश्चाऽऽसीद् व्यवहारस्तदा घनः ।
मण्डले विरलोऽमुष्मिन् दीन्नारैस्ताम्रजैः पुनः ॥ ९५० ॥

दण्डनायकतां प्राप्य सुन्नः सर्वोन्नतिं भजन् ।
तस्मिन् काले त्वभूल्लोभान्नीचो मुष्टिपचः परम् ॥ ९५१ ॥

निजा जयवने सूर्यामूलके विजयेश्वरे ।
आख्यान्ति यस्य लुब्धत्वं निर्व्ययस्थितयो मठाः ॥ ९५२ ॥

क्षुधितव्याधितानाथदीनाद्यार्तिनिवारणात् ।
सुस्पष्टं प्राप पट्टस्य राज्यलक्ष्मीः कृतार्थताम् ॥ ९५३ ॥

नन्दिक्षेत्रे व्ययीकृत्य प्रत्यब्दं सप्त वासरान् ।
चण्पकः सफलां चक्रे सर्वकालार्जितां श्रियम् ॥ ९५४ ॥

---

945. c) P_2 कर्ता (for कान्ता°).
946. c) C S′ ससर्पेव (for सशम्पेव).
948. P_3 om. *cd*.
949. After this *v*. चक्कलकम् .
950. c) St (before corr.) विरलामु° (for विरलोऽमु°).
951. b) $P_{1,3}$ I_3 सुर्नः (for सुन्नः).
953. b) D (before suggestion) S′ C P_{1-3} St I_3 निवारणम् (for निवारणात् suggested with D).

कृष्णाजिनोभयमुखीमुख्यैर्दानैः क्षमाभुजा ।
अदरिद्रीकृता विप्रा निश्शेषार्तिच्छिदार्थिनाम् ॥ ९५५ ॥

राज्ञो वसन्तलेखाख्या शाहिवंशप्रियाऽकरोत् ।
मठाग्रहाराञ्नगरे पूज्ये च त्रिपुरेश्वरे ॥ ९५६ ॥

माहेश्वर्यमयी काचिदित्थं ज्वालेव सोद्ययौ ।
उदारव्यवहारं तु न तद्राज्यं प्रचक्षते ॥ ९५७ ॥

अथ प्रवृद्धिं सम्प्राप्ताः शनकैर्नवमन्त्रिणः ।
पूर्वामात्यद्विषो राज्ञो मतिमोहं प्रचक्रिरे ॥ ९५८ ॥

कुष्ठार्ताङ्घ्रियुगः शिखी बहुपदं गृह्णाति धावन्नहिं
भानुः पादसहस्रभाक् प्रतिपदं संचार्यतेऽनूरुणा ।
वञ्च्यन्ते बलिनोऽपि यल्लघुबलैः सामर्थ्यहीनैश्च यद्
भ्राम्यन्ते परिपूर्णवृत्तय इदं दैवस्य लीलायितम् ॥९५९॥

स सर्वशास्त्राधिगमप्रौढः परिवृढो विशाम् ।
यन्मोहितमतिश्चक्रे वैधेयैरपि मन्त्रिभिः ॥ ९६० ॥

विपन्नस्य पितुर्वैरप्रतिकारविधित्सया ।
स राजधानीनामाङ्कं मठादि निरलोठयत् ॥ ९६१ ॥

त्यागी तत्कोशसंभारं व्ययीकुर्वन्नितस्ततः ।
लुब्धस्य चाऽभिधां तस्य पापसेन इति व्यधात् ॥ ९६२ ॥

शुद्धान्तेऽशुद्धशीलानां ढौकितं मूढचेतसा ।
स्पष्टं षष्ट्यधिकं राज्ञा स्त्रीणां तेन शतत्रयम् ॥ ९६३ ॥

यादृशीस्तादृशीस्तत्र नारीर्विन्यस्यताऽनिशम् ।
नाऽगृह्यन्त परं डोम्बजनंगमकुलाङ्गनाः ॥ ९६४ ॥

---

955. d) P_{1-3} I_3 °तार्थिनम् (for °तार्थिनाम्).
959. d) S′ इव (for इदं).
961. cd) C S′ St $P_{1,3}$ °माङ्कमठा° (for °माङ्कं मठा°). C S′ °ठादिभिरलो° (for °ठादि निरलो°).
963. a) St °द्धान्ते शुद्ध° (for °द्धान्तेऽशुद्ध°).
964. c) C S′ डाम्भ°; P_{1-3} I_3 SA डोम्भ° (for डोम्ब°).

78/9/1

अत्रान्तरे प्रेर्यमाणो गूढं कोटपदातिभिः ।
पुनर्भुवनराजोऽभूल्लोहरालब्धिलुब्धधीः ॥ ९६५ ॥

स दर्पितपुरं प्राप्तः कंदर्पद्वारनायकम् ।
श्रुत्वा योद्धुं विनिर्यातं ययौ भूयोऽप्यदृश्यताम् ॥ ९६६ ॥

तस्मिन् प्रसङ्गेऽपि नृपो दृप्यन् राजपुरीपतिः ।
संग्रामपालः केनाऽपि हेतुना विक्रियां ययौ ॥ ९६७ ॥

कंदर्पे कोटभृत्यानां भिन्नानां संग्रहोद्यते ।
क्रुध्यन् राजपुरीं राजा व्यसृजद् दण्डनायकम् ॥ ९६८ ॥

स महद्भिः समं सैन्यैर्गच्छंल्लोहरवर्त्मना ।
अधीरः कोटकच्छेषु सार्धं मासं व्यलम्बत ॥ ९६९ ॥

प्रत्यासन्नाच्छुचेर्मासात् प्रतापाच्च विरोधिनाम् ।
त्रस्यतस्तस्य यात्रायां न संकल्पोऽप्यराजत ॥ ९७० ॥

अविशेषज्ञभावेन भर्तुस्तिष्ठन्निरुद्यमः ।
ततो जगाम कंदर्प एवोपालम्भपात्रताम् ॥ ९७१ ॥

कृतप्रतिज्ञोऽनाहारतया राजपुरीजये ।
उपालम्भार्दितः सोऽथ निस्सामग्र्योऽप्यवाचलत् ॥ ९७२ ॥

निराहारस्य वसतः कंदर्पस्याऽद्रिगह्वरे ।
षष्ठेऽह्न्यभूद् राजपुरी योजनेऽभ्यधिके स्थिता ॥ ९७३ ॥

---

965. a) All Mss. read पूर्यमाणो (for प्रेर्यमाणो as suggested by St. in Tr.). —d) All Mss. read लहरा° (for लोहरा° as suggested by St. in Tr.).

966. a) C S′ $P_{1,2}$ I_3 मदर्पित° (for स दर्पित°).

967. b) I_3 °पुरीं पतिः (for °पुरीपतिः).

968. c) D C आजपुरीं (for राजपुरीं).

971. d) D (before suggestion) St P_{1-3} I_3 C S′ °मात्रताम् (for °पात्रताम्).

अव्याहतः सोऽरिबलाद् द्विषच्छत्राणि पातयन् ।
कदलीपल्लवान्मृद्नन् वनं सिंह इवाऽविशत् ॥ ९७४ ॥

दण्डनायकसैन्येभ्यः परमेकस्तमन्वगात् ।
सेनानीः कुलराजाख्यो बुद्धराजकुलोद्भवः ॥ ९७५ ॥

तं बाह्याल्यां राजपुर्या हताऽसंख्याहितं द्विषः ।
निहत्य शुक्लच्छत्राङ्कं कंदर्पं मेनिरे हतम् ॥ ९७६ ॥

मध्याह्ने स तु कंदर्पः स्वयं संप्राविशद् बली ।
राजधानीं राजपुर्या विंशत्रिंशैः समं भटैः ॥ ९७७ ॥

द्विषां त्रिंशत्सहस्राणि योधानामनिवर्तिनाम् ।
रुरोध राजपुर्यग्रे तत्पदातिशतत्रयम् ॥ ९७८ ॥

काश्मीरकाणां निहतं रणे तत्र शतद्वयम् ।
चत्वारि तु शतान्युर्वी खशानामध्यशेरत ॥ ९७९ ॥

भग्ने रिपुबले दूरमसंख्येयैश्चिताग्निभिः ।
संस्कुर्वद्भिर्हतानासीद् रणे मृत्योर्महानसः ॥ ९८० ॥

तेनैवं स्वाम्युपालम्भवेतालो रभसाऽर्पितैः ।
रणश्मशाने वीरेण शमितो मांसशोणितैः ॥ ९८१ ॥

याममात्रावशेषेऽह्नि पुनरेवाऽथ संहताः ।
द्विषः परिभवोत्तप्ताः कंदर्पं योद्धुमाययुः ॥ ९८२ ॥

---

976. a) D S′ $P_{1,2}$ I_3 बाह्याल्यां (for बाह्याल्यां).

979. a) St (before corr.) S′ °श्मीरिका° (for °श्मीरका°). —d) All Mss. except SL read °मध्यशेर° (for °मध्यशेर°).

980. cd) D (before suggestion) St P_{1-3} I_3 S′ C °तान्राशीन्रणो; D suggests °तानासीद्रणो (for °तानासीद् रणे found in SL).

981. b) All Mss. except SL read °सार्पितः (for °साऽर्पितैः). —d) I_3 °शोणितः (for °शोणितैः).

982. c) SA_1 °भवो तप्ताः (for °भवोत्तप्ताः).

उत्तप्तानथ नाराचान्निचिक्षेप स संयुगे।
लिप्तानोषधितैलेन विद्धा यैः प्राज्वलन् द्विषः ॥ ९८३ ॥

आग्नेयं वेत्त्यसावस्त्रमिति मूढा विशङ्किताः।
ते दूरं प्रययुर्भीता निन्दन्तः पुनरागमम् ॥ ९८४ ॥

प्रगल्भभावः प्रतिभानमोजः
प्रयोगचातुर्यमसंभ्रमश्च ।
महाशयानामतिसंकटेषु
धैर्योपनद्धां न धियं जहाति ॥ ९८५ ॥

राजधानीं प्रविष्टः स भानावस्ताभिलाषिणि।
भूयोऽप्यपश्यत् संछन्नां बाह्यालीं बहुलैर्बलैः ॥ ९८६ ॥

योद्धुं यियासुः शुश्राव प्राप्तं तं दण्डनायकम्।
घोरां रणाटवीं दृष्ट्वा भयात् स्थगितसैनिकम् ॥ ९८७ ॥

स्वीयैर्दृष्टैः क्षतैः केचिद् दृप्यन्त्यधिकमाहवे।
परकीयैस्त्रसन्त्यन्ये कोऽन्तरं वेत्ति देहिनाम् ॥ ९८८ ॥

आनीतोऽथ विनिर्गत्य तेनैव स भये ब्रुडन्।
स्पर्धमानो यथाऽम्भोधौ मज्जन् हंसेन वायसः ॥ ९८९ ॥

रक्तप्रजं व्यूढसैन्यमभिन्नं बहुकोशवत्।
परराष्ट्रं विशेदेवं स्ववीर्येणैव कोऽपरः ॥ ९९० ॥

---

983. a) All Mss. except SL read ततस्ता° (for उत्तप्ता°). —c) C St P_2 I_3 °नौषधि°; S′ °नोषिधि°; D °नौषध° (for °नोषधि° found in SL). —d) All Mss. except SL read °लन्दिशः (for °लन् द्विषः).

986. c) St C S′ P_{1-3} I_3 °त्स छन्नां (for °त् संछन्नां).

987. d) P_2 om. सैनिकम्.

988. ab) P_2 om. upto धिक. D (before suggestion) St P_{1-3} C S′ कैश्चिद् (for केचिद् also found in SL). —c) All Mss. except SL read पारकी° (for परकी°).

990. a) All Mss. except SL read वीतसैन्य°; D suggests वीरसैन्य° (for व्यूढसैन्य°).

प्रणतात् करमादाय ततो राजपुरीपतेः ।
मासमात्रेण कंदर्पः पुनः स्वां भुवमाययौ ॥ ९९१ ॥

प्रत्युद्गमादिसत्कारैः कृतपूजो महीभुजा ।
स दण्डनायकादीनां शिरश्शूलावहोऽभवत् ॥ ९९२ ॥

परिहासपुरे पारिपाल्यं कुर्वन् कठोरधीः ।
वातगण्डाख्यया ख्यातिं निन्ये यस्तत्र पर्षदा ॥ ९९३ ॥

प्रभूतोत्कोचसंप्रीतसचिवप्रेरणस्पृशा ।
अपास्य वामनं राज्ञा पादाग्रादौ नियोजितः ॥ ९९४ ॥

आनन्दः स क्षणे तस्मिन्निच्छन् द्वाराधिकारिताम् ।
कंदर्पद्वेषिणामासीन्मन्त्रिणामतिसंमतः ॥ ९९५ ॥

तत्प्रेरितस्ततः पातुं लोहरं विप्लुताहितम् ।
मण्डलेश्वरतां दत्वा कंदर्पं प्राहिणोन्नृपः ॥ ९९६ ॥

मन्त्रविक्रमसंपन्नः कुभृत्यैः स्वोदयेप्सुभिः ।
युक्तया तया राजपशोः समीपात् सोऽपवाहितः ॥ ९९७ ॥

दूत्यार्होऽयमिति प्रहाय निकटाद् देशान्तरं वाग्मिनं
सूरिं बन्धुवियोगकृन्ननु वचोऽमुष्येति संत्यज्य च ।
शूरं राज्यमसौ हरेदिति भयात् हित्वा विचारोज्झितो
धूर्तप्रेरणयाऽबुधो नृपपशुर्नाऽऽयाति नाशं चिरात् ॥९९८॥

अदर्शनात् सुबद्धापि कंदर्पप्रीतिराशयात् ।
राज्ञो जगाल कालेन सा मुष्टेरिव वालुका ॥ ९९९ ॥

---

991. d) D (before corr.) St P_{1-3} I_3 S' C स भुव°; D and St suggest स्वभुव° (for स्वां भुव° found in SL).
994. c) All Mss. except SA_1 read वासनं (for वामनं).
995. cd) P_2 om. *cd*. —d) D $P_{1,3}$ I_3 C °मभिसं° (for °मतिसं°).
998. c) St I_3 शूरो (for शूरं also found in SL). D (before suggestion) and all other Mss. read तया (for भयात् suggested).
999. d) SA_1 (before corr.) मुष्टिरिव (for मुष्टेरिव).

उत्कर्षपुत्रमादाय चिकीर्षुर्लोहरेशताम् ।
कंदर्पो वर्तत इति क्षितिपं मन्त्रिणोऽवदन् ॥१०००॥

तथेति नृपतिर्गृह्णन् बन्धुं हन्तुमथाऽऽशु तम् ।
ससैन्यं व्यसृजत् पट्टं टक्कं चाऽसिधराभिधम् ॥१००१॥

तयोः संप्राप्तयोर्वार्तां तां लेखव्यत्ययाद् विदन् ।
विमुखश्चकितात्मा च कंदर्पोऽभूद् यदा मुहुः ॥१००२॥

केलिद्यूतक्षणे हस्तं मृद्नन् सेवकवत्पुरः ।
आसीदसिधरस्तस्य बन्द्धुमभ्युद्यतस्तदा ॥१००३॥

ततः पाणिं विनिष्कृष्य सोऽङ्गुष्ठाग्रेण तत्करम् ।
अमृद्नाद् येन निस्त्वक्त्वं क्लिन्नः पक्षीव सोऽगमत् ॥१००४॥

अनन्तरज्ञो भूभृच्च तेनाऽऽत्मा च नृपाश्रितः ।
विगर्ह्यते स खिन्नेन पट्टश्चैवमकथ्यत ॥१००५॥

नेयाशयो नरपतिः कुटुम्बं प्रहिणोतु मे ।
अर्पयित्वा ततः कोट्टं प्रयास्यामि दिगन्तरम् ॥१००६॥

आनीय दत्तांस्तैर्ज्ञातीनादाय द्रोहवर्जितः ।
स विमुक्ताधिकारोऽथ मन्त्री वाराणसीं ययौ ॥१००७॥

हत्वा गयायां सामन्तमेकमन्यं निवेश्य च ।
काश्मीरकाणां चक्रे स श्राद्धशुल्कनिवारणम् ॥१००८॥

1000. a) All Mss. except SL read °पुत्रावादा° (for °पुत्रमादा°).
1001. c) SA_4 gloss मन्त्रिणं (for पट्टं). —d) SA_1 रक्कि; I_3 रक्कं; C टक्कं (for टक्कं).
1002. a) SA_1 om. तां in वार्तां with a space. —b) D S′ C लेख्यव्य° (for लेखव्य°). —d) D (before suggestion) St P_{1-3} I_3 S′ C यथा(for यदा also found in SL).
1003. b) C मृदुत्सेव° (for °मृद्नन् सव°). All St. Mss. except SC read सेवकत्पुरः (for सेवकवत्पुरः). —d) All St. Mss. read बद्धुमु° (for बन्द्धुम°).
1004. a) D (before suggestion) and all other Mss. read °निष्कृत्य (for °निष्कृष्य suggested with D). —c) SA_1 निस्त्वक्यं; S′ C निस्तथ्यं; SG SR निस्त्वथ्यं (for निस्त्वक्त्वं also found in SL).
1005. a) S′ C °न्तराजो (for °न्तरज्ञो).
1006. c) S′ St $P_{1,2}$ I_3 कोटं (for कोट्टं).
1008. c) St (before corr.) काश्मीरिकाणां (for काश्मीरकाणां).

स हत्वा चौरसेनान्यं ससैन्यं दुर्गमेऽध्वनि ।
पूर्वाशामध्वनीनानां व्यधान्निर्धूतकण्टकाम् ॥१००९॥

व्याघ्रं निहत्योग्रसत्त्वं वाराणस्यां निरस्यता ।
पूर्वा दिग्भूषिता तेन मठैः सुकृतकर्मठैः ॥१०१०॥

ते तन्निर्वासनादेव लब्धलक्षाः कुमन्त्रिणः ।
अन्योन्यासूयया जघ्नुरथ कार्याणि भूभुजः ॥१०११॥

स्वैराहारोदितगुरुमदाः शृङ्गकण्डूतिशान्त्यै
दुर्वारेर्ष्याकलुषमतयो यत्र दुर्मन्त्रिमेषाः ।
घ्नन्त्यन्योन्यं भवति गणितैर्वासरैरेव कैश्चि-
न्मध्यस्थाणोरिव नरपतेस्तत्र सर्वाङ्गभङ्गः ॥१०१२॥

अतिक्रामति कालेऽथ पार्थिवं हन्तुमुद्यमम् ।
दुष्प्रक्षुर्जातराज्येच्छस्तान्वङ्गिर्धम्मटोऽभजत् ॥१०१३॥

द्रोहापवादभागेष भवेद् राज्यमिदं पुनः ।
मामेव वेश्यापुत्रत्वादनर्हेऽस्मिन्नुपैष्यति ॥१०१४॥

इति संमन्त्र्य सुचिरं निहन्तुं पृथिवीभुजम् ।
प्रेरितो जयराजोऽभूत् तेनाऽसरलचेतसा ॥१०१५॥

विलावग्रामजान् क्षिप्त्वा तीक्ष्णान् द्रोहाय भूपतेः ।
सोऽवरोधवधूर्द्वित्रा विदधे मध्यपातिनीः ॥१०१६॥

1009. b) All Mss. except SL read ससैन्ये (for ससैन्यं). —c) D St P_{1-3} °ध्वनीनां च; C S′ °ध्वनीनां स; SA_1 I_3 °ध्वनीनां (for °ध्वनीनानां found in SL). —d) D (before suggestion) C S′ P_{1-3} °कण्टकम् (for °कण्टकाम्).
1011. b) S′ °लक्ष्याः (for °लक्षाः).
1012. b) SA_1 *sec. manu* °मन्त्रिशेषाः (for °मन्त्रिमेषाः). —c) S′ C $P_{1,2}$ I_3 कश्चि° (for कैश्चि°).
1013. c) All Mss. read दुद्रुक्षुः (for दुष्प्रक्षुः suggested with D).
1014. c) SA_1 *sec. manu* St वैश्या° (for वेश्या°). —d) St S′ P_{1-3} I_3 °न्नुपैष्य° (for °न्नुपैष्य°).
1015. After this *v.* युग्मम्.
1016. c) C S′ सावरो° (for सोऽवरो°).

क्रमात् सिद्ध्युन्मुखे तस्मिन् कार्ये राजपुरीं नृपः ।
दूत्याय व्यसृजज्जातु बहुमानेन धम्मटम् ॥१०१७॥

सहस्रमङ्गलगृहे सुदिनापेक्षया स्थितम् ।
तं सिद्धिभङ्गचकितो जयराजः समाययौ ॥१०१८॥

तमर्थं मण्डपे गूढं तयोर्मन्त्रयमाणयोः ।
प्रयागानुचरः कश्चिद् भित्तिव्यवहितोऽशृणोत् ॥१०१९॥

तदावेदिततद्वार्तात् प्रयागात् तत्कथां ततः ।
बुद्ध्वा निवर्तयामास धम्मटं गमनान्नृपः ॥१०२०॥

कुलक्षयभयात्तिष्ठंस्तत्प्रतीकारमन्थरः ।
स्वमेव केवलं रक्षन्नासीत् स चकितोऽन्वहम् ॥१०२१॥

असिद्धिं जयराजस्तु दृष्ट्वा दूतैः स्वसंमुखौ ।
शमालडामरौ वीरौ वागपाजाभिधौ व्यधात् ॥१०२२॥

स्वभृत्यैर्भेदनिर्यातैर्यियासुं तं निवेदितम् ।
श्रुत्वा क्षपायां क्षितिभृद् दिक्षु चिक्षेप रक्षिणः ॥१०२३॥

व्याजाद् यात्रां वदन् सज्जः प्रातस्तान्वङ्गिरेव तम् ।
चतुष्कं पूजने धूर्तो जयराजमुपानयत् ॥१०२४॥

राज्ञो दत्तार्गले धाम्नि स्थितस्याऽऽस्थानमण्डपम् ।
सत्रा स भ्रातृपुत्रेण धम्मटेन ततोऽविशत् ॥१०२५॥

1018. b) SA_1 (before corr.) D C S′ P_{1-3} I_3 स्थितिम् (for स्थितम्).
1019. b) All Mss. read °मन्त्रायमा° (for °मन्त्रयमा° suggested with D).
1022. d) SL C S′ नाग° (for वाग°).
1023. a) I_3 स्वकृत्यै° (for स्वभृत्यै°).
1024. c) SA_1(before corr.) पूर्तये; SA_2 marg. भोजने (for पूजने).
1025. a) P_2 राज्ञे (for राज्ञो). —b) St S′ $P_{1,2}$ I_3 स्थितस्य स्थान° (for स्थितस्याऽऽस्थान° also found in SL).

रक्षिणोऽथ बहिर्न्यस्य प्रयागः पार्थिवाज्ञया ।
जयराजं बधानेति नीचैर्धम्मटमभ्यधात् ॥१०२६॥

धम्मटे विश्वसञ्शस्त्रं जयराजस्त्यजेद् ध्रुवम् ।
निदेशेनाऽमुना वेत्ति स्वमज्ञातं च धम्मटः ॥१०२७॥

द्वयोरेकस्य वा युद्धे तयोर्मृत्यौ हितं च नः ।
व्यक्तीकृतैक्ययोर्वाऽपि वधो लोकेऽप्यगर्हितः ॥१०२८॥

इति निर्ध्यायतः शश्वदविरोधेन वेधसः ।
प्राज्ञस्य प्रत्यभाद् राज्ञो मन्त्रो युक्ततमस्तदा ॥१०२९॥

नाऽबुद्ध मां ध्रुवं राजा तान्वङ्गिरिति विश्वसन् ।
जयराजमुपागत्य ततो धाष्टर्याद् वचोऽब्रवीत् ॥१०३०॥

अप्रसन्नस्त्वयि नृपो यद्यद्रोहोऽसि निश्चयात् ।
तत्त्वयाऽऽशु विशुद्ध्यर्थमसिधेनुः समर्प्यताम् ॥१०३१॥

दैवेन वा मोहितः स तद्विश्वासेन वाऽत्यजत् ।
आक्षिप्यमाणः शस्त्रास्त्रकोविदः शस्त्रमन्यवत् ॥१०३२॥

वैक्लव्यदर्शनात् सेर्ष्यस्ततः स परुषां गिरम् ।
तन्वङ्गपौत्रष्टङ्काख्यस्तं जगादाऽज्जकात्मजः ॥१०३३॥

न त्वं निस्सत्व कन्याया जातः कलशभूभुजा ।
आसीज्जनयिता नूनं क्लीबो यः कश्चिदेव ते ॥१०३४॥

निष्ठायां धैर्यचर्याणां परिणाममजानता ।
तेनेत्युक्तः स शीताम्बुसिक्तसुप्तोपमोऽभवत् ॥१०३५॥

द्रोहोदन्तं पृच्छयमानो धीरस्तन्मध्यपातिनम् ।
यातनाक्लेशितोऽप्यूचे स्वमेव न तु धम्मटम् ॥१०३६॥

1026. b) SA_1 (before corr.) प्रायमः (for प्रयागः).
1029. c) D (before suggestion) St C S' P_{1-3} I_3 प्रज्ञास्य (for प्राज्ञस्य also found in SL). —d) All Mss. read °स्तथा (for °स्तदा suggested with D). After this *v.* युगलकम्.
1035. After this *v.* तिलकम्.

विषघ्नमन्त्रवीर्येण मोघीकृतविषाशनः ।
रज्ज्वा निपीड्य ग्रीवाग्रं ततो निशि विपादितः ॥१०३७॥

जय्यकेन प्रतीहर्त्रा शिरश्छित्त्वोज्झितं ययौ ।
भट्टारनड्वलातोये तद्वपुर्मत्स्यभोज्यताम् ॥१०३८॥

तमेकसप्तते वर्षे हत्वा भाद्रपदे नृपः ।
वधं गभीरहृदयो धम्मटस्याऽप्यचिन्तयत् ॥१०३९॥

आदिदेशाऽथ तत्सिद्ध्यै रहः शस्त्रभृतां वरम् ।
शूरं कलशराजाख्यं ठक्कुरं लोहराश्रयम् ॥१०४०॥

प्रहिणोति यदा दूतं प्रयागस्ते तदा त्वया ।
संपाद्यमेतदित्यूचे तं चोपचितसत्क्रियम् ॥१०४१॥

असिद्धिभीत्या तं दूतमप्रहिन्वन् प्रयागकः ।
संमन्त्र्य क्रियतामेतदित्यूचे कुपितं नृपम् ॥१०४२॥

राज्ञि मन्त्रयमाणेऽथ पश्चाऽऽनीयाऽग्र्यमन्त्रिणः ।
वामनः सार्गले द्वारे त्यक्तदेहोऽब्रवीद् वचः ॥१०४३॥

मन्त्रश्च मन्त्रिणश्चैते न यावन्निस्सृता बहिः ।
तावत् क्रियेत चेदेतन्न भद्राणि दरिद्रति ॥१०४४॥

राजाज्ञया प्रयागेण ततो दूते विसर्जिते ।
तीक्ष्णः कलशराजाख्यस्तनयाभ्यां सहाऽऽययौ ॥१०४५॥

तस्मिन् प्रसङ्गे तान्वङ्गिः श्येनस्य ददातपम् ।
राजधान्यन्तरेवाऽऽसीद् द्वित्रैरनुचरैः समम् ॥१०४६॥

1037. [d]) P_2 विपाटितः (for विपादितः).

1042. [a]) All Mss. except SL read स्वं (for तं). —[b]) D (before suggestion) St P_{1-3} I_3 S′ C स प्रहिण्वन् (for अप्राहिन्वन् also found in SL). —[d]) All Mss. except SL read कुपितो (for कुपितं).

1043. [a]) C S′ मन्त्रीय°; D (before suggestion) SA P_{1-3} I_3 मन्त्रिय° (for मन्त्रय° suggested with D and St). —[d]) S′ I_3 त्यक्तदेहेऽब्र° (for त्यक्तदेहोऽब्र°).

1045. [a]) St प्रयागेन [sic] (for प्रयागेण).

पुरः कलशराजं तं दृष्ट्वा पश्चाच्च तत्सुतौ ।
यावत् साशङ्कमाचख्यौ तावद् भृत्यैर्निजैर्जहे ॥१०४७॥

शक्तोषि धम्मट क्रष्टुं कृपाणीमिति वादिनम् ।
हन्तुं कलशराजं तं यावच्छस्त्रे व्यधात् करम् ॥१०४८॥

तावत् तेनाऽग्रतः पश्चात् तत्पुत्राभ्यां कृताहतिः ।
आसनादुच्चलन्नेव क्षिप्रं प्राणैरमुच्यत ॥१०४९॥

मुमूर्षुणा क्षतस्तेन ज्यायान् कलशराजजः ।
चित्रमायुधवैगुण्यान्नाऽभीक्ष्णव्रणितोऽभवत् ॥१०५०॥

तस्य ह्यभाग्ययोगेन तेष्वेवाऽहस्सु शस्त्रिणः ।
निजा कृपाणी तुत्रोट तेनाऽभद्रायुधोऽभवत् ॥१०५१॥

निहत्य पातितः पृष्ठात् स तैर्व्याधैरिवाऽण्डजः ।
शुनां ग्रासाय सन्त्यक्तः श्वपाकैः पार्थिवाज्ञया ॥१०५२॥

राज्ञा तन्वङ्गनसारौ स्वयं रल्हणसल्हणौ ।
आगत्य प्राङ्गणे त्यक्तकृपाणी परिरक्षितौ ॥१०५३॥

दत्तास्कन्दास्तु दुल्लाद्याः संरम्भेण युयुत्सवः ।
माययोदयसिंहेन दाम्भिकेनैत्य वञ्चिताः ॥१०५४॥

यूयं पुत्रा ममेत्युक्तवतस्ते धार्मिकस्य यत् ।
प्रत्ययात्तस्य शस्त्राणि तत्यजुर्जीवितेच्छवः ॥१०५५॥

1047. c) SA D C P_{1-3} I_3 सशङ्क° (for साशङ्क°).
1048. a) C D P_{1-3} St I_3 शक्तोऽपि; S′ शाक्तोऽपि (for शक्तोषि found in SL). All Mss. except SL read °म्मटः (for °म्मट). —b) St (after suggestion) °मतिवादिनीम्; $P_{1,3}$ °मिति वादिनीम् (for °मिति वादिनम्). —c) All Mss. except SL read तु (for तं).
1050. b) S′ P_2 °राजतः (for °राजजः).
1051. d) P_2 तेन भद्रा° (for तेनाऽभद्रा°). SA_1 om. युधो with a space.
1053. b) S′ रिल्ह°; P_2 वल्ह° (for रल्ह°). St I_3 °मल्हणौ (for °सल्हणौ). —c) S′ St P_2 I_3 प्राङ्गने [sic] (for प्राङ्गणे).
1054. a) SA $P_{1,2}$ I_3 °स्कन्दाद्यास्तु° (for °स्कन्दास्तु दु°). —c) SL °दयसीहेन (for °दयसिंहेन).

राज्ञो विशुद्धिः क्रियतां पार्श्वमेत्येति तद्वचः ।
तैः समाकर्ण्य जगृहे मार्गो राजगृहान् प्रति ॥१०५६॥

तन्वङ्गजगृहोच्छिष्टैर्बाल एव विवर्धितः ।
टुल्लं ततो विहस्यैवं स्वच्छत्रग्राहकोऽवदत् ॥१०५७॥

तन्वङ्गनप्तर्यत्पूर्वं जयराजमभाषथाः ।
न त्वं निस्सत्त्व कन्याया इति तद्विस्मृतं तव ॥१०५८॥

स ते तादृश एवाऽयं वर्तते संकटक्षणः ।
किं धैर्यावसरे मूढ वैक्लव्यमवलम्बसे ॥१०५९॥

तस्माज्जातोऽसि नियतं मत्पित्रोच्छिष्टपुष्टिना ।
अहं तु तेन वीरेण त्वत्पित्रा कीर्तिभागिना ॥१०६०॥

इत्युक्त्वा स रणे गृह्णन् खड्गधाराझलज्झलाम् ।
पपात जन्ममालिन्यं मानी प्रक्षालयन्निव ॥१०६१॥

नृपान्तिकं प्रयास्याम इति निश्चयतस्ततः ।
टुल्लादीन् राजपुरुषाः कारागारे निचिक्षिपुः ॥१०६२॥

ते यौवनभरोन्मत्ता द्रुमा वासन्तिका इव ।
प्रत्यभासन्त कारुण्याद् रक्षणीयाः क्षमाभुजः ॥१०६३॥

टक्कस्तु बिम्बियो नाम पापः संप्रेर्य भूभुजम् ।
न्यजिग्रहत्तान् ग्रीवासु निशि पाशान्निवेशयन् ॥१०६४॥

1056. c) All Mss. except SL read समागत्य (for समाकर्ण्य). —d) P_1 मार्गे (for मार्गो).

1058. a) C P_{1-3} I_3 D SA °नप्तो यत्पू° (for °नप्तर्यत्पू°).

1059. b) D (before suggestion) St C $P_{1,3}$ I_3 संकटः क्षणः (for संकटक्षणः).

1060. b) All Mss. except SL read °मुष्टिना (for °पुष्टिना).

1061. a) C S′ P_2 I_3 मरणे (for स रणे). —b) D (before suggestion) °जलज्जलाम्; St SA_1 $P_{1,3}$ I_3 °जलज्जलम्; S′ °चलज्जलम्; SL °जलज्झलाम्; D suggests जलज्झलाम् (for °झलज्झलाम् suggested cf. MW.).

1064. b) All Mss. except SL read सम्प्रेक्ष्य (for संप्रेर्य).

टुल्लो विजयराजश्च बुल्लो गुल्लश्च तेऽलुठन् ।
तन्वङ्गपौत्राश्चत्वारो हता वध्यमहीतले ॥१०६५॥

हतानामपि सौन्दर्यं तेषामद्याऽपि वर्ण्यते ।
कथान्तरे वयोवृद्धैर्बद्धास्रुस्यन्ददुर्दिनैः ॥१०६६॥

सतताभ्यस्ततास्त्रूलैः स्रस्तैस्तद्दशनाङ्कुरैः ।
कीर्णशोणाश्ममालेव सुचिरं वध्यभूरभूत् ॥१०६७॥

वृद्धिमानीतयो राज्ञाऽप्युत्कर्षापत्ययोस्ततः ।
ज्यायान् प्रमिम्ये डोम्बाख्यो गूढदण्डैः कुलच्छिदा ॥१०६८॥

स्फुलिङ्गमिव संभाव्य तेजोविस्फूर्जितं शिशुम् ।
जघान जयमल्लं च तद्वद् विजयमल्लजम् ॥१०६९॥

गोप्तॄन् स्वगोत्रजान् हत्वा भोक्तुमेकस्य कस्यचित् ।
कुर्वन्ति दैवोपहता राज्यं निष्कण्टकं नृपाः ॥१०७०॥

संरूढं मधुगोलमुच्चविटपव्यूहावलीगह्वरे
मूढः कर्तुमकृच्छ्रहार्यमभितः कस्याऽपि भव्यात्मनः ।
दैवप्रेरणया प्रकम्पविवशः पत्रप्रहारैर्दृढं
तद्गोप्तॄन्मधुपान्निहत्य शमयत्यश्वत्थपृथ्वीरुहः ॥१०७१॥

ज्ञातिद्रोहमहापाप्मनष्टधीरथ पार्थिवः ।
डिम्बानामप्यसंभाव्यामभजद् विटभोज्यताम् ॥१०७२॥

1065. a) D (before suggestion) S′ C P_{1-3} गुल्लो; I_3 इल्लो (for टुल्लो). —b) S′ om. *b*. D P_2 बल्लो (for बुल्लो). —c) S′ om. तन्वङ्गपौत्राश्च.

1067. c) D (before suggestion) SA_1 *sec. manu* C S′ P_{1-3} I_3 °गोणा° (for °शोणा°).

1068. c) S′ C प्रसिष्ये; SA P_1 I_3 प्रसिस्ये; P_2 प्रसिस्यो (for प्रमिम्ये). —d) P_1 गुरु° (for गूढ°).

1070. a) C S′ गोभृत्स्व°; SA गोप्तृ° (for गोप्तॄन्स्व°).

1071. b) S′ °मभितः (for °मभितः).

1072. •) D suggests डिम्भानां (for डिम्बानां).

वामनस्याऽऽत्मजः क्षेमस्तं जानञ्जनकद्विषम् ।
प्रैरयत् कलशेशस्थच्छत्रहेमनिवर्हणे ॥१०७३॥

तामिच्छामच्छिनत्तस्य भक्तो युक्त्या प्रयागकः ।
धावतः श्वभ्रपातेच्छां धीरो यन्तेव दन्तिनः ॥१०७४॥

अनिशं नष्टचेष्टानां शवानामिव भूभुजाम् ।
अन्तःप्रवेशकुशलो यो वेताल इवाऽभवत् ॥१०७५॥

नप्ता हलधरस्याऽथ विटो लोष्टधराभिधः ।
जगाद निर्जने जातु राजानं रञ्जनेच्छया ॥१०७६॥

ह्रियतां ग्रामहेमादि कलशेश्वरसंश्रयम् ।
तत्प्रासादाश्मभिः सेतुं वितस्तायां करोमि ते ॥१०७७॥

आलेख्यं गगने लिखामि बिसिनीसूत्रैर्वयाम्यम्बरं
स्वप्नालोकितमानयामि कनकं ग्रथ्नामि वप्रं हिमैः ।
इत्याद्युक्तमपि स्फुटं जडमतिर्जानाति सत्यं नृपो
यस्तादृक्त्रपया न वक्ति स गतप्रौढिः परं वञ्च्यते ॥१०७८॥

निषिषेध चिकीर्षां तु प्रयागस्तामपि प्रभोः ।
सदुपस्थायिकोऽपथ्याभ्यर्थनामिव रोगिणः ॥१०७९॥

अथ लोष्टधरो हास्यावसरे जातु भूपतिम् ।
बद्धस्य मोक्षो देवस्य क्रियतामित्यभाषत ॥१०८०॥

1073. b) SA जान जन° (for जानञ्जन°). —c) All St. Mss. except SA_2 om. य in प्रैरयत्.

1075. b) S′ भवा° (for शवा°).

1076. After this *v.* युग्मम्.

1077. c) D (before suggestion) C S′ P_{1-3} I_3 तत्प्रसा° (for तत्प्रासा°). —d) P_2 वितस्तायाः (for वितस्तायां).

1078. a) S′ विसनीं सू° (for बिसनीसू°). —d) I_3 °प्रौढः (for °प्रौढिः).

1079. d) P_2 °थ्याभ्यर्थिना° (for °थ्याभ्यर्थना°).

स्मित्वा किमेतदित्युक्तवन्तं तं स व्यजिज्ञपत् ।
उदभाण्डपुरे भीमाभिधश्शाहिरभूत् पुरा ॥१०८१॥

विरोधात् पारिषद्यानां तत्कृतो भीमकेशवः ।
राज्ये कलशदेवस्य बद्धद्वारोऽभवच्चिरम् ॥१०८२॥

तैः शान्तवैरैर्विदधे यदाऽथ विवृताऽररिः ।
चौरापहृतदुर्वर्णकवचो ददृशे तदा ॥१०८३॥

भूयोऽपि चक्रे तद्भीत्या कोशसामग्र्यभागिति ।
ततः प्रभृत्यद्य यावद् बद्धद्वाराऽररिः स्फुटम् ॥१०८४॥

आदीयतां तदीयस्तत्कोशश्चौरभयावहः ।
सोऽपि बन्धाद् विमुक्तोऽस्तु पुष्पदीपादिभोगभाक् ॥१०८५॥

इति संप्रेरितस्तेन तथा चक्रे स भूपतिः ।
कोशं ततः प्रपेदे च मणिस्वर्णादिनिर्भरम् ॥१०८६॥

अचिन्तयच्च यत्रेदृग्वसु शून्यसुरास्पदे ।
कीदृक्तत्राऽपरेषु स्यादाढ्येषु सुरवेश्मसु ॥१०८७॥

कृतप्रायैः स तत्रत्यैः पारिषद्यैस्ततो नृपः ।
निष्क्रयं रूढभारोढिवारणेन प्रदापितः ॥१०८८॥

1081. a) P_3 I_3 स्मृत्वा; P_2 सिता (for स्मित्वा). —c) D (before suggestion) C S′ तदमुण्डपुरे; P_1 पर्यस्तंतुपुरे; P_2 तदभूडपुरे; I_3 तदुतुंडांवरे (for उदभाण्डपुरे). S′ C St D I_3 P_3 भीम; P_1 मीश (for भीमा°). —d) All Mss. except SL om. भिधः. D (before suggestion) C P_{1-3} I_3 S′ °श्चाहि° (for °श्शाहि° also found in SL). C S′ °रण्यमभूत्पुरा (for °रभूत् पुरा).

1082. a) D (before suggestion) St (before corr.) C S′ SA P_{1-3} I_3 परिपत्यानां (for °पारिषद्यानां also found in SL). —d) P_2 °द्वारे° (for °द्वारो°).

1085. b) SA °त्कोशचौर° (for °त्कोशश्चौर°).

1086. d) S′ मार्णि स्व°; $P_{1,3}$ I_3 मणिस्वर्णाहि° (for मणिस्वर्णादि°).

1087. b) All Mss. except SL read °ग्वस्तु (for °ग्वसु). —c) SA $P_{1,2}$ I_3 कीदृक्कुत्रा° (for कीदृक्तत्रा°).

1088. a) All Mss. read कृतप्रायः (for कृतप्रायैः as suggested in St Tr.).

क्रमेण नानासेनाङ्गव्ययव्यसनशालिनः ।
सुरार्थहरणे रूढा धीः संभावनया तया ॥१०८९॥

पूर्वराजार्पितान् कोशांस्ततः स भुवनाद्भुतान् ।
सर्वगीर्वाणवेश्मभ्यो लुब्धबुद्धिरपाहरत् ॥ १०९०॥

हृतेषु कोशेष्वानेतुं देवानां प्रतिमा अपि ।
चकारोदयराजाख्यं देवोत्पाटननायकम् ॥१०९१॥

वदनेषु स नश्नाटैः शीर्णघ्राणाङ्घ्रिपाणिभिः ।
मूर्तिनाशाय देवानां शकृन्मूत्राद्यपातयत् ॥१०९२॥

स्वर्णरूप्यादिघटिता गीर्वाणाकृतयोऽलुठन् ।
अध्वस्विन्धनगण्डाल्य इव सावस्करेष्वपि ॥१०९३॥

विबुधप्रतिमाश्चक्रुराकृष्टा गुल्फदामभिः ।
थूत्कारकुसुमच्छन्ना रुग्णा नश्नाटकादयः ॥१०९४॥

ग्रामे पुरेऽथ नगरे प्रासादो न स कश्चन ।
हर्षराजतुरुष्केण न यो निष्प्रतिमीकृतः ॥१०९५॥

तस्य देवावधृष्यौ द्वौ परमास्तां प्रभाविनौ ।
नगरे श्रीरणस्वामी मार्त्ताण्डः पत्तनेष्वपि ॥१०९६॥

द्वौ महाप्रतिमामध्याद् बुद्धबिम्बावरक्षताम् ।
दानप्रसङ्गे तं जातु याचित्वा त्यागिनं नृपम् ॥१०९७॥

परिहासपुरे जन्ममेदिन्यां कनकाऽभिधः ।
गायनः कुशलश्रीश्च श्रमणो नगरान्तरे ॥१०९८॥

1089. a) All Mss. except SL read सेनानानाङ्ग° (for नानासेनाङ्ग°) —c) SG SC S′ P_1 सुराकुह° (for सुरार्थह°).

1091. d) SA °त्पाटनायकम् (for °त्पाटननायकम्).

1093. a) SA स्वर्णरुप्या° (for स्वर्णरूप्या°).

1094. d) D (before suggestion) SA_1 (before corr.) P_{1-3} I_3 C रुग्ननश्ना°; St भग्ननश्ना° (for रुग्णा नश्ना° also found in SL).

1095. b) $P_{1,3}$ प्रासादे (for प्रासादो). S′ च (for स).

1096. d) All Mss. except SL read पत्तनेष्विव (for पत्तनेष्वपि).

अधिगतवतां लोके विश्वाद्भुतामपि संपदं
न खलु विरतिर्दुष्कर्मभ्यो धनार्जनकाङ्क्षिणाम् ।
किमपि कमलावाप्त्यै पद्माकरोद्धृतिपातकं
भजति कमलालीलावासो भवन्नपि हि द्विपः ॥१०९९॥

पैतामहेन पित्र्येण तथा राज्यचिकीर्षया ।
लोहरादाहृतार्थस्य कोशेनोत्कर्षभूपतेः ॥११००॥

युक्तोऽपि पूर्वराजार्थं देवौकोभ्यो जहार यः ।
ऐच्छद्धनार्जनं हा धिक् सोऽपि वास्तव्यपीडया ॥११०१॥

तदाज्ञामात्रमादाय सचिवैरथ पापिभिः ।
ते ते नवनवाऽऽयासनामाङ्का नायकाः कृताः ॥११०२॥

कालानुवृत्तिपरतां धिग्धिग् राजोपजीविनाम् ।
यत्र मन्त्री वयस्थः सन् सदाचारोऽपि गौरकः ॥११०३॥

सर्वदेवगृहग्रामसर्वस्वापहृतिव्रतम् ।
स्वीचकाराऽऽज्ञया भर्तुरर्थनायकतामपि ॥११०४॥

पार्षदः समरस्वामिदेवागारे सहेलकः ।
आप्तो विजयमल्लस्य यो राज्ञो द्वेष्यतां ययौ ॥११०५॥

द्विगुणोत्पत्तिदानेन सोऽर्थनायकतां गतः ।
लब्धावकाशो राजाग्रे क्रमेणाऽऽसीन्महत्तमः ॥११०६॥

किमन्यद्धरता तेन सर्वार्थान् सर्वनायकैः ।
व्यधीयत धनावाप्त्यै पुरीषस्याऽपि नायकः ॥११०७॥

1099. c) $P_{1,3}$ °वाप्त्या; P_2 °व्याप्त्यै (for °वाप्त्यै). P_2 पद्माकरो° (for पद्माकरो°). —d) P_3 द्विषः (for द्विपः).
1100. d) D (before suggestion) SA C S′ P_{1-3} I_3 °भूपतिः (for भूपतेः).
1101. After this *v.* युग्मम् .
1103. c) C S′ P_2 वयस्यः; St वयःस्थः (for वयस्थः).
1104. After this *v.* युग्मम् .
1105. b) SA D P_{1-3} I_3 S′ C च हेलकः (for सहेलकः).
1107. d) S′ St $P_{2,3}$ I_3 पुरीश° (for पुरीष°).

श्रीगर्भपदपर्यायच्छन्नजाड्यप्रभावतः ।
तथाऽर्जितस्य कोशस्य सोऽनुरूपव्ययोऽभवत् ॥११०८॥

मृगीदृशां दुर्लभतां हयानां
श्वासान् विटानां कुवचस्सहत्वम् ।
वैतालिकानां च विकत्थनत्वं
क्रेतुं क्षितीशाः क्षपयन्ति लक्ष्मीम् ॥११०९॥

कोपप्रसादैर्दयिताजनस्य
हयादिवृत्तान्तगवेषणेन ।
भृत्यानुवृत्त्या मृगयाकथाभी
राज्ञां शिशूनामिव याति कालः ॥१११०॥

विलासहासासनयानदान-
पानाशनाद्या असतीः सतीर्वा ।
छायेव चेष्टाः क्षितिपालवर्गः
परानुकारेण करोति सर्वाः ॥१११११॥

अमानुषत्वं पुरुषाधिराजा
विटस्तवैः स्वस्य विचिन्त्य सत्यम् ।
तृतीयमद्यभ्यधिकं भुजौ वा
ममेति मत्वा न विदन्ति मृत्युम् ॥१११२॥

निशासु येषां प्रभवन्ति दारा
दिनेष्वमात्या नियताधिकाराः ।
अहो भ्रमः स्वस्य यदत्र तेऽपि
विदन्ति भूपाः प्रभविष्णुभावम् ॥१११३॥

1111. a) C °पान° (for °यान°). I_3 °हान° (for °दान°). —b) C S' °याना° (for °पाना°).

1113. d) P_3 °भावनम् (for °भावम्).

अधिगतवतां लोके विश्वाद्भुतामपि संपदं
न खलु विरतिर्दुष्कर्मभ्यो धनार्जनकाङ्क्षिणाम् ।
किमपि कमलावाप्त्यै पद्माकरोद्धृतिपातकं
भजति कमलालीलावासो भवन्नपि हि द्विपः ॥१०९९॥

पैतामहेन पित्र्येण तथा राज्यचिकीर्षया ।
लोहरादाहृतार्थस्य कोशेनोत्कर्षभूपतेः ॥११००॥

युक्तोऽपि पूर्वराजार्थं देवौकोभ्यो जहार यः ।
पेच्छद्धनार्जनं हा धिक् सोऽपि वास्तव्यपीडया ॥११०१॥

तदाज्ञामात्रमादाय सचिवैरथ पापिभिः ।
ते ते नवनवाऽऽयासनामाङ्का नायकाः कृताः ॥११०२॥

कालानुवृत्तिपरतां धिग्धिग् राजोपजीविनाम् ।
यत्र मन्त्री वयस्थः सन् सदाचारोऽपि गौरकः ॥११०३॥

सर्वदेवगृहग्रामसर्वस्वापहृतिव्रतम् ।
स्वीचकाराऽऽज्ञया भर्तुरर्थनायकतामपि ॥११०४॥

पार्षदः समरस्वामिदेवागारे सहेलकः ।
आप्तो विजयमल्लस्य यो राज्ञो द्वेष्यतां ययौ ॥११०५॥

द्विगुणोत्पत्तिदानेन सोऽर्थनायकतां गतः ।
लब्धावकाशो राजाग्रे क्रमेणाऽऽसीन्महत्तमः ॥११०६॥

किमन्यद्धरता तेन सर्वार्थान् सर्वनायकैः ।
व्यधीयत धनावाप्त्यै पुरीषस्याऽपि नायकः ॥११०७॥

1099. c) $P_{1,3}$ °वाप्त्या; P_2 °व्याप्त्यै (for °वाप्त्यै). P_2 पद्याकरो° (for पद्माकरो°).—d) P_3 द्विषः (for द्विपः).

1100. d) D (before suggestion) SA C S′ P_{1-3} I_3 °भूपतिः (for भूपतेः).

1101. After this *v.* युग्मम्.

1103. c) C S′ P_2 वयस्यः; St वयःस्थः (for वयस्थः).

1104. After this *v.* युग्मम्.

1105. b) SA D P_{1-3} I_3 S′ C च हेलकः (for सहेलकः).

1107. d) S′ St $P_{2,3}$ I_3 पुरीश° (for पुरीष°).

श्रीगर्भपदपर्यायच्छन्नजाड्यप्रभावतः ।
तथाऽर्जितस्य कोशस्य सोऽनुरूपव्ययोऽभवत् ॥११०८॥

मृगीदृशां दुर्लभतां हयानां
श्वासान् विटानां कुवचस्सहत्वम् ।
वैतालिकानां च विकत्थनत्वं
क्रेतुं क्षितीशाः क्षपयन्ति लक्ष्मीम् ॥११०९॥

कोपप्रसादैर्दयिताजनस्य
हयादिवृत्तान्तगवेषणेन ।
भृत्यानुवृत्त्या मृगयाकथाभी
राज्ञां शिशूनामिव याति कालः ॥१११०॥

विलासहासासनयानदान-
पानाशनाद्या असतीः सतीर्वा ।
छायेव चेष्टाः क्षितिपालवर्गः
परानुकारेण करोति सर्वाः ॥११११॥

अमानुषत्वं पुरुषाधिराजा
विटस्तवैः स्वस्य विचिन्त्य सत्यम् ।
तृतीयमद्यभ्यधिकं भुजौ वा
ममेति मत्वा न विदन्ति मृत्युम् ॥१११२॥

निशासु येषां प्रभवन्ति दारा
दिनेष्वमात्या नियताधिकाराः ।
अहो भ्रमः स्वस्य यदत्र तेऽपि
विदन्ति भूपाः प्रभविष्णुभावम् ॥१११३॥

1111. [a]) C °पान° (for °थान°). I_3 °हान° (for °दान°). —[b]) C S' °थाना° (for °पाना°).

1113. [d]) P_3 °भावनम् (for °भावम्).

स्वादूचितं स्वादुतयैव भुङ्क्ते
थूत्कृत्य मुञ्चत्यपि थूत्कृतानि ।
वित्रासितस्त्रासमुपैत्यकस्माद्
भूभृच्च बालश्च समानभावः ॥१११४॥

जाड्यमित्यादि यत्किंचित् क्षितिपानां कटाक्षितम् ।
तत्सर्वं हर्षदेवस्य जाड्येन लघुतां ययौ ॥१११५॥

तुष्टः पटहवाद्येन हृद्यातोद्यविदे ददौ ।
भीमनायकनाम्ने स करिणं करिणीसखम् ॥१११६॥

स्वशिष्यस्तेन तस्याऽऽसीद् गायनः कनकोऽथ सः ।
चण्पकावरजः खेदाद् गीताभ्यासकृतोद्यमः ॥१११७॥

प्रसादीकृतमस्मै च खेदच्छेदनमिच्छता ।
तेन काञ्चनदीन्नारलक्षमक्षतचेतसा ॥१११८॥

कर्णाटभर्तुः पर्माण्डेः सुन्दरीं चन्दलाभिधाम् ।
आलेख्यलिखितां वीक्ष्य सोऽभूत् पुष्पायुधक्षतः ॥१११९॥

उत्तेजयन्ति संघर्षे हास्ये जडमतीन् विटाः ।
सारमेयानिवाऽजस्रं प्रोत्साह्य प्राकृताशयाः ॥११२०॥

स विटोद्रेचितो वीतत्रपश्चक्रे सभान्तरे ।
प्रतिज्ञां चन्दलावाप्त्यै पर्माण्डेश्च विलोडने ॥११२१॥

कृतापवित्रमकर्पूरपरित्यागं प्रतिज्ञया ।
तं च स्तुतिमिषादेवं जहसुः कविचारणाः ॥११२२॥

1117. c) C S′ चम्पका°; P_3 चण्यका° (for चण्पका°).
1118. a) P_3 प्रासादी°; P_2 प्रसादे (for प्रसादी°). —b) P_3 खेदोच्छे° (for खेदच्छे°).
1119. a) पर्माडेः is suggested with D, cf. *v.* vii 935 (for पर्माण्डेः found in all Mss.). —c) P_2 आलेख्यालि° (for आलेख्यलि°).
1120. b) $P_{1,3}$ °मती: (for °मतीन्).
1121. d) पर्माडेश्च is suggested (for पर्माण्डेश्च found in all Mss.).
1122. b) P_2 °त्यागे (for °त्यागं).

भाषावेषविशेषतः परिगतस्त्वं दाक्षिणात्योऽध्वगो
गन्धादप्यवधारितं यदुत ते कर्पूरकोलं करे ।
पक्वं चेदिदमङ्ग हर्षनृपतेस्तत्कल्पयोपायनं
नो चेत्तिष्ठतु नालिकेरकुहरे संप्रत्यमुष्मिन्यतः ॥११२३॥

आ कर्णाटवसुन्धराधववधादा चंदलालिङ्गनाद्
आ कल्याणपुरप्रवेशनविधेरा पिम्मलादर्शनात् ।
आ राजाश्रयकाननान्तवसुधापारर्द्धिकौतूहलाद्
देवेन प्रतिषिद्धमिद्धमहसा पोतासंचर्वणम् ॥११२४॥

विटः प्रसाद्य नृपतिं मदनः कम्पनापतिः ।
महत्तरत्वं जग्राह तस्याश्चित्रार्पिताकृतेः ॥११२५॥

वस्त्रालंकारनिर्वाहकृतेऽमुष्याश्च वेतनम् ।
नित्यमादत्त भूपालाद् दायमीर्ष्याशमाय च ॥११२६॥

विटत्वे निस्त्रपत्वे च मदनस्य कथाक्रमः ।
मौग्ध्ये पारिप्लवत्वे च नृपस्य निकषोऽभवत् ॥११२७॥

मातेयं बप्पिका नाकात् तवाऽऽनीतेति वादिभिः ।
संदर्श्य जरतीं नारीं मुषितः सोऽपरैर्विटैः ॥११२८॥

दासीश्च देवता एता इत्युक्त्वाऽन्यैः प्रवेशिताः ।
उन्नतिं च श्रियं चौज्झत्प्रणमञ्जहसे जनैः ॥११२९॥

1123. b) P_2 °धारिते (for °धारितं). —d) S′ नारिकेल° (for नालिकेर°).

1124. b) SL प्रिम्मला°; S′ धिम्मला°; P_2 पिस्मला (for पिम्मला°). —c) D suggests °पापर्द्धि° (for °पारर्द्धि°). —d) P_2 दैवेन (for देवेन). P_1 I_3 °सिद्धमह°; P_2 सिद्धसह° (for °मिद्धमह°). According to Rājanighaṇṭu *potāsa* is the name of a kind of camphor.

1125. a) P_{1-3} प्रसाद° (for प्रसाद्य). S′ नृपतिः (for नृपतिं).

1127. c) S′ मौग्ध्यपारि° (for मौग्ध्ये पारि°).

1128. a) S′ मातेत्थं (for मातेयं). D (before suggestion) C $P_{1,3}$ SA बद्धिका; P_2 बुद्धिका; St वप्पिका (for बप्पिका also found in SL).

ता व्योमचरसंलापमन्त्राद्युल्लेखकारिभिः ।
अध्यापिता विटैस्तस्य मतिमोहं प्रचक्रिरे ॥११३०॥

ताभ्यः काभिरपि क्ष्माभृत् सुरतं समयोचितम् ।
वाञ्छन्तीभिः कृतः स्वाङ्गस्पर्शाद् भाग्याशयोज्झितः ॥११३१॥

आयुष्कामाय भूयांसं कालं जीवितकाङ्क्षिणे ।
आयुर्वर्षशतान्यस्मै ता मूढमतये ददुः ॥११३२॥

डोम्बेन पिण्डसिद्ध्यर्थी केनाऽप्येतद्रसायनम् ।
पिण्डसिद्धिकृदित्युक्त्वा पेयं किमपि पायितः ॥११३३॥

किं तस्य कथितैरन्यैर्मौग्ध्यैर्यो याचितो विटैः ।
विद्यमानादिव धनादायुषोऽपि व्ययं व्यधात् ॥११३४॥

बलरूपेच्छुरपरानुपायान् यानसेवत ।
कथयेत् कः सदाचारस्तानतोऽपि त्रपावहान् ॥११३५॥

स एवमन्धतामिस्रे निक्षिप्तः शाश्वतीः समाः ।
मुग्धबुद्धिः स्वजाड्येन दुर्जातैश्च कुमन्त्रिभिः ॥११३६॥

मेघवाहनमुख्यानां कृत्ये लोकोत्तरे यथा ।
सन्त्यद्याऽल्पधियः केचित् संदेहान्दोलिताशयाः ॥११३७॥

तथाऽस्मिन्नपि दुष्कृत्ये वर्ण्यमानेऽद्भुतावहे ।
भविष्यतीव कालेन नूनमप्रत्ययो जनः ॥११३८॥

राज्ये बहुच्छले तादृग् दुर्नीत्योपहतोऽप्यभूत् ।
आयुश्शेषेण न वशे स रन्ध्रान्वेषिणां द्विषाम् ॥११३९॥

1130. a) All Mss. except SL read दास्यो मदन° and P_2 om. मद (for ता व्योमचर° cf. St Tr.).
1131. d) St भाग्योदयो° (for भाग्याशयो°).
1132. c) SL °वर्षायुतान्य° (for °वर्षशतान्य°).
1133. a) S′ °सिद्ध्यर्थो (for °सिद्ध्यर्थी).
1136. a) I_3 SA °तामस्रे (for °तामिस्रे). —c) SA P_2 I_3 स्वजात्येन; C S′ $P_{1,3}$ स्वजन्येन (for स्वजाड्येन). —d) C S′ दुर्जात° (for दुर्जातै°).
1137. b) D (before suggestion) P_{1-3} कृते (for कृत्ये).

नर्तकीः शिक्षयन् रात्रावुत्थायाऽभिनयं स्वयम् ।
तिष्ठन् दीपोज्ज्वले धाम्नि दूरात् केनाऽपि शत्रुणा ॥११४०॥

क्षितेषुरपि नाऽभूद् यन्निहतो व्रणितोऽथ वा ।
फलं तदायुश्शेषस्य प्रजानां कुकृतस्य वा ॥११४१॥

कश्चिदेवाऽथ शुद्धान्ते पातदूतो महीपतेः ।
सर्वाशुद्धिनिधेः प्राभून्नारीचारित्रविप्लवः ॥११४२॥

ते युवानो मदोन्मत्तास्ताः स्त्रियो यौवनोन्मदाः ।
नाशाय हर्षदेवस्य तस्मिन्नेवाऽभवन् क्षणे ॥११४३॥

निगृहीतास्तेन रोषात् सजाराः काश्चन स्त्रियः ।
काश्चित्त्वाकृष्य शुद्धान्ताज्जारैर्नीता दिगन्तरम् ॥११४४॥

स्वेन दौश्शील्यदोषेण सर्व एव विशङ्किताः ।
भृत्यास्तस्याऽशुभान्यैच्छन्नयतन्त च शान्तये ॥११४५॥

तस्याऽपि शीलवैकल्यं तावत् सर्वत्र पप्रथे ।
यावत् कलशभूपालात् संजातस्योपपद्यते ॥११४६॥

शैशवे वर्धितो याभिरङ्कमारोप्य मातृभिः ।
सोऽङ्कमारोप्य ता एव चुम्बन् संबुभुजेऽनिशम् ॥११४७॥

संभोगं भगिनीवर्गे कुर्वता दुर्वचोरुषा ।
निगृहीता च भुक्ता च नागा पुत्री पितृष्वसुः ॥११४८॥

स तुरुष्कशताधीशाननिशं पोषयन् धनैः ।
निधनावधि दुर्बुद्धिर्बुभुजे ग्राम्यसूकरान् ॥११४९॥

इत्थमाचरतानर्थं पार्थिवानामिहाऽधिकम् ।
पङ्क्तिः सन्दूषिता तेन तिरश्चेव विपश्चिताम् ॥११५०॥

1141. b) S′ जनितो° (for व्रणितो°). —c) D (before suggestion) St C S′ P_{1-3} I_3 तस्यायु° (for तदायु° also found in SL).
1142. c) D SA $P_{1,2}$ I_3 सर्वशुद्धनि°; P_3 सर्वशुद्धानि° (for सर्वाशुद्धिनि° also found in SL).
1146. a) S′ °कैवल्यं (for °वैकल्यं).
1147. b) D (before suggestion) St P_{1-3} I_3 S′ C °मारुह्य (for °मारोप्य also found in SL).
1148. c) I_3 विगृहीता (for निगृहीता).
1150. All Mss. except SL om. this v.

अथ सर्वाभिसारेण कदाऽपि कुपितो नृपः ।
स मन्दबुद्धिरास्कन्दमदाद् राजपुरीं प्रति ॥११५१॥

विलोक्य सैन्यसामग्रीमनन्यसदृशीं पथि ।
त्रैलोक्याक्रान्तिसामर्थ्यं पार्थिवैस्तस्य शङ्कितम् ॥११५२॥

स तु पृथ्वीगिरिं दुर्गं दृष्ट्वा तद्ग्रहणोद्यतः ।
अप्रविष्टो राजपुरीं तन्मूले समुपाविशत् ॥११५३॥

मासमभ्यधिकं तेन तस्थुषा परिपीडिताः ।
प्रक्षीणान्नादिसंभारा बभूवुर्दुर्गरक्षिणः ॥११५४॥

त्रातुं संग्रामपालस्तानूरीचक्रे धरापतिः ।
कियन्तं न करं भीतः कियतीर्न च संविधाः ॥११५५॥

उपोढदार्ढ्ये नृपतौ स तदप्रतिगृह्णति ।
लुब्धमुत्कोचदानेन स्वीचक्रे दण्डनायकम् ॥११५६॥

अमन्यमाने नृपतौ व्यावृत्तिं प्रेरिता रहः ।
प्रवासवेतनं भूरि मार्गितुं तेन शस्त्रिणः ॥११५७॥

तैः प्राये प्राकृतप्रायैः कृते सोल्लुण्ठभाषितैः ।
राज्ञो दूरस्थकोशस्य कटकः क्षोभमाययौ ॥११५८॥

स तत्समर्थनां यावच्चक्रे तावद् विभीषिकाम् ।
तुरुष्कास्कन्दजामन्यां प्रददौ दण्डनायकः ॥११५९॥

अथाऽल्पधैर्यो नृपतिरुत्थाप्य कटकं ययौ ।
कृत्स्नां च कोशसामग्रीं तत्याजाऽध्वसु साध्वसात् ॥११६०॥

अपरीक्ष्याऽऽदृतो भृत्यः स्वामिनामतिसंकटे ।
करोति व्यसनापातमजात्योऽसिरिवाऽऽहवे ॥११६१॥

1151. a) All Mss. except SL read सेवाभिसा° (for सर्वाभिसा°).

1153. c) SL राजधानीं (for राजपुरीं).

1157. a) SA P_{1-3} I_3 प्रमन्यमाने (for अमन्यमाने).

1158. a) P_3 प्राकृताप्रा° (for प्राकृतप्रा°). —c) S′ दूरस्थे को• (for दूरस्थको°).

1161. b) P_2 °मिना सति सं• (for °मिनामतिसं°).

तेन स्वयमयोग्येन योग्यानन्याननिच्छता ।
कलङ्किता नरेन्द्रश्रीः क्षुद्राश्वेनेव मन्दुरा ॥११६२॥

ततः प्रभृति निर्वाणप्रतापस्य महीपतेः ।
प्रतापचक्रवर्त्याख्या सर्वतो म्लानिमाययौ ॥११६३॥

म्लानाननो न यत्सिद्धं स्वेन भृत्यैस्तथाऽखिलैः ।
तत्कर्म कृतवन्तं स कंदर्पं बह्वमन्यत ॥११६४॥

आनिनीषोश्च तं तस्य जडस्याऽकृत भूपतेः ।
दण्डनायक एवेच्छाच्छेदं पैशुनकर्मणा ॥११६५॥

ज्ञातद्रोहोऽथ नृपतिरबध्नाद् दण्डनायकम् ।
प्रतिपत्त्यानुरोधेन न क्रुधा न्यग्रहीत् पुनः ॥११६६॥

दुर्गे संदिग्धजीवोऽपि निवसन् संचिकाय सः ।
लुब्धस्ताम्बूलवस्त्रादि प्रहितं भृत्यबान्धवैः ॥११६७॥

आत्मनः सर्वनाशाय संजातं दैवमोहितः ।
वधार्हं प्रत्युत पुनर्निन्ये तं स्वपदं नृपः ॥११६८॥

तं विटाश्चाटुभिर्भूयो राजानमुदतेजयन् ।
घोषयात्राजितं स्तोत्रैः कर्णाद्या इव कौरवम् ॥११६९॥

वादी वादपराजितः प्रतिभटं गालीभिरत्याक्षिपन्
योषिन्नष्टसतीव्रता कुकलहैरुद्वेजयन्ती पतिम् ।
कायस्थश्च हृताखिलार्थमहिमा कृच्छ्रे नृपं पातयन्
स्वस्याऽऽसन्नपराभवस्य कुरुते भूयः समुत्तम्भनम् ॥११७०॥

भुक्तदेयधनो बिभ्यत् तं सहेलमहत्तमः ।
उर्वीपतिं दुर्व्यसने प्रेरयन् स्वार्थपण्डितः ॥११७१॥

1165. b) I_3 जडस्य कृत (for जडस्याऽकृत).

1166. c) All Mss. except SL read प्रातिपत्त्य° (for प्रतिपत्त्य°). —d) SA न्यगृही° (for न्यग्रही°).

1167. a) All Mss. except St read दुग्धे (for दुर्गे also found in SL).

1168. b) S′ देवमो° (for दैवमो°). —c) P_2 वधार्हे (for वधार्हं). —d) $P_{1,3}$ ते (for तं).

1170. a) P_2 °भिरित्या° (for °भिरत्या°).

रन्ध्रमन्विष्य दरदां लवन्यैः सह लाहरैः ।
दुग्धघाताभिधं दुर्गं ग्रहीतुं तमचूचुदत् ॥११७२॥

तद्धि लक्कनचन्द्राख्ये पुरा गोप्तरि डामरे ।
जनकद्वारपतिना हतेऽनन्तनृपाज्ञया ॥११७३॥

प्रायोपविष्टया द्वारे तत्पत्न्याऽपि समर्पितम् ।
कलशक्ष्माभुजा क्लृप्तोपेक्षं प्राप दरन्नृपः ॥११७४॥

तद्बलाद् दारदैः क्रान्तानन्तग्रामेऽत्र मण्डले ।
राजा स मन्त्रिणा चाऽथ बभूव स्वीकृतोद्यमः ॥११७५॥

निर्ह्रदे तत्र गोप्तॄणां वृत्तये संभृतं हिमम् ।
अवग्रहेण तत्तस्मिन् क्षणे निश्शेषतां ययौ ॥११७६॥

चारैस्तद्रन्ध्रमालक्ष्य तद्ग्रहाय महत्तमः ।
अभीक्ष्णं प्रैरयत् क्ष्मापं स च तत्रोद्यमं व्यधात् ॥११७७॥

वातगण्डस्तदुद्योगे प्रतिष्ठासुं नृपाज्ञया ।
चण्पकं द्वारकार्यस्थमभिसंधातुमैहत ॥११७८॥

द्वारं निवार्य भूपेन प्रापितो मण्डलेशताम् ।
सर्वैः सहाऽभजद् वैरं स हि द्वाराधिकारिभिः ॥११७९॥

1172. a) All Mss. except SL read बन्धुम° (for रन्ध्रम°). D दरदं (for दरदां). —c) D St C S′ P_{1-3} I_3 दुर्गघाता°; SL दुग्धाघाता° (for दुग्धघाता° suggested with St. Tr. cf. *v.* viii 2468).

1173. a) SL तक्कन° (for लक्कन°).

1175. c) All Mss. except SL read च (for स).

1176. a) D S′ C P_{1-3} I_3 निर्ह्रादे; SA निह्रादे; SL निर्ह्रशे (for निर्ह्रदे suggested with St).

1177. b) St तद्रहाय (for तद्ग्रहाय). —c) P_2 अतीक्ष्णं (for अभीक्ष्णं). —d) P_3 सदा (for स च).

1178. a) St °गण्डं तदु° (for °गण्डस्तदु° also found in SL). —c) St D P_{1-3} चण्पको; S′ P_2 चम्पको (for चण्पकं also found in SL).

1179. a) P_2 द्वारे (for द्वारं). —c) All Mss. except SL read द्वारं (for वैरं).

विसूत्रितेऽपि कटके तेन द्वारपतिस्ततः ।
तीर्त्वा मधुमतीं सिन्धुं सैन्यैर्दुर्गमवेष्टयत् ॥११८०॥

समस्तानपि सामन्तान् प्रहिण्वन् सर्वतः स्वयम् ।
एकप्रयाणान्तरितः कोटेऽपि न्यवसन्नृपः ॥११८१॥

त्यजद्भिर्गण्डशैलादि दुर्गसंश्रयदुर्जयैः ।
काश्मीरकाः सह दरत्सैनिकैः समरं व्यधुः ॥११८२॥

विदधे प्राजिमठिकानाम्न्याघातपदे वसन् ।
सपुत्रो गुङ्गजो मल्लः संभ्रमानतिदुस्सहान् ॥११८३॥

तत्पुत्रौ दैववित्प्रोक्तराज्यप्राप्ती तदिच्छया ।
मानं व्यवर्धिषातां यौ वीरावुच्चलसुस्सलौ ॥११८४॥

अत्युद्दामस्तयोर्ज्यायान् द्विषन्नपि नृपासनम् ।
आसीद् भाव्यर्थमाहात्म्याद् यात्रायां तत्र निर्गतः ॥११८५॥

अवग्रहेण भूपालप्रतापेन च शोषिताः ।
यथाकथंचित् तद्दुर्गं ररक्षुर्दारदा भटाः ॥११८६॥

अथाऽऽज्ञेव विधेर्हर्षप्रतापपरिपन्थिनी ।
पपात महती वृष्टिरेकीकृतजलस्थला ॥११८७॥

दुर्गशृङ्गं हिमैः कृत्स्नं दुर्भेद्यैः पर्यवार्यत ।
अनुकूलेन विधिना संनाहैर्निहितैरिव ॥११८८॥

उत्थाने पातयन् कांश्चित् पतने कांश्चिदुत्क्षिपन् ।
वेधाः कन्दलयत्येव कन्दुकक्रीडितभ्रमम् ॥११८९॥

1180. [a]) D (before suggestion) I_3 P_{1-3} SA विसूत्रितापि; St विसूत्रितोऽपि; S′ C विसूत्रिता च; P_2 विमूत्रितापि (for विसूत्रितेऽपि suggested with St D). P_3 कटकं (for कटके).

1182. [c]) St (before corr.) P_3 काश्मीरिकाः (for काश्मीरकाः).

1183 [a]) P_3 प्राणिम° (for प्राजिम°). —[b]) S′ °नाम्नाघात° (for नाम्न्याघा°).

1184. [a]) S $P_{2,3}$ I_3 SA तत्पुत्रो (for तत्पुत्रौ). S′ P_3 °वित्प्रोक्तो (for °वित्प्रोक्त°). —[c]) S′ P_1 °र्धिषतां (for °र्धिषातां).

ततः स्मृत्वा गृहान् वृष्टिदुस्स्थास्ते दुष्टमन्त्रिणः ।
चक्रिरे पूर्ववद् राज्ञः स्कन्धावारे विसूत्रणम् ॥११९०॥

ऊर्ध्वस्रोतोनुसारीव तिमिः शैलहताननः ।
ततोऽपि चक्रे व्यावृत्तिं राजा जयपराङ्मुखः ॥११९१॥

मुक्तापणः शीर्णकोशस्त्यक्तश्रीकश्च्युतायुधः ।
कटकः सर्व एवाऽभूत् पलायनपरायणः ॥११९२॥

धावतः पथिभिस्तैस्तैः साक्रन्दान् राजसैनिकान् ।
पृष्ठलग्नरिपून् दीर्घा मार्गेऽग्रसिषतापगा ॥११९३॥

क्षौमैः सहंसमालेव साब्जषण्डेव खेटकैः ।
सशेवलेव खड्गौघैः सशिलेव तुरंगमैः ॥११९४॥

सौवर्णैः सरथाङ्गेव राजतैर्भाजनैरपि ।
सफेनेव जनत्यक्तैरासीन्मधुमती सरित् ॥११९५॥

नीतानां च हतानां च दरदैः प्रसृतोदयैः ।
अभून्नदीहृतानां च संख्या काचिन्न देहिनाम् ॥११९६॥

अनाथवत् तथाभूतं सैन्यं त्रातुं कृतोद्यमः ।
एकस्तु सानुजो मानी नाऽचलन्माल्लिरुच्चलः ॥११९७॥

दरद्वलाम्बुधिर्धावन् स विश्वाक्रमणोद्यतः ।
ताभ्यां वेलागिरीन्द्राभ्यामिव संस्तम्भितोऽखिलः ॥११९८॥

तौ रक्षित्वा बलं प्राप्तौ प्रसिद्धिमतुलां गतौ ।
पतिंवरेव राजश्रीर्भेजे लक्ष्येण तेजसा ॥११९९॥

ततः प्रभृति लोकस्य सर्वस्याऽऽसीदसौ मतिः ।
राज्यार्हौ मानिनावेतौ क्लीबोऽयं न तु भूपतिः ॥१२००॥

1190. d) All Mss. read स्कन्दावारे (for स्कन्धावारे suggested with D St). P_2 विसूत्रिणम् (for विसूत्रणम्).
1193. d) S' St C °सिष्यता° (for °सिषता°).
1194. c) S' C सशैवलेवं (for सशेवलेव).
1195. c) C सफणेव [sic] (for सफेनेव).
1197. a) St तथा भूतं (for तथाभूतं).
1200. c) P_1 राजार्हौ; P_3 राज्ञायौं (for राज्यार्हौ).

तथा कृत्वाऽपि यद्राज्ञो दर्शनं परिजह्रतुः ।
तौ प्रीतिदायविमुखौ बबन्धाऽऽस्थां ततो जनः ॥१२०१॥

अथ शान्तरिपुत्रासो नगरं प्राविशन्नृपः ।
प्रतापस्तु दिशः प्रायान्मल्लराजतनूजयोः ॥१२०२॥

तौ रामलक्ष्मणावेताविति सर्वस्तदाऽब्रवीत् ।
रावणप्रतिमे राज्ञि भाव्यर्थानुगुणं वचः ॥१२०३॥

राजा तु गतलज्जः स नित्यकृत्योपमं जडः ।
कर्तुं प्रारभताऽखिन्नः पुनर्मण्डलपीडनम् ॥१२०४॥

अल्पापकारमपि पार्श्वगतं निहन्ति
नीचो न दूरमसमागसमप्यरातिम् ।
श्वा निर्दशत्युपलमन्तिकमापतन्तं
तत्त्यागिनं न तु विदूरगमुग्ररोषः ॥१२०५॥

ततः प्रविष्टः संप्रीतः सेवया दत्तकम्पनम् ।
मदनं सोऽशृणोत् स्वैरं शंसन्तं तत्पराभवम् ॥१२०६॥

तद्रोषेण जिघांसुस्तमागो जग्राह सोऽपरम् ।
तस्य देवीविसृष्टाज्ञालेखोल्लङ्घनलक्षणम् ॥१२०७॥

प्राप्तो मडवराज्यात् स क्षमाभुजाऽदत्तदर्शनः ।
भीतो लक्ष्मीधरस्याऽगान्मन्दिरं टक्कमन्त्रिणः ॥१२०८॥

राजा प्रसाद्यमानोऽपि तत्कृतेऽन्येन मन्त्रिणा ।
सस्मितं वीक्षितं सैन्यैस्तं सपुत्रमघातयत् ॥१२०९॥

कोपस्मितं नरपतेरकालकुसुमं तरोः ।
वेतालस्याऽट्टहसितं नैवमेव प्रशाम्यति ॥१२१०॥

1201. a) D (before suggestion) P_{1-3} St S′ C I_3 यद्राज्ञे (for यद्राज्ञो also found in SL).

1202. b) P_1 प्रविश° (for प्राविश°).

1205. d) S′ C °अदोषः (for °अरोषः).

1206. c) P_2 सदनं (for मदनं).

1208. d) SA D P_{1-3} I_3 ठक्क°; C S′ झक्क° (for टक्क° suggested with St).

ये संप्ररूढविपुलप्रणयाभिमाना
निश्शङ्कमीश्वरनिषेवणमाचरन्ति ।
मन्त्रानुषङ्गरभसाद् भुजगेन्द्रसख्यं
प्रख्यापयन्त इव ते प्रलयं प्रयान्ति ॥१२११॥

कर्णेजपकुले तावन्मदनप्रलयावधिः ।
शापः सूर्यमतीदेव्याः प्रसारितभुजोऽभवत् ॥१२१२॥

विक्रमालोकनोत्कम्पी निचिक्षेप क्षमापतिः ।
बद्ध्वा कलशराजं तं लक्ष्मीधरनिवेशने ॥१२१३॥

विरुद्धं तस्य बद्धस्य शिक्षापेक्षामिषान्नृपः ।
तेजोवधाय सविधमुदयाख्यं व्यसर्जयत् ॥१२१४॥

लक्ष्म्या जाज्वल्यमानं तं वीक्ष्य प्रज्वलितः क्रुधा ।
लब्धासिधेनुः कस्माच्चिन्मनस्वी सहसाऽवधीत् ॥१२१५॥

तद्भृत्यैरथ संक्रुद्धैर्निपत्य स विपादितः ।
दुर्बुद्धेस्तस्य भूभर्तुरेवं भृत्या विपेदिरे ॥१२१६॥

मण्डले राजदण्डेन क्षतेनेव परिक्षते ।
क्षारपातोपमाऽन्याऽपि प्राभूद् दुःखपरम्परा ॥१२१७॥

अहारि काञ्चनस्थाली यैः पार्थिवगृहादपि ।
सत्यप्यहस्करे जघ्नुस्तस्करास्तादृशा विशः ॥१२१८॥

प्रवर्धमाने मरके क्रन्दितध्वनिनिर्भरः ।
निर्घोषः प्रेतवाद्यानां न व्यरंसीद् दिवानिशम् ॥१२१९॥

उदीपब्रुडितग्रामे वत्सरे पञ्चसप्तते ।
अखण्डं सर्वभाण्डानां दुर्भिक्षमुदजृम्भत ॥१२२०॥

1213. c) C बद्धा (for बद्ध्वा).
1217. b) $P_{2,3}$ I_3 क्षतेनैव (for क्षतेनेव).
1218. c) C S′ असत्य° (for सत्यप्य°).
1220. a) C उदीयक्रडित° [sic] (for उदीपब्रुडित°).

दीन्नाराणां धान्यखारिः प्राप्याऽभूत् पञ्चभिः शतैः ।
दीन्नारेणाऽभवल्लभ्यं मार्द्वीकस्य पलद्वयम् ॥१२२१॥

ऊर्णापलस्य दीन्नारैः क्रयः षड्भिरजायत ।
लवणोषणहिङ्ग्वादेरभिधाऽप्यास्त दुर्लभा ॥१२२२॥

शर्वैर्नद्योऽभवन्नम्भस्संसेकोच्छूनविग्रहैः ।
छन्नतोया गिरिस्रस्तैश्छिन्नदारुवनैरिव ॥१२२३॥

एतद्व्यवहिता राजधानी दूरान्न दृश्यते ।
ध्यात्वेति सर्वतो राजा द्रुमाणां छेदमादिशत् ॥१२२४॥

सप्रसूनफला वृक्षा गृहस्था इव पातिताः ।
कुटुम्बैरिव रोलम्बैरशोच्यन्त पदे पदे ॥१२२५॥

प्राणापहं महादण्डं तथाऽऽर्तेऽपि जने नृपः ।
हलावरुग्णे वृद्धोक्षे गण्डशैलमिवाऽक्षिपत् ॥१२२६॥

निपीड्य लोकं कायस्थैर्महादण्डव्यवस्थया ।
पुरग्रामादिषु काऽपि न मृदप्यवशेषिता ॥१२२७॥

अथोल्बणत्वं संप्राप्तान्निहन्तुं सर्वडामरान् ।
सदण्डभृदिव क्रुध्यन्नादिक्षन्मण्डलेश्वरम् ॥१२२८॥

पूर्वं मडवराज्योर्व्यां होलडान्तः स डामरान् ।
दत्तास्कन्दोऽवधीत् तांस्तान् कुलाये विहगानिव ॥१२२९॥

1221. c) S′ दीनारे° (for दीन्नारे°). —d) S′ C मार्द्वी° (for मार्द्वी°). P_2 °कस्यापल° (for °कस्य पल°).

1222. a) $P_{1,2}$ तूर्णा° (for ऊर्णा°).

1223. c) C I_3 गिरिप्रस्थै°; P_2 गिरिग्रस्तै° (for गिरिस्रस्तै°).

1224. a) C S′ P_{1-3} I_3 SA °वहृता रा°; P_2 °वहृतरा° (for °वहिता रा°).

1225. c) I_3 SA रोलम्भै° (for रोलम्बै°). —d) C °रशोचन्त (for °रशोच्यन्त).

1226. b) C $P_{2,3}$ तथान्तोपि (for तथाऽऽर्तेऽपि). —c) S′ °वरुग्रे; C °वरुग्ने [sic] (for °वरुग्णे).

1227. d) S′ C नाभून्मृदवशे° (for न मृदप्यवशे°).

1229. b) S′ लोहराहः; P_2 होलनान्ताः; P_3 लोहडान्तः (for होलडान्तः).

भ्रता लवन्यानुन्नद्धकुन्तलोऽविकटाकृतिः ।
जीवन्मडवराज्यान्तस्तेन विप्रोऽपि नोज्झितः ॥१२३०॥

लावन्यबुद्ध्या शूलानि पान्थैरप्यथ रोपितैः ।
भीमरूपाऽभवद् भूमिर्भैरवस्य महानसः ॥१२३१॥

शूले लवन्यस्यैकस्य क्रूरां विन्यस्यतो वधूम् ।
ययुः सर्वे दिशो भीता लवन्या मण्डलेश्वरात् ॥१२३२॥

केचिद् बुभुजिरे तेषां गोमांसं म्लेच्छभूमिषु ।
अरघट्टघरट्टादिकृष्टाः केचिदवालगन् ॥१२३३॥

प्राहिणोत् प्राभृतं भूरि भैरवाय महीभुजे ।
लवन्यमुण्डमालालीरखण्डा मण्डलेश्वरः ॥१२३४॥

तोरणावलयो राजद्वारेऽदृश्यन्त सर्वतः ।
डामराणां करोटीभिर्घटीभिरिव निर्भराः ॥१२३५॥

द्वारे कङ्कणवस्त्रादि लम्बमानं नृपौकसः ।
नेता डामरमुण्डस्य यः कोऽपि स किलाऽऽसदत् ॥१२३६॥

भोक्तुं डामरमुण्डानि व्याप्तविस्तीर्णतोरणाः ।
विदधुर्गृध्रकङ्काद्या राजद्वारोपसेवनम् ॥१२३७॥

यत्र यत्राऽऽस्त भूपालस्तत्र तत्र व्यधुर्जनाः ।
लवन्यमुण्डैरुच्चण्डैर्विस्तीर्णास्तोरणस्रजः ॥१२३८॥

1230. a) D C °न्यान्नु° (for °न्यानु°). —b) All Mss. except St विकटा° (for [अ]विकटा°). D (before suggestion) P_{1-3} I_3 S′ C °कृतिम् (for °कृतिः).

1231. a) D P_3 लवन्य° (for लावन्य°). —b) C S′ P_1 I_3 पाथै°; P_2 पंक्ति° (for पान्थै°).

1233. d) D suggests °कृष्टौ (for °कृष्टाः). SA_1 I_3 C S′ °वादयन्; SG °वागलन् (for °वालगन्).

1236. b) P_2 °माने (for °मानं). —c) P_3 नता (for नेता). —d) P_2 °सदन् (for °सदत्).

1237. b) D (before suggestion) P_{1-3} I_3 S′ C SA व्याप्ता वि° (for व्याप्तवि°). SA $P_{2,3}$ °तोरणा (for °तोरणाः).

1238. a) C भूपाला° (for भूपाल°).

गन्धेनाऽशुचिना घ्राणं कर्णौ भीमैः शिवारुतैः ।
अखिद्यत शवाकीर्णे श्मशान इव मण्डले ॥१२३९॥

बलेरकप्रपाप्रान्ताल्लोकपुण्यावधि व्यधात् ।
एकश्रेणीं मण्डलेशो डामरैः शूलकीलितैः ॥१२४०॥

एवं मडवराज्यं स कृत्वा निर्नष्टडामरम् ।
अधावत् क्रमराज्योर्वीं कर्तुं तामेव पद्धतिम् ॥१२४१॥

अवश्यं न भविष्याम इति निश्चित्य डामराः ।
चक्रिरे क्रमराज्यस्था लौलाहे सैन्यसंग्रहम् ॥१२४२॥

तैः सर्वैर्दत्तसंग्रामैः कुर्वद्भिः कदनं महत् ।
आस्ते स्म तत्र सुचिरं निरुद्धो मण्डलेश्वरः ॥१२४३॥

किमन्यद् राक्षसः कश्चित् सुरतीर्थर्षिपूजितम् ।
निहन्तुं मण्डलमिदं हर्षव्याजादवातरत् ॥१२४४॥

उल्लासो रात्रिषु दिने स्वापः क्रौर्यमुदग्रता ।
अवाङ्मयत्वं कर्तव्ये दक्षिणेशोचिते रतिः ॥१२४५॥

इत्यादयस्तस्य केचिद् धर्मा नक्तंचरोचिताः ।
तथा हि तत्कालभवैः प्रियाः प्राज्ञैः प्रकीर्तिताः ॥१२४६॥

अत्रान्तरे मल्लसूनुः कनीयान् यौवनोन्मदः ।
लक्ष्मीधरस्य गेहिन्या हृदयाह्लादकोऽभवत् ॥१२४७॥

सा हि राजसुते तस्मिन् संसक्ता प्रातिवेश्मिके ।
नाऽरज्यत निजे पत्यौ वानरप्रतिमाकृतौ ॥१२४८॥

1239. b) D कर्णौ (for कर्णौ).
1240. b) SA_2 gloss नूतन···यावल्लोकभवनं [three syllables are illegible] (for लोकपुण्य).
1242. b) P_2 डामरः [sic] (for डामराः). —d) P_2 लोलाहे (for लौलाहे).
1246. c) C S′ तथापि (for तथा हि).
1248. b) I_3 प्रातिवेशिके (for प्रातिवेश्मिके).

ज्ञातीनगण्यान् हत्वाऽन्यान् कस्माद् राज्यार्हलक्षणौ ।
नाऽवधीरुद्धतावेतौ राजन्नुच्चलसुस्सलौ ॥१२४९॥

इति लक्ष्मीधरेणेर्ष्यारोषादुक्तोऽपि भूपतिः ।
न चुक्रोधाऽनुतापार्तिं पूर्वज्ञातिवधाद् गतः ॥१२५०॥

स्वयमन्यमुखेनाऽपि स तेनोक्तस्ततोऽसकृत् ।
तयोर्घाते तदौद्धत्यं ध्यात्वा साध्वसमादधे ॥१२५१॥

ज्ञातिप्रीत्यनुवृत्त्यादि तेन विस्मरता ततः ।
संमन्त्र्य मन्त्रिभिः सार्धं दध्रे तद्वधनिश्चयः ॥१२५२॥

आसन्नवारवनिता थक्कनाख्याऽथ तं व्यधात् ।
भूभर्तुर्दुरभिप्रायं तयोः कर्णपथातिथिम् ॥१२५३॥

सख्या दर्शनपालेन तत्राऽर्थे छिन्नसंशयौ ।
निरगातां निशीथिन्यां द्वित्रैस्तावनुगैः समम् ॥१२५४॥

षट्सप्ततेऽब्दे नगरान्मार्गशीर्षेऽथ निर्गतौ ।
उत्रासवसतेः प्राप्तौ डामरस्योपवेशनम् ॥१२५५॥

प्रशस्तराजो दुध्रुक्षुः सिल्हराजं निजानुजम् ।
सोऽभिसंधाय तौ निन्ये लवन्यो मण्डलान्तरम् ॥१२५६॥

ततो राजपुरीं ज्यायान् प्रायात् कल्हस्य भूपतेः ।
कनीयान् प्रययौ पार्श्वं कलिञ्जरधरेशितुः ॥१२५७॥

तयोर्निर्गतयो राज्यं न कैश्चिच्छ्रद्दधीयत ।
निमित्तज्ञेन राज्ञैव दुर्निमित्तैस्त्वशङ्क्यत ॥१२५८॥

1250. c) C S′ I_3 P_{1-3} SA चक्रो° [sic] (for चुक्रो°).
1251. c) St D P_{1-3} I_3 om. तयोः; C S′ तेषां (for तयोः suggested with St. Tr.).
1255. c) D P_{1-3} I_3 C S′ तत्रास°; SA_3 उत्त्रास°; SA_2 *prima manu* उत्रसो (for उत्रास°).
1257. d) SA_1 (before corr.) D P_1 I_3 कालि° (for कलि° cf. St. Tr. fn.).
1258. a) D °र्निगत° (for °र्निर्गत°). —b) All Mss. except St read कश्चि° (for कैश्चि° suggested with St).

लक्ष्मीधरमुखेनैव प्रार्थनां हन्तुमुच्चलम् ।
चक्रे सेग्रामपालस्य सोऽङ्गीकृत्य धनं ततः ॥१२५९॥

स त्वन्तिकाऽऽगतस्येषन्मल्लसूनोः कृतादरः ।
तया विशङ्कया शत्रोरासीदधिकगौरवः ॥१२६०॥

आसन्नाभ्युदयं शत्रुं द्वेष्टैव विधिचोदितः ।
शङ्काविष्करणाल्लोके नयेत् संभावनाभुवम् ॥१२६१॥

राजपुर्याः प्रकृत्यैव काश्मीरानर्थकाङ्क्षिताः ।
प्रभविष्णौ रिपौ प्राप्ते चक्रिकायां किमुच्यताम् ॥१२६२॥

कांश्चिन्निकृतिकप्रायान् पार्श्वायातानथोच्चलः ।
गमागमान् कृतोद्योगो डामराणामकारयत् ॥१२६३॥

डामरास्तु महोत्साहास्तमानेतुं व्यसर्जयन् ।
राज्ञा विप्रकृता दूतान् वितीर्णोपायनान् बहून् ॥१२६४॥

तं सूर्यवर्मचन्द्रस्य तनयो जनकाभिधः ।
चकारोपचितोत्साहं मायादूतैर्विसर्जितैः ॥१२६५॥

वीक्ष्य डामरदूतांस्ताञ्जहता राजतो भयम् ।
व्यक्तं संग्रामपालेन निन्ये माहात्म्यमुच्चलः ॥१२६६॥

स कार्यगौरवात् प्रह्वो मूर्ध्नि कर्पूरचूर्णनम् ।
कृत्वा तमविनाशाय यावद् विस्रष्टुमैहत ॥१२६७॥

तावत् कलशराजाख्यस्तद्देशे मुख्यठक्कुरः ।
हर्षदेवार्पितोत्कोचस्तमेत्य विजनेऽब्रवीत् ॥१२६८॥

1262. ab) C शत्रुद्वे° (for शत्रुं द्वे°).
1263. a) P_2 °कृतिकाप्रा° (for °कृतिकप्राय°).
1264. a) SA_1 *sec. manu* डामरांस्तु महोत्साहांस्त° (for डामरास्तु महोत्साहास्त°). —c) SA_1 *sec. manu* विप्रकृतान् (for विप्रकृता). P_3 दूरा° (for दूता°).
1268. c) P_3हर्षं दे° (for हर्षदे°).

राज्ञः प्रसादनं त्यक्त्वा तवोच्चलहितैषिणः ।
कामधेनुं विनिर्धूय छागकण्ठग्रहे ग्रहः ॥१२६९॥

कोऽयं काश्मीरभूपानां काऽस्य शक्तिस्तपस्विनः ।
आराधनेन तद्राज्ञो विधेहि स्वमसाध्वसम् ॥१२७०॥

अयं राजगिरौ दुर्गे स्थाप्यतां पार्थिवस्ततः ।
स्यान्मनीषितवर्षी वस्त्रासान्मित्रं च सर्वदा ॥१२७१॥

तेनेति प्रभुराख्यातः खशानां स मिताशयः ।
तद्भीतः स्वार्थलुब्धश्च तथेति प्रत्यपद्यत ॥१२७२॥

तमभ्यधाच्च नो बन्द्धुं शक्तोऽहममुमुद्यतम् ।
त्वयैव वध्यतामेष मिषतः प्रेषितोऽन्तिकम् ॥१२७३॥

इत्युक्त्वा तं स्ववसतिं विसृज्याऽवददुच्चलम् ।
प्रातः कलशराजस्य त्वया गन्तव्यमन्तिकम् ॥१२७४॥

इह प्रधानामात्योऽसौ तेन ते स्यादनत्ययः ।
ततो विपक्षोच्छित्त्यै त्वां प्रतिमोक्ष्यामि सानुगम् ॥१२७५॥

अथ तद्वसतिं गन्तुं चलितोऽन्येद्युरुच्चलः ।
प्राग्दुर्निमित्तैस्तत्कृत्यमातैरथ निबोधितः ॥१२७६॥

मन्त्रे भिन्ने निवृत्तं तं श्रुत्वा खशनृपान्तिकम् ।
कुप्यन् कलशराजोऽथ सज्जसैन्यः समाययौ ॥१२७७॥

तमास्कन्दाय संप्राप्तं जानञ्शस्त्रभृतां वरः ।
ऐच्छद् रणाय निर्गन्तुं निजभृत्यैः सहोच्चलः ॥१२७८॥

क्षोभे संप्रस्तुते तं स सान्त्वयित्वा खशाधिपः ।
तिष्ठन् कलशराजेन सहाऽऽनिन्ये निजां सभाम् ॥१२७९॥

1271. b) C S′ स्थापितां (for स्थाप्यतां). —cd) C °वर्षीव त्रासा° (for °वर्षी वस्त्रासा°).
1272. b) C S′ शमिता° (for स मिता°). —d) D (before suggestion) P_{1-3} प्रतिपद्यत (for प्रत्यपद्यत).
1274. c) $P_{1,3}$ °राज्यस्य (for °राजस्य).
1277. d) C S′ °सैन्यैः (for °सैन्यः).

निषेधाधायिनो भृत्यान् स विधूयौजसां निधिः ।
सज्जं खशसमाजं तं कोपकम्प्राधरोऽविशत् ॥१२८०॥

द्रष्टुं तं नाऽशकत् कश्चित् कल्पान्तार्कमिवोल्बणम् ।
क्रुद्धं कलशराजो वा राजा वा तेजसां निधिम् ॥१२८१॥

स विविक्तीकृते धाम्नि खशाधीशं समन्त्रिणम् ।
सान्त्वयन्तं महातेजाः कोपरूक्षाक्षरोऽब्रवीत् ॥१२८२॥

पूर्वं दार्वाभिसारेऽभूद् भारद्वाजो नरो नृपः ।
नरवाहननामाऽस्य सूनुः फुल्लमजीजनत् ॥१२८३॥

स सातवाहनं तस्माच्चन्दोऽभूत् तत्सुतस्सुतौ ।
गोपालसिंहराजाख्यौ चन्दुराजोऽप्यवाप्तवान् ॥१२८४॥

बह्वात्मजः सिंहराजो दिद्दाख्यां तनयां ददौ ।
क्ष्माभुजे क्षेमगुप्ताय साऽवीरा भ्रातृनन्दनम् ॥१२८५॥

राज्ये संग्रामराजाख्यं व्यधादुदयराजजम् ।
भ्राताऽपि कान्तिराजोऽस्या जस्सराजमजीजनत् ॥१२८६॥

पिताऽनन्तस्य संग्रामो जस्सस्तन्वङ्गगुङ्गयोः ।
अनन्तात् कलशक्ष्माभृद् गुङ्गान्मल्लोऽप्यजायत ॥१२८७॥

कलशाद्धर्षदेवाद्या जाता मल्लात् तथा वयम् ।
कोऽयमित्यादि तन्मन्दैः क्रमेऽस्मिन् कथ्यते कथम् ॥१२८८॥

1280. b) I_3 विहायौ° (for विधूयौ°). —c) I_3 St सज्जः (for सज्जं).
1281. a) P_2 द्रष्टं तन्ना°; P_3 SA द्रष्टुं तन्ना° (for द्रष्टुं तं ना°).
1282. a) C SA S′ P_{1-3} I_3 °कृतो (for °कृते). —b) SA P_2 I_3 खशादीशं (for खशाधीशं).
1284. a) D SL SA P_{1-3} I_3 S′ C सार्थवा° (for सातवा° cf. *v.* vi 367). —d) P_3 om. *d.* D P_3 चन्दरा°; I_3 चर्मुरा° (for चन्दुरा°).
1285. a) P_3 om. *a.* —d) I_3 भृत्य° (for भ्रातृ°).
1286. cd) SA_1 (before corr.) P_3 °स्यास्सज्जरा°; P_1 °स्याज्जः सरा° (for °स्या जस्सरा°).
1287. c) D (before suggestion) P_{1-3} I_3 S′ C अनन्तः (for अनन्तात्).

पृथिव्यां वीरभोज्यायां क्रमो वा कोपयुज्यते ।
वीरस्य च सहायोऽस्तु कः स्वबाहुद्वयात् परः ॥१२८९॥

दिष्ट्या तदनुकम्प्यानां मूर्ध्नि हस्तमिवाऽस्पृशन् ।
काश्मीरकाणां भूपानां नाऽभूवं कुलपांसनः ॥१२९०॥

तस्माद् द्रक्ष्यथ मे शक्तिमित्युक्त्वा निर्गतस्ततः ।
विजयाय स पत्तीनां शतेनाऽनुगतोऽचलत् ॥१२९१॥

निहतं शशमादाय तस्याऽग्रे कश्चिदाययौ ।
स तेन सुनिमित्तेन प्राप्तां मेने रिपुश्रियम् ॥१२९२॥

अरघट्टघरट्टादिकृष्टिमुत्सृज्य निर्गताः ।
डामरा वाट्टदेवाद्यास्तं यान्तमुपतस्थिरे ॥१२९३॥

कटकस्थस्य संग्रामपालस्याऽऽयातमन्तिकात् ।
तद्देव्यो राजपुर्यन्तः खिन्नं निन्युः प्रसन्नताम् ॥१२९४॥

भुक्त्वा तद्वसतेर्गच्छन् स्वावासं स दिनात्यये ।
सैन्यैः कलशराजस्य दत्तास्कन्दोऽभवद् बहिः ॥१२९५॥

राज्ञीभिर्निर्गमात्तस्मिन् द्वारं संरोध्य वारिते ।
तदीयाः सैनिका युद्धे लोष्टावट्टादयो हताः ॥१२९६॥

मध्यं प्रविश्य शमिते प्रधानैस्तत्र संयुगे ।
सोऽल्पसैन्योऽपि संवृत्तः सुतरामल्पसैनिकः ॥१२९७॥

चैत्रस्य पौर्णमास्यां तत्कृच्छ्रमप्यनुभूतवान् ।
वैशाखाऽसितपञ्चम्यां यात्रामत्रस्तधीर्व्यधात् ॥१२९८॥

1289. b) P_1 वार्थोप°; S′ कोपजायते; C कोपजायते (for कोपयुज्यते). —d) $P_{1,3}$ °द्वयात्मकः (for °द्वयात् परः).
1290. c) St काश्मीरि° (for काश्मीर°).
1293. b) S′ C निर्गतः [sic] (for निर्गताः).
1296. b) C सम्बध्य (for संरोध्य). —d) SA_1 (after corr.) D C P_{1-3} लोष्टव° (for लोष्टाव°).
1298. ab) All Mss. read °मास्यन्तः कृ° (for °मास्यां तत्कृ° suggested with D).

विसृज्य वाट्टदेवादीन् विप्लवाय स्ववर्त्मभिः ।
आललम्बे प्रवेशेच्छां क्रमराज्याध्वना स्वयम् ॥१२९९॥

यं राजोदयसीहान्ते कपिलं क्षेमजात्मजम् ।
आस्थापयल्लोहरोर्व्यां स विशन्तं मुमोच तम् ॥१३००॥

स्वयमग्रे समग्राणां खड्गचर्मधरो व्रजन् ।
पलायने पूर्वशिष्यान् पर्णोत्से तद्भटान् व्यधात् ॥१३०१॥

बद्ध्वा निश्शङ्कमासीनं द्वारेशं सुज्जकाभिधम् ।
कश्मीरानामिषाकाङ्क्षी क्षिप्रं श्येन इवाऽपतत् ॥१३०२॥

तं डामराश्च कतिचित् खाशिकाश्चाऽद्रिसंश्रयाः ।
राजद्विषः प्राप्तमात्रं सर्वतः पर्यवारयन् ॥१३०३॥

तमाकाशादिव स्रस्तं भुवो गर्भादिवोत्थितम् ।
निशम्याऽतर्कितं प्राप्तं चकम्पे हर्षभूपतिः ॥१३०४॥

मा भूदसौ बद्धमूलः क्रमराज्यान्तरस्थितम् ।
मा वधीन्मण्डलेशं च ध्यायन्नित्याकुलोऽथ सः ॥१३०५॥

विलम्बमाने संनद्धसैनिके दण्डनायके ।
त्वरितं प्राहिणोत् पट्टं वितीर्णासंख्यनायकम् ॥१३०६॥

दैवोपहतवीर्यो वा क्रान्तो वा द्रोहचिन्तया ।
अभ्यमित्रीणतां त्यक्त्वा स तु मार्गे व्यलम्बत ॥१३०७॥

अन्यांश्च यान् यांस्तिलकराजादीन् व्यसृजन्नृपः ।
ते ते पट्टं समासाद्य नाऽकुर्वन्नग्रनिर्गमम् ॥१३०८॥

1299. a) SA_1 D C S′ $P_{2,3}$ I_3 वट्ट°; P_1 भट्ट° (for वाट्ट° suggested with St). —b) SA_1 om. न् विप्लवा and र्त्म in स्ववर्त्मभिः with a space. —c) SA C S′ P_2 I_3 आललम्ब (for आललम्बे).

1300. b) क्षेमटा° is suggested with St, cf. *v.* vii 482 (for क्षेमजा° found in all Mss.). —c) St C $P_{1,2}$ I_3 अस्थाप° (for आस्थाप°). —d) P_{1-3} संविशन्तं (for स विशन्तं).

1301. c) S′ C $P_{1,3}$ I_3 °शिष्यात् (for °शिष्यान्). —d) P_2 पूर्णोत्से (for पर्णोत्से).

1305. b) D (before suggestion) C S′ P_{1-3} I_3 SA °स्थितिम्; D suggests स्थितः (for स्थितम्).

दण्डनायकमुख्येऽपि लोके राज्ञा विसर्जिते ।
याते विमूढतां प्राप बद्धमूलत्वमुच्चलः ॥१३०९॥

वराहमूलं प्रविशन्नागतां द्विषतां बलात् ।
अश्वां सुलक्षणोपेतां राजलक्ष्मीमिवाऽऽसदत् ॥१३१०॥

महावराहमौलिस्रक् तस्य मूर्ध्नि पपात च ।
तदंसस्थितया पृथ्व्या वरणार्थमिवाऽर्पिता ॥१३११॥

काकाद्यवैद्यकुलजैर्योधैः संरुद्धपद्धतिः ।
स हुष्कपुरमुत्सृज्य क्रमराज्योन्मुखो ययौ ॥१३१२॥

अत्रान्तरे तमायान्तमाकर्ण्योत्सेकमागतैः ।
विद्रवोन्मुखतां निन्ये डामरैर्मण्डलेश्वरः ॥१३१३॥

तैर्हि प्रागेव भङ्गं स नीतो हत्वा महाभटान् ।
यशोराजमुखान् भूरीन् ययौ मन्दप्रतापताम् ॥१३१४॥

शनैरपसरन् सोऽथ तारमूलकमासदत् ।
उच्चलाधिष्ठितास्तेऽपि विद्विषन्तस्तमन्वयुः ॥१३१५॥

समेतानन्तसैन्येन तेन तत्र चिरं धृतः ।
उच्चलप्रलयाभ्रस्य पौरस्त्यानिलविभ्रमः ॥१३१६॥

सैन्ययोरुभयोस्तत्र जयश्रीकरिणीकृते ।
बभूव तुल्यसंघर्षः सेर्ष्ययोरिव दन्तिनोः ॥१३१७॥

आनन्दनामाऽप्युत्पिञ्जोत्थानमुच्चलमातुलः ।
चक्रे मडवराज्येऽथ निबिडीकृतडामरः ॥१३१८॥

1309. a) SA_3 °सख्ये° (for °मुख्ये°).

1310. c) P_2 अश्वं (for अश्वां). I_3 P_2 स्वल° (for सुल°).

1312. a) SA_1 *sec. manu* कांकाद्यवैश्य° (for काकाद्यवैद्य°). —b) D C P_1 °यौंधैः (for °योंधैः).

1316. a) S′ C P_2 °तां न तु सै° (for °तांनन्तसै°).

तद्विप्लवे डामरौघा दिग्देशेभ्यः सहस्रशः ।
उन्ममज्जुर्हिमापाये रन्ध्रेभ्य इव षट्पदाः ॥१३१९॥

तत्क्षणं क्षीणभाग्यस्य यथा द्वारपतिस्तथा ।
कायस्थः कम्पने राज्ञः सहेलोऽभून्महत्तमः ॥१३२०॥

आनन्देन कृतास्कन्दो बहुशो विहिताऽऽहवः ।
औज्झीन्मडवराज्यं स न यत्तद् बह्वभूत् तदा ॥१३२१॥

अथाऽद्भुतप्रतापेन वेष्टयित्वा महाचमूम् ।
उच्चलेनाऽऽहवे बद्धः ससैन्यो मण्डलेश्वरः ॥१३२२॥

न विद्मः किं तदा वृत्तं योधानां यत्किलाऽविदन् ।
ते सखड्गाश्वसंनाहा बद्धा वयमिति स्फुटम् ॥१३२३॥

तथा बद्धोऽपि निर्दध्यौ स भव्यः प्रभवे हितम् ।
स्वामिभक्तिर्विपर्येति पर्यन्तेऽपि न मानिनाम् ॥१३२४॥

तूर्णं पुरप्रवेशाय सोऽथ प्रैरयदुच्चलम् ।
विश्वास्य नेदृगन्योऽस्ति क्षण इत्यसकृद् ब्रुवन् ॥१३२५॥

विशतस्तस्य चाऽनेकैः पुरग्रामाद्यलुण्ठयत् ।
कर्मणाऽनेन कौलीनमस्याऽस्त्विति विचिन्तयन् ॥१३२६॥

परिहासपुरे तेन स ततः संप्रवेशितः ।
श्वभ्राम्बुविषमाद्यस्मान्निर्गमोऽत्यन्तदुर्गमः ॥१३२७॥

तत्रोच्चलं चतुश्शाले स्वं च दग्धुमचूचुदत् ।
निजान् स निशि ते तत्तु न चक्रुस्तद्धितैषिणः ॥१३२८॥

1320. c) D C S′ P_{1-3} I_3 कार्यस्थः (for कायस्थः). —d) C S′ $P_{1,2}$ I_3 SA सहलो° (for सहेलो°). C S′ P_1 I_3 SA °भूमहत्तमः; P_3 °भूमहतुसः[sic] (for °भून्महत्तमः).

1323. c) C °खड्गास्ससंना° (for °खड्गाश्वसंना°).

यथा चित्तं तथाऽस्य स्यात् कायश्चेत् साहसक्षमः ।
तदात्मनिरपेक्षस्य किं न सिध्येन्मनीषितम् ॥१३२९॥

क्लीवश्छन्नवपुस्त्वचा सह वसत्यच्छेद्यया कच्छपो
निर्वर्मा रणकर्मसाहसमहोत्साहश्च सिंहः सदा ।
धिक् प्रादुष्कृतपक्षपातरभसो नीचेषु मुग्धो विधि-
र्वीराणां कुरुते शरीरमभितो वैकल्यशल्याहतम् ॥१३३०॥

संदिदेशाऽथ स क्ष्मापमाकृष्याऽयं मयाऽग्रतः ।
सृगाल इव ते क्षिप्तः क्षिप्रं निर्गत्य वध्यताम् ॥१३३१॥

ततः समस्तसामन्तसैन्यसंततिसंयुतः ।
अद्य मृत्युर्जयो वेति निश्चित्य निरगान्नृपः ॥१३३२॥

स प्राणसंशये सर्वायासप्रशममादिशत् ।
पटहोद्घोषणेनाऽऽसीत् पौरैरनुगतोऽखिलैः ॥१३३३॥

प्राप्तं भरतसेत्वग्रं घ्नन्तः सैन्यं विरोधिनाम् ।
अजानेयै राजभृत्याः क्षणान्मार्गमलङ्घयन् ॥१३३४॥

क्षुभितेऽब्धाविवाऽऽयाते राजसैन्ये द्विषद्बलम् ।
मण्डलेश्वर एवाऽन्तःप्रविष्टो निरनाशयत् ॥१३३५॥

अथोच्चलबले भग्ने विदद्रुः केऽपि जाङ्घिकाः ।
श्रान्ता राजविहारं च प्राविशन् केऽपि डामराः ॥१३३६॥

त्रिल्लसेनाभिधं दृष्ट्वा प्रविष्टं डामरं परे ।
उच्चलोऽसाविति भ्रान्त्या विहारं तमदाहयन् ॥१३३७॥

1330. a) $P_{2,3}$ St क्लीवच्छन्न° (for क्लीवश्छन्न°).
1331. c) C S′ शृगाल; I_3 मृडाल [sic] (for सृगाल).
1333. b) D °दिशन् (for °दिशत्). —d) $P_{1,2}$ I_3 SA पारै°; St C परै° (for पौरै°).
1334. b) All Mss. read विरोधिनम् (for विरोधिनाम् suggested with D).
1336 b) St C विदुद्रुः [sic] (for विदद्रुः).
1337. b) SA_1 *sec. manu* प्रविष्टा (for प्रविष्टं).

सोमपालाभिधेनाऽरिहयारोहान्तरे चिरम् ।
कुर्वन् दर्शनपालस्य पितृव्येन सहाऽऽहवम् ॥१३३८॥

यत्नाज्जनकचन्द्राद्यैर्मानी व्यावर्तितो रणात् ।
परिहासपुरात् प्रायान्मृत्युवक्त्रादिवोच्चलः ॥१३३९॥

वितस्तां गौरिकाबालग्रामात् तीर्त्वा हयान्वितः ।
स डामरैः सह पुनः प्रययौ तारमूलकम् ॥१३४०॥

जयेन तावन्मात्रेण कितवोऽल्प इवोन्मदः ।
राजा प्रशंसन्नानन्दं राजधानीं न्यवर्तत ॥१३४१॥

जीवन्तमप्यरिं श्रुत्वा न पश्चादलगत् स यत् ।
आसन्नुच्छ्वसितास्तेन भङ्गभाजोऽपि डामराः ॥१३४२॥

यातान् पलाय्य ताञ्ज्येष्ठामूलीये मासि सर्वतः ।
भूयोऽपि संघटयितुं स्थिरधीरैच्छदुच्चलः ॥१३४३॥

स्वदोर्मात्रसहायस्य परायत्तस्य मानिनः ।
दुर्भिक्षान्तर्महोद्योगः स तस्य विषमोऽभवत् ॥१३४४॥

तन्मध्येऽतिदरिद्रोऽपि संप्राप्तं स ररक्ष यम् ।
तमुत्पाट्याऽऽनयद् राजा श्रीपरीहासकेशवम् ॥१३४५॥

तस्मिन् विघटिते पांसुः कपोतच्छदधूसरः ।
रोदसीच्छादनं हर्षशीर्षच्छेदावधि व्यधात् ॥१३४६॥

प्रागन्धकारो देशेऽस्मिन् दिवसेऽपि व्यजृम्भत ।
रूपिकादिवसालोक इति यत् पप्रथे जने ॥१३४७॥

1338. d) St P_3 पितृव्येण [sic] (for पितृव्येन). P_1 महा° (for सहा°).
1340. P_2 om. *ab*. —a) SA_2 gloss परिहासपुरसमीपे गुरिकाबलमस्ति (for गौरिकाबाल).
1345. b) All Mss. read यत् (for यम् suggessted). —d) S′ °परि° (for °परी°).
1347. a) SA S′ $P_{1,2}$ I_3 °कारदेशे° (for °कारो देशे°). S′ om. *vv.* 1347 *c*—1348 *d*. —d) P_2 प्रपथे (for पप्रथे). I_3 जनैः (for जने).

निवेशिते परीहासकेशवे प्रशशाम तत् ।
तस्मिन्नुन्मूलिते भूयः सार्धं मासमजृम्भत ॥१३४८॥

किंचिदुच्छ्वसिते राज्ञि मन्दोद्रेकतया रिपोः ।
दिशा शूरपुरस्याऽथ सुस्सलः प्रत्यदृश्यत ॥१३४९॥

अवनाहे स हि वसन्नुपालम्भपरैः पितुः ।
संदेशैः शंसतो ज्येष्ठमौदासीन्यादपाहृतः ॥१३५०॥

दत्तान् कल्हक्षितीशेन कांश्चिदादाय वाजिनः ।
चिरेण राजदाक्षिण्यमौज्झीत् तेन व्यलम्बत ॥१३५१॥

आरम्भादुदयान्तं च तिष्ठन् वैरेऽपि निष्ठुरे ।
साम प्रयुयुजे मोहावहं मायानिधी रिपोः ॥१३५२॥

जित्वा माणिक्यनामानं तेन सेनापतिं रणे ।
प्रापि शूरपुरद्रङ्गाजयश्रीः श्रीश्च भूयसी ॥१३५३॥

तस्याऽभ्युदयपात्रस्य तया संप्राप्तया श्रिया ।
आरब्धिसमयः कृत्स्नः स विभूत्यद्भुतोऽभवत् ॥१३५४॥

मण्डलेश्वरपट्टादीनविचिन्त्योच्चलं ततः ।
प्राहिणोन्नृपतिर्योद्धुं सुस्सलं क्षिप्रकारिणम् ॥१३५५॥

तेन शूरपुरे भग्नास्तद्योधाः शौर्यशालिना ।
भूयांसः प्रलयं प्रापुर्मग्ना वैतरणीजले ॥१३५६॥

1349. d) P_2 सुसलः; P_3 सुस्सुलः (for सुस्सलः).
1350. a) SA_3 gloss पौदुपावग्रामे; SA_2 अशनाहे (for अवनाहे).
1351. a) S′ C $P_{1,2}$ °कल्प° (for °कल्ह°). —d) S′ C °लम्भ° (for °लम्ब°).
1352. c) SA I_3 मोहौ° (for मोहा°).
1353. c) S′C °पुराद्र° (for °पुरद्र°). द्रङ्ग means the most important part of a city.
1355. d) P_1 सुःसुलं; P_2 सुस्मलं (for सुस्सलं).
1356. c) P_2 °यांसोः (for °यांसः). d) Here वैतरणी means 'river' in general < *वैतर- 'water' (cf. Panj. वत्तर-;Eng. water, wet). It does not appear to be the name of a particular river as St. would have it, cf. St. Tr. fn.

तत्र दर्शनपालस्य स्वामिद्रोहकृतो वपुः ।
विक्रामतो न संस्पृष्टं खिन्नयेव जयश्रिया ॥१३५७॥

राजसैन्यं तदन्येद्युर्हतशेषं पलायितम् ।
लोकपुण्ये निवसतः सहेलस्याऽन्तिकं ययौ ॥१३५८॥

सुस्सलापातकल्पान्तं विशङ्क्याऽपि सहेलकः ।
तैस्तैर्भग्नैर्बलैः साकं नगरं प्राविशत् ततः ॥१३५९॥

एवमभ्येत्य नृपतौ सुस्सलेन विसूत्रिते ।
अवाप तारमूलस्थः प्रतिष्ठां पुनरुच्चलः ॥१३६०॥

विभ्यद्भिस्तुरगानीकात् पत्तिप्रायैः स डामरैः ।
आनिन्ये शैलदुर्गेण भूयो लहरवर्त्मना ॥१३६१॥

राजाऽप्युदयराजाख्यं कृत्वा द्वारपतिं पुनः ।
प्राहिणोदुच्चलं जेतुं लहरं मण्डलेश्वरम् ॥१३६२॥

ततः पद्मपुरं प्राप्ते मातुले मल्लजन्मनोः ।
न कोऽपि कम्पनं भूपान्मन्त्री त्रासातुरोऽग्रहीत् ॥१३६३॥

को मेऽस्तीति विनिश्वस्य वदतोऽथ महीपतेः ।
अधिकारस्रजं हस्ताच्चन्द्रराजः समाददे ॥१३६४॥

अनाशीः शयने मृत्युर्येषां तेषां स वंशजः ।
श्रीजिन्दुराजमुख्यानामौचित्यं प्रत्यपद्यत ॥१३६५॥

स द्रौणिरिव निर्नष्टे काले सेनापतिः कृतः ।
निर्गत्य तत्पद्मपुरादरिसैन्यं न्यवारयत् ॥१३६६॥

विपक्षः कम्पनेशः स तेन क्ष्मां क्रामता शनैः ।
नवम्यां शुक्लनभसो हतोऽवन्तिपुरान्तरे ॥१३६७॥

1357. c) D (before suggestion) C P_{1-3} I_3 विक्रामते (for विक्रामतो).
1360. a) P_2 °मध्येत्य (for °मभ्येत्य). —c) P_3 °मूलस्थैः (for °मूलस्थः).
1361. a) SA C S′ P_{1-3} °नीकान् (for °नीकात्).
1362. d) S′ लहरे (for लहरं).
1364. a) D विनिःश्वस्य (for विनिश्वस्य).
1365. d) St P_1 I_3 प्रत्यपाद्यत (for प्रत्यपद्यत).
1367. a) P_3 om. स. —b) D SA P_{1-3} I_3 S′ C क्रमता (for क्रामता suggested with St).

स हि गोवर्धनधरोपान्ते कुर्वद्भिराहवम् ।
स्वसैन्यैर्वर्जितो गीतं शृण्वन् परिमितानुगः ॥१३६८॥

प्रविश्याऽरिहयारोहैर्वितस्तातीरवर्त्मना ।
प्राप्तोऽकस्माद् वधं लेभे प्रमत्तानां शुभं कुतः ॥१३६९॥

प्रहितं चन्द्रराजेन क्ष्मापतिर्वीक्ष्य तच्छिरः ।
भूयो जयाशामकरोदानुकूल्यं विदन् विधेः ॥१३७०॥

वैमुख्येन व्रजन् कुर्यात् सांमुख्यैरन्तरा विधिः ।
प्रत्यागमभ्रमं सिंह इव व्यावृत्य वीक्षितैः ॥१३७१॥

अथ लब्धबलश्चन्द्रराजोऽमन्दोद्यमोऽविशत् ।
विजयक्षेत्रमाकर्षन् कटकं दशधाऽष्टधा ॥१३७२॥

तुलाधर इव स्रष्टा साम्यभङ्गं न चक्षमे ।
तदा द्वयोः कटकयोस्तुलायाः पुटयोरिव ॥१३७३॥

प्राप्ते यतस्तृतीयस्मिन् दिवसे मण्डलेशितुः ।
अकालवृष्टिविवशं लहरे व्यद्रवद् बलम् ॥१३७४॥

शीतवातहता योधा मग्नाः केदारकर्दमे ।
तुरगासितनुत्रादि द्राक् तिर्यञ्च इवाऽमुचन् ॥१३७५॥

उच्चेलेन ततो रक्ष्यमाणमप्यार्द्रचेतसा ।
प्राप्तं जनकचन्द्राद्या निजघ्नुर्मण्डलेश्वरम् ॥१३७६॥

हर्षभूभृद्भृत्यवर्गे द्रोहशङ्काङ्किते परम् ।
कलेवरव्ययात् कीर्तिः क्रीता तेनैव मन्त्रिणा ॥१३७७॥

ध्रुवं संस्पर्धतो वन्द्या देवशर्मादयोऽस्य ते ।
न चेत् कोऽपि विपर्यासे दोषमुद्घोषयेज्जनः ॥१३७८॥

1370. c) S′ भूपो (for भूयो).
1372. c) P_3 विजये क्षेत्र° (for विजयक्षेत्र°). —d) $P_{1,3}$ °धाऽष्टदा [sic] (for °धाऽष्टधा).
1374. a) C S′ °तीयेस्मिन् (for °तीयस्मिन्).
1376. b) S′ °मथार्द्र° (for °मप्यार्द्र°).
1378. d) S′ °षते जनः; I_3 °षयेज्जवः (for °षयेज्जनः).

लवन्योन्मूलनारातिव्यूहव्यामोहनादयः ।
विध्यधीने फले ध्याते स्तुत्याः कस्य न तत्क्रियाः ॥१३७९॥

किं पातालतमो न हन्ति हिमगुः किं नो विषं भीतये
पानीयं गिलतः किमान्तरशिखिध्वस्त्यै न धन्वन्तरिः ।
सर्वत्रैकपदे प्रयात्यफलतां वाच्यो जडो नाऽम्बुधिः
सिद्धेर्दैवविधेयतां विमृषतां स्तुत्यैव वस्तुज्ञता ॥१३८०॥

स्वामिकृत्योद्यमस्तुत्यसूतिषु स्त्रीषु पूज्यताम् ।
गज्जा तज्जननी स्वस्य नमस्यन्त्यविशङ्कताम् ॥१३८१॥

साहसे सा हि तनये यत्र तत्र महीभुजा ।
प्रहीयमाणे तं स्नेहमोहिताऽऽह स्म भूभुजम् ॥१३८२॥

अनन्यसंततेरेकं सुतमेतं प्रभो मम ।
मा नियुङ्क्था यत्र तत्र कार्ये संदेहितासुनि ॥१३८३॥

स तामकथयन्मातर्यथा तेऽनन्यसंततेः ।
तथा मेऽनन्यभृत्यस्य सोऽयमेकोऽवलम्बनम् ॥१३८४॥

स्वसंभवस्य तां भर्तुर्भक्तिसंभावनामसौ ।
प्राप्तप्रतिष्ठानिष्ठायां मेने मानवती सती ॥१३८५॥

उच्चलस्य क्षणे तस्मिन् हिरण्यपुरमीयुषः ।
राज्याभिषेकं संभूय तत्रत्या ब्राह्मणा ददुः ॥१३८६॥

नृपमत्यन्तविवशं प्रसङ्गे तत्र मन्त्रिणः ।
भूयांसः सन्ति तैः सार्धं व्रज तल्लोहराचलम् ॥१३८७॥

1380. a) S′ निहन्ति (for न हन्ति). —b) P_2 गलितः (for गिलतः). S′ C °ध्वस्तेन (for °ध्वस्त्यै न). All Mss. except St read धान्व° (for धन्व° emended with St).

1381. b) S′ C °मूर्तिषु; P_1 °मूतिषु; P_3 °मूलिषु [sic] (for° सूतिषु). —c) C S′ P_1 I_3 राज्ञा; P_3 राज्जा (for गज्जा).

1382. c) S′ °यमाणो (for °यमाणे).

1383. b) S′ C प्रभोर्मम (for प्रभो मम). —c) SA नियुक्थ; I_3 नियुक्ता (for नियुङ्क्था).

1384. d) S′ C $P_{1,3}$ स्वय° (सोऽय°).

1385. a) S′ C °विष्यतो; $P_{1,2}$ I_3 SA °वस्य ता (for °वस्य तां).

प्रजा एव ततः शान्तोत्कण्ठा नवनृपं प्रति ।
त्वामानेष्यन्ति न चिराद् दिनैर्वा स्वयमेष्यसि ॥१३८८॥
सोऽभ्यधादवरोधस्त्रीकोशसिंहासनाद्यहम् ।
असामान्यं परित्यज्य गन्तुं सपदि नोत्सहे ॥१३८९॥
पुनस्तेऽकथयन्नाप्ता यान्तोऽध्यारुह्य वाजिनः ।
पृष्ठे विन्यस्य नेष्यन्ति कोशान्तःपुरयोषितः ॥१३९०॥
श्वपाकीकामुकोऽप्यासीद् यस्मिंस्तदपरोऽपि चेत् ।
सिंहासनं समारोहेत् काऽभिमानक्षतिस्ततः ॥१३९१॥
आस्तामेतत्परं ब्रूथ मन्त्रमित्यथ चोदिताः ।
ते पार्थिवेन भूयोऽपि ससंरम्भं बभाषिरे ॥१३९२॥
क्षत्रधर्मं पुरस्कृत्य शासतां क्ष्मां क्षमाभुजाम् ।
को दैन्यस्याऽवकाशः स्यादाशीर्येषां मृधे वधः ॥१३९३॥
अनुद्योगश्च लज्जा च भयं द्वैधं च मन्त्रिणाम् ।
भूभुजां व्यसनोल्लासे शत्रवो न तु गोत्रिणः ॥१३९४॥
कार्यं न पश्येदलसः स्वयं यो
भृत्येषु विन्यस्तसमस्तकृत्यः ।
यष्ट्याश्रयस्येव विनष्टदृष्टेः
पदे पदे तस्य किलोपघातः ॥१३९५॥
लज्जेऽहमस्य स्वयमात्तशस्त्रः
स्वल्पस्य शत्रोः कलयन्नवज्ञाम् ।
एवं किलाऽदीर्घमतिर्ददाति
स्वयं प्रवृद्धिं त्रपया विमुग्धः ॥१३९६॥

1389. b) I_3 °शोक° (for °कोश°).
1390. a) C S′ P_{1-3} I_3 °न्नासौ (for °न्नासा). —d) P_1 °योजितं (for °योषितः).
1391. c) P_2 सिंहासने (for सिंहासनं).
1393. c) S′ C कौ (for को). SA_1 *sec. manu* C S′ P_2 सैन्य° (for दैन्य°).
1394. b) St $P_{1,2}$ I_3 मन्त्रिणा (for मन्त्रिणाम्). —c) D भूभृतां (for भूभुजां).
1395. a) P_1 °दलसा: (for °दलसः).
1396. a) SA_1 om. ह with a space. I_3 °मस्या (for °मस्य). —d) I_3 त्रयया [sic] (for त्रपया).

कालेन याति क्रिमितां महेन्द्रो
महेन्द्रभावं क्रिमिरप्युपैति ।
अयं प्रथीयानयमप्रतिष्ठ
इत्येष निष्ठाऽनुचितोऽभिमानः ॥१३९७॥

पराभवाधायि भयं जिगीषोः
सर्वाङ्गवैकल्यवताऽहितेन ।
येनाऽभियुक्तः स समस्तसंप-
त्पूर्णोऽपि वैकल्यहतत्वमेति ॥१३९८॥

लब्धस्थितिः स्फीतविभूतिपात्रं
दीनोऽभियोक्ता परपिण्डवृत्तिः ।
आद्ये कथं नाम पराभवः स्याद्
भयं भवेच्चेह न तत्र भावः ॥१३९९॥

अमात्यवैमत्यवशेन निष्ठा
दृष्टा न कार्यस्य तनीयसोऽपि ।
वैशाखरज्जोरिव कर्षकाभ्यां
पर्याययोगेन कृते विकर्षे ॥१४००॥

समग्रशक्तेरेकेनाऽप्याशाक्रान्तस्य भूपतेः ।
वैरी सर्वाङ्गहीनोऽपि राज्यमायुश्च कर्षति ॥१४०१॥

यत्र द्विषस्तत्र याहि क्रान्तां क्रान्तां च मेदिनीम् ।
पातार्थी न चिरादेवं पुनर्जयमवाप्स्यसि ॥१४०२॥

1397. a) P_2 कालो न (for कालेन). —b) P_2 कृमि° (for क्रिमि°). —c) S′ P_2 I_3 °प्रतिष्टः ; P_1 °प्रतिष्टो ; P_3 °प्रतिष्ठो (for °प्रतिष्ठ).

1398. b) D °कल्यहतत्वमेव ; P_2 °कल्पकृतत्वमेति ; I_3 °कल्पवता° (for वैकल्यवताऽहितेन). —cd) P_2 om. *cd*. —d) I_3 °कल्पह° (for °कल्यह°).

1399. a) P_3 स्फीति° (for स्फीत°). —d) SA_1 (before corr.) D C S′ P_2 तत्प्रभावः (for तत्र भावः).

1400. d) P_2 °योगो न and विमर्षे (for °योगेन and विकर्षे).

1402. c) P_3 °तार्थीव (for °तार्थी न).

विधुरेऽपि विधौ शूरसहस्रपरिवारितैः ।
पतद्भिराहवे भूपैः ख्यात्याभिख्योपलभ्यते ॥१४०३॥

नृत्यच्छिन्नशिरोधरोद्धुरनटे ज्यालाबुवीणागुण-
प्रक्वाणिन्युदयच्छिवामुखशिखिज्वालाप्रदीपाङ्कुरे ।
धन्याः केऽप्युपलभ्य वीरशयने शान्ताभिमानज्वरो-
ल्लाघश्लाघ्यशरीरतासफलितस्निग्धाशिषः शेरते ॥१४०४॥

उदात्तमित्यन्तकृत्यं संचिन्त्य कितवा इव ।
राज्ये भजन्ते दीव्यन्तः क्षत्रियास्त्रासहीनताम् ॥१४०५॥

मन्त्रान्तरानुयोक्तारं तदप्युत्सृज्य मन्त्रितम् ।
परुषं प्राप्तकालं च ते निश्श्वस्य तमब्रुवन् ॥१४०६॥

उत्कर्षवदसूंस्त्यक्तुमपि शक्नोषि संकटे ।
अन्यथाऽनुचितं किंचित् प्राप्स्यस्यहितचिन्तितम् ॥१४०७॥

स तानुवाच स्वं हन्तुं न शक्तोऽहं ततो मयि ।
भवद्भिरेव विषमे प्रहर्तव्यमुपस्थिते ॥१४०८॥

गिरं कापुरुषस्येव क्लैब्यग्रस्तस्य तां प्रभोः ।
सबाष्पास्तेऽनुशोचन्तः पुनरेवं बभाषिरे ॥१४०९॥

प्रतीकाराय नः शक्तिर्न चेद् दैवहतौजसाम् ।
प्रत्युतैवंविधे कृत्ये प्रसरेयुः कराः कथम् ॥१४१०॥

1403. d) P_2 ख्याता° (for ख्यात्या°).

1404. a) SA_1 (after corr.) S′ C $P_{2,3}$ I_3 °नटो; SA_1 (before corr.) °नख° (for °नटे). SA_1 (before corr.) ज्वालाग्र°; $P_{1,3}$ I_3 ज्यालाग्धु° (for ज्यालाबु°). —b) P_3 °न्युभय°; P_1 C °न्युरु य°; S′ °त्पुरुप° (for °न्युदय°), C S′ $P_{1,3}$ I_3 °च्छिवौ मु°; SA_1 (before corr.) °च्छिवो मु° (for °च्छिवामु°). —c) C S′ धन्यः कौ° ; P_2 धन्या को° (for धन्याः के°). P_{1-3} °मनो ज्व° (for °मानज्व°). —d) S′ °ल्लाघ्य° (for °ल्लाघ°).

1405. b) St (before corr.) SA P_1 I_3 संचित्य (for संचिन्त्य). —d) P_{1-3} °हीनताम् (for °हीनताम्).

1406. c) S′ C P_2 SA पुरुषं (for परुषं).

1407. b) S′ C शक्तोषि [sic] (for शक्नोषि).

पशून् पुरुषरूपान् स नूनं भूभृत् पुपोष तान् ।
दुःखं नोदखनंस्तस्य ये तादृग्दैन्यमीयुषः ॥१४११॥

युगान्तानपि जीवित्वा कायः सापाय एव यः ।
तत्त्यागमात्रसाध्येऽर्थे धिग् दैन्यमनुजीविनाम् ॥१४१२॥

योषितोऽपि विशन्त्यग्निं यं ध्यात्वा विस्मृतिं व्रजेत् ।
भर्तृस्नेहः स पुंसोऽपि यस्य कोऽन्यस्ततोऽधमः ॥१४१३॥

शैलूषस्येव ये शोकभयदैन्यादिविक्रियाः ।
भर्तुः पश्यन्ति तैरेषा भूः सतीर्थाऽप्यपावनी ॥१४१४॥

क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृद्-
दुग्धा गौरशनाद्यभावविवशा हम्बारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषन्निर्जितो
दृष्टो येन परं न तस्य निरये भोक्तव्यमस्त्यप्रियम् ॥१४१५॥

भूयोऽपि मानुषपशून् स तान्नृपतिरब्रवीत् ।
उदात्तकृत्योऽप्याविश्य भूतैरिव विमोहितः ॥१४१६॥

एतस्मिन् पश्चिमे काले भुक्तं राज्यं यथा मया ।
जाने विशालेच्छतया तथाऽन्यो नोपभोक्ष्यते ॥१४१७॥

यमः कुबेरश्चौष्ठाग्रे राज्ञां तिष्ठत इत्यसौ ।
मदेकशरणैवाऽभूत् ख्यातिरस्मिन् कलौ युगे ॥१४१८॥

रुद्रोपेन्द्रमहेन्द्राद्याः प्रयातारो यदध्वना ।
उपस्थितायां नियतौ तत्र मर्त्यस्य काः शुचः ॥१४१९॥

1411. b) P_3 ताम् (for तान्). —c) D (before suggestion) दुःखे नोद°; C S′ P_1 दुःखेनादाय नस्तस्य; St $P_{2,3}$ I_3 दुःखेनोद° (for दुःखं नोदखनंस्तस्य suggested with D).
1412. b) S′ नः; SA P_2 I_3 वः (for यः). —d) $P_{1,2}$ दिग् (for धिग्).
1414. a) P_2 °षस्येव (for °षस्येव). —b) St C S′ P_2 °न्याद्यवि° (for °न्यादिवि°).
1415. d) P_2 कृतस्य (for न तस्य).
1416. a) St भयोऽपि (for भूयोऽपि). —c) S′ C P_1 I_3 तदात्त°; P_1 I_3 तदा तु (for उदात्त°).
1417. c) St जानेविशा° (for जाने विशा°).
1419. b) P_2 प्रयातारौ (for प्रयातारो). —d) S′ C P_3 तस्य (for तत्र).

विधुरेऽपि विधौ शूरसहस्रपरिवारितैः ।
पतद्भिराहवे भूपैः ख्यात्याभिख्योपलभ्यते ॥१४०३॥

नृत्यच्छिन्नशिरोधरोद्धुरनटे ज्यालाबुवीणागुण-
प्रक्वाणिन्युदयच्छिवामुखशिखिज्वालाप्रदीपाङ्कुरे ।
धन्याः केऽप्युपलभ्य वीरशयने शान्ताभिमानज्वरो-
ल्लाघश्लाघ्यशरीरतासफलितस्निग्धाशिषः शेरते ॥१४०४॥

उदात्तमित्यन्तकृत्यं संचिन्त्य कितवा इव ।
राज्ये भजन्ते दीव्यन्तः क्षत्रियास्त्रासहीनताम् ॥१४०५॥

मन्त्रान्तरानुयोक्तारं तदप्युत्सृज्य मन्त्रितम् ।
परुषं प्राप्तकालं च ते निश्श्वस्य तमब्रुवन् ॥१४०६॥

उत्कर्षवदसूंस्त्यक्तुमपि शक्नोषि संकटे ।
अन्यथाऽनुचितं किंचित् प्राप्स्यस्यहितचिन्तितम् ॥१४०७॥

स तानुवाच स्वं हन्तुं न शक्तोऽहं ततो मयि ।
भवद्भिरेव विषमे प्रहर्तव्यमुपस्थिते ॥१४०८॥

गिरं कापुरुषस्येव क्लैब्यग्रस्तस्य तां प्रभोः ।
सबाष्पास्तेऽनुशोचन्तः पुनरेवं बभाषिरे ॥१४०९॥

प्रतीकाराय नः शक्तिर्न चेद् दैवहतौजसाम् ।
प्रत्युतैवंविधे कृत्ये प्रसरेयुः कराः कथम् ॥१४१०॥

1403. d) P_2 ख्याता° (for ख्यात्या°).

1404. a) SA_1 (after corr.) S′ C $P_{2,3}$ I_3 °नटो; SA_1 (before corr.) °नख° (for °नटे). SA_1 (before corr.) ज्वालाग्र°; $P_{1,3}$ I_3 ज्यालाग्धु° (for ज्यालाबु°). —b) P_3 °न्युभय°; P_1 C °न्युरु य°; S′ °त्पुरुप° (for °न्युदय°), C S′ $P_{1,3}$ I_3 °च्छिवौ मु°; SA_1 (before corr.) °च्छिवो मु° (for °च्छिवामु°). —c) C S′ धन्यः को° ; P_2 धन्या को° (for धन्याः के°). P_{1-3} °मनो ज्व° (for °मानज्व°). —d) S′ °ल्लाघ्य° (for °ल्लाघ°).

1405. b) St (before corr.) SA P_1 I_3 संचित्य (for संचिन्त्य). —d) P_{1-3} °दीनताम् (for °हीनताम्).

1406. c) S′ C P_2 SA पुरुषं (for परुषं).

1407. b) S′ C शक्तोषि [sic] (for शक्नोषि).

पशून् पुरुषरूपान् स नूनं भूभृत् पुपोष तान् ।
दुःखं नोदखनंस्तस्य ये तादृग्दैन्यमीयुषः ॥१४११॥

युगान्तानपि जीवित्वा कायः सापाय एव यः ।
तत्त्यागमात्रसाध्येऽर्थे धिग् दैन्यमनुजीविनाम् ॥१४१२॥

योषितोऽपि विशन्त्यग्निं यं ध्यात्वा विस्मृतिं व्रजेत् ।
भर्तृस्नेहः स पुंसोऽपि यस्य कोऽन्यस्ततोऽधमः ॥१४१३॥

शैलूषस्येव ये शोकभयदैन्यादिविक्रियाः ।
भर्तुः पश्यन्ति तैरेषा भूः सतीर्थाऽप्यपावनी ॥१४१४॥

क्षुत्क्षामस्तनयो वधूः परगृहप्रेष्यावसन्नः सुहृद्-
दुग्धा गौरशनाद्यभावविवशा हम्बारवोद्गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषन्निर्जितो
दृष्टो येन परं न तस्य निरये भोक्तव्यमस्त्यप्रियम् ॥१४१५॥

भूयोऽपि मानुषपशून् स तान्नृपतिरब्रवीत् ।
उदात्तकृत्योऽप्याविश्य भूतैरिव विमोहितः ॥१४१६॥

एतस्मिन् पश्चिमे काले भुक्तं राज्यं यथा मया ।
जाने विशालेच्छतया तथाऽन्यो नोपभोक्ष्यते ॥१४१७॥

यमः कुबेरश्चौष्ठाग्रे राज्ञां तिष्ठत इत्यसौ ।
मदेकशरणैवाऽभूत् ख्यातिरस्मिन् कलौ युगे ॥१४१८॥

रुद्रोपेन्द्रमहेन्द्राद्याः प्रयातारो यदध्वना ।
उपस्थितायां नियतौ तत्र मर्त्यस्य काः शुचः ॥१४१९॥

1411. b) P_3 ताम् (for तान्). —c) D (before suggestion) दुःखे नोद°; C S′ P_1 दुःखेनादाय नस्तस्य; St $P_{2,3}$ I_3 दुःखेनोद° (for दुःखं नोदखनं-स्तस्य suggested with D).
1412. b) S′ नः; SA P_2 I_3 वः (for यः). —b) St C S′ P_2 °न्याद्यवि° (for °न्यादिवि°).
1414. a) P_2 °षस्यैव (for °षस्येव).
1415. d) P_2 कृतस्य (for न तस्य).
1416. a) St भयोऽपि (for भूयोऽपि). —c) S′ C P_1 I_3 तदात्त°; P_1 I_3 तदा तु (for उदात्त°).
1417. c) St जानेविशा° (for जाने विशा°).
1419. b) P_2 प्रयातारौ (for प्रयातारो). —d) S′ C P_3 तस्य (for तत्र).

किंतु दूये यदेषा भूर्भूत्वा कुलवधूरिव ।
मद्दोषाद्धट्टचेटीव प्राप्ता प्रसभभोग्यताम् ॥१४२०॥

इतः प्रभृति यः कश्चिद् राज्यस्याऽस्य गतौजसः ।
चक्रिकामात्रसाध्यत्वं जानन्नाशां करिष्यति ॥१४२१॥

अलौकिके कृते यद्यत् तद्वीक्ष्य फलवन्ध्यताम् ।
प्राप्तोदयैरल्पसत्त्वैर्दर्पान्नूनं हसिष्यते ॥१४२२॥

कार्यारम्भः फलोल्लासमालोक्य प्रायशो जनैः ।
अनानुगुण्यगणनां कुर्वाणैर्न विगर्ह्यते ॥१४२३॥

पक्षान्तकोऽरिरवलम्बनभूः सनेत्रं
दुग्धेन यस्य मरणं धियि कैरिवेत्थम् ।
पारं गते मथनकर्मणि मन्दराद्रे-
र्दोषोऽर्प्यते विगुणहेतुपरीक्षणेन ॥१४२४॥

शास्त्रसंदर्भवित्त्वेऽपि श्रीगर्भत्वमदर्शयम् ।
जनोपजीवनार्थं यत् तज्जातं जाड्यसिद्धये ॥१४२५॥

उच्चलेनाऽपि मत्कृत्ये हस्ताग्रोच्चेयचेतसा ।
दर्शितश्यामदशनं करिष्यन्ते विडम्बनाः ॥१४२६॥

ततोऽवमानान्न त्रासात् संप्राप्तोऽद्य विहस्तताम् ।
समर्थनेच्छुर्वाञ्छामि मृत्युमीदृशमप्यहम् ॥१४२७॥

स्वैरेव स हतो नोचेत् कस्तस्माद् वसुधां हरेत् ।
लब्धां रक्षितुमिच्छामि ख्यातिमेतेन हेतुना ॥१४२८॥

मुक्तापीडः पुरा राजा ज्वलित्वा मूर्ध्नि भूभुजाम् ।
कार्पण्यप्रणयं प्राप लब्धरन्ध्रो विरोधिभिः ॥१४२९॥

1420. c) D °षाद्धट° (for °षाद्धट्ट°).
1425. b) I_3 °दर्शनम् (for °दर्शयम्).
1426. a) All Mss. except D सत्कृत्ये (for मत्कृत्ये). —b) S′ C °ग्रोच्छ्य° (for °ग्रोच्चेय°).
1427. c) S′ C स मन्थ° (for समर्थ°).
1428. a) S′ C P_{1-3} महतो (for स हतो).
1429. a) C पीडा; S′ P_2 °पीडाः (for °पीडः). —c) S′ C °प्रलयं (for °प्रणयं).

स ह्युत्तरापथे नानापथस्थगितसैनिकः ।
मितानुगोऽहितै रुद्धमार्गोऽभूद् दुर्गमेऽध्वनि ॥१४३०॥

तं शल्यो नाम सामग्र्यवैरल्यविवशं नृपः ।
बन्द्धुं प्रतिज्ञामकरोद् वाजिलक्षैर्युतोऽष्टभिः ॥१४३१॥

स सामप्रमुखोपायापायध्यानावसन्नधीः ।
भवस्वाम्यभिधं कृत्यमपृच्छन्मुख्यमन्त्रिणम् ॥१४३२॥

असाध्यां सोऽपि निर्ध्याय विनिपातप्रतिक्रियाम् ।
न्याय्ये निश्चित्य नैयत्यं कर्तव्ये प्रत्युवाच तम् ॥१४३३॥

उपाययुक्तिप्रत्युक्ते कृत्ये कीर्त्यभिमानिनाम् ।
निस्संभ्रमैव प्रतिभा लोभेनाऽक्षोभिते हृदि ॥१४३४॥

कृत्यं कृत्यविदो लब्धप्रसिद्धिपरिरक्षणम् ।
साम्राज्योपार्जनमुखो व्यापारस्त्वानुषङ्गिकः ॥१४३५॥

गच्छच्छरीरविच्छेदादपि भस्मावशेषताम् ।
कर्पूरः सौरभेणेव जन्तुः ख्यात्याऽनुमीयते ॥१४३६॥

शान्तयोर्जीवितस्थानं द्वयमत्यद्भुतं द्वयोः ।
अनङ्गस्याऽङ्गनापाङ्गः स्तोतृजिह्वा यशस्विनः ॥१४३७॥

ख्यातिसंरक्षणं नाम जन्तोः कल्पान्तरस्थितिः ।
वर्तने कीर्तिकायस्य संपूर्णाः परमाणवः ॥१४३८॥

धीरैर्विधिश्च निर्ध्येयो विरोधिष्ववधानवान् ।
यस्तेषामुन्नतिधनध्वंसाय यततेऽन्वहम् ॥१४३९॥

1431. b) SA_2 °वैबल्य° (for °वैरल्य°). —c) C बद्धुं (for बन्द्धुं). —d) S′ C °क्षैर्वृतो°; P_2 °क्षैर्हतो° (for °क्षैर्युतो°).
1433. a) C S′ P_1 असाध्या (for असाध्यां). —c) All Mss. read न्याये (for न्याय्ये suggested with D).
1434. P_3 om. *ab*.
1435. a) P_2 °विदे (for °विदो). —b) P_1 °प्रसिद्ध° (for °प्रसिद्धि°).
1436. c) P_2 कर्पूरा: (for कर्पूरः).
1437. a) I_3 °विते स्था° (for °वितस्था°). —d) P_2 स्तोत्र° (for स्तोतृ°).
St यशास्वि° [sic] (for यशस्वि°).
1438. a) St ख्यात° (for ख्याति°). —b) D suggests °स्थितेः (for °स्थितिः).
1439. a) C S′ °रैर्विध° (for °रैर्विधि°).

तुङ्गावपातनहठव्यसनी विधाता
स्वोत्पत्तिपद्मकुलजेऽपि सरोजषण्डे ।
संकोचिनि द्विजपतावपि शुद्धिवन्ध्ये
मातङ्गहस्तपतनैः कुरुतेऽवमानम् ॥१४४०॥

ये हठापातिनो धातुर्धियं ख्यातिनिपातने ।
रक्षितुं समुपेक्षन्ते न तैः किं नाम रक्षितम् ॥१४४१॥

जातिः क्ष्माभृति वंशजाश्रयतया ख्यातिप्रतिष्ठामिमा-
मुद्दीप्याऽनलमुज्झितस्ववपुषः केऽप्यत्र वेत्राङ्कुराः ।
त्रातुं हन्त विदन्ति ये न विधिना क्रुद्धेन पृथ्वीभृतां
द्वारि द्वास्स्थकरैर्गतागतखलीकाराणि संप्रापिताः ॥१४४२॥

भोगान्निर्वाणभूयिष्ठानिष्टान् प्राप्तानवेत्य तत् ।
प्रतिष्ठासौष्ठवत्राणे संरब्धुं देव सांप्रतम् ॥१४४३॥

दण्डकालसकाख्यस्य तद्रोगस्याऽऽशुकारिणः ।
पार्थिवाकस्मिकोत्थानं मिषादद्य प्रकाश्यताम् ॥१४४४॥

श्वो वक्ताऽस्म्यथ कर्तव्यं व्यापत्प्रक्षपणक्षमम् ।
उक्त्वेति स महामात्यो निर्गत्य स्वगृहानगात् ॥१४४५॥

दण्डकालसकं दण्डधरो व्यञ्जन्मिषात् ततः ।
अधीर इव चक्रन्द लुठन् निस्स्पन्दलोचनः ॥१४४६॥

स्वेदसंवाहनस्नेहवमनाद्यैरुपक्रमैः ।
निश्शैथिल्यव्यथं तेन मुमूर्षुं तं जनोऽवदत् ॥१४४७॥

1440. d) P_2 °तेऽवसानम् (for °तेऽवमानम्).
1441. b) SA_1 (before corr.) D S′ C P_{1-3} I_3 धातुरियम् (for धातुर्धियम्). —d) St $P_{1,2}$ I_3 om. न here and indicate a *lacuna* of one syllable after नाम; C SR SL S′ P_2 add this न before रक्षितम् and SA om. this without *lacuna*.
1442. a) S′ तथा (for °तया). —c) S′ P_2 विशान्ति (for विदन्ति). D (before suggestion) St S′ C P_{1-3} I_3 °भृता; S′ °भृत्या (for °भृतां suggested with D).
1443.) b) D suggests °ष्ठान्निष्ठां (for °ष्ठानिष्टान्). P_1 तं (for तत्). —d) D (before suggestion) $P_{1,3}$ I_3 संरब्धं; S′ C संरोद्धुं; D suggests संरम्भो (for संरब्धुं).
1444. d) S′ $P_{1,2}$ °दन्यः (for °दद्य).

ततो निश्चितमृत्युत्वं पत्युः कथयता कृतः ।
वह्निप्रवेशोऽमात्येन कृतज्ञत्वनिवेदकः ॥१४४८॥

कर्तव्यशेषं दाक्षिण्यादनाचक्षाणमग्रतः ।
युक्त्योक्तनिष्ठुराचारमन्तस्तुष्टाव तं नृपः ॥१४४९॥

अप्रौढः सोढुमुद्दामां व्यथामस्मीति वादिना ।
राज्ञाप्यनलसाद्देहं ततश्चक्रेऽभिमानिना ॥१४५०॥

तेन प्राणानुपेक्ष्यैवमन्यख्यातेर्मनस्विना ।
ऊर्ध्वाधिरोहे सोपानं कृतं न निजकीर्तनात् ॥१४५१॥

एवं दैवोपनीतानामख्यातीनां चिकित्सितम् ।
स्वधियाऽमात्यबुद्ध्या वा पारमेति मनस्विनाम् ॥१४५२॥

इत्युक्त्वा विरतो वंशबीजरक्षार्थमात्मजः ।
भोजो विसृज्यतां कोटमेवमूचेऽथ मन्त्रिभिः ॥१४५३॥

तं राजपुत्रं प्रस्थानमङ्गलान्ते विनिर्गतम् ।
पुनर्व्यावर्तयामास दण्डनायकमोहितः ॥१४५४॥

सा धीः स साहसारम्भस्तदवैह्वल्यमापदि ।
नष्टमेकपदे तस्य नाशकाले ह्युपस्थिते ॥१४५५॥

लक्ष्मीतडिल्लता कीर्तिवलाका शौर्यगर्जितम् ।
प्रतापशक्रचापश्च भागधेयाम्बुदानुगम् ॥१४५६॥

धीशौर्यादिगुणेन भाग्यसमये प्रागेष एको नृपः
शक्रस्याऽऽक्रमणं क्रियेत न कुतोऽनेनेति संभाव्यते ।
मौग्ध्यं पङ्गुजडान्धवच्च स ततो गच्छन्नभाग्योदये
दत्तोऽनेन पदक्रमो भुवि कथं नामेति संचिन्त्यते ॥१४५७॥

1449. c) D युक्त्योक्ता°; P_2 युक्त्योर्था° (for युक्त्योक्त°). —d) S′ पुनः (for नृपः).
1451. c) I_3 भूत्वा° (for ऊर्ध्वा°).
1452. b) C S′ चिकीर्षितम् (for चिकित्सितम्).
1456. a) SA S′ P_2 °स्तडि° (for °तडि°). —c) All Mss. read °चापं च (for °चापश्च suggested with D).

विरोधिप्रतिरोधाय तन्त्रिसैन्यं विसर्जितम् ।
नगरस्थमपि क्षमापात् प्रवासधनमादधे ॥१४५८॥

दायादाश्रयणं राजभृत्याः सर्वेऽपि चक्रिरे ।
ये केचित्त्ववसन् गेहे ते देहैरेव केवलम् ॥१४५९॥

पराश्रयपरं द्वित्रा न संकल्पमपि व्यधुः ।
किं वा स्तुतैस्तैर्ये स्त्रीवदमुञ्चन्नचिरादसून् ॥१४६०॥

यां काणश्रावतीनर्तक्यन्वये काऽपि नर्तकी ।
पुत्रीचक्रे काऽपि जातां जयमत्यभिधाऽथ सा ॥१४६१॥

भूत्वा गृहीतकौमारा तरुण्युच्चलरागिणी ।
धनलुब्धाऽवरुद्धात्वमभजन् मण्डलेशितुः ॥१४६२॥

तस्मिन् हते तदैवाऽस्तापत्रपोच्चलमाययौ ।
तयैव दैवयोगेन पट्टदेव्या भविष्यते ॥१४६३॥

आबद्धपङ्क्तयश्चर्चामुच्चलाश्रयिणीं व्यधुः ।
भूपालदर्शनेऽप्यस्तभीतयो राजसेवकाः ॥१४६४॥

वेतनस्वीकृतैः सर्वैः शिक्षाधायी पुरस्कृतः ।
लोभावमानावुद्बोध्य योधश्रद्धां हरन् युधि ॥१४६५॥

मन्दप्रतापतावाप्तो नर्मोक्त्या मर्मभेदकृत् ।
आहारादिक्षणे कर्ता प्रक्रियार्थनया कलेः ॥१४६६॥

अतीव प्रभुदानादिमाहात्म्याख्यानकोविदः ।
एक एकोऽकरोद् योधः पृतनानां विसूत्रणम् ॥१४६७॥

1458. a) P_{1-3} I_3 S′ C D °प्रतिबोधाय (for °प्रतिरोधाय). —d) D suggests °माददे (for °मादधे).
1460. d) S′ SA $P_{1,2}$ I_3 °मुञ्चदचि° (for °मुञ्चन्नचि°).
1463. c) P_2 देव° (for दैव°). After this *v.* तिलकम् .
1465. b) P_3 °स्कृताः (for °स्कृतः).
1466. a) D P_3 °वाप्तौ (for °वाप्तो). —b) I_3 °भेदवत् (°भेदकृत्).
1467. After this *v.* युग्मम् .

श्रीलेखाभ्रातृसूनोर्यस्तनयो व्यड्डमल्लः ।
मल्लज्ञातीयकोपेन स राज्ञाऽऽस्कन्द्य घातितः ॥१४६८॥

मातुलस्याऽऽत्मजा मल्लापत्ययोस्तस्य गेहिनी ।
श्वश्र्वा समं स्ववसतीरादीप्य दहने मृता ॥१४६९॥

मौनव्रतादिनियमच्छन्नक्रौर्योऽन्तकोपमः ।
करोत्यभ्यन्तरान् भिन्नान् मल्लः परमदाम्भिकः ॥१४७०॥

तदेष पुत्रराज्येच्छुर्वध्यतां निर्भयं रिपुः ।
शाहिपुत्रीभिरित्यूचे तस्मिन्नवसरे नृपः ॥१४७१॥

स्वयं प्रादात् समास्कन्दं द्वारि स्थितवतः पुरः ।
तस्य प्राणार्थिनो वाञ्छापूर्त्यै मल्लश्च निर्ययौ ॥१४७२॥

स हि द्वैराज्यसज्जाभ्यां पुत्राभ्यां प्रार्थितोऽपि सन् ।
मुनिव्रतः सदाचारानुरोधान्नाऽत्यजन् नृपम् ॥१४७३॥

विश्वासाय परं राज्ञो भ्रातॄन् राज्ञोर्भविष्यतोः ।
द्वैमातुरान् सह्लणादीन् नीवीं दत्त्वाऽवसद् गृहे ॥१४७४॥

आसेदुषे मुनिदशामाजन्मप्रीणिताग्नये ।
तदा स तस्मै चुक्रोध प्रत्यासन्नवधो नृपः ॥१४७५॥

स सुराभ्यर्चनं कुर्वन् आहूतः परिपन्थिभिः ।
रेजे तेनैव वेषेण समराय विनिर्गतः ॥१४७६॥

उपवीत्यक्षसूत्राङ्कपाणिर्दर्भोज्ज्वलाङ्गुलिः ।
भस्मस्मेरललाटाङ्को जामदग्न्य इवाऽपरः ॥१४७७॥

स्नानार्द्रधवलश्यामलोलधम्मिललीलया ।
देहत्यागे प्रयागाम्बु धारयन्निव मूर्धनि ॥१४७८॥

1468. c) C $P_{1,2}$ मल्लजा°; P_3 मर्मजा°; St emends in corrigenda °ज्ञातेय° (for मल्लज्ञातीय°).
1469. b) S′ गेहिनीं (for गेहिनी).
1471. b) SA °र्वध्यतां (for °र्वध्यतां).
1473. a) S′ $P_{2,3}$ °संज्ञा° (for °सज्जा°).
1474. d) St P_2 I_3 नीविं (for नीवीं).
1478. b) St emends °धम्मिल्ल°; I_3 °धाम्मिल°; $P_{1,2}$ °धस्मिल° (for °धम्मिल°). P_3 °लोलया (for °लीलया).

उष्णीषी वीरपट्टेन खेटकेनोष्णवारणी ।
सोऽसिधारातीर्थपान्थो दण्डी खड्गेन दिद्युते ॥१४७९॥

भोगे पुरस्कृताः केचित् तद्भृत्याः पूर्वनिर्गताः ।
अमर्त्यनारीभोगेऽपि तस्याऽऽसन्नग्रभागिनः ॥१४८०॥

द्वौ रय्यावट्टविजयौ द्विजौ पौरोगवस्तथा ।
कोष्ठकः सज्जकाख्यश्च योधा युद्धे हता बभुः ॥१४८१॥

क्षतोऽप्युदयराजाख्यः क्षत्ताऽऽयुश्शेषसत्तया ।
प्राणैर्नियोगभागाजौ नाऽज्जकोऽपि व्ययुज्यत ॥१४८२॥

विरोधियोधैर्नीरन्ध्रं द्वारमालोक्य सर्वतः ।
त्यक्तकम्पो ददौ झम्पां स तेषामेव मूर्धनि ॥१४८३॥

शैवलेष्विव खड्गेषु खेटकेष्वम्बुजेष्विव ।
जरसा धवलो भ्राम्यन् राजहंस इवाऽऽबभौ ॥१४८४॥

क्षणाच्च ददृशे शातशरशङ्कुशताचितः ।
प्रवीरो वीरशयने सुतो भीष्म इवाऽपरः ॥१४८५॥

शोच्यं गतायुषो राज्ञः किं नाऽभूत् तस्य तादृशः ।
चिच्छेद यः शिरः पृष्ठे हयं च भ्रमयन् स्मयात् ॥१४८६॥

राज्ञी कुमुदलेखाख्या मल्लस्याला च वल्लभा ।
गृहेष्वजुहुतां वीतिहोत्रे गात्राणि संभृते ॥१४८७॥

1481. b) P_3 पार°; D $P_{1,2}$ पौर° (for पौरो°). S' °गवा° (for °गव°). —c) S' $P_{1,2}$ I_3 कोष्ट° (for कोष्ठ°). —d) St योद्धा (for योधा).
1482. b) SA S' $P_{1,2}$ I_3 क्षता° (for क्षत्ता°).
1483. c) All Mss. except St read °कार्यो (for °कम्पो).
1484. a) St P_{1-3} I_3 शेव° (for शैव°).
1485. a) P_3 I_3 °णाञ्च (°णाच्च).
1486. c) P_2 या (for यः). S' $P_{1,2}$ I_3 पृष्टे [sic] (for पृष्ठे).
1487. a) S' I_3 कुसुम° (for कुमुद°). —c) S' °जुह्वां; C D P_1 °जुहतां; P_2 °जहुतां (for °जुहुतां).

राजाऽवकल्ययोः पत्न्यौ बाले सल्हणरह्वयोः ।
स्नुषे मल्लस्याऽऽसमती सहजा चाऽग्निसाद्गते ॥१४८८॥

सर्वोपभोगभागिन्यस्तदन्तःपुरयोषिताम् ।
परिवाराङ्गना वह्नौ षट् चाऽत्रैव विपेदिरे ॥१४८९॥

महागृहाग्नितापेन शोकोष्णैश्च जनाश्रुभिः ।
तप्ताम्भसो वितस्तायास्तीरे वामे बभूव तत् ॥१४९०॥

प्रवर्धितायाः स्तन्येन द्रष्टुमक्षमया पयः ।
दास्यमानं निवापेषु पुत्र्याश्चान्द्रयाख्यया समम् ॥१४९१॥

धात्र्या परस्मिन् वै तस्मिंस्तीरे स्वान्तःपुरे स्थिता ।
माता भविष्यतो राज्ञोर्नन्दाऽनिन्द्यकुलोद्भवा ॥१४९२॥

महानसाग्निधूमेन संलक्ष्या वीक्ष्य पुत्रयोः ।
सोत्कण्ठं कटकौ सौधादुदग्दक्षिणदिक्स्थयोः ॥१४९३॥

क्रियतां दिवसैरेव पुत्रौ शत्रोः पितृद्विषः ।
जामदग्न्यायितं वंशे शप्त्वेति नृपतिं सती ॥१४९४॥

अनिषण्णेव दीप्ताग्नौ गृहे स्वं निरदाहयत् ।
प्रनृत्यन्तीभिरालीभिरिव ज्वालाभिरावृता ॥१४९५॥

वधे दर्शनपालस्तु नृपे प्राप्ते प्रतिक्षणम् ।
अत्यद्भुतैरन्तरायैरायुश्शेषेण रक्षितः ॥१४९६॥

वर्षमात्रावशेषायुर्यद्वा द्रोहेण रक्षितः ।
सोऽवमानस्य पूयस्य रोगजस्य च भुक्तये ॥१४९७॥

1488. a) D C S′ $P_{1,2}$ I_3 °कल्प° (for °कल्य°). —b) I_3 णह° (for सल्ह°).
—c) S′ °मसती; $P_{1,2}$ °ससती (for °समती).
1490. b) St I_3 जलास्नु°; S′ जलास्नु° [sic]; P_1 जलाश्रु°; P_2 जानाश्र° [sic]; P_3 जर्णाश्रु° [sic] (for जनाश्रु°).
1491. d) D C P_3 °इचन्द्रा° (for °इचान्द्रया°).
1492. d) SA राज्ञो नन्दा° (for राज्ञोर्नन्दा°).
1493. b) संलक्ष्यौ is suggested (for संलक्ष्या found in all Mss.).
—c) P_{1-3} I_3 कटको (for कटकौ).
1494. b) P_3 पित्रौ (for पुत्रौ).
1496. a) C S′ वधं (for वधे).

कृष्णभाद्रनवम्यां तं वधं श्रुतवतोः पितुः ।
मल्लात्मजन्मनोः शोकः कोपेन निरपीयत ॥१४९८॥

आवह्निपुरकग्रामान् प्रज्वलन् क्रोधवह्निना ।
अधावद् विजयक्षेत्रं सोऽन्येद्युरथ सुस्सलः ॥१४९९॥

योद्धुमभ्यापतन्तं तं चन्द्रराजोऽथ निर्गतः ।
पट्टदर्शनपालाद्यैः ससैन्यैः पर्यवर्ज्यत ॥१५००॥

निजैरुपेक्षितश्चक्रे स चिरं तत्र दुष्करम् ।
स्वल्पसैन्योऽपि संग्रामं भूरिसैन्येन शत्रुणा ॥१५०१॥

अक्षोटमल्लः समरे तत्र मल्लश्च चाचरिः ।
अगातां राजगृह्यौ द्वौ स्वर्गस्त्रीभोगभागिताम् ॥१५०२॥

रजोन्धकारे छत्रेन्दुद्योतिन्यालिङ्गितो हतः ।
चन्द्रराजः सुरस्त्रीभिरिन्दुराजोऽस्य चाऽनुगः ॥१५०३॥

तस्मिन्नपि हते वीरे चक्रे हर्षमहीभुजः ।
आशारविन्दिनीमूलकन्दनिर्दलनं विधिः ॥१५०४॥

पट्टाद्यः प्रविश्याऽथ विजयेशाङ्गनं भयात् ।
प्रविष्टे सुस्सले देशं द्वारं दत्तार्गलं व्यधुः ॥१५०५॥

आस्थानीयः परं पद्मनामा युद्ध्वा हतो बहिः ।
लक्ष्मीधरो मर्तुमिच्छुर्बद्ध्वा नीतः स डामरैः ॥१५०६॥

विजयेश्वरगञ्जाग्रसौधारूढोऽथ सुस्सलः ।
अधो ददर्श तान् सर्वान् पशूनिव भयाकुलान् ॥१५०७॥

1498. a) S′ $P_{2,3}$ I_3 °भ्राद्र° [sic] (for °भाद्र°). —d) S′ °धीयत (for °पीयत).
1499. a) D suggests अवन्तिपुरकग्रामात् (for आवह्निपुरकग्रामान्).
1500. a) D C S′ SA $P_{1,2}$ I_3 °मस्याप° (for °मभ्याप°). —d) S′ °र्य्यवर्य्यत (for °र्यवर्ज्यत).
1503. d) SA_1 (before corr.) °भिर्नन्द्रराजो° (for °भिरिन्दुराजो°). SA_1 (before corr.) चात्मजः (for चाऽनुगः).
1505. b) S′ P_3 विटवे°; P_1 विटये° (for विजये°). —c) P_2 मुस्स°; P_3 सुस्सु°; I_3 स्वःस° (for सुस्स°). P_2 देशे (for देशं).
1507. a) S′ °गजा° (for °गञ्जा°).

धूर्तः स दत्तमध्यस्थो हसन्नानीतवान् पुनः ।
पट्टदर्शनपालौ द्वौ तेषां पूर्वं निजान्तिकम् ॥१५०८॥

निश्श्रेण्यभावादारोढुमक्षमौ सुस्सलानुगैः ।
तौ मृताविव निर्बद्धपाणी रज्ज्वाधिरोपितौ ॥१५०९॥

तयोर्विदेशगमनं व्रीडादर्थयमानयोः ।
प्रतिश्रुत्याऽकरोत् धीमान् सुस्सलो म्लानिमार्जनम् ॥१५१०॥

स्निग्धोक्त्या भृष्टमांसादिभोगैस्तस्याऽग्रतस्तयोः ।
तस्मिन्नेवाऽह्नि मन्दत्वं विदेशौत्सुक्यमाययौ ॥१५११॥

केनाऽप्यधिष्ठितश्चक्रे परेद्युर्यत् स सुस्सलः ।
जाने विश्वसृजोऽप्यङ्गं रोमाञ्चयति तत्स्मृतिः ॥१५१२॥

जासटो नृपतिर्हर्षभूभर्तुर्मातुलात्मजः ।
उमाधरमुखाश्चाऽन्ये राजानो यत्र च त्रयः ॥१५१३॥

राजपुत्रहयारोहतन्त्रिसामन्तसंततेः ।
न यत्र गणना काचित् सैन्येष्वष्टादशस्वभूत् ॥१५१४॥

विजयेशाङ्गनस्थानां द्वारमुत्पाट्य सोऽविशत् ।
एकाक्येवाऽन्तरं तेषां सासिराक्षेपरूक्षवाक् ॥१५१५॥

स तत्र साक्षिणं कृत्वा क्षमावान् विजयेश्वरम् ।
प्रतिश्रुत्याऽभयं तेभ्यः प्रणतेभ्यो विनिर्ययौ ॥१५१६॥

पुनः सौधाग्रमारूढस्तान् सर्वानर्पितायुधान् ।
रज्जुबद्धकरान् भृत्यैरानिनाय ततोऽन्तिकम् ॥१५१७॥

1509. b) $P_{2,3}$ I_3 °क्षमो (for °क्षमौ).
1510. b) All Mss. read °र्थायमा° (for °र्थयमा° suggested).
1512. c) St $P_{2,3}$ I_3 °प्यङ्ग°; P_1 °प्यङ्गा° (for °प्यङ्गं°).
1513. a) I_3 जामटो (for जासटो).
1514. c) S′ °णनाः काश्चि° (for °णना काचि°).
1515. b) I_3 °विशेत् (for °विशत्). —c) P_2 I_3 एकाथ्यें° (for एकाक्ये°).

कृष्णभाद्रनवम्यां तं वधं श्रुतवतोः पितुः ।
मल्लात्मजन्मनोः शोकः कोपेन निरपीयत ॥१४९८॥

आवह्निपुरकग्रामान् प्रज्वलन् क्रोधवह्निना ।
अधावद् विजयक्षेत्रं सोऽन्येद्युरथ सुस्सलः ॥१४९९॥

योद्धुमभ्यापतन्तं तं चन्द्रराजोऽथ निर्गतः ।
पट्टदर्शनपालाद्यैः ससैन्यैः पर्यवर्ज्यत ॥१५००॥

निजैरुपेक्षितश्चक्रे स चिरं तत्र दुष्करम् ।
स्वल्पसैन्योऽपि संग्रामं भूरिसैन्येन शत्रुणा ॥१५०१॥

अक्षोटमल्लः समरे तत्र मल्लश्च चाचरिः ।
अगातां राजगृह्यौ द्वौ स्वर्गस्त्रीभोगभागिताम् ॥१५०२॥

रजोन्धकारे छत्रेन्दुद्योतिन्यालिङ्गितो हतः ।
चन्द्रराजः सुरस्त्रीभिरिन्दुराजोऽस्य चाऽनुगः ॥१५०३॥

तस्मिन्नपि हते वीरे चक्रे हर्षमहीभुजः ।
आशारविन्दिनीमूलकन्दनिर्दलनं विधिः ॥१५०४॥

पट्टादयः प्रविश्याऽथ विजयेशाङ्गनं भयात् ।
प्रविष्टे सुस्सले देशं द्वारं दत्तार्गलं व्यधुः ॥१५०५॥

आस्थानीयः परं पद्मनामा युद्ध्वा हतो बहिः ।
लक्ष्मीधरो मर्तुमिच्छुर्बद्ध्वा नीतः स डामरैः ॥१५०६॥

विजयेश्वरगञ्जाग्रसौधारूढोऽथ सुस्सलः ।
अधो ददर्श तान् सर्वान् पशूनिव भयाकुलान् ॥१५०७॥

1498. a) S′ $P_{2,3}$ I_3 °भ्राद्र° [sic] (for °भाद्र°). —d) S′ °धीयत (for °पीयत).
1499. a) D suggests अवन्तिपुरकग्रामात् (for आवह्निपुरकग्रामान्).
1500. a) D C S′ SA $P_{1,2}$ I_3 °मस्याप° (for °मभ्याप°). —d) S′ °र्य्यवर्य्यत (for °र्यवर्ज्यत).
1503. d) SA_1 (before corr.) °भिर्नन्द्रराजो° (for °भिरिन्दुराजो°). SA_1 (before corr.) चात्मजः (for चाऽनुगः).
1505. b) S′ P_3 विटवे°; P_1 विटये° (for विजये°). —c) P_2 मुस्स°; P_3 सुस्सु°; I_3 स्वःस° (for सुस्स°). P_2 देशे (for देशं).
1507. a) S′ °गजा° (for °गञ्जा°).

[illegible] जहा ॥१५४७॥

[illegible] डामरान् ।

[illegible] व ॥१५४८॥

[illegible] वपुर्बभौ ।

[illegible] तमोन्तरे ॥१५४९॥

[illegible] ५५०॥

[illegible] ॥१५५२॥

[illegible] को).

1509. b) P_{2a} I_8 [illegible] (for [illegible]).
1510. b) All [illegible] (for [illegible]).
1512. c) [illegible] (for [illegible]).
1513. c) I_3 I_8 °व्यङ्ग° ; P_1 °[illegible]° (for °[illegible]° suggested).
1514. c) S' °[illegible]° (for जामदो[illegible]) ; [illegible] (for [illegible]).
1515. b) I_8 °[illegible]° (for [illegible]).

स्वर्णरूप्यत्सरुश्रेणिपूर्णायुधपरिष्कृता ।
कीर्णपुष्पोपकारेव सुस्सलास्थानभूरभूत् ॥१५१८॥

विन्यस्य पशुपालानां पशूनिव स तान् करे ।
संरक्षितुं डामराणां त्र्यहं तत्राऽकरोत् स्थितिम् ॥१५१९॥

ततः सुवर्णसानूरग्रामं संप्राप्य बन्धनात् ।
पट्टदर्शनपालौ द्वावौज्झीद् देशान्तरोन्मुखौ ॥१५२०॥

पट्टः शूरपुरं प्राप्तो भार्ययाऽऽगतया गृहात् ।
संसृज्यमानो व्यस्मार्षीदल्पसत्त्वो दिगन्तरम् ॥१५२१॥

यावन्मात्राऽप्यौचिती सा विदेशौन्मुख्यलक्षणा ।
द्रोरधुर्दर्शनपालस्य पट्टमैत्र्या विसूत्रिता ॥१५२२॥

अहंपूर्विकया राज्यं जिघृक्षुरथ सुस्सलः ।
नगरासादनादैच्छदभिसंधातुमग्रजम् ॥१५२३॥

समानप्रायवयसोः सर्वदोद्दामयोरभूत् ।
यस्माज्ज्येष्ठकनिष्ठत्वं प्रक्रियारहितं तयोः ॥१५२४॥

द्वित्रेष्वहस्सु यातेषु क्रामंस्तां तां भुवं बली ।
उदतिष्ठद् राजधान्याः सविधादेव सुस्सलः ॥१५२५॥

निर्दग्धुं कलशाख्यं तत्प्रस्तुतं भूपतेः सुतः ।
बुप्पापराभिधो भोजदेवो योद्धुं विनिर्ययौ ॥१५२६॥

1518. a) SA °रूप्य° (for °रूप्य°). —c) °ष्पोपहारेव is suggested (for °ष्पोपकारेव found in all Mss.).
1519. b) P_1 सुतान् (for स तान्). —c) S' °क्षितं; P_2 °क्षतुं [sic] (for °क्षितुं).
1520. a) S' P_2 °स्वव (for सुव°). —b) St स प्राप्य (for संप्राप्य). —c) D P_1 °र्शनापालौ; P_2 C °र्शनपालो (for °र्शनपालौ).
1521. c) All Mss. read संसृष्ट° (for संसृज्य° suggested with D). All Mss. read °व्यसार्षी° (for °व्यसार्षी° suggested with St Tr.).
1524. a) S' P_{1-3} °प्रिय° (for °प्राय°). P_{1-3} I_3 SA °वयसो (for °वयसोः). —c) S' कसा° (for यसा°).
1526. a) P_{1-3} °दग्धं (for °दग्धुं). —ab) After कलशा all Mss. except I_3 (°शाः तत्तत्प्र°) and C om. one syllable (for कलशाख्यं तत्प्र° emended with C). —c) S' D P_{1-3} C I_3 बुप्पा° (for बुप्पा°).

आत्मवच्छङ्कमानेन कुमाराणां प्रदुष्टताम् ।
यो भाव्यर्थबलात् पित्रा हतौजा विदधे सदा ॥१५२७॥

कृतो गत्यन्तराभावात् तदानीं तु निरङ्कुशः ।
केषु केषु न युद्धेषु योधानामग्रणीरभूत् ॥१५२८॥

प्रपितामहतुल्यः स स्याच्चेत् प्रागेव वर्धितः ।
कुर्यादुत्साहसंपन्नो निर्दायादा न किं दिशः ॥१५२९॥

नाऽनीतिविन्नाम कश्चित् प्रयोगस्तु विहीयते ।
अस्त्रविल्लभ्यते सर्वो विषयज्ञस्तु दुर्लभः ॥१५३०॥

स राजसूनुरुद्दामविक्रमस्य रिपोरभूत् ।
अत्युद्दामोऽधिकं जातस्तिमेरिव तिमिंगिलः ॥१५३१॥

कृतघ्नभावं पितरि प्रपन्ने
विगर्हणां नाऽर्हति तत्प्रसूतिः ।
कल्कीभवेच्चेत् तिलमुज्झ्यते किं
तैलेन दत्तः कुसुमाधिवासः ॥१५३२॥

देवेश्वरात्मजः पित्थः पार्थिवेनाऽधिगौरवम् ।
वर्धितोऽप्यभजत् पापः प्रतिपक्षसमाश्रयम् ॥१५३३॥

ततस्तदात्मजो मिल्लः प्रस्तुते सुस्सलाहवे ।
नृपेणाऽर्थयमानोऽश्वं खेदात् सावज्ञमीक्षितः ॥१५३४॥

1529. b) $P_{2,3}$ I_3 स्याश्चे° (for स्याच्चे°). —d) P_{1-3} I_3 निन्दा° (for निर्दा°).
1530. c) D $P_{1,3}$ I_3 अस्त्य°; C S′ अस्त्व°; P_2 अस्थ्य° (for अस्त्र°).
1531. cd) SA $P_{1,2}$ I_3 जाता ति° (for जातस्ति°).
1532. c) SA (after corr.) D C S′ P_{1-3} शल्की°; SA (before corr.) I_3 शङ्की° (for कल्की°).
1533. a) I_3 हवैदु° (for देवेश्व°). P_1 पिथः; P_2 पिर्थाः (for पित्थः).
1534. a) C S′ मल्लः; P_3 सिल्लः (for मिल्लः). —b) All Mss. read प्रास्थिते (for प्रस्तुते suggested with D). —c) All Mss. read °णार्थाय° (for °णाऽर्थय° suggested) D C P_1 °मानोध्व°; S′ °मानश्च (for °मानाऽश्वं).

क्षास्यस्यद्यान्तरं राजन् ममेत्युक्त्वा विनिर्गतः ।
खड्गधाराजलैर्मानी म्लानिमक्षालयद् रणे ॥१५३५॥
सर्वनाशादभूद् दुःखं तथा न हृदि भूपतेः ।
तदन्तरापरिज्ञानात् कृतज्ञस्य यथाऽधिकम् ॥१५३६॥
विभवैर्नित्यसंमूढा जानते त्वन्तरं नृपाः ।
तदा शक्या यदा तेषां प्रलापैरेव सत्क्रिया ॥१५३७॥
भोजेन निर्जितानीको विद्रुतः सुस्सलो रणात् ।
लवणोत्सं पलाय्याऽगाद् द्विर्दर्शितगतागतः ॥१५३८॥
प्रत्यावृत्तस्ततो भोजस्तीव्रातपकदर्थितः ।
उद्यानान्तस्तनुं तल्पे पित्रा सह मुहुर्जहौ ॥१५३९॥
अथोत्तरेणोदतिष्ठन्नादः पारान्नृपौकसः ।
ज्यायान् मल्लात्मजः प्राप्तः सेतुराच्छिद्यतामिति ॥१५४०॥
सुस्सलेन हृतं राज्यं नाऽद्याऽऽयासि द्रुतं यदि ।
स दण्डनायकेनाऽभूत् संदिष्ट इति पापिना ॥१५४१॥
अतो जवने चाऽविक्षत् प्रथमं चाऽवधीन्मृधे ।
नरेन्द्रेश्वरदेवाग्रवर्तिनं देवनायकम् ॥१५४२॥
अथोज्जगाम स्थामस्थः सह व्यूहेन सादिनाम् ।
नगराधिकृतो नागस्तस्याऽग्राद् भूरिसैनिकः ॥१५४३॥
यत्राऽऽस्थां पार्थिवोऽबध्नात् प्रधानपृतनान्विते ।
बभार नोच्चलाशङ्कां सुस्सलाहवनिर्गतः ॥१५४४॥
अल्पसैन्यो मल्लसूनुर्यावत् तस्मादशङ्कत ।
अपनीतशिरस्त्राणस्तावत् स तमवन्दत ॥१५४५॥

1535. c) S' °र्मानी; P_2 °र्मौनो (for °र्मानी).
1536. c) $P_{1,3}$ °न्तरात्प°; P_2 °न्तरप° (for °न्तराप°).
1537. c) P_1 शक्तया (for शक्या). —d) I_3 प्रलयै° (for प्रलापै°).
1544. c) $P_{2,3}$ I_3 नोश्च° (for नोच्च°).
1545. a) P_1 I_3 °दैत्यो (for °सैन्यो).

मण्डलेश्वरवत् तं स प्रियं शत्रोरविश्वसन् ।
ऊचे स्ववेश्म याहीति स च पापस्तथाऽकरोत् ॥१५४६॥

तस्य द्रोहफलं दृष्टमेतस्मिन्नेव जन्मनि ।
मण्डले यदनन्यस्मिन् भिक्षित्वा जीवितं जहौ ॥१५४७॥

ततो राजा सरित्तीरं प्रातः प्रैक्षत डामरान् ।
सेत्वग्रे श्यामविकृतान् दावदग्धान् द्रुमानिव ॥१५४८॥

बलक्षवारबाणस्य तेषां मध्ये वपुर्बभौ ।
परं जनकचन्द्रस्य शुक्रस्येव तमोन्तरे ॥१५४९॥

महासेतुः स घटितो राज्ञा नौभिः स्वसिद्धये ।
पर्यवस्यद् विधिवशाच्छत्रूणां सिद्धये पुनः ॥१५५०॥

अथाऽऽरुरुहुरादाय वह्निं हर्म्यचतुष्किकाम् ।
शतद्वारे मर्तुकामा देव्यः शाहिसुतादिकाः ॥१५५१॥

लोको विरक्तः सेत्वग्रे दायादैः सह संगरम् ।
ददर्शाऽश्वयुजीगालिमिव निर्विक्रियः प्रभोः ॥१५५२॥

विजये सावशेषेऽसौ वह्निदानोद्यताः प्रियाः ।
अनिशं वारयन् राजा सेत्वग्रे रणमग्रहीत् ॥१५५३॥

अथ विन्यस्तवर्माणं राजसेनागजं शरैः ।
सेतोर्जनकचन्द्राद्याः प्रमुखस्थमताडयन् ॥१५५४॥

स विद्धो मर्मसु शरैः पूत्कारोद्गारकृद्गजः ।
स्वचमूमेव चरणैरमृद्नाद् विमुखीकृतः ॥१५५५॥

1546. b) P_2 °रिव श्व° (for °रविश्व°).
1547. a) P_2 °बलं (for °फलं). —d) S′ $P_{1,3}$ C °क्षित्वं (for °क्षित्वा).
1550. c) S′ St C $P_{2,3}$ °वस्यन् (for °वस्यत्).
1551. d) S′ P_2 C देव्याः (for देव्यः).
1552. a) D (before suggestion) C S′ P_{1-3} I_3 लोके (for लोको). —c) D St C $P_{1,3}$ I_3 °जीलागि°; P_2 °जीलौगि°; S′ °जीनाग्नि° (for °जीगालि° found in SL).
1553. a) D (before suggestion) C S′ P_{1-3} I_3 SA °वशेषो° (for °वशेषे°). —b) P_2 क्रियाः (for प्रियाः).
1554. d) P_2 °खास्य° (for °खस्थ°). P_2 °डयत् (for °डयन्).
1555. b) S′ C पुत्का° (for पूत्का°). —d) S′ P_1 मृद्रा; P_2 °मूद्रा° (for °मृद्रा°).

क्षास्यस्यद्यान्तरं राजन् ममेत्युक्त्वा विनिर्गतः ।
खड्गधाराजलैर्मानी म्लानिमक्षालयद् रणे ॥१५३५॥

सर्वनाशादभूद् दुःखं तथा न हृदि भूपतेः ।
तदन्तरापरिज्ञानात् कृतज्ञस्य यथाऽधिकम् ॥१५३६॥

विभवैर्नित्यसंमूढा जानते त्वन्तरं नृपाः ।
तदा शक्या यदा तेषां प्रलापैरेव सत्क्रिया ॥१५३७॥

भोजेन निर्जितानीको विद्रुतः सुस्सलो रणात् ।
लवणोत्सं पलाय्याऽगाद् द्विर्दर्शितगतागतः ॥१५३८॥

प्रत्यावृत्तस्ततो भोजस्तीव्रातपकदर्थितः ।
उद्यानान्तस्तनुं तल्पे पित्रा सह मुहुर्जहौ ॥१५३९॥

अथोत्तरेणोदतिष्ठन्नादः पारान्नृपौकसः ।
ज्यायान् मल्लात्मजः प्राप्तः सेतुराच्छिद्यतामिति ॥१५४०॥

सुस्सलेन हृतं राज्यं नाऽद्याऽऽयासि द्रुतं यदि ।
स दण्डनायकेनाऽभूत् संदिष्ट इति पापिना ॥१५४१॥

अतो जवने चाऽविक्षत् प्रथमं चाऽवधीन्मृधे ।
नरेन्द्रेश्वरदेवाग्रवर्तिनं देवनायकम् ॥१५४२॥

अथोज्जगाम स्थामस्थः सह व्यूहेन सादिनाम् ।
नगराधिकृतो नागस्तस्याऽग्राद् भूरिसैनिकः ॥१५४३॥

यत्राऽऽस्थां पार्थिवोऽबध्नात् प्रधानपृतनान्विते ।
बभार नोच्चलाशङ्कां सुस्सलाहवनिर्गतः ॥१५४४॥

अल्पसैन्यो मल्लसूनुर्यावत् तस्मादशङ्कत ।
अपनीतशिरस्त्राणस्तावत् स तमवन्दत ॥१५४५॥

1535. c) S' °र्मानी; P_2 °र्मौनो (for °र्मानी).
1536. c) $P_{1,3}$ °न्तरात्प°; P_2 °न्तरप° (for °न्तराप°).
1537. c) P_1 शक्तया (for शक्या). —d) I_3 प्रलयै° (for प्रलापै°).
1544. c) $P_{2,3}$ I_3 नोश्च° (for नोच्च°).
1545. a) P_1 I_3 °दैत्यो (for °सैन्यो).

मण्डलेश्वरवत् तं स प्रियं शत्रोरविश्वसन् ।
ऊचे स्ववेश्म याहीति स च पापस्तथाऽकरोत् ॥१५४६॥

तस्य द्रोहफलं दृष्टमेतस्मिन्नेव जन्मनि ।
मण्डले यदनन्यस्मिन् भिक्षित्वा जीवितं जहौ ॥१५४७॥

ततो राजा सरित्तीरं प्रातः प्रैक्षत डामरान् ।
सेत्वग्रे श्यामविकृतान् दावदग्धान् द्रुमानिव ॥१५४८॥

बलक्षवारबाणस्य तेषां मध्ये वपुर्बभौ ।
परं जनकचन्द्रस्य शुक्रस्येव तमोन्तरे ॥१५४९॥

महासेतुः स घटितो राज्ञा नौभिः स्वसिद्धये ।
पर्यवस्यद् विधिवशाच्छत्रूणां सिद्धये पुनः ॥१५५०॥

अथाऽऽरुरुहुरादाय वह्निं हर्म्यचतुष्किकाम् ।
शतद्वारे मर्तुकामा देव्यः शाहिसुतादिकाः ॥१५५१॥

लोको विरक्तः सेत्वग्रे दायादैः सह संगरम् ।
ददर्शाऽश्वयुजीगालिमिव निर्विक्रियः प्रभोः ॥१५५२॥

विजये सावशेषेऽसौ वह्निदानोद्यताः प्रियाः ।
अनिशं वारयन् राजा सेत्वग्रे रणमग्रहीत् ॥१५५३॥

अथ विन्यस्तवर्माणं राजसेनागजं शरैः ।
सेतोर्जनकचन्द्राद्याः प्रमुखस्थमताडयन् ॥१५५४॥

स विद्धो मर्मसु शरैः पूत्कारोद्गारकृद्गजः ।
स्वचमूमेव चरणैरमृद्नाद् विमुखीकृतः ॥१५५५॥

1546. b) P_2 °रिव श्व° (for °रविश्व°).
1547. a) P_2 °बलं (for °फलं). —d) S′ $P_{1,3}$ C °क्षित्वं (for °क्षित्वा).
1550. c) S′ St C $P_{2,3}$ °वस्यन् (for °वस्यत्).
1551. d) S′ P_2 C देव्याः (for देव्यः).
1552. a) D (before suggestion) C S′ P_{1-3} I_3 लोके (for लोको). —c) D St C $P_{1,3}$ I_3 °जीलागि°; P_2 °जीलौगि°; S′ °जीनाग्नि° (for °जीगालि° found in SL).
1553. a) D (before suggestion) C S′ P_{1-3} I_3 SA °वशेषो° (for °वशेषे°). —b) P_2 क्रियाः (for प्रियाः).
1554. d) P_2 °खास्य° (for °खस्थ°). P_2 °डयत् (for °डयन्).
1555. b) S′ C पुत्का° (for पूत्का°). —d) S′ P_1 मृद्रा; P_2 °मूद्रा° (for °मृद्रा°).

विधिनेव विरुद्धेन सिन्धुरेण कदर्थिता ।
भ्रश्यत्पत्तिहयारोहा समपद्यत वाहिनी ॥१५५६॥

सेतुं तीर्णस्ततो वैरिसैनिकैर्विमुखीकृतः ।
शतद्वाराङ्गनं त्रस्तः साश्वारोहोऽविशन्नृपः ॥१५५७॥

उदात्तवेषरहितो रहोऽपि ददृशे न यः ।
भुञ्जानस्याऽपि यस्याऽऽस्यमुद्रा नैव व्यभाव्यत ॥१५५८॥

स भयद्विगुणार्कांशुस्वेदप्रस्विन्नविग्रहः ।
पुनः पुनः क्षिप्यमाणस्त्रस्तवर्मासयोर्निजैः ॥१५५९॥

अनवस्थितपार्ष्ण्यन्ताघातप्रचलितं हयम् ।
निरोद्धुं बहुशः कर्षन्नष्टवल्गाग्रहं करम् ॥१५६०॥

खल्वाटशीर्षपर्यन्तलम्बिनीः कुन्तलच्छटाः ।
प्रापयञ्श्रवणोपान्तं करेण गलितासिना ॥१५६१॥

लडत्प्रलम्बनिर्भूषश्रोत्रपालिलताच्छलात् ।
कालाहिनेव मूर्तेन वेष्टितोच्छुष्ककन्धरः ॥१५६२॥

निस्ताम्बूलतयोच्छुष्कौ जतुपीताविवासकृत् ।
ओष्ठावुत्क्षिप्य कृच्छ्रेण विह्वलो जिह्वया लिहन् ॥१५६३॥

कनीनिकासक्तरेणुक्षामधूसरमाननम् ।
उत्तानीकृत्य पृष्ठस्थाः पश्यन् दीनमनाः प्रियाः ॥१५६४॥

परिभ्रमन्नङ्गनान्तः त्रस्तः स ददृशे जनैः ।
वह्निदानोद्यतास्ताश्च वारयन् करसंज्ञया ॥१५६५॥

1557. a) P_2 सेतु°; I_3 सीतुं [sic] (for सेतुं). —c) P_2 °ङ्गने (for °ङ्गनं).
1558. a) S′ C P_{1-3} I_3 तदा तु वेश°; SA °वेश° (for उदात्तवेष°). —cd) C °स्य मुद्रा; I_3 °स्य पुत्रा (for °स्यमुद्रा).
1559. a) P_2 °गुण° (for °भय°).
1560. a) $P_{1,3}$ I_3 °र्णयाता° (for °र्ष्ण्यन्ता°).
1561. b) S′ C °च्छटा (for °च्छटाः).
1562. d) All Mss. read °कन्दरः (for कन्धरः suggested with D).
1564. c) P_2 °ष्टस्थाः (for °ष्ठस्थाः).

मल्लराजस्य वेश्माऽभूद् राजधान्यन्तिकेऽपि यत् ।
तीर्त्वा जनकचन्द्रेण तत्र वह्निरदीयत ॥१५६६॥

राजधान्युन्मुखं दृष्ट्वा ज्वलन्तं वह्निमागतम् ।
भेजे पलायनं भोजो राज्यं निश्चित्य हारितम् ॥१५६७॥

स शूलैर्विद्विषां भीमैर्नडैरिव तिरोहितम् ।
द्वारं भित्त्वा तुरंगस्थः प्राङ्गणान्निर्ययौ बहिः ॥१५६८॥

पञ्चषैः सादिभिः सार्धं लोहरौन्मुख्यमाश्रितः ।
प्रतस्थे सेतुमुत्तीर्य सिंहराजमठाग्रगम् ॥१५६९॥

यातस्य दृक्पथात् सूनोः साश्रुरालोकयन् दिशम् ।
राजाऽश्ववारैः सहितो वेश्मनां बहिरभ्रमीत् ॥१५७०॥

अत्राऽन्तरे मर्तुकामास्त्रातुं काश्चिन्नृपाङ्गनाः ।
अश्मभिस्तत्परिजनैरभज्यत चतुष्किका ॥१५७१॥

शाहिपुत्र्यस्तदज्ञात्वा शत्रवः पतिता इति ।
मत्वा चतुष्किकाश्रृङ्गे ततोऽग्निमुददीपयन् ॥१५७२॥

वास्तव्या डामराश्चाऽथ घ्नन्तोऽन्योन्यमुदायुधाः ।
ज्वलतः क्ष्मापतिगृहाद् भाण्डागाराद्यलुण्ठयन् ॥१५७३॥

केचित् तत्र वधं प्रापुर्विपदं केचनाऽत्यजन् ।
अदृष्टवस्तुसंप्राप्तिः केषांचिद्धास्यदाऽभवत् ॥१५७४॥

सितेयं शर्करेत्येकः कर्पूरं वदनेऽक्षिपत् ।
ततः सरिति तद्भाण्डं निर्दग्धवदनो व्यधात् ॥१५७५॥

पामरैः स्वर्णचित्राणि कैश्चित् स्वर्णग्रहेच्छया ।
विनिर्दग्धानि वासांसि विचितं भस्म चाऽऽदरात् ॥१५७६॥

1568. d) St S′ $P_{2,3}$ प्राङ्गना° (for प्राङ्गणा°).

1572. a) All Mss. read °स्तदा ज्ञात्वा (for °स्तदज्ञात्वा suggested with St).

1576. d) S′ विचित्रं (for विचितं). S′ C P_3 साद° (for चाऽऽद°).

अविद्धमौक्तिकस्तोमः सिततण्डुलविभ्रमात् ।
क्वचित् पामरनारीभिर्घरट्टेषु विचूर्णितः ॥१५७७॥

वसन्त्यधृष्ये देशेऽस्मिन् खलीकारेण तादृशा ।
एवं विडम्बिता लक्ष्मीर्न पुनः क्वाऽप्यदृश्यत ॥१५७८॥

विद्याधरीरिवोदात्तवेषाः क्ष्मापतिसुन्दरीः ।
हरन्तो डामराः क्रूरा दृश्यन्ते स्म पदे पदे ॥१५७९॥

वसन्तलेखाप्रमुखाः सस्नुषास्तत्र चक्रिरे ।
निर्यातशेषाः स्वान् देहान् राज्ञ्यः सप्तदशाऽग्निसात् ॥१५८०॥

गृहाणां दह्यमानानामश्रूयत चटत्कृतिः ।
गाढोष्मक्वथमानाभ्रसिन्धुघोषप्रतीतिकृत् ॥१५८१॥

श्रीपद्मश्रीप्रपापार्श्वस्थितस्तद्वीक्ष्य पार्थिवः ।
आर्षं श्लोकमिमं शोकात् स्मृत्वाऽपाठीत् पुनः पुनः ॥१५८२॥

"प्रजापीडनसन्तापात् समुद्भूतो हुताशनः ।
राज्ञः कुलं श्रियं प्राणान्नाऽदग्ध्वा विनिवर्तते" ॥१५८३॥

दग्ध्वाऽथ राजधानीं तामुच्चलो डामरान्वितः ।
अत्यक्तसैन्यं वीक्ष्याऽरिं पारमेवाऽतरत् पुनः ॥१५८४॥

ततो युद्ध्वा मर्तुमिच्छन् निन्ये राजाऽऽकुलात्मताम् ।
उच्चावचैर्मतिद्वैधैः पदातीनां क्षणे क्षणे ॥१५८५॥

1577. ab) S′ P_2 I_3 SA C °स्तोमसित° (for °स्तोमः सितः).
1578. a) St वसन्त्यदृश्ये; SL वसत्यदृशे; P_3 वमत्यदृश्ये; D C S′ $P_{1,2}$ I_3 SA वसत्यदृश्ये; St. Tr. suggests वसत्यधृष्ये (for वसन्त्यधृष्ये suggested).
1579. b) SA S′ P_{1-3} I_3 C °वेशाः (for °वेषाः).
1580. d) C S′ $P_{2,3}$ °राज्ञः (for °राज्ञ्यः). S′ C P_{1-3} I_3 सप्ता° (for सप्त°).
1581. b) SA P_1 I_3 °श्रूयन्त (for °श्रूयत).
1583. c) P_1 राज्ञां (for राज्ञः).
1584. d) C S′ °मवा° (for °मेवा°).

गच्छन्ननन्तपालादिराजपुत्रधिया मृधम् ।
दण्डनायकवाक्येन न्यषिध्यत पदे पदे ॥१५८६॥

युध्यस्व लोहरं वाऽपि याहीत्यूचे च चण्पकः ।
प्रयागस्योत्तरः पक्षः प्रत्यभान्नाऽग्रिमः पुनः ॥१५८७॥

वार्तामबुद्ध्वा पुत्रस्य नृपतिर्व्याकुलीभवन् ।
पदवीं भोजदेवस्य याहीत्याह स्म चण्पकम् ॥१५८८॥

प्रयागमात्रानुचरो राजन् संपत्स्यसे क्षणात् ।
तस्मान्मामपि मा त्याक्षीरित्यूचे तं स निश्श्वसन् ॥१५८९॥

सोऽन्तर्बाष्पस्तं बभाषे निर्द्रोहोऽसीति कथ्यते ।
त्वयाऽप्यस्मिन् क्षणे कस्मात् तस्मादुल्लङ्घ्यते वचः ॥१५९०॥

विना पुत्रं न पश्यामि सार्केऽपि दिवसे दिशः ।
त्वं तस्मिन्नङ्कसंवृद्धे न मन्युं कर्तुमर्हसि ॥१५९१॥

अश्वानिमित्तं कलहस्तेष्वेव दिवसेष्वभूत् ।
मन्त्रिणो राजपुत्रेण तेन तस्याऽभिमानिना ॥१५९२॥

गिरा प्रभोरुपालब्धस्तदाणूरणगर्भया ।
स लज्जानम्रवदनो राजपुत्रानुसार्यगात् ॥१५९३॥

पञ्चाशताऽश्ववारैः स भ्रातृभृत्यादिभिः समम् ।
उत्तीर्णः सरितः पारमात्मना पञ्चमोऽभवत् ॥१५९४॥

भ्रातृद्वयेऽश्ववार च शेषाराजात्मजे पथि ।
हताऽश्वे पतिते सोऽभूद् धनकेनाऽन्वितो भ्रमन् ॥१५९५॥

1587. b) SA I_3 om. च. C S′ P_2 चम्पकः (for चण्पकः).

1592. d) P_3 °गामिना (for °मानिना).

1594. d) D °त्मनापञ्च° (for °त्मना पञ्च°).

1595. a) SA D C S′ P_{1-3} I_3 °द्वारे (for °द्वये emended with St). —b) D P_{1-3} I_3 S′ C शेषा राजा (for शेषाराजा° suggested with St, cf. *v.* vii. 1608.).

अनाप्नुवन् राजसूनोर्वार्तां वार्वर्त्मनाऽप्यटन् ।
गलितेऽहनि संप्राप वितस्तासिन्धुसंगमम् ॥१५९६॥

एवमातान् परान् पुत्रमन्वेष्टुं प्राहिणोन्नृपः ।
अन्येऽपि तन्मिषं लब्ध्वा तस्य पार्श्वादवाचलन् ॥१५९७॥

उत्कोचादायिना क्रुद्धं राजपुर्यादिविग्रहे ।
योग्यानसहता भृत्यान्निस्सारः कटकः कृतः ॥१५९८॥

लोहरप्रस्थितौ विघ्नं राजा पुत्रस्य कारितः ।
प्रवेशितः पुरं वैरी राजन्यन्याहवाकुले ॥१५९९॥

सर्वस्वध्वंसिना येन स एव नृपतेरभूत् ।
तदाऽप्युचितकर्तव्यनिषेद्धा दण्डनायकः ॥१६००॥

राज्ञः कृत्स्नावसन्नस्य शृण्वतो बहु मन्त्रितम् ।
नैकत्र रूढिः कर्तव्ये क्वाऽप्यधीरधियोऽभवत् ॥१६०१॥

सर्वैर्यथा निखिलरन्ध्रमुखेन वंशः
संपूरितो न खलु शब्दमपि प्रसूते ।
तैस्तैस्तथा बहुपथप्रचयेन मन्त्रः
संकल्पितः किल न निश्चयमभ्युपैति ॥१६०२॥

भाग्यक्षयस्यैतदेव लक्षणं प्राकृतोऽपि यत् ।
अपृष्टः कथयेद्धाष्ट्र्यान्मन्त्रं स्वहृदयोचितम् ॥१६०३॥

1596. b) All the Mss. read वा वर्त्मना° (for वार्वर्त्मना° suggested with D).

1598. a) D (before suggestion) S′ C P_{1-3} I_3 °चदा° (for °चादा°). —d) P_2 I_3 SA °न्निसारः; C S′ °म्निसारः (for °न्निस्सारः).

1599. b) All Mss. read राजपुत्र° (for राजा पुत्र° suggested with D).

1600. cd) C S′ °व्यं निषङ्गात् (for °व्यनिषेद्धा). After this v. तिलकम्.

1601. c) C S′ P_2 रूढि° (for रूढिः).

1602. b) I_3 C S′ St °मपाकरोति (for °मपि प्रसूते).

1603. d) I_3 सुहृद° (for स्वहृद°).

त्रैलोक्यनाम्ना सूतेन शंसता दण्डनायकम् ।
निरोध्य वल्गामित्यूचे भूयः क्ष्माभृद् रणोन्मुखः ॥१६०४॥

एकाङ्गैः साश्ववारैः प्राग् जिगाय त्वत्पितामहः ।
तद्गच्छामोऽक्षपटलोपान्तं तत्संग्रहेच्छया ॥१६०५॥

पदातिप्रायसैन्यांस्तान् निहन्मः संहतान् रिपून् ।
पश्चान्निपत्य तैः साकं श्येना इव विहंगमान् ॥१६०६॥

ततश्चिचलिषावेव राज्ञि तत्कटको दिशः ।
स वृष्ट्यम्बुहतो रङ्गप्रेक्षिलोक इवाऽगमत् ॥१६०७॥

पारेवितस्तात् प्राप्तेभ्यः पाथेयायाऽऽत्मजन्मनः ।
स शेयाराजजन्मभ्यो रत्नग्रैवेयकाद्यदात् ॥१६०८॥

आरामिकैस्तैः संप्राप्ते राजचिह्ने क्षणादिव ।
तेजस्स्फारोर्जितो गतश्रीर्ददृशे जनैः ॥१६०९॥

पदे पदे भ्रश्यमानसैन्योऽक्षपटलादिषु ।
स्थानेषु चाऽभ्रमीत् कश्चिन्न च तस्याऽऽपदन्तिकम् ॥१६१०॥

संश्रयार्थ्यथ बभ्राम सायं वेश्मानि मन्त्रिणाम् ।
प्रवेशं प्रददौ चाऽस्य न कोऽपि द्वारि तस्थुषः ॥१६११॥

प्रायोपवेशकुशलाः शक्तास्त्वन्ते न कुत्रचित् ।
मिथ्यासंभावनाभूमिर्भूपानां ब्रह्मबन्धवः ॥१६१२॥

1605. b) D (before suggestion) P_{1-3} SA I_3 °न्तात्सिता°; S′ °ति सिता°; - C °तत्पिता° (for त्वत्पिता°).

1606. d) P_2 सेना (for श्येना).

1607. c) St C सवृ° (for स वृ°).

1608. a) All Mss. read °तस्तां; D suggests °तस्तं (for °तस्तात् suggested with St. Tr. —°) C S′ सशय्य (for स शेया°). St. thinks, possibly, the person referred to here as शेयाराज- is identical with the शेषाराज- of *v.* vii. 1595, cf. St. Tr. fn.

1609. a) S′ सम्प्राप्तै (for संप्राप्ते).

1610. ab) S′ C P_{1-3} I_3 °मानः सै° (for °मानसै°).

ये केऽपि देशे सन्त्यस्मिंस्तद्गेहेष्वास्थया भ्रमन् ।
प्रविविक्षुर्गृहान् प्राप कपिलाख्यस्य मन्त्रिणः ॥१६१३॥

तस्मिंल्लोहरकोटस्थे तत्पत्न्या स्थातुमर्थितः ।
नौभिश्च कोट्टं गन्तुं न प्राविक्षद् दैवमोहितः ॥१६१४॥

आर्तस्य तस्य तत्पुत्रैः पितृवद्द्रोहकारिभिः ।
ऋणिकैरुत्तमर्णस्य स्वं निस्स्वैरिव गोपितम् ॥१६१५॥

सदोषोऽस्मीति सोऽज्ञासीत् स्वयं शृण्वन् विगर्हणाम् ।
तदैव गोपिताशेषकृत्यो दुर्मन्त्रिभिः पुरा ॥१६१६॥

गृहीतसर्वनैराश्यः पार्श्वस्थेष्वप्यविश्वसन् ।
अभूत् प्रद्युम्नमुत्तीर्णो नितरां विरलानुगः ॥१६१७॥

प्रख्यापयन्तः संभूतिं षट्त्रिंशति कुलेषु ये ।
तेजस्विनो भास्वतोऽपि सहन्ते नोच्चकैः स्थितिम् ॥१६१८॥

तेऽप्यन्तेऽनन्तपालाद्या राजपुत्रास्तमत्यजन् ।
सान्द्रतां दधति ध्वान्ते स्थगिताश्वाः पदे पदे ॥१६१९॥

वाहनाज्जोहिलमठोपान्तं प्राप्याऽवतीर्णवान् ।
स दण्डनायकेनाऽपि तत्यजे सानुजन्मना ॥१६२०॥

इहाऽस्मच्छ्वशुरावासस्तत्र वस्तुमिमां निशाम् ।
वीक्ष्य ते स्थानमेष्यामीत्युक्त्वा व्याजेन सोऽचलत् ॥१६२१॥

1615. d) D °रेव (for °रिव). All Mss. read गोपितः (for गोपितम् suggested with D).
1618. a) I_3 प्राध्या° (for प्राख्या°).
1619. After this v. युग्मम् .
1620. d) D (before suggestion) P_{1-3} I_3 SA C सोनुज°; S′ सोऽनिज° (for सानुज° emended with St D).
1621. b) C S′ °मिदं (for °मिमां). D C S′ P_{1-3} I_3 SA निजम्; St निशम् (for निशाम् suggested with D).

यियासोरनुजं तस्य पाथेयार्थं प्रयागकः ।
ययाचेऽङ्गदमस्मै स प्रादात् सक्तून्न तत्पुनः ॥१६२२॥

एकांशुकावशेषश्रीस्ततो वा शेषजीवितः ।
प्रयागशेषानुचरो नृपतिः समपद्यत ॥१६२३॥

सूदश्चण्पकभृत्यस्य जेलकाख्यस्य तत्क्षणम् ।
मुक्तो नामाऽन्तिकं प्राप्तो नृपतेराप्ततामगात् ॥१६२४॥

उदीपविहितैः खातैरग्रे दुस्संचरा क्षितिः ।
भ्राम्यतस्तानुवाचेति नारी काचिद् गुहान्तरात् ॥१६२५॥

ततस्तीरे वितस्ताया निषण्णेऽस्मिन् प्रयागकः ।
गन्तुं जयपुरं कोट्टमाजुहाव स नाविकान् ॥१६२६॥

स हि प्राक्संविदं चक्रे तत्रत्यैः सह शस्त्रिभिः ।
नृपं प्रेयाश्रयं नेतुं भीमादेवस्य मन्दिरम् ॥१६२७॥

उच्चलाश्रयिणाऽप्यूचे भीमादेवेन येन सः ।
राज्ञोऽनुगो गमिष्यामि प्रविष्टस्योपवेशनम् ॥१६२८॥

नौचरैराहृतां नावमारुरोह न भूपतिः ।
नाशोन्मुखः समासन्नदृष्टिपातभयाकुलः ॥१६२९॥

पर्यापतत्कालकरस्थभोगि-
संदर्शनेनेव मतिप्रदीपः ।
क्षिप्रं प्रशान्त्युन्मुखतामुपैति
विनाशकालेषु शरीरभाजाम् ॥१६३०॥

1622. d) D P_{1-3} I_3 SA तं पुनः (for तत्पुनः).
1626. c) P_1 जया° (for जय°).
1627. c) St. Tr. suggests प्रेर्या° (for प्रेया°). —d) D (before suggestion) SA P_{1-3} I_3 भूमादे°; S′ भीमो दे° (for भीमादे°).
1628. d) S′ प्रवेष्ट° (for प्रविष्ट°).
1629. d) D °वृष्टि° (for °दृष्टि°).
1630. a) P_2 °करस्य (for °करस्थ°). —b) I_3 °नेनैव (for °नेनेव).

तस्मिन् द्रोहसुभिक्षेऽपि यस्य मानवतः परम् ।
अनन्यालोकिनी दृष्टिर्भेजे कुलवधूव्रतम् ॥१६३१॥

नीलाश्वीयः स बिम्बाख्यो डामरोऽमिलितोऽहितैः ।
तदाऽपि प्रययौ राज्ञो विस्मृतिं संश्रयार्थिनः ॥१६३२॥

ततः प्रावर्तत त्यक्तुं वारि वारिमुचां गणः ।
क्षमामिव क्षालयितुं द्रोहस्पर्शेन दूषिताम् ॥१६३३॥

भूर्निर्जना वृष्टिपातस्तमिस्रा दुस्सहायिता ।
वैरिभीतिरिति प्राभूत् किं किं तस्य न दुःखदम् ॥१६३४॥

इतिवृत्तानुरोधेन धिग् दुष्कर्मविधायिनाम् ।
अस्मर्तव्यमपि व्यक्तं नाम ग्राहिष्यतेऽधुना ॥१६३५॥

सोमानन्दाभिधानस्य पूज्याः सिद्धस्य देवताः ।
सोमेश्वराभिधाः सन्ति काश्चित् पितृवनान्तरे ॥१६३६॥

तल्लाञ्छिताङ्गना तुङ्गतरुप्रच्छन्नवाटिका ।
अभूद् गुणाभिधानस्य कुटी क्षुद्रतपस्विनः ॥१६३७॥

वारस्त्रिया स विरहभुजंगीतिप्रसिद्धया ।
भिश्वाख्यया समं भेजे चेष्टितं कुट्टनोचितम् ॥१६३८॥

तस्य प्रतापगौरीशदेवागारान्तिकस्थितेः ।
कुटीं मुक्तेन तां निन्ये क्षमाभृद् वस्तुं स तां क्षपाम् ॥१६३९॥

1632. b) SA_1 om. डामरोऽमि with a space. D (before suggestion) S′ P_{1-3} I_3 SA C डामरामि° (for डामरोऽमि° suggested with St D). —d) S′ P_1 C विस्तृतिं (for विस्मृतिं). P_2 संशया° (for संश्रया°). After this *v.* युगलकम् .

1633. bc) P_2 om. *bc*.

1635. a) St इति वृत्ता° (for इतिवृत्ता°).

1636. d) SA_1 P_2 °नान्तिके (for °नान्तरे).

1637. c) S′ SL SA_1 C °च्छिन्ना° (for गुणा°).

1638. a) SA_1 om. वारस्त्रिया with a space. C सवि° (fore स वि°). —d) S′ चेष्टितं (for चेष्टितं). St S′ P_2 I_3 कुट्टिनो°; P_1 कुंठिनो° (for कुट्टनो°).

1639. d) P_2 om. *d*. C सतां (for स तां) D (before suggestion) P_3 क्षमाम् ; SA C S′ P_1 I_3 क्षमम् (for क्षपाम् suggested with St D).

मुक्तमालम्ब्य नृपतिस्तमालम्ब्य प्रयागकः ।
यान्ति स्म विद्युद्द्योतेन क्ष्मां पश्यन्तोऽन्तरान्तरा ॥१६४०॥

निरुष्णीषोऽङ्गसंस्यूतक्नूतवासाः स्खलन् नृपः ।
स तां प्रयागमुक्ताभ्यां कथञ्चित् प्रापितः कुटीम् ॥१६४१॥

तदा कुमन्त्रिनिष्कृष्टं स व्यापद्वारणक्षमम् ।
शोचन् सस्मार कंदर्पं रुद्रं दैत्यमिवोत्पलः ॥१६४२॥

प्राकारमूर्ध्ना मुक्तेन प्रविष्टेन हृतार्गलाम् ।
नृपः कुटीप्राङ्गणोर्वीं विवेशाऽस्थिततापसाम् ॥१६४३॥

विशतोऽश्मक्षतः पादस्तस्याऽसृग्दक्षिणोऽत्यजत् ।
मेने तेनाऽनिमित्तेन स मृत्युं समुपस्थितम् ॥१६४४॥

कुट्यामर्गलरुद्धायां निषण्णस्याऽङ्गने ययौ ।
रात्रिर्भीतिमतो भीमा तस्य घोराभ्रमालिनी ॥१६४५॥

पङ्कोपलिप्तः पङ्काङ्कस्थण्डिलस्थो निनाय ताम् ।
दासकम्बलिकाच्छन्नगात्रो वृष्ट्युत्तरां निशाम् ॥१६४६॥

विसस्माराऽन्तरा दुःखमासीनप्रचलायितैः ।
निर्निद्रस्त्वभवच्छ्वभ्राद् भ्रश्यन्निव समाकुलः ॥१६४७॥

कोऽहं केनाऽभिभूतोऽद्य क्व वर्ते कोऽनुगोऽधुना ।
किं कृत्यमिति निर्ध्याय मुहुर्मुहुरकम्पत ॥१६४८॥

1640. P_2 om. *a-c* and the first and fifth syllables of *d*.

1641. ab) C S′ °सक्तस्यूत°; P_3 °सूतक्नूत° (for °स्यूतक्नूत°).

1642. b) S′ C °द्वार° (for °द्वार°). —bc) C °न्दर्परुद्रं (for °न्दर्प रुद्रं).

1643. P_3 om. *cd*. —c) St C S′ $P_{1,2}$ I_3 °ङ्गनो° (for °ङ्गणो°).

1644. b) S′ P_2 I_3 °जेत् (for °जत्).

1645. c) SA P_1 I_3 °भींतिव° (for °भींतिम°).

1646. d) St $P_{1,2}$ I_3 निशम् (for निशाम्).

1647. a) St P_3 °न्तराद्दुःख° (for °न्तरा दुःख° also found in SL). —b) P_2 °सीनं प्र° (for °सीनप्र°).

1648. c) P_{1-3} °र्व्याय; I_3 °ध्याय [sic] (for °र्ध्याय).

हृतं राज्यं प्रिया दग्धा भ्रष्टः सूनुरबान्धवः ।
जातोऽस्म्येकाक्यपाथेयो लुठन् भिक्षाभुजोऽङ्गने ॥१६४९॥

इत्येकैकं च निर्ध्याय दुःखं नैक्षिष्ट सोऽपरम् ।
प्रातावसानं शोचन्तमात्मतुल्यं कथास्वपि ॥१६५०॥

भोजस्तु वाजिभिर्द्वित्रैरवशिष्टैः समं व्रजन् ।
हस्तिकर्णान्तरं प्राप निर्गत्य नगरान्तरात् ॥१६५१॥

व्रजतस्तस्य धीरासीन्नियतं पञ्चभिर्दिनैः ।
पुनः संप्राप्नुयां राज्यं यदीन्द्रोऽपि भवेद् रिपुः ॥१६५२॥

गर्भवास इव पौरुषे स्फुरन्
किं न कर्म पुरुषश्चिकीर्षति ।
कर्मवायुरिव संस्पृशन् हठा-
न्मूढमेव कुरुते तु तं विधिः ॥१६५३॥

मातृभिर्दत्तपाथेयं भृत्यं नागेश्वराभिधम् ।
प्रतीक्षमाणश्चक्रे स रङ्गवाटान्तरस्थितिम् ॥१६५४॥

शून्ये देवगृहे तत्र तिष्ठञ्छ्रुत्वा तमागतम् ।
स निर्ययौ तेन तस्मिन् निश्शङ्कं प्रहृतं पुनः ॥१६५५॥

तत्र प्रादुष्कृतद्रोहे क्षत्रधर्मादविच्युतः ।
राजपुत्रः स यच्चक्रे न तत् कस्याऽद्भुतावहम् ॥१६५६॥

स सिंह इव संहारं कृत्वा युधि विरोधिनाम् ।
अस्राङ्गरागलिप्ताङ्गो वीरशय्यामभूषयत् ॥१६५७॥

भ्राताऽस्य मातुलापत्यं विपेदे पद्मकाभिधः ।
खेलो लालितकश्चैव संख्येऽसंख्यपराक्रमः ॥१६५८॥

1649. b) S′ P_2 C भ्रष्टा (for भ्रष्टः).
1650. c) St °सादं (for °सानं). After this v. युग्मम् .
1654. d) St °न्तरे स्थि° (for °न्तरस्थि°).
1658. c) St D C S′ P_1 °तवच्चै°; $P_{2,3}$ I_3 °तवश्चै°; SL °तश्चै° (for °तकश्चै° suggested with St. Tr. cf. vv. v. 229; vi. 152, 166, etc.).

मठं सूर्यमतीदेव्याः शर्वर्यामुच्चलोऽविशत् ।
भ्राताऽप्यस्य रणश्रान्तो लवणोत्सात् समाययौ ॥१६५९॥

हतं भोजं श्रुतवतोर्हर्षमात्रे स्थिते तयोः ।
मनस्युत्खातशूलेऽश्रिरेवैका पर्यशिष्यत ॥१६६०॥

प्राप्तमप्राप्तवद् राज्यं तथाऽपि प्रत्यभात् तयोः ।
प्रवासे विस्मृते राज्यसुखे लब्धे च कुत्रचित् ॥१६६१॥

प्राह्ले कुतश्चिदानीतो मुक्तेनाऽन्विष्य तापसः ।
प्रणम्य नृपतिं चक्रे स्वकुटीं तां निरर्गलाम् ॥१६६२॥

तां दंशमशकाकीर्णामास्तीर्णतृणविष्टराम् ।
कृताम्बुसेकां मुक्तेन नृपतिः प्राविशत् कुटीम् ॥१६६३॥

यद्गिरा बहुमानोऽभूच्छ्रुतया भूभुजामपि ।
स भूभृच्चाटुकारित्वं भीतो भिक्षाभुजोऽप्यगात् ॥१६६४॥

भिक्षाकस्योचितं ग्राम्यमनुदात्तं त्रपावहम् ।
आलापव्यवहाराभ्यां तस्य शृण्वन् स विव्यथे ॥१६६५॥

स भिक्षाकः प्रयागेण विक्रयायाऽधरांशुकम् ।
निजं दत्त्वा विससृजे विपणिं भोज्यसिद्धये ॥१६६६॥

कदुक्तिः कटुवागग्रे परोक्षं भेदभीतिकृत् ।
कुतापसो दौस्स्थ्यहेतुर्नृपस्याऽरिर्यथाऽप्यभूत् ॥१६६७॥

1661. c) P_3 प्रवास्ते (for प्रवासे). C °स्तृते (for °स्मृते). S′ C $P_{1,3}$ राज्यं सु° (for राज्यसु°).

1662. SA_1 om. प्राह्ले कुतश्चिद, पसः and चक्रे स्वकुटीं तां with a space.

1663. a) SA_1 (before corr.) चाषम° (for दंशम°). SA P_2 °मषका° (for °मशका°).

1665. a) P_2 भिक्षक° (for भिक्षाक°). D (before suggestion) S′ C P_{1-3} I_3 °स्योचितो; D suggests °स्य वचो (for °स्योचितं). S′ C °ग्रास्य° (for ग्राम्य°). —b) C S′ P_2 I_3 °दातुं (for °दात्तं). —c) St °पाभ्यव°; P_2 I_3 °पाव्यव° (for °पव्यव°).

1666. a) St $P_{1,3}$ I_3 °यागेन (for °यागेण).

1667. a) S′ कटुक्तिः (for कदुक्तिः). —b) I_3 भेरु° (for भेद°). —c) St C S′ $P_{1,3}$ दौस्थ्य°; P_2 दौस्थ्य° (for दौस्स्थ्य°).

मध्याह्ने स्कन्धविन्यस्तभोज्यभाण्डकरण्डिका ।
तपस्विन्यप्यथाऽऽनिन्ये तेन क्षुद्रतपस्विना ॥१६६८॥

भृत्यभिक्षाकयोः पूर्वं स्त्रिया अप्यथ पार्थिवः ।
स्वं वीक्ष्य गोचरीभूतं निराशो जीवितेऽभवत् ॥१६६९॥

तेन प्रयागोपहृतं भोज्यं तदनुरोधतः ।
स्पृष्टमेव न भुक्तं तु तीव्रदुःखोल्बणात्मना ॥१६७०॥

का वार्तेति प्रयागेण प्राङ्गणस्थेन पृष्टया ।
तापस्या ग्राम्यया व्यक्तमुक्तो भोजवधस्ततः ॥१६७१॥

मिथ्यैतदिति तेनाऽथ कथ्यमानोऽपि पार्थिवः ।
श्रुतिं तामङ्गशकुनं परीक्ष्याऽबुद्ध नाऽन्यथा ॥१६७२॥

नाऽऽरोहति गिरं शत्रोरप्रियाख्यायिनोऽपि यत् ।
तस्य संववृते दुःखं निमग्नस्य तदापदि ॥१६७३॥

स शोचन्नात्मजं बाल्ये नीत्यै यां यन्त्रणां व्यधात् ।
आजन्मदुःखदायित्वं मेने तस्याऽऽत्मनस्तया ॥१६७४॥

हतः स समरे वृत्त्या प्रवीरस्पृहणीयया ।
जज्ञे तेनाऽतिवात्सल्यादङ्कशायीव घातितः ॥१६७५॥

गात्रेषु हारान् पुत्रस्य यौवनव्यूढवक्षसि ।
पश्यन्नात्मनि संकल्पैर्विह्वलः सोऽकृताशिषः ॥१६७६॥

1668. c) All Mss. read °पस्विन्या° (for °पस्विन्य° suggested with D).
1669. a) P_2 I_3 °भिक्षक° (for °भिक्षाक°).
1671. a) St P_{1-3} I_3 °गेन (for °गेण). —b) St S′ C P_{1-3} I_3 प्राङ्गन° (for प्राङ्गण°). —c) D P_{1-3} I_3 °पस्याग्रस्थ° (for °पस्या ग्राम्य°). —cd) S′ C मुक्तो व्यक्त° (for व्यक्तमुक्तो). —d) S′ C $P_{1,2}$ I_3 भोजो (for भोज°).
1672. a) C S′ P_3 I_3 SA तेनार्ध°; $P_{1,2}$ तेनाव° (for तेनाऽथ).
1674. d) SA_1 om. स्तया with a space. S′ P_3 °स्तथा (for °स्तया).
1675. c) S′ C वज्ञे (for जज्ञे).
1676. b) S′ यौवना° (for यौवन°). D suggests °वक्षसः (for °वक्षसि).

रक्षणीयो हतो बालो वृद्धस्त्वेवं स्वजीवितम् ।
रक्षाम्यनुचिताचारैर्जिह्मायेति स चिन्तयन् ॥१६७७॥

एवं स पुत्रशोकेन धृतावाच्यव्यथो व्यथन् ।
निनाय तापसावासे द्वितीयामपि यामिनीम् ॥१६७८॥

कृतार्थनः प्रयागेण प्रयातुं भगवन्मठम् ।
शोकहारितधी रात्रौ न संकल्पमपि व्यधात् ॥१६७९॥

लम्बेन्दुवदना सान्द्रावश्यायाम्भोस्रुवर्षिणी ।
रथाङ्गाक्रन्दिनी रात्रिः सशोकेवाऽथ साऽऽगमत् ॥१६८०॥

क्षुत्पिपासापरिक्षामं प्रभुं वीक्ष्य स तापसः ।
प्रार्थ्यते स्म प्रयागेण प्रातर्भोक्तव्यसिद्धये ॥१६८१॥

उपनिन्ये विनिर्गत्य प्रविष्टस्तापसस्तयोः ।
सव्यञ्जनान्नपूर्णे द्वे पात्रे तद्वीक्षणात् पुरः ॥१६८२॥

कस्याऽपि गृहिणो यागोत्सवादेते मयाऽऽहृते ।
तस्मिन्नित्युक्तवत्यूचे विनिश्श्वस्य प्रयागकः ॥१६८३॥

राजन् स्वामिवियोगेऽस्मिन् पश्य लोकस्य सुस्थताम् ।
स तं जगाद विहसन् किं मूढ इव भाषसे ॥१६८४॥

यो गतो गत एवाऽसौ तत्क्षत्या नाऽपरः क्षतः ।
सर्वो निजसुखापेक्षी न किंचित् कोऽपि शोचति ॥१६८५॥

1677. a) SA_1 (before corr.) हुतो (for हतो). —c) SA_1 om. रक्षाम्यनु and ताचारै with a space.
1678. b) P_2 धृत्या (for धृता°).
1679. a) St P_2 I_3 प्रयागेन (for प्रयागेण). —c) C °धीरात्रौ (for °धी रात्रौ).
1680. a) St P_{1-3} °वदन°; S′ C °वदनं (for °वदना). —b) S′ P_{1-3} I_3 SA C °श्यायो° (for °श्याया°).
1681. a) I_3 °क्षादं; P_2 °क्षायं (for °क्षामं). —c) St P_{1-3} I_3 प्रयागेन (for प्रयागेण).
1682. d) St D P_{1-3} om. तद्वी with a space. I_3 पत्रे° (for तद्वी°).
1684. b) P_1 स्वस्थ° (for सुस्थ°).

लोकैकचक्षुषि गते परलोकमर्के
लोकः स्वपित्यखिल एव सुखं गृहेषु ।
कोऽन्यो विचिन्तयितुमर्हति विश्वमेतत्
तिष्ठेन्मया विरहमेत्य कथं किलेति ॥१६८६॥

पुत्रस्य स्नेहविश्वासः पूर्वमातक्षये श्रुते ।
यथैकः प्रभवेन्नाऽन्यस्तथा स्नेहोऽपि देहिनः ॥१६८७॥

अहमेव हतं पुत्रं श्रुत्वा जीवितजीवितम् ।
तिष्ठामि स्वस्थवद्यत्र तत्राऽन्यो निन्द्यतां कथम् ॥१६८८॥

इत्युक्त्वा विरते रात्रि पूनर्गूढं प्रयागकः ।
प्रैरयत् तापसं भोज्यं कर्तुं ते भाजने त्यजन् ॥१६८९॥

ह्यस्तनव्ययशिष्टं मे पर्याप्तं नाऽस्ति वेतनम् ।
यते तथाऽपीत्युक्त्वा स सखेद इव निर्ययौ ॥१६९०॥

गोप्यं रहस्यभणितमत्यल्पहृदयातिथि ।
अमृतं पारदमिव नाऽल्पसत्त्वैः सुदुर्जरम् ॥१६९१॥

कुल्यो मनोरथो नाम विप्रस्य वनवासिनः ।
सुहृत्तपस्विनस्तस्य तां कथामुपलब्धवान् ॥१६९२॥

राज्ञः संदर्श्य दायादं भवावो भूतिभाजनम् ।
इत्युक्त्वा तेन निन्ये स द्रोग्धृतां क्षुद्रतापसः ॥१६९३॥

जज्ञे भृत्येन गर्ह्येण जातः सोऽन्त्येन केनचित् ।
सदृशं यत्सदसतोर्ज्ञापकं जन्मकर्मणोः ॥१६९४॥

1686. c) D P_3 °मर्हतु (for °मर्हति).
1687. b) St SA_1 °मास्त क्ष° (for °माप्तक्ष°). —c) C S′ °न्नान्यु° (for °न्नाऽन्य°).
1689. c) SA_1 om. प्रैरयत् तापसं with a space. —d) S′ त्यजेत् (for त्यजन्).
1691. c) All Mss. read पारत° (for पारद° suggested with D). —d) S′ P_3 सदु° (for सुदु°).
1693. d) SA C दोग्धृ°; P_1 I_3 दोग्ध्य°; $P_{2,3}$ दोग्ध°; S′ दाग्धृ° (for द्रोग्धृ°).

इल्लाराजस्तां प्रवृत्तिं बुद्ध्वा ताभ्यां न्यवेदयत् ।
उच्चलाय समादिक्षत् कार्ये तत्र तमेव सः ॥१६९५॥

केचित् तु भूतिभिश्चाख्यमिल्लाराजोपसर्पणे ।
कायस्थं कारणं प्राहुस्तयोस्तापसविप्रयोः ॥१६९६॥

वार्ता चेदवगीतेयं सुबहुश्रोत्रसंकुले ।
काले तद्भृत्यपाशस्य तस्यैव द्रोहमुख्यता ॥१६९७॥

श्वपाकस्कन्धमारूढो लब्ध्वा तास्ता विमाननाः ।
विपेदे यत् स कारायां युक्तं तत् तस्य कर्मणः ॥१६९८॥

क्षुत्तप्तो हर्षदेवस्तु प्रयागेणाऽर्थितोऽसकृत् ।
प्रत्यग्रे पुत्रशोकेऽपि भोजनायाऽकरोन्मनः ॥१६९९॥

गृहीतभोजनं जानन् प्राप्तं प्राप्तं स तापसम् ।
तमोरेर्बहिरैक्षिष्ट नीडाच्छिशुरिवाऽण्डजः ॥१७००॥

अपश्यच्च कुटीं कृत्स्नां वेष्टितामेत्य शस्त्रिभिः ।
शुश्राव चाऽङ्गनद्वाराद् वार्यमाणार्गलाद्ध्वनिम् ॥१७०१॥

जानञ्जातं ततो द्रोहमङ्गनात् तापसाधमम् ।
स शस्त्रिणं मुक्तमेहीत्याह्वयन्तं व्यलोकयत् ॥१७०२॥

मुक्तं विसृज्य कृत्वा च द्वारमुद्घाटितारारि ।
त्यक्तभीरादधे लघ्वीं क्षुरिकामन्तिकस्थिताम् ॥१७०३॥

एकस्तत्सविधं क्रूरः साहसाहंक्रियोन्मदः ।
आरुरोहाऽथ कृष्टासिधेनुः कवचितो भटः ॥१७०४॥

1695. b) C बुद्धा; P_2 बुद्धया; I_3 कुद्ध्वा (for बुद्ध्वा).
1696. a) SA P_2 I_3 भूभिश्चा°; C S′ $P_{1,3}$ भूरिश्चा° (for भूतिभिश्चा°).
1697. c) C S′ P_3 °पाद° (for °पाश°).
1698. c) C सका° (for स का°).
1699. b) St $P_{2,3}$ I_3 °गेना° (for °गेणा°).
1701. d) C °द्धनिं; P_1 °द्धुनिं; °ध्वनिम् is suggested (for °द्ध्वनिम्).
1702. a) D S′ जातं (for जान°). —c) St C सशस्त्रि° (for स शस्त्रि°).
1703. b) C S′ P_1 °ररिः (for °ररि). —c) D °ददे (for °दधे).
1704. d) C S′ °धनुः (for °धेनुः).

तं राजा संकटकुटीरुद्धायामोऽप्यपातयत् ।
क्षितौ व्यायामकुशलो नाऽवधीत् कृपया पुनः ॥१७०५॥

पतितेन हतेनाऽर्थो वराकेणाऽमुना न मे ।
इत्यूचे दुरहङ्कारग्रस्तस्तस्मिन्नपि क्षणे ॥१७०६॥

नीध्रमुत्पाट्य निपतन्नेकोऽन्योऽप्युत्पतन् भटः ।
भयाद् भूमौ न्यपततां तं विलोक्योद्यतायुधम् ॥१७०७॥

पृष्ठे पूर्वं प्रविष्टस्य तिष्ठन् स्थानकनिष्ठुरः ।
स रुरोरिव चामुण्डा रेजे दण्डाकृतिः क्षणम् ॥१७०८॥

न सिंहनादैर्नो भेरीतूर्यघोषैर्न वोन्मदैः ।
शस्त्रशब्दैः स शुशुभे भूपस्याऽन्तक्षणे रणः ॥१७०९॥

आखोर्भाण्डप्रवेशस्य विडाला इव डामराः ।
परं प्रवेशितास्तस्य निश्शब्दं शस्त्रिणः कुटीम् ॥१७१०॥

अथाऽन्यो नीध्रमार्गेण संप्रविष्टः प्रयागकम् ।
हत्वा दोष्णि च शीर्षे च राजानं समुपाद्रवत् ॥१७११॥

राज्ञः प्रहरतः शस्त्रं वञ्चयित्वा स शस्त्रभृत् ।
वक्षसि क्षुरिकाघातद्वयं प्रादात् कृतत्वरः ॥१७१२॥

वर्णान् महेश्वरेत्येतान् द्विरुक्त्वा गतजीवितः ।
पपात निहतो भूमौ छिन्नमूल इव द्रुमः ॥१७१३॥

पलाय्य संप्रविशतो योग्यश्चौरस्य यादृशः ।
चक्रवर्त्यपि स प्राप वधं वेश्मनि तादृशम् ॥१७१४॥

नाऽन्यः स इव कालेऽस्मिन् ददृशे भूतिमान् नृपः ।
गर्ह्यनिर्हरणत्वं च तस्येवाऽन्यस्य नेक्षितम् ॥१७१५॥

1705. a) SA °कटी कु°; S′ C °कटिकु°; $P_{2,3}$ I_3 °कटीकु° (for °कटकु°).
1708. a) SA D I_3 P_{1-3} om. स्य in प्रविष्ट with a space. —c) D रुरोविव; C S′ हराविव; P_3 हरोरिव (for रुरोरिव).
1711. c) S′ शीर्षे (for शीर्षे).
1713. a) St °त्येनान् (for °त्येतान्). —b) D °रुक्ता (for °रुक्त्वा). —d) C S P_2 च्छिन्न° (for छिन्न°).
1714. b) P_3 °रश्च (for °रस्य). —c) P_2 संप्राप (for स प्राप).

यद्वैकेनैव संग्रामवैमुख्येनोन्नतात्मनः ।
सर्वप्रकारसुभगं माहात्म्यं तस्य खण्डितम् ॥१७१६॥

नेयबुद्धित्वमेवाऽऽसीदथवा तस्य दूषणम् ।
सर्वक्लेशावहा दोषाः कृत्स्नास्तन्मन्त्रिणां पुनः ॥१७१७॥

द्वाचत्वारिंशतिः साष्टमासा यस्य वयस्समाः ।
स शुक्लभाद्रपञ्चम्यां हतोऽब्दे सप्तसप्तते ॥१७१८॥

राजा दुर्योधन इव स्ववंशच्छेदमिच्छता ।
सोऽभूज्जातकयोगेन कारितः स्वकुलक्षयम् ॥१७१९॥

तस्याऽऽस्तां क्ष्मार्कजौ जीवबुधौ शुक्रोष्णगू शशी ।
तनयामित्रजामित्रखेषु कर्कटजन्मनः ॥१७२०॥

चन्द्रदैत्येज्यपापेषु खमदात्मजगेषु यत् ।
आहुः सुसंहिताकाराः कौरवादीन् कुलान्तकान् ॥१७२१॥

निर्ब्रह्मण्यो जनः कृत्स्नो देशेऽस्मिन् वैरिणोऽन्तिकम् ।
दस्योरिव शिरश्छित्त्वा स्वामिनोऽपि निनाय तत् ॥१७२२॥

1717. b) S′ C तातस्य (for °वा तस्य).
1718. a) D C S′ P_{1-3} I_3 SA °शत: (for °शति: suggested with St).
1720. a) C S′ $P_{1,2}$ I_3 °सीत्; St emends °सन्; SA °सी (for °स्तां). —b) SA $P_{1,2}$ I_3 °ष्णगी (for °ष्णगू). SA_2 explains this *v.* by the following *janmacakra*:



1721. a) SA_2 gloss शु (for ज्य). —b) S′ C स्वम° (for खम°).
1722. a) C S′ $P_{1,3}$ °ह्मण्यज° (for °ह्मण्यो ज°).

7819/A

तस्योत्तमाङ्गे भूभर्त्तुश्छिद्यमाने ससागरा ।
चकम्पे भूर्निरभ्राऽपि द्यौर्वृष्टिं महतीं जहौ ।१७२३॥

तन्मुण्डे लगुडारूढे यदयुक्तं जनो व्यधात् ।
अभूत् तेनाऽभिशापेन सोऽग्रे दीर्घोपसर्गभाक् ॥१७२४॥

मण्डले देवबिम्बानां यथाऽमुष्मिन् विपाटनम् ।
तथा नवं प्रववृते भूपतेर्मुण्डखण्डनम् ॥१७२५॥

नैक्षिष्ट तच्छिरः प्राप्तमौचित्यादुच्चलो नृपः ।
भूत्वा चिरमुदस्रुस्तु कारयामास वह्निसात् ॥१७२६॥

धिक् कष्टं तस्करस्येव तादृशश्चक्रवर्तिनः ।
नोच्चलाङ्गां विना प्राप्ता शरीरेणाऽन्तसत्क्रिया ॥१७२७॥

भृत्यत्यक्तो नष्टवंशो गोरकाख्येन केनचित् ।
स काष्ठागारिणा चक्रे नग्नोऽनाथ इवाऽग्निसात् ॥१७२८॥

दीर्घो हर्षनृपोदन्तः सोऽयं कोऽप्यद्भुतावहः ।
रामायणस्य नियतं प्रकारो भारतस्य वा ॥१७२९॥

भाग्याम्बुवाहतडितस्तरलाः श्रियस्ता-
स्तच्चावसानविरसं प्रसभोन्नतत्वम् ।
तत्राऽपि नैष बत मोहहताशयानां
शान्तिं प्रयाति विभवानुभवाभिमानः ॥१७३०॥

तावत्यप्यवरोधिकापरिकरे नैकाऽपि चक्रन्द तं
तावत्स्वप्यनुगेषु नाऽनुसृतवान् कोऽप्यास्त तीर्थे न वा ।
लोकस्य स्वसुखोपलिप्तमनसो वीक्ष्येति निस्स्नेहतां
निर्वेदं समुपेत्य नाऽऽश्रयति धिक् स्वान्तं वनान्ते रतिम् ॥१७३१॥

1724. a) P_2 तन्मण्डले गु° (for तन्मुण्डे लगु°).
1726. c) C S′ P_1 °ग्रस्तु; P_3 °स्रस्त [sic] (for °स्रुस्तु).
1728. b) D °ख्येण (for °ख्येन). —d) C °ग्रो ना°; S′ °ग्रौना°; P_2 °ग्रोना° (for °ग्रोऽना°).
1730. d) S′ om. प्रायाति; P_{1-3} I_3 प्रयान्ति (for प्रयाति).
1731. b) C °त्यप्यनुगेऽधुना°; S′ °त्पथनुगेऽधुना (for °त्स्वप्यनुगेषु ना°). C तीर्थेन (for तीर्थे न).

नाऽऽदौ किंचिद् भवति नियतं यश्च पश्चान्न किंचि-
न्मध्येऽकस्मात् सपदि घटयन् सौस्थ्यदौस्स्थ्यानुरोधम् ।
निश्शीर्षाङ्घ्रिर्नट इव मुहुः कोऽपि जन्तुर्नटित्वा
नो जानीमो भवजवनिकान्तर्हितः क्व प्रयाति ॥१७३२॥

श्रीः सातवाहनकुलेऽकृत कान्तिराज-
वंशे त्यजन्त्युदयराजकुले प्रतिष्ठाम् ।
शृङ्गं सुरैर्विरहितं जहती हिमाद्रे-
र्दिव्ये तटे सुरगिरेरिव वासरश्रीः ॥१७३३॥

—*—

इति श्रीकाश्मीरकमहामात्यचण्पकप्रभुसूनोः
कल्हणस्य कवेः कृतौ राजतरङ्गिण्यां
सप्तमस्तरङ्गः ।

—*—

1732. [a]) D S′ C St °यच्च (for यश्च also found in SL). —[b]) C कस्मा° (for [अ]कस्मा°). C $P_{1,2}$ I_3 °दौस्थ्य° (for °सौस्थ्य°). C S′ St P_{1-3} °दौस्थ्या° (for °दौस्स्थ्या°). —[d]) P_1 प्रयान्ति (for प्रयाति).

1733. [a]) D (before suggestion) C S′ P_{1-3} SA श्रीसात°; I_3 श्रीसप्त° (for श्रीः सात°). All Mss. read कान्तराज° (for कान्तिराज° suggested with St D cf. *v.* vii 1286).

After *v.* 1733 P_1 St राजानः ६, श्लोकाः १७३२; P_2 राजानः ६, श्लोकाः १८२३; P_3 राजानः ६, श्लोकाः १७३२, आदितः राजानः ९६, ग्रन्थः ४३२६; SA_1 राजानः ६, श्लोकः १७२३ [metathesis], लिखितश्चैष मया राजानकरत्नकण्ठेन; I_3 ओं नमो विघ्नहर्त्रे.

Colophon : St om. श्री; D om. कवेः. C S′ St D P_{1-3} I_3 °रिक° (for °रक°).

After Colophon a *v.* is inserted in all Mss. :—

समाष्टनवतावस्यां व्यहोनायां महीभुजः ।
षडत्रोदयराजस्य वंशे जाताः प्रकीर्तिताः ॥

[[a]) St I_3 °माष्टा° (for °माष्ट°)].

The Vis

matical

Grammati

4. A Grammati

5. A Grammati

7. U nisad-U

8. Atha

9. Ath

Br

11. Ṛgve the

Udgīt

12. at

13. Vaitāna- aut

Bhāṣya of

14. Kalhaṇa's Rājataraṅgiṇī, with the supple

Śrīvara and Śuka, Cr n fou pts

15. or t ology : 100 resea

Idheshwar

Bandhu)

16. Idheshwar

17.

18.

19.

25.

26.